
# ।।ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ ।।



Tracking

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 12-06-2013 | Typing Started on | H K Srinivasa Rao |
| 2 | | Typing Ended on | H K Srinivasa Rao |
| 3 | 01-09-2013 | Started First Proof Reading | H K Srinivasa Rao M S Venugopal |
| 4 | 02-10-2013 | Finished I Proof Reading | H K Srinivasa Rao M S Venugopal |

# ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಟ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Email : srkarc@gmail.com*

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಜ್ಞಾನ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ – ಪಿತೃದೇವೋ ಭವ-ಆಚಾರ್ಯದೇವೋ ಭವ"

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಏಕೋ ತಿಳಿಯದಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಿ ಮನ್ನಿಸಬೇಕಾಗಿ ಪ್ರಾರ್ಥಿಸಲಾಗಿದೆ.

ಗ್ರಂಥ ಋಣ: ಶ್ರೀ ಸರ್ವಜ್ಞಾಚಾರ್ಯ ಸೇವಾ ಸಂಘ (ಅನುವಾದಕ: ಬಿ ಭೀಮರಾವ) ದವರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಯುಕ್ತಿಮಲ್ಲಿಕಾ

# युक्ति मल्लिका

# गुणसौरभं

भक्त्या स्तुत्या विरक्त्या भजदमल जनौन्नत्यभूत्यर्पकाय ।
क्षित्यामत्यल्पभृत्येष्वपि कुजनकृतौद्धत्य भूत्याजकाय ।
कर्त्रे धर्त्रेथ हर्त्रे हयमुखहरयेऽमुत्रपात्रे नमस्ते ।
तस्मै कस्मैचिदस्मन्मनसि धृतकथा विस्मृतौ स्मारकाय ॥ 1 ॥

पारं भवाख्यजलधेर्भुवनैकसारम् ।
स्वैरं कृतोरुविधवेदपथप्रचारम्॥
आरञ्जितामरजनं सुखचिच्छरीरम् ।
धीरं स्मरामि हृदि सत्यवतीकुमारम् ॥ 2 ॥

यत्पूर्वं त्वमपूर्वसिन्धुमतरस्सद्वन्द्यमध्याचलात् ।
उद्यातः शतयोजनं परमदः शम्सन्ति सन्तः क्षितौ ।
चित्रं जैत्रभवच्चरित्रमधुना यद्देदवार्धिं तरन् ।
नित्यं कोटिसहस्रयोजनमपि त्वं राजवद्राजसे ॥ 3 ॥

व्यासाय भवनाशाय श्रीशाय गुणराशये ।
हृद्याय शुद्धविद्याय मध्वाय च नमो नमः ॥ 4 ॥

श्रीशस्ते सुश्रियं दद्यादायुर्वायुसुतः प्रियः ।
भूमिं ते वामनो दद्यादरीन् हन्तु नृकेसरी ॥ 5 ॥

न वित्तैरुन्मत्ता न च कुहकदुर्मन्त्रबलिनो

न वा मिश्रैर्मिश्रा न च कुजनसाचिव्यसहिताः ।

न दुश्यास्त्रं शास्त्रं विरसमुपजीव्योद्धतधियः

हयग्रीवं देवं वयमिममुपास्येव कृतिनः ॥ 6 ॥

हयग्रीवस्य मध्वस्य विद्यानिधिगुरोर्गुरोः (वाण्याविद्यागुरोर्गुरोः)

कृपया वादिराजोऽहं रचये युक्तिमल्लिकाम् ॥ 7 ॥

बौद्धजैनागमौ पूर्वपक्षौ सर्वागमस्य हि ।

ततः परस्ताज्जातेषु मतेषु च यथाक्रमं ॥

पूर्वपूर्वः पूर्वपक्षो यावन्मध्वमतोदयः ॥ 8 ॥

अन्ते सिद्धस्तु सिद्धान्तो मध्वस्यागम एव हि ।

निर्णीतुं शक्यते युक्तायुक्तपक्षविमर्शिभिः ॥ 9 ॥

अस्मादुत्तरपक्षोन्यो यस्मान्नाद्यापि दृश्यते ।

तस्मात्स एव सिद्धान्त इति निश्चित्य चेतसा ॥ 10 ॥

अवलम्ब्य मतं सर्वोन्नतं श्रुतिपुरस्कृतम् ।

मयेत्थं युक्तिरुचिना क्रियते युक्तिमल्लिका ॥ 11 ॥

त्वं चण्डालः पशुर्म्लेच्छश्चोरो जारः खरः कपिः ।

कुण्डो गोळक इत्याद्या या निन्दा लोकसम्मताः ।

ताः सर्वा सर्वजीवैक्यवादे स्युर्हि परात्मनि ॥ 12 ॥

ब्रह्मैव हीनयोनीस्ताः प्राप्य स्वेनैव पाप्मना ।

संसरेच्चेदियं सर्वा गालीकस्य गले वद ॥ 13 ॥

अन्धश्च बधिरो मूकः पङ्गुः पण्डो विनासिकः ।

इत्याद्या व्यङ्गता हेतोर्या निन्दा लोकसम्मताः ।

ताः सर्वाश्च निराकारवादे किं न स्युरीश्वरे ॥ 14 ॥

विद्याविनयहीनस्त्वं निर्दयो निर्व्रतोऽशुचिः ।

औदार्यधैर्यशौर्याद्यैर्हीन इत्यादिकाश्च याः ॥

सद्गुणाभावतो निन्दास्तास्तु नैर्गुण्यवादिनां ।

मते स्युर्ब्रह्मणि परे सर्वास्सर्वस्य सम्मताः ॥ 16 ॥

याच ग्रामतटाकादेरारामादेः कृतस्य हि ।

मिथ्यात्वकथनान्निन्दा मत्सरग्रस्तचेतसाम् ।

सा सर्वा सर्वमिथ्यात्ववादे स्यादेव माधवे ॥ 17 ॥

अज्ञोऽसीति तु या निन्दा सा मायाश्रयतोक्तितः ।

भगवत्युच्यते कर्मबद्धत्वोक्त्या च पापिता ॥ 18 ॥

इत्थं विचार्यमाणे भूद्यस्मान्मायाविनां मतं ।

सर्वं च लोकसम्मत्या भगवन्निन्दनात्मकं ॥ 19 ॥

अतो मायावादमतान्नाम्नैवातिजुगुप्सितात् ।

भीतोहमभजं तत्ववादिनामेव पद्धतिं ॥ 20 ॥

परस्मात्पूर्वदौर्बल्ये निषेधाद्विधिबाधने ।

यतो महाग्रहस्तेषां सर्वेषां विदुषामपि ॥ 21 ॥

तत्पूर्वसर्वराद्धान्तसिद्धार्थानां निषेद्धरि ।

परे च तत्ववादेऽस्मिन् गरीयसि भरो मम ॥ 22 ॥

तत्परत्वान्निषेद्धृत्वादन्ते सिद्धेः प्रभुस्तुतेः ।

नाम्ना चात्युल्लसन्त्यासीद्वल्ली ते यक्तिमल्लिके ॥ 23 ॥

न स्नेहान्न च विस्नेहाद्युक्त्याकृष्टेन केवलं ।

यतः कृतासि तत्तर्क रसिकानां मुदे भव ॥ 24 ॥

हृद्यपद्यरसस्निग्धां सद्यो हृद्रोचनोद्यतां ।

विद्यामद्यानवद्यां मे को द्वेष्टुद्धतपद्धतिः ॥ 25 ॥

अधुना विधुना रुद्धं मधुनासीन्मधुव्रत ।

उदिते मुदितेऽब्जे स्याददितेर्विदिते सुते ॥ 26 ॥

तार्णे वौकसि पार्णे वा तापसो भूप सोऽवसत् ।

तिथौ तेऽतिथिरेतद्वद्विद्वान् कागण्यपुण्यदः ॥ 27 ॥

तुलया मलयाद्युत्थ चन्दनेनेन्धनं खलः ।
समं समन्तात्कुरुतात् ग्रन्थौ गन्धं करो(तु)ति कः ॥ 28 ॥

सूक्तिरत्नस्वभावाभा पूज्या त्याज्या न कोविदैः ।
गुणे मणेर्हि मात्सर्यं कार्यं नार्यैः कदाचन ॥ 29 ॥

विदुषोऽविदुषोपीष्टा कं जनं रञ्जयेन्न गीः ।
भ्रमरैरमरैश्चाथ्र्यं कुसुमं (कः पु) कोऽसुमांस्त्यजेत्॥ 30 ॥

विद्याऽविद्याविभागज्ञः किमज्ञः प्राज्ञवद्भवेत् ।
अन्धस्येन्दूदयेप्यान्ध्यमन्धकारोदयेऽपि हि ॥ 31 ॥

गृहीतमर्थं यः पश्चान्न जहाति स वै महान् ।
तृणग्राही मणिर्मान्यः पौर्णमासीविधुश्यशी॥ 32 ॥

गृह्णीयात्तिन्त्रिणी शाखां शिग्रुशाखाग्रहेण किं ।
जगृहुस्तद्विदो वेदं वादिवाक्यान्यकोविदाः ॥ 33 ॥

एकस्यवादिनोवाक्याद्धर्माधर्मव्यवस्थितौ ।
तद्व्यत्यासः  कुतो न स्याद्वाक्यैस्तत्प्रतिवादिनां ।
बहुत्वेन बलीयांसि वचनानीति मे मतिः ॥ 34 ॥

शुष्कतर्कशतो(द्रिक्तां)दर्कास्तैस्तैराप्ततयादृतान् ।

अनेकदर्शनाचार्यान् कथमेको निवारयेत् ॥ 35 ॥

असर्वज्ञवचांस्यैवं विरुद्धानि परस्परं ।

न धर्मनिर्णयायालं तत्वज्ञानस्य शङ्कया ।

तेष्वेकस्य न सार्वज्ञमन्यस्येव प्रसिध्यति ॥ 36 ॥

क्षित्यादिकर्ता सर्वज्ञो न सर्वस्यापि सम्मतः ।

यस्यासौ सम्मतस्तं च बुद्धो युद्धे जिगीषति ॥ 37 ॥

दैत्यान् स विप्रलिप्सुश्चेद्देवांश्चानुजिघृक्षति ।

अधर्ममपि तत्तृप्त्यै धर्मं वक्तीति संशयात् ॥ 38 ॥

कथं तदुक्तिमात्राच्चक्रत्वादेः स्यात् प्रवर्तनं ।

अतः पुंवाक्यतो धर्मः कथं निर्णीयते वद ॥ 39 ॥

यस्तु युक्त्यैव धर्मस्य निर्णयं वर्णयेद्बुधः ।

लाघवात्स सकृच्छुध्यैपिबेदाचमनोदकं ॥ 40 ॥

पुनरुक्तत्वयुक्त्या च मन्त्रावृत्तिं परित्यजेत् ।

परोपकारयुक्त्याच गच्छेत्कामातुराङ्गनां ॥ 41 ॥

देहबन्धाद्बहिर्जीवान् कुर्यात्कारागृहादिव ।

अनादिनित्या वाग्वाच्या धर्मसिद्धै ततोऽखिलैः ॥ 42 ॥

अस्मदादिकृतं कार्यं व्यर्थं सार्थमनर्थकृत् ।
दृश्यते गेहकुड्यादि केनापि न कृतातु या ॥ 43 ॥

अनादितः पूर्वपूर्वसम्प्रदायबलागता ।
सा तु नार्थं व्यभिचरेत् कर्तृदोषविवर्जिता ।
किं क्वचिन्नावकाशोस्ति नित्याकाशे शरीरिणां ॥ 44 ॥

सा च  श्रुतिर्भवेदेषा श्रौतवादिप्रवादतः ।
श्रुतिनाम्ना च सर्वैश्च श्रुता या सैव हि श्रुतिः ॥ 45 ॥

न षड्भिर्दर्शनाचार्यैः कृतो वेदो विचारणे ।
द्वयोरसम्मतत्वेन चतुर्णामपि सम्मतेः ॥ 46 ॥

नापीश्वरकृतो वेदो भाट्टाद्यैस्त्रिभिरुच्यते ।
येनैकेनोच्यते तेन मुच्यते युक्तिमार्गतः ।
अशरीरस्तदीशस्तां नैव वक्ति कदाचन ॥ 47 ॥

तत्कर्तृता कथं तस्य न ह्यणोश्चोदनादिना ।
नभो गुणस्यास्य जन्म किं तूच्चारणतस्तव ॥ 48 ॥

उत्पत्तये व्यक्तये वा शब्दानां सर्ववादिभिः ।

वाच्यैव किल ताल्वोष्ठपुटव्यापारमूलता ॥ 49 ॥

सृष्ट्यादौ निगमस्रष्टुर्न हि देहोस्ति भौतिकः ।
किञ्चेशमूलतामादौ श्रुतीनां न ददर्श सः ॥ 50 ॥

सन्दिग्धा कार्यता नादौ ततोपीश कृता न सा ।
गुणत्वमिव वाक्यत्वं नानित्यत्वप्रयोजकं ॥ 51 ॥

सुष्टुतिं नित्यया वाचा चोदस्वेत्यृग्यतोऽब्रवीत् ।
प्रादुर्भावजनेस्तस्मादृचस्सामानि जज्ञिरे ॥ 52 ॥

ऋक् सामादेरभावे प्राग्यज्ञस्सोज्ञकृतोऽभवत् ।
देवास्तेनायजन्तोति पूर्वां श्रुतिमनुस्मर ॥ 53 ॥

आदिसर्गेप्युपाध्यायः पुत्रेऽध्येतरि केशवः ।
न कर्तोक्तप्रकारेण यज्ञभोकृत्वविघ्नवित् ॥ 54 ॥

निद्राविद्रावणे यस्य छन्दांसि किल बन्दिनः ।
तं वेदं स कथं कुर्याद्दुर्गास्यात्प्राग्विनिर्गतं ॥ 55 ॥

यस्या(पश्या)स्ति पुस्तकं हस्ते हयास्यस्य विधेर्गुरोः ।
स च वक्ताऽनादिनित्यसिद्ध बुद्धिक्रमात् क्रमं ।
वर्णानां क्रमशून्यानामपि पश्येद्धि सर्वदा ॥ 56 ॥

नित्येशबुद्ध्युपादेस्तद्वर्णेष्वौपाधिकः क्रमः ।
मठाकाशघटाकाशक्रमवत्स्यादनादितः ॥ 57 ॥

उपाधिनित्यतायां तु नित्यताप्यस्य शोभते ।
अनाद्यज्ञानतोनादि यथा संसारबन्धनम् ।
यथा वा प्रतिबिम्बात्मा जीवोऽनादिश्श्रुतौ श्रुतः ॥ 58 ॥

पूर्वं बुद्ध्याग्रहणतः पूर्वत्वं वर्णगं हि तत् ।
पश्चाद्बुद्ध्याग्रहणतः परत्वं तच्च वर्णगं ॥ 59 ॥

एवं बुद्ध्यापूर्वतैव काचिद्वर्णेस्त्युपाहिता ।
पश्चाद्बुद्ध्यापरत्वं च वर्णेष्वस्ति न संशयः ॥ 60 ॥

न चेन्नदीदीनशब्दौ भिन्नभिन्नार्थकौ कथं ।
कथं च स्यात्पूर्ववर्णात्पूर्व इत्यादिकं वचः ॥ 61 ॥

यथैकस्यामीशबुद्धौ पौर्वापर्यं विशेषतः ।
वर्णेषु तद्वत्स्वीकार्यं पौर्वापर्यं सदोपधेः ॥ 62 ॥

त्वयापि काले महति यामादीनामुपाधिजं ।
पौर्वापर्यं कथं वार्यं कार्यं कुर्युर्यतोऽखिलं ॥ 63 ॥

तवापि ताल्वोष्ठपुटमध्यस्थाकाश एव हि ।

वर्णोत्पत्तिस्ततः को वा पूर्वः कश्चापरो वद ॥ 64 ॥

न हि तत्राधरोवर्ण एक ऊर्ध्वश्च देशतः ।
पूर्वकालोत्पन्नतैव पूर्वता परता तथा ।
परकालोत्पन्नतैव वर्णे वाच्या न चापरा ॥ 65 ॥

एवं च पूर्वं व्यक्तत्वं पूर्वत्वं मे भविष्यति ।
परकालव्यक्ततायां परो वर्णो भविष्यति ।
अतः समं समाधानं नित्यानित्यत्ववादिनोः ॥ 66 ॥

यथेशो नित्यया बुद्ध्या सकृत्सृष्टश्रुतेः क्रमं ।
आकल्पान्तं तवेक्षेत तथेक्षेत सदा मम ॥ 67 ॥

प्रमाणदृष्टघटना कार्या सैव यथामति।
न शक्यते चेत्सर्वेशाचिन्त्य शक्त्यैव सेत्स्यति ॥ 68 ॥

नेदं पूर्वा यदा बुद्धिराद्यानादिरधीशितुः ।
तत एव द्वितीयापि नेदं पूर्वाबलाद्भवेत् ॥ 69 ॥

अनादेः पृष्ठलग्नस्याप्यनादित्वं हि युक्तिमत् ।
यावद्यावद्गजो गच्छेत्तावत्पुच्छं च गच्छति ॥ 70 ॥

पूर्वेदं पूर्वताऽभावे तदव्यवहितोत्तरे ।
क्षण एवं परं यात्स्यात्तस्येदं पूर्वता कथं ।
मत्स्यस्यानादितायां न किं कूर्मस्याप्यनादिता ॥ 71 ॥

अधोवधिविहीनेन विष्णोः पादेन सङ्गता ।
जङ्घाप्यधोवदेर्भङ्गं किं न कुर्यात् बृहत्तनोः ।
आद्यद्वितीयभावोऽपि तद्वत्स्यादप्यनादिषु ॥ 72 ॥

अनादिर्बीजसन्तानस्तथैवाङ्कुरसन्ततिः ।
अतः क्रमिकयोःश्चानादित्वं तत्वं रुणद्धि कः ॥ 73 ॥

आनादिवेदवातस्तन्मनोमोदाय धीमतां।
अचिन्त्यशक्तिं यो वक्ति प्रभोः स्वार्थपरायणाः ॥ 74 ॥

तद्वेदपदराशिस्थ वर्णमालास्वनादितः ।
पौर्वापर्यं केन वार्यमनादीशधियार्पितम् ॥ 75 ॥

वर्णानामप्यनादित्वं बुद्धेश्चानादिता यदा ।
कथं तदा बुद्धिसिद्धपौर्वापर्यस्य सादिता ।
न हीदं पूर्वतां बुद्धेरनादेर्बुद्धिमान् वदेत् ॥ 76 ॥

ज्ञानसाध्या हरेरिच्छा यदानादिर्निगद्यते ।
ज्ञानज्ञेयस्वरूपस्य सादितास्य कथं वद ॥ 77 ॥

अगत्यापञ्चरात्रादौ प्रमाणाभावतो हरिः ।

न व्यक्तीकुरुते बुद्धिं शक्तामपि सकार्यवित् ॥ 78 ॥

अतस्तत्कृतशास्त्रस्य सादित्वेऽस्त्यतिसङ्कटम् ।

अनादित्वे (चनाया)त्वनायास इति मान्यामहे वयं॥ 79 ॥

ईशेनोच्चरितं तच्च ब्रह्मादीनां परम्परा।

अनुभूतं स्मरेन्नित्यं न करोति स्वयं पुनः ॥ 80 ॥

उच्चारयन्त्युपाध्यायाः स्मृत्वा स्मृत्वा तदेव हि ।

तदेवं प्रचरेद्वेदः कर्तारोस्य न कुत्रचित् ॥ 81 ॥

निमित्तबुद्धेरज्ञानेप्यस्य ज्ञानं च शोभते ।

तिरोहितजपापुष्पसन्निधानोत्थरक्तिमा ।

स्फटिकादौ न किं सर्वैः स्फुटमेवानुभूयते ॥ 82 ॥

न चेत्काव्यस्य कर्तारः सर्वेपि स्युर्गृहे गृहे ॥ 83 ॥

द्विकर्तृकत्वात्काव्यस्याप्यस्तीश्वरमतौ स्थितिः ।

यावत् प्रचारं पश्चात्स बुद्धिं तत्र व्यनक्ति न ।

तदुत्पन्नमनित्यं च पौरुषेयं वचोऽखिलं ॥ 84 ॥

पुराणाद्यात्वनित्या वाग्यदुत्पत्तेरनन्तरं ।

व्यक्तैव तत्र तद्बुद्धिर्यतो मानानुसारतः ॥ 85 ॥

स्वतन्त्रेच्छोपि भगवान् मानेऽसौ मानवान् किल ।

उक्तव्यवस्था तत्सुस्था कर्ता वक्ता ततः पृथक् ॥ 86 ॥

तदेवेदं वाक्यमिति प्रत्यभिज्ञां प्रमाणयन् ।

आचार्योपीममेवार्थमभिप्सैति न संशयः ॥ 87 ॥

तस्मादनादिसिद्धान्तशुद्ध बुद्धिमतां सताम् ।

प्रमाणे सत्यनादित्वं विनोदेनैव सिद्ध्यति ॥ 88 ॥

प्रमाणे सति शक्त्येत्थं घटयेन्नित्यतां हरिः ।

यत्र कुत्रापि तां शक्तिं चित्रशक्तिर्युनक्ति न ।

नि(गि)र्युद्धरणशक्तिं स किं प्रयुङ्क्ते तृणोद्धृतौ ॥ 89 ॥

किञ्चान्त्यवर्णस्योत्पादे प्राङ्नष्टैर्वर्णराशिभिः ।

बुद्ध्यारूढैः पदत्वं स्यात्प्राक् सृष्टिस्तद्वथैव ते ॥ 90 ॥

वर्णानित्यत्ववादोपि वर्णनित्यत्ववादिनां ।

प्रक्रियां स्वक्रियासिद्ध्यैसत्करोतीति मे मतिः ॥ 91 ॥

त्रिक्षणस्थायिवर्णात्मवेदेष्वाकल्पवर्तिता ।

त्वयापीश्वरबुद्ध्यैवमङ्गीकार्या मयैव न ॥ 92 ॥

तवेश्वरोपि सर्गादौ सृजेद्वेदं न सर्वदा ।

पश्चात्स्वबुद्धिविषयैर्वर्णैः सोपि पदावलिं ।

वैदिकीमनुसन्धत्ते त्वत्पक्षे सर्वदा मम ॥ 93 ॥

एवं पूर्वापर्यवन्त एते वर्णा इतीश्वरः ।

अनादिनित्यया बुद्ध्या सदोल्लिखति वैदिकीं ॥ 94 ॥

अनन्तपदमर्यादां घटयेद्योऽतिदुर्घटम् ।

अनादिनित्यतैवं वा न कुचोद्येन बाधते ॥ 95 ॥

उच्चारयन्त्युपाध्यायास्तेपि स्वाध्यापकानुगाः ॥ 96 ॥

पुराणकृच्च वेदानां व्यासकृन्न तु कारकः ।

यो वेदव्यासनाम्नैव विख्यातो मुनिमण्डले ॥ 97 ॥

गूढकर्तृकवाक्यं च ध्रुवं कर्तृप्रसिद्धिमत् ।

अभूत्वाभाविकार्यत्वादपूर्वगृहकूपवत् ॥ 98 ॥

अनादित्वं हि गमयेत् यत्राध्येतृ परम्परा ।

अभूत्वाभाविनी सा न ततः कर्त्रनुमापि न ।

अतोऽकर्तैव कोऽनन्तवाक्कर्तारं निगूहयेत् ॥ 99 ॥

कर्तृप्रसिद्ध्यभावेन तद्वेदोयमकर्तृकः ॥ 100 ॥

कन्याकुमारीकन्यात्वं यथा भर्तुरभावतः ।

लेभे श्रुतिकुमारीयं तथा कर्तुरभावतः ।

अकृतत्वं ध्रुवं लेभे या नित्येति श्रुतौ श्रुता ॥ 101 ॥

पिपीलिकालिपिश्चापि तैरज्ञैर्भ्रमतः कृता ।

बाधे व्यभिचरेदर्थं न त्वनादिरियं श्रुतिः ॥ 102 ॥

किञ्च स्वव्याप्तवर्णानां लिपिः सा ह्यनुमापिका ।

वाक्यं तैः कुरुते तज्ज्ञस्ततः पुंवाक्यमेव तत् ॥ 103 ॥

लिपिकारकदोषेण दुर्लिप्या दुष्टवर्णधीः ।

तेनायोग्यार्थकं वाक्यं ततश्चामानता क्वचित् ॥ 104 ॥

अनादितस्तु यद्वाक्यं शृणोत्येवाखिलो जनः ।

स्वयं पुनर्न कुरुते श्रावकाश्च सुरर्षयः ॥ 105 ॥

यस्य स्वराश्च नियताः क्रमाश्च नियताः सदा ।

फलं च दृश्यते यस्य तद्धि मानं महत्तरम् ॥ 106 ॥

दोषाभावादमानत्वशङ्का स्यां किं कृता वाद ॥ 107 ॥

स्वोक्ताश्वासाय यां व्यासः सूत्रे सूत्रे जगौ हरिः ।

तां श्रुतिं कोऽपरः कुर्यान्मानं वा किं ततोऽधिकं ॥ 108 ॥

अनाद्युपाध्यायपारम्पर्येणैव निरीशितुः ।

नियतैकप्रकारत्वं नित्यत्वं तच्च नेति न ॥ 109 ॥

सोऽनाथानां यतः पन्थास्तस्मादगतिकागतिः ।

सनाथास्तु वयं द्वेधाप्यनादित्वं प्रचक्ष्महे ॥ 110 ॥

एवं च विमतो वेदो मानमित्यनुमीयते ।

अवद्याऽमूलवाक्यत्वादाप्तवाक्यवदेव हि ।

अवद्याऽमूलताचास्य नित्यत्वाद्गगनादिवत् ॥ 111 ॥

कर्तृप्रमितिशून्यत्वान्नित्यत्वं चास्य सिद्ध्यति ।

तद्वदेव ततो वेदः सिद्धोधर्मानुशासनम् ॥ 112 ॥

अन्यथा धर्मसिद्धिर्नैत्यस्ति तर्कोऽतिकर्कशः ॥ 113 ॥

कारीर्या वीक्ष्यते वृष्टिः पुत्रेष्ट्या पुत्रजन्म च ।

कृषाविवाङ्गवैकल्यात् क्वचिच्च विकलं फलं ॥ 114 ॥

अनृतत्वादयो दोषाः सन्दिग्धा सिद्धमूर्तयः ।

नामानात्वं ततोऽमुष्य साधयेयुः परोदिताः ॥ 115 ॥

कलौ युगे कलहिनां षण्णां षण्मार्गवर्तिनां ।

तद्बलं द्वापराचार्यव्यासवाचां च यद्बलं ॥ 116 ॥

अष्टादशपुराणानां कर्ता सत्यवतीसुतः ।
तदुक्तौ कस्य न श्रद्धा यदुच्छिष्टं जगत्त्रयम् ॥ 117 ॥

वेदो न मानमिति तु द्वौ चत्वारोस्य मानतां ।
मन्वते तद्वहोरेव तन्वतेऽनुग्रहं बुधाः ॥ 118 ॥

छन्दांस्यनन्तानि किल ग्रन्थस्तैस्तैः कृतोल्पकः ।
कोऽन्धोरन्धोनुसन्धत्ते सिन्धोरग्रे पराक्रमं ॥119 ॥

कलौ किल षडाचार्या वेदस्तु त्रियुगोत्सवः ।
राजसूयाश्वमेधाद्या यन्मूलाश्चक्रवर्तिनाम् ॥ 120 ॥

द्विपात्रिपाच्चतुष्पाच्च तत्र धर्मोऽत्र चैकपात् ।
धर्मानुशासनं तद्वा वादिवाग्वा विचार्यताम् ॥ 121 ॥

धर्मप्रवृत्तिकालीनं वाक्यं न किल धर्मवाक् ।
कलावधर्मकलिले धर्मशास्त्रकृतः किल ॥ 122 ॥

अद्यापि मध्यस्थगिरा पूर्वशासनतोपि वा ।
नृणां कलहशान्तिः स्यात्तादृग्वेदस्तु कस्य न ॥ 123 ॥

छन्दस्यययस्मयादीनीत्याद्यैः शब्दानुशास्तिकृत् ।
अमानयद्धि यन्मार्गं मानं कस्य न सा श्रुतिः ॥ 124 ॥

तस्माद्वेदार्थकुशलो वेदधर्मं कलावपि ।
न वेद यो वेदमार्गं न स वेद शुभाशुभे ॥ 125 ॥

वैदिकैः किल गायत्री मन्त्राद्यैर्मन्त्रितेषवः ।
अस्त्रीभवन्ति स्म राज्ञां कस्तच्छास्त्रं न मानयेत् ॥ 126 ॥

यत्स्वाध्यायैः किलाद्यापि व्याध्याद्यैर्नास्त्युपद्रवः ।
धर्मस्य वेदनादेव स वेदो नात्र संशयः ॥ 127 ॥

स्वबन्धुषु कृतः स्नेहः स्याद्धि रागादिदोषतः ।
पान्थेषु कृतः स्नेहो धर्मं श्रुत्वैव तन्मुखात् ॥ 128 ॥

तथा स्वस्वकृते शास्त्रे सर्वस्य स्याद्दुराग्रहः ।
सर्वैरकृतशास्त्रेऽस्मिन् धर्मसिद्ध्यै परं रतिः ॥ 129 ॥

सुवित्तस्यैव चोरोऽस्ति दुर्वित्तस्य न तस्करः ।
अमानं चेत् स्वतो जीर्णं कुतो वेदमचूचुरत् ॥ 130 ॥

हयग्रीवमुखोद्गीर्णा सा वाणी धर्मशासनः ।
अतस्तदुदितो धर्मो ह्यधर्मस्तद्विपर्ययः ॥ 131 ॥

चार्वाकस्य न वाक् चार्वी कुर्वीतात्मवधं यतः ।
अक्षैकमानतावाक्किं रक्षेदात्मप्रमाणताम् ॥ 132 ॥

शिष्यप्रमायै वाग्वाच्या सा शोच्या मानता न चेत् ।

न प्रयोज्या न तैः पूज्या मूको लोकायतो भवेत्॥ 133 ॥

किं च प्रत्यक्षमेवैकं मानमित्यादिरूपिणी ।

वाक्प्रमापिका चेत्स्याद्वाक्यार्थप्रच्युतिस्तदा ॥ 134 ॥

यद्यप्रमापिका सा स्याद्वाक्यार्थप्रच्युतिस्तदा ।

अर्थायाथार्थ्यतः प्राहुरमानत्वं यतो बुधाः ॥ 135 ॥

अतस्त्वच्छास्त्रमानत्वे जितं त्वत्प्रतिवादिभिः ।

त्वच्छास्त्रामानतायां च जितं त्वत्प्रतिवादिभिः ॥ 136 ॥

त्वद्वाक्यार्थोऽस्ति चेन्मानमागमोपि बलाद्भवेत् ।

त्वद्वाक्यार्थो न चेन्मानमागमोपि बलाद्भवेत् ॥ 137 ॥

चित्रं पक्षद्वयेप्येकं पतितं दूषणं तव ।

तं त्वां पतितपङ्क्तिस्थं सन्तो हन्त हसन्ति ते ।

अखर्वगर्वचार्वाकदुर्वाक्यं नोर्वकुर्वत ॥ 138 ॥

कथा वृथैव जल्पादौ तव कैतवशील तत् ।

यन्नास्ति युक्तिरुक्तिस्ते गर्जत्सु प्रतिवादिषु ॥ 139 ॥

अक्षैकमानतावादी को वादी नो न वादकृत् ॥ 140 ॥

तेक्षणस्तीक्ष्णकटाक्षस्तान् प्रतिवक्ष्यति कां कथां ।

अतस्त्वत्क्रियया सर्वा विरुद्ध प्रक्रिया तव ॥ 141 ॥

अथ प्रत्यक्षदृष्टेऽर्थे यदा वाक्यं प्रयुज्यते ।

तेन भोधोपि न स्याच्छेद्धीना स्याद्वक्तृतैव ते ॥ 142 ॥

स्याच्चेत्प्रमात्वं चावश्यं तस्येत्यासीद्धि मानता ।

तत्र प्रयुक्तयुक्तेश्च तद्वदेव प्रमाणता ॥ 143 ॥

प्रत्यक्षस्यैव मानत्वे युक्तिश्चेत् कथ्यते त्वया ।

अनुमानं तदा मानं यदि युक्तिर्न कथ्यते ।

अनुमानं तदा मानं राजाज्ञा न हि ते वचः ॥ 144 ॥

नापि हार्दगुहाबोधः प्रत्यक्षेणैव जायते ।

तद्बोक्तृणां च पात्तृणामनुमानं परायणं॥ 145 ॥

तस्मात्प्रत्यक्षानुमानागमानां मानता ध्रुवा ॥ 146 ॥

यद्यदृष्टं न तर्ह्येकः पोष्योन्यः पोषकः कुतः ।

धनभावाभावतश्चेत्तयोरपि नियामकं ।

किं दृष्टमेव यत्किञ्चिदुतादृष्टं विचारय ॥ 147 ॥

दृष्टदेहेन्द्रियादीनामिच्छायत्नादिकस्य च ।

उभयत्रापि साम्येन स्याददृष्टं नियामकम् ॥ 148 ॥

अतो यत्सदसत्त्वाभ्यां धन्यो कोऽन्यस्तु निर्धनः ।

अदृष्टं च तदेष्टव्यं दृष्टवत्कार्यगौरवात् ॥ 149 ॥

तद्धेतुशुभकर्मादेरत्रादृष्टस्य सर्वथा ।

करणायान्यदेहेषु नित्योन्योप्यस्ति देहभृत् ॥ 150 ॥

कार्यस्य निर्निमित्तत्वमुन्मत्तो वक्तुमर्हति ।

तृप्त्यर्थं को न भुञ्जीत सुखार्थं न यतेत कः ॥ 151 ॥

अपि चाव्यङ्गकुणपे मरणं नाम किं तव ।

पूर्वदृष्टाङ्गनेत्रादेः पश्चादपि च दर्शनात् ॥ 152 ॥

स्पर्शानुमेयनीरूपश्वासे नाश्वा सवान् भवान् ।

मक्षिका मत्कुणादौ ते यस्य दृश्यास्थितिश्च न ॥ 153 ॥

तस्माद्देहान्यजीवात्मा तत्र नास्तीति सा मृतिः ।

इत्येव सर्वथा वाच्यं न चेन्मृत्या मृतिस्तव ॥ 154 ॥

अतो योगविशेषेण यथा ताम्बूलरक्तिमा ।

तथा योगविशेषेण जडस्यैव प्रमातृता ।

इति यो वक्ति तस्यापि कुणपोऽभणदुत्तरम् ॥ 155 ॥

पृथिव्यप्तेजसांयोगो जीवदेहेपि नापरः ।
स सर्वः कुणपेप्यस्ति वादी नः कुणपोऽभवत् ॥ 156 ॥

अतीन्द्रियेन्द्रियं नास्ति गोलकं तूभयत्र च ।
आत्मादृष्टे न कुत्रापि किं न्यूनं कुणपस्य तत् ॥ 157 ॥

पूर्णौ जीवार्हयोगोस्मिन्नानाक्रिम्यात्मके क्रमात् ।
तस्माद्देहस्वामिजीवस्याभावोत्र ध्रुवोऽभवत् ॥ 158 ॥

शवस्य नव रन्ध्रेषु वायोश्चास्तिगता गतम् ।
भस्त्रान्तरपि यो वाति तस्य यात्रा तु कुत्र न ॥ 159 ॥

पश्य निर्जीवदेहेन जीवसिद्धिरभूद् अहो ॥ 160 ॥

रक्तिमा रत्नधात्वादि पार्थिवेषु स्वभावतः ।
वर्तते स तु योगेन तज्जातीयेपि दृश्यताम् ॥ 161 ॥

ज्ञानं तु पञ्चभूतात्मजड वर्गे न कुत्रचित् ।
अतो जडस्वभावो न तद्योगेपि जडे कथम् ॥ 162 ॥

जपाकुसुमयोगेपि रूपवत्येव रक्तिमा ।
निरूपवायौ किं रक्त शतयोगेपि रक्तिमा ॥ 163 ॥

नान्धानां शतमप्यन्ध पश्यतीति न किं श्रुतम् ॥ 164 ॥

चक्षुष्मता तु संयोगे तस्यापि स्याद्गता गतम् ।
एनं ज्ञानवता योगे देहे यात्रा न चेन्न च ॥ 165 ॥

स च स्वभावतो ज्ञानी स्यान्न कृत्रिमबोधवान् ।
किं चित्रलिखितं नेत्रं कचिदर्थं प्रपश्यति ॥ 166 ॥

अतो जडस्य जीवत्वं जडो वक्ति न पण्डितः ।
जीवस्तज्जडदेहान्यो मान्यो यं देहिनं विदुः ॥ 167 ॥

जातमात्रशिशोरम्बास्तनपानेष्टहेतुता ।
प्राग्भवेष्वनुभूतैतज्जातीयस्य निदर्शनात् ।
अनुमेया सा च देह जीवैक्ये शक्यते कथम् ॥ 168 ॥

अन्यस्यैवानुभूतिः स्यात्ततोन्यस्यानुमा भवेत् ।
नित्यदेहान्यजीवस्य पक्षे तु क्षेममेति सा ॥ 169 ॥

अतोम्बास्तनपानं तन्न शिशोरेव पुष्टये ।
जीवदेहान्यतायुक्ति मान्यता पुष्टयेप्यभूत् ॥ 170 ॥

भुक्तेः प्राग्भोक्ष्यमाणान्न व्यक्ताविष्टस्य हेतुता ।
अनुमेयानुभूतान्न जातीयत्वेन केवलम् ॥ 171 ॥

अतोनुमानमानत्वमनङ्गीकुर्वतस्तव ।

नित्योपवासान्मृत्युः स्यादित्युत्पश्यति यौक्तिकः ॥ 172 ॥

जडदेहात्मता जीवे जडाकारेण चाकृतिः ।

यच्छेदभेदवेधाग्नि दाहाद्यैः स्ववधप्रदा ।

तद्बुधास्तां न मन्यन्ते मनः खेदाय यत्सदा ॥ 173 ॥

सुखज्योतिः स्वरूपात्मा चितां साकारतां स्तुमः ।

या मौक्तनानाभोगानां भोक्तृत्वाय श्रुतौ श्रुता ।

सदा द्रष्टृत्ववक्तृत्व सौन्दर्यादिगुणाय च ॥ 174 ॥

प्रमाणसत्वचिन्तां तु श्रुतिरेव निकृन्तति ।

युक्तिस्तु नित्यचैतन्याकारं सत्कुरुतेतराम् ॥ 175 ॥

अणूनामणुराकारो यथा नित्योस्त्यनादितः ।

ज्योतिर्मयास्तथा जीवाः साकाराः सन्तु सन्ततम् ॥ 176 ॥

परितो मण्डलाकारत्पारिमाण्डिल्यसंज्ञिताम् ।

कथयन्ति महात्मानः परमाणुषु चाकृतिं ॥ 177 ॥

यथा जालमरीचिस्था वर्तुलास्त्रसरेणवः ।

ततोप्यत्यन्तसौक्ष्मेण वर्तुलास्तेपि रेणवः ॥ 178 ॥

हस्तादिः क्वचिदाकारः क्वचिदाकृतिरीदृशी ।

पृथुबुध्नोदराकारो घटस्येति न किं श्रुतम् ॥ 179 ॥

अतो नित्यचिदाकारो युक्ति सिद्धो न वार्यते ॥ 180 ॥

सर्वावकाशदात्रीच व्याप्ता च विरलाऽकृतिः ।
नभस्यस्ति न चेदीश व्याप्तेः किं स्यान्निदर्शनम् ॥ 181 ॥

दूरस्थैर्नीलिमा चास्य दृश्यते सर्वलौकिकैः ।
वायोश्च शीतस्पर्शस्याऽऽधाराकारोऽनुमीयते ॥ 182 ॥

इतरेषां तु भूतानां आकारः सर्वसाक्षिगः ।
पुम्पशोस्तव यच्छृङ्गं निराकारं तदेव तत् ॥ 183 ॥

ये जीवान्वैदिकं मन्या ज्योतिरूपान्वदन्ति ते ।
किं नोरीचक्रुरेतेषां सूक्ष्मदीपसमाकृतिम् ॥ 184 ॥

वयं तु ज्योतिषस्तस्य ज्योतीरूपमुखं करौ ।
चरणावुदरादींश्च वदामोत्र किमद्भुतम् ॥ 185 ॥

त्वं तु ब्रूषे जडाकारं वयं त्वजडताश्रये ।
जडाद्विलक्षणाकारं ब्रूमो युक्तिः किमत्र न ॥ 186 ॥

पाञ्चभौतिकदेहेस्मिंस्तेजसोप्यस्ति रूपिता ।
सा शुद्धतेजोमात्रस्याप्यस्ति चेत्काक्षतिस्तव ॥ 187 ॥

आप्यतैजसवायव्यमात्रदेहाश्च किञ्चन।

अतः पिण्डसमाकारं पिण्डभोक्तुर्न कल्पय ॥ 188 ॥

सुखरूपाश्च ते सर्वे ज्ञानरूपाश्च सर्वदा ।

अनादिनित्याः सत्याश्च चिद्रूपावयवा यतः ॥ 189 ॥

न चेज्जोतिर्मयाकार सुभगस्य हरेरिमे ।

प्रतिरूपाः कथं जीवा भवेयुरिति चिन्त्यताम् ॥ 190 ॥

**पुरुरूपस्य जीवोयं रूपं रूपं प्रति प्रति ।**

**प्रतिरूपो बभूवेति श्रुतिर्गर्जति शाश्वती ॥ 191 ॥**

तच्छ्रुतिस्मृतिहर्षाय मनःकर्षाय पश्यताम् ।

भुक्त्यै च मौक्तभोगानां सत्यैवेयं व्यवस्थितिः ॥ 192 ॥

वृत्तता चतुरस्रत्वाद्याकारस्तदचेतने ।

चेतनेश्वेव हस्ताङ्घ्रि श्रोत्रनेत्रादिका कृतिः ॥ 193 ॥

इत्येव सर्वथा वाच्यं न चेल्लिङ्गकलेवरे ।

जडान्तरादृष्टरूपं कुतो जातं विचार्यताम् ॥ 194 ॥

प्रकृत्यंशा हि ते सर्वे सा च सूक्ष्माणुरूपिणी ।

न तस्याश्च तदाकारो विकृतौ स्थूलरेणुता ।

भवेत्परं पुमाकारे पुंरूपानुसृतिर्गतिः ॥ 195 ॥

साकार सर्वजीवाङ्ग वेष्टनेनेष्टहेतुताम् ।

गतास्ते तत्समाकारास्तद्देहत्वं च लेभिरे ॥ 196 ॥

तल्लिङ्गदेहता चैषां तत्तद्रूपानुमापनात् ॥ 197 ॥

अतादृशास्तादृशाश्च बाह्यदेहाः स्युरंहसा ।

अतो न लिङ्गतैतेषां सोनादिः सादयस्त्विमे ॥ 198 ॥

रेतसो बिन्दुमात्रेण बाह्यो देहश्च जायते ।

न तस्यापि स्वतो रूपमजीवं चेद्रजो हि तत् ॥ 199 ॥

साक्षीन्द्रियगणैर्योगे बाह्येन्द्रियगुणोप्यसौ ।

पृथक्पृथक् ज्ञानदः स्यान्नो चेन्निर्हेतुको भवेत् ॥ 200 ॥

अतः स्वभावतः सर्वे साकारा जीवराशयः ।

तत्कञ्चुकोपमातत्तल्लिङ्गमूर्तिश्च तादृशी ॥ 201 ॥

क्वचित्तु कर्मणा बाह्या भिन्नाकारा च जायते ॥ 202 ॥

जडान्तरादृष्टरूपं तनूनामेवमागतं ।

इति मन्ये न चेदन्ये जडाश्च स्युः शरीरवत् ॥ 203 ॥

अथः स्वभावरूपस्याभावे रूपपरम्परा ।

निर्निमित्ता भवेत्तस्मात्साकारा जीवराशयः ॥ 204 ॥

कञ्चुकेस्ति तनुच्छाया न त्वकञ्चुकवाससि ।

ततः स्वाभाविकाभावे न स्युरौपाधिका अपि ॥ 205 ॥

स्याद्धि स्फटिक लौहित्यं स्वतो लोहितसन्निधौ ।

स्वेन रूपेण निष्पत्तिं मुक्तिमाह ततः श्रुतिः ॥ 206 ॥

युक्तिश्चौपाधिकैः रूपैः स्वाभाविकमसाधयत् ॥ 207 ॥

यस्तु वस्तु निराकारं वक्ति तत्वं न वेत्ति सः ।

चित्त्वाचित्त्वाश्रयं तत्वमित्थमित्यतिनिर्मलम् (मङ्गलम्) ॥ 208 ॥

गुरुश्चार्वाकविद्याया गुरुर्मे नाकिनां गुरुः ।

अतस्तत्कृपया श्रौतमतस्थितिरपीरिता ॥ 209 ॥

क्षीरस्योत्सेचनं को वा निरुणद्ध्याज्ञया जनः ।

वस्त्रेणापि ग्रहः प्रोक्तो राजमन्दिर सर्पिषः ॥ 210 ॥

निरङ्कुशः कामभोगः फलं किल भवन्मते ।

तच्च तक्षकमौलिस्थ रत्नाहरणयत्नवत् ॥ 211 ॥

धर्माङ्कुशस्य छेदेपि धनाभावाङ्कुशस्य न ।

तस्य निर्मूलनायास्ति धर्मः कोपि न ते मते ॥ 212 ॥

धनिनां परिचर्या वा चौर्यं वा कार्यते त्वया ॥ 213 ॥

तच्च बन्धादिनिर्बन्धैर्मृतिभीतिगतागतैः ।
तेषां दुःखार्णवे मङ्क्तुमभूद्रन्तुं न कर्हिचित् ॥ 214 ॥

अतस्तेनैव मज्जेरन् भवच्छास्त्रमहोदधौ ॥ 215 ॥

धनिनस्तु मदेनान्धाः प्रवर्तन्ते न ते मते ।
तेषां च न फलायालं तव शास्त्रप्रचोदना ॥ 216 ॥

**बहुभुक्तावजीर्तिस्याद्बहुपाने महोदरम् ।**
**बहुस्त्रीभोगतो रोगा यद्दश्यन्ते पदेपदे ॥ 217 ॥**

किं न भाराय महते बहुदारपरिग्रहः ।
परस्परविरोधाद्यैः पत्युर्मृत्युप्रदा हि ते ॥ 218 ॥

परस्त्रीभोगतः किं न शिरश्छेदादिकं भयम् ॥ 219 ॥

दुःखोज्झितं सुखं प्रार्थ्यं न तु दुःखान्वितं सुखम् ।
दुःखोदर्कसुखेत्यल्पे को नून्मत्तः प्रवर्तते ॥ 220 ॥

तस्मान्महानर्थसार्थ सङ्कुलाः सुखविप्रुषः ।
न प्रेक्षावत्प्रवृत्त्यैस्युर्निवृत्त्यैस्युः परंविदाम् ॥ 221 ॥

अज्ञास्तु रागतो भोगे प्रवृत्ताः पूर्वमेव हि ।

न ते शास्त्रमपेक्षन्ते नापि धर्माङ्कुशाद्भयम् ।
रागोद्रेकाख्यदुष्प्रेक्ष रूक्षहर्यक्षरक्षिणाम् ॥ 222 ॥

अतो निष्फलमेवाभूच्छास्त्रं ते क्लीबशास्त्रवत् ॥ 223 ॥

कस्तेऽधिकारी स्वस्थात्मा मत्तस्याप्यस्ति मृत्युभीः ।
विषयस्य विचारश्च युक्तितः स्यान्न शक्तितः ॥ 224 ॥

अक्षं स्यात्तवलीलायै न पक्षान्तरशिक्षणे ।
तच्च युक्त्याख्यशास्त्रेण नान्येनेति मतिर्मम ॥ 225 ॥

अक्षानुकूलः स्यादर्थस्तद्विरुद्धस्तु नेत्यपि ॥ 226 ॥

तथा सर्वत्र दृष्टत्वादिति युक्त्यैव सिद्ध्यति ।
युक्तेरमानता यस्य तस्य निर्विषयं मतम् ॥ 227 ॥

किं च दृष्टं समस्तं च दृष्ट्या सिद्धो न शास्त्रतः ।
अदृष्टं नास्ति चेत् तर्हि विषयस्ते विषं पपौ ॥ 228 ॥

धर्माभावोपि तत्वं चेत् प्रत्यक्षेणैव सिद्ध्यति ।
अतत्वं यदि तर्ह्यासीद्धर्मो निष्कण्टको मम ॥ 229 ॥

नापि धर्मे प्रमाणस्याभावः शास्त्रेण बोध्यते ॥ 230 ॥

सोपि तत्वं यदि तदा प्रत्यक्षेणैव सिद्ध्यति ।

अतत्वं चेत् धर्मशास्त्रमकण्टकमभून्मम ॥ 231 ॥

एवं चार्वाकमर्यादा सर्वाप्यार्यैर्विगर्हिता ।
जिनबुद्धागमाद्यध्व शोधनायाधुना यते ॥ 232 ॥

यदीदं न तदा तन्नेत्याज्ञा राज्ञः परं भवेत् ।
समानं नोभयोर्मानमनुमा ननु मा क्व मा ॥ 233 ॥

न चेत्सुरावत् क्षीरं च किमपेयं न ते मते ।
द्रवद्रव्यत्वतो हेतोस्ततो मूलानुगैव सा ॥ 234 ॥

मूलं नातीन्द्रियेध्यक्षं स्वस्ववाक् कस्य कस्य न ॥ 235 ॥

प्राचां वाचस्तु शोचन्ते देहः कारागृहं किल ।
अतो युक्त्यापि नार्थस्ते यत्सा हिंसां प्रशंसति ॥ 236 ॥

तन्मानिनोप्यमानस्य कथङ्कारं मिथः कथा ॥ 237 ॥

किञ्च युक्त्येकभक्तश्चेत् कथं मांसं निषेधसि ॥ 238 ॥

भूतेभ्योऽन्यन्न वै मांसे नान्यदन्नेपि दृश्यते ।
एकं त्याज्यं भोज्यमन्यदित्येतत्केन ते मते ॥ 239 ॥

हिंसादोषेण यौक्तस्य यज्ञावज्ञा च ते कथं ॥ 240॥

जिनमन्दिरनिर्माणे तद्यात्रायां च कोटिशः ।

भूशोधाद्यैः पादघातैर्हिंसास्ते मखवन्न किं ॥ 241 ॥

बर्हहस्तस्य या शङ्के गर्हा सापि न शोभते ॥ 242 ॥

लवणं भक्ष्यते चेत्स्याच्छुक्तिरूपास्थि भक्षणम् ।

जालीकृत्य स्वीकृतिश्चेदस्थिक्षालनवारिणः ॥ 243 ॥

कर्ता सर्वस्य कार्यस्य कस्मादीशो विसृज्यते ॥ 244 ॥

स्वभावादेव सर्वं च जगत्स्यात्सचराचरम् ।

किमीश्वरेणेति वदन् प्रष्टव्यः प्रतिवादिना ॥ 245 ॥

स्वभावोपि जडश्चेत्स्यादन्यप्रेर्यो घटादिवत् ।

जानातीच्छति पश्चाच्च गच्छतीति न किं श्रुतम् ॥ 246 ॥

अजडोप्यस्वतन्त्रश्चेत् प्रागुक्तं दूषणं स्मर ।

स्वातन्त्र्ये तु किमीशेना पराद्धं लघुमूर्तिना ॥ 247 ॥

स्वस्वभावात्स्वयं चेत्स्यात्तर्ह्यात्माश्रयदूषणम् ।

स्वकारणस्वभावाच्चेत्स्वभावस्ते गुरुः पतेत् ॥ 248 ॥

तदा कारणचक्रस्थः कर्ताप्यावश्यकोस्य हि ।

महीमहीधरादेश्च यः कर्ता स महेश्वरः ॥ 249 ॥

न चेत् कुलालकावांद्या नापेक्ष्येरन् स्थले स्थले ।
अन्यथा दृष्टहानिः स्याददृष्टस्य च कल्पना ॥ 250 ॥

यत्नेन साध्यते मोक्षो यदि तर्हि स्वभाववाक् ।
अभावमाप नो चेत्ते व्रतचर्या बहिर्ययौ ॥ 251 ॥

जडस्वभावकर्मादि प्रेर्यं स्यादजडेन हि ।
किं कुठारः स्वयं गच्छेत् घटो वा जलमाहरेत् ॥ 252 ॥

स्वभावस्य तिरस्कारः पुरस्कारश्च पावके ।
दृश्यते मणिमन्त्राद्यैर्न तत्तस्य स्वतन्त्रता ॥ 253 ॥

स्वनिष्ठस्य हि कर्मादेः प्रेरको न स्वयं जनः ।
अतस्तत्प्रेरणा यान्यो मान्यः कोपि मनीषिणा ॥ 254 ॥

न हि पुण्यस्य लघुता पापस्य गुरुतापि वा ।
यदुन्नयेल्लाघवाद्वा गौरवाद्वाप्यधो नयेत् ।
अतः शिलादिदृष्टान्तोप्युक्तेर्भाराय केवलम् ॥ 255 ॥

सर्वस्य कर्ता तत्रापि किं न कर्ता महेश्वरः ॥ 256 ॥

यः स्तम्भसम्भवो डिम्भं हिरण्यकशिपोरपात् ।
सोन्तर्यामी मम स्वामी कस्य न स्याद्विचारय ॥ 257 ॥

शिला यदि स्वसत्त्वेन जले नयति पूरुषं ।

स्थले कस्मान्न नयति समे या नीयते नरैः ॥ 258 ॥

अश्मा यस्मान्न तेऽप्स्वेव तिर्यक् पर्यक् च गच्छति ।

अतः स्वतः कृतिस्तस्य न जले नापि च स्थले ॥ 259 ॥

तदीश गौरवात् स्वीय गौरवाच्च नयेदधः ।

यतः स गौरवं धर्मं चक्रे पतनकारणम् । 260 ॥

यदा स धर्मसामर्थ्यं रुणद्धि न तदा पतेत् ।

न मग्नो मन्दरः तस्मान्मही वा नाप्सु मज्जति ॥ 261 ॥

यद्वत्तवरतो वार्षु नलहस्तार्पिताः शिलाः ।

उन्ममज्जुः स दौर्जन्यं कस्य कस्य न भर्जयेत् ॥ 262 ॥

विषमारोहतीशस्य सत्वा देव न तु स्वतः ।

किं विषादो विषादासीत् शिशोस्तस्य शिवस्य वा ॥ 163 ॥

अतो दृष्टं समस्तं च दृष्टाचेश्वरतो भवेत् ।

अदृष्टमीश्वरादेवेत्यासीत्सर्वदुरन्धरः ॥ 264 ॥

तस्मात्पक्षे पक्षसमे यस्यानैकान्त्यचोदना ।

वेद नासौ पुमान् शास्त्र मर्यादामार्यगर्हितः ॥ 265 ॥

रत्नप्रभा स्वभावश्चेत् कुतो नास्ति शिलान्तरे ।
ततस्तत्रैव सा भूयादित्यत्रास्ति नियामकः ॥ 266 ॥

नार्यैश्च वार्यः कार्येऽसौ हयैश्चर्येर्यवीर्यवान् ।
निर्दैवमृच्यैतं विद्वान् कोद्याऽऽदद्याद्धि बौद्धवत् ॥ 267 ॥

किं चाचेतनमात्रस्य स्वभावोन्यनियम्यता ।
अतो भवत्स्वभावेन प्रभुराविर्बभूव मे ॥ 268 ॥

स च स्वेच्छानुसारेण तत्तद्वस्तु तथा तथा ।
तनुते तेषु चाप्येकमुच्चं नीचं करोति च ॥ 269 ॥

स्वतन्त्रस्य च तस्येच्छा नियोक्तुं नैव शक्यते ।
अराजकमिदं राष्ट्रं न चेन्नष्टं भविष्यति ॥ 270 ॥

नरेषु कश्चिन्मूकोस्ति वाचालोप्यस्ति कश्चन ।
सोयं नरस्वभावो न तवापि च ममापि च ॥ 271 ॥

कर्मापि चेत् गतं तर्हि स्वभावाद्ब्युपसर्पणम् ।
क्वचित् स्वभावः कर्मापि क्वचिच्चेत्कलहो भवेत् ॥ 272 ॥

अथ कर्मापि राजा चेज्जडता तस्य किं कृता ।
जनने मरणे वापि किं कर्ता तस्य नेष्यते ॥ 273 ॥

अतोऽवद्यं जडत्वाद्यं स्वभावानां च कर्मणाम् ।
यतोऽभून्निरवद्योसौ कथं सिध्येन्न सिद्धराट् ॥ 274 ॥

यदि तत्तत्कृतं कर्म तज्जन्ममरणादिकं ।
अन्यचैतन्यसाचिव्यशून्यमेव करोति ते ॥ 275 ॥

तर्हि हन्ता न कोप्यासीत् स्वस्वकर्महते जने ।
अतो हिंसा दोषवादो गतो यस्ते मते मतः ॥ 276 ॥

अथ कर्त्रन्तरापेक्षं कर्मापि कुरुते तव ।
तर्हि सर्वस्य कर्तारमाक्षिपेत्कश्चनेश्वरम् ॥ 277 ॥

निरीश्वरान् भाट्टसाङ्ख्यप्राभाकरमतानुगान् ।
चित्रमेकप्रहारोयं युक्त्या त्रीनप्यखण्डयत् ॥ 278 ॥

**तस्माज्जडानुसरणं त्यक्त्वा भज महाप्रभुम् ।**
**स्वभावकालकर्मादेः सर्वस्यास्य नियामकम् ॥ 279 ॥**

एकस्य पाप मन्यस्य नां हः स्यादिति चोद्यते ।
दारा गुरूणां पापाय न तथा गृहमेधिनां ॥ 280 ॥

युक्तिस्तु तत्र व्यर्थैव विवेकोऽतो विधेर्बलात् ।
तत्रांहस्तद्यत्र तत्वे प्राचां वाचो न चेन्न च ॥ 281 ॥

निरवद्यतया यस्तु श्रुत्याद्यैः स्तूयतेतराम् ।
कृत्वापि न स कर्माणि लिप्यते जगदीश्वरः ॥ 282 ॥

नापि कारयितुः पापं कर्तृवद्युक्तितो भवेत् ।
मङ्क्तुर्जलेषु यद्दुःखं किं तन्मज्जयितुः प्रभोः ॥ 283 ॥

विधेः पदानुसरणे विधितातस्य किं भयम् ।
करणात् प्रेरणाद्यस्य न भीरिति स गर्जति ॥ 284 ॥

यतो विधिर्निषेधो नॄन् विदधाति निषेधति ।
ताभ्यां बन्धो हि बद्धानां मुक्तानां स्यात्कथं वद ॥ 285 ॥

यस्तु प्रस्तूयते श्रुत्या नित्यमुक्ततया प्रभुः ।
स निर्दोषो विजयते हयग्रीवाभिधो हरिः ॥ 286 ॥

व्रतस्था हस्तविन्यस्त सूत्रात्ते सूतकांहसा ।
न लिप्यते किल स्त्री च हन्तेशो लिप्यते किल ॥ 287 ॥

का भीः स्वगुणसम्बद्ध सूत्रसप्तशतीपतेः ।
कण्ठोपकण्ठे नृहरेस्त्रिसूत्री सूत्रितस्य च ॥ 288 ॥

अस्त्यावश्यकधर्मस्य प्रत्यवायोऽकृतौ सृतौ ।
मुक्ते मुक्तत्वतोसौ न ततस्तच्छाघवारकम् ॥ 289 ॥

तस्मादेवास्मदीशोपि सर्वस्माच्च न लिप्यताम् ।

एकत्र वारकं कस्मान्नापरत्र निवारकम् ॥ 290 ॥

मुक्तत्वं च सदा क्लेश वर्जितत्वेन सिद्ध्यति ॥ 291 ॥

तच्च जन्मजरामृत्यु क्षुत्तृडादि विवर्जनात् ।

अनुमीयते श्रिया साकं सर्पतल्पपरायणे ।

नारायणे पयःसिन्धौ कृतधाम्नि त्रिधाम्नि नः ॥ 292 ॥

युगे युगे परक्लेश हत्यै चावतितीर्षति ।

अनुत्तीर्णः स्वयं पङ्कात् परं तारयतीह कः ॥ 293 ॥

**नित्यमुक्ता च सा भार्या नित्यमुक्तः पतिश्च सः ।**

**बाहुभ्यामेव बन्धोस्ति न तयोर्भवबन्धनम् ॥ 294 ॥**

अनाद्योर्न भवाद्योस्ति भवो ह्येष पुनर्भवः ॥ 295 ॥

पत्या तेन कुतोपत्य शतवत्यभवन्न सा ।

सत्सु धारेषु नाभेः स पुत्रं कस्मादजीजनत् ॥ 296 ॥

अतः स भरणाद्भर्ता सा भार्या भ्रियते यतः ।

तत्तयोर्नित्यसुखिनोर्न संसारोस्त्यदुःखिनोः ॥ 297 ॥

दुःखमेव हि संसारो दुःखहेतुत्वतो परम् ।
उपचारेण संसारो न दुःखं नापि दुःखदा ॥ 298 ॥

सा भार्या केन संसारो यदि स्त्रीत्वेन संसृतिः ।
तर्हि पुंस्त्वाच्च संसार इति मुक्तिर्गता तव ॥ 299 ॥

कलत्राणीव मित्राणि भवायेह भवन्ति हि ।
मुक्तौ चेन्मित्रसम्पत्तिः स्त्रीसम्पत्तिः कुतो न ते ॥ 300 ॥

रागाभावेन या शान्तिः सा देवी देवयोः समा ।
अतः कलत्रशून्यस्य गुरोर्वाक्ये भरं त्यज ॥ 301 ॥

उन्नयोर्जितधर्मेण भार्यां च सहधर्मिणीम् ॥ 302 ॥

सततोर्ध्वगतिर्नृणां महाक्लेशकरी तव ।
मुक्तौ स्याच्चेत्सुखकरी भार्या केन भयङ्करी ॥ 303 ॥

वृथा वेदेषु देवेषु सत्सु यज्ञादिकारिषु ।
न मत्सरं कुरु महादोषमीषत्पराकुरु ॥ 304 ॥

अतो वैदिकमर्यादैवाङ्गीकार्या विवेकिना ।
वैदिकानां तु कलहो वेदार्थास्फूर्तितः परम् ॥ 305 ॥

क्वचित्सदसतोश्चैकी भावः स्थानैक्यतो भवेत् ।
सुरासुराः सुधार्थे प्राक् एकीभूताः किमम्बुधौ ॥ 306 ॥

त्यक्त्वैकमत्यरूपैक्यान्निघ्नन्ति बलिनोऽबलान् ।
यथा पुरन्दरः पूर्वदेवान् देवर्षिहर्षकृत् ॥ 307 ॥

प्रतिपक्षी सदृक्षः स्यात् प्राचो नीचो न वै भवेत् ।
कालात्ययापदिष्टस्य नो चेत् सत्प्रतिपक्षता ॥ 308 ॥

महत्वं च गुणेनैव नाकारेण धनेन वा ।
सावकाशैक्यवाक्यानि बाधते किं न भेदवाक् ॥ 309 ॥

मानत्वस्य स्वतस्त्वेन सा नातत्वं वदेत् क्वचित् ।
दोषश्च वेदेनानादौ बाधोप्यन्यार्थतैव तत् ॥ 310 ॥

दोषाद्यप्रतिरुद्धेन ज्ञानग्राहकसाक्षिणा ।
स्वतस्त्वं ज्ञानमानत्व निर्णीतिनियमो हि नः ॥ 311 ॥

अतो दूरस्थवृक्षादि ज्ञाने ज्ञातेपि यत्पुनः ।
प्रामाण्यसंशयस्तत्र तदस्माकं मते भवेत् ॥ 312 ॥

यतो दूरत्वदोषेण स्वगृहीतेन कुण्ठितः ।
न निश्चिनोति प्रामाण्यं तत्र ज्ञानग्रहेपि सः ॥ 313 ॥

देशस्य विप्रकर्षो हि दूरत्वं स च साक्षिणा ।

गृहीतुं शक्यते यस्मादाकाशोऽव्याकृतो ह्यसौ ॥ 314 ॥

काचादिदोषं चैकत्र तत्कार्यानुमितं पुनः ।

यदान्यत्रानुसन्धत्ते ज्ञानमात्रग्रही तदा ॥ 315 ॥

विपर्ययेपि दूरत्व पूर्वदोषानुदर्शनात् ।

उदास्ते चतुरः साक्षी प्रामाण्यग्रहणे किल ॥ 316 ॥

तदा रागादिदोषेण कलुषं चञ्चलं मनः ।

गृह्णाति तत्र प्रामाण्यमर्थग्रहणकातरः ॥ 317 ॥

समीपस्थ पदार्थानां चक्षुरादीन्द्रियैः शुभैः ।

ग्रहणे ज्ञानयाथार्थ्य ग्रहे तस्याग्रहो महान् ॥ 318 ॥

स्वतः प्रामाण्यवादे तन्न क्वाप्यनुपपन्नता ।

यथानुभूतसर्वार्थ वादिनां तत्ववादिनाम् ॥ 319 ॥

न चेत्तण्डुलपानीय वस्त्रभार्यासुतादिषु ।

गृहस्थितेषु गृहिणो नवेषु स्यान्ननिर्णयः ॥ 320 ॥

शिशुः किं जातमात्रोम्बास्तनं सन्दिह्य चुम्बति ।

पशुश्च नवघासादौ न विश्वसिति किं वने ॥ 321 ॥

अनानुभविकी सर्वत्रापि सन्दिग्धता नृणाम् ।
विनोन्मत्तशिरःपित्ति पिशाचग्रस्त चेतनान् ॥ 322 ॥

अनभ्यासदशापन्न समीपस्थे न संशयः ।
न तत्र तद्धीमानत्वेप्यस्ति कस्यापि संशयः ॥ 323 ॥

एवं चार्थेष्वसन्देहान्मानत्वेपि न संशयः ।
यतस्तत्संशयोप्यर्थसंशये पर्यवस्यति ॥ 324 ॥

अयोग्यं मनसो मानत्वं चेत्तत्संशयः कुतः ।
स्वायोग्यगन्धे सन्देहश्चक्षुषा कस्य जायते ॥ 325 ॥

उपनीतं च निर्णीति कन्या धन्यान्वमन्यत ।
दोषाभावाद्विरुद्धार्थ कोटेराटोपमोटनात्॥ 326 ॥

अतः सांशयिकत्वाख्य हेतोरेतादृशस्थले ।
असिद्धत्वान्न मानत्व परतस्त्वप्रसाधकः ॥ 327 ॥

दूरस्थे संशयोप्यस्ति दोषश्च भ्रमकारणं ।
यतोऽणुत्व भ्रमो नृणां महत्यर्थेऽपि जायते ॥ 328 ॥

तत्र तद्दोषरोधेन प्रामाण्यं प्राङ्ग गृह्यते ॥ 329 ॥

विशेषदर्शनाभावाद्विकोटस्मृतिमान् जनः ।
तदर्थी तत्र सन्दिग्धे मनसा न तु साक्षिणा ॥ 330 ॥

विकल्परूपं हि मनो यत आहुः पुरातनाः ।
यतश्च संशयः साक्षि वेद्यदुःखसुखेषु न ॥ 331 ॥

ज्ञानं गृह्णंस्तदा साक्षी निर्दोषं चेदियं प्रमा ।
इति सामान्यतः प्रामाण्यं च गृह्णन्निवर्तते ।
अत्र सांशयिकत्वाख्य हेतुः स्यात्सिद्धसाधनः ॥ 332 ॥

तत्र सांशयिकत्वेपि कुतोन्यत्र तदग्रहः ।
दूरस्थे चञ्चलं चक्षुर्न हि पात्रस्थितोदने ॥ 333 ॥

क्वचिद्ज्ञानत्वजातीये दोषजेऽव्यभिचारिणि ।
सर्वत्र व्यभिचारित्वशङ्कापङ्कोपि नोचितः ॥ 334 ॥

अनुमानत्व जातीये दोषजेऽव्यभिचारिणि ।
किं प्रामाण्यानुमानाच्च तच्छङ्की त्वं निवर्तसे ॥ 335 ॥

यदि व्याप्त्यादि दार्ढ्येन शङ्कां धिक्कुरुते भवान् ।
तर्हि निर्दोषता दार्ढ्यात्साक्षीह क्षोभयेद्धिताम् ॥ 336 ॥

तत्सन्निकृष्टदृष्टेषु न प्रामाण्यग्रहे भयम् ।

प्रामाण्यग्रहणे शक्तिः साक्षिणः स्वेन तेजसा ॥ 337 ॥

निरोधनाशमात्राय नदीरुद्धेन नौरिव ।

परीक्षापेक्ष्यते क्वापि तद्भावे स्वयं पटुः ।

न हि राजपथे गन्त्रा गमने नौरपेक्ष्यते ॥ 338 ॥

निरोधकोपि कार्यस्याभावं सम्पादयेत्परम् ।

तद्भावस्यापि कार्ये कारणत्वं न शोभते ॥ 339 ॥

रुणद्धि यद्धि सामग्री सत्वेप्यभिमतं फलम् ।

बुधैस्तदेव सर्वत्र प्रतिबन्धकमुच्यते ॥ 340 ॥

उष्णस्पर्शभरेणोग्रः शक्तो दग्धुं हि पावकः ।

मन्त्रादि प्रतिबद्धस्तु न दहेदन्यदा दहेत् ॥ 341 ॥

यत्प्रागभावादुदयन् घटो न स्वनिरोधकृत् ।

यतस्तन्तुविनाशेन पटनाशेन तन्तुषु ।

तद्रोद्धृता यतश्चेशो नित्यः क्ष्मापातरोधकृत् ॥ 342 ॥

अतो न कारणीभूताभावस्य प्रतियोगिता ।

प्रतिबन्धकता किन्तु पूर्वोक्तैव सतां मता ॥ 343 ॥

मण्यादिर्मुख्यतो रोद्धा तस्यैवादर्शिलक्षणम् ।

हेतोर्विघटकादृष्टं त्वमुख्यं तन्न लक्षितम् ॥ 344 ॥

प्रतिबन्धकमण्यादेरभावो यदि कारणम् ।

कारणाभावतस्तर्हि कार्याभावो भविष्यति ॥ 345 ॥

प्रतिबन्धकताप्यत्र मण्यादेर्भण्यते कुतः ॥ 346 ॥

दण्डाख्यकारणाभावाद्यत्र कार्यं न विद्यते ।

प्रतिबन्धेन निर्बन्धं तत्र को वक्ति मानवः ॥ 347 ॥

कारणाभावहेतुश्च कश्चित् स्यात् प्रतिबन्धकः ।

सत्येन कारणे शक्तिस्तम्भकोप्यस्ति कश्चन ॥ 348 ॥

मण्यभावस्य हेतुत्वे तदभावात्मको मणिः ।

न हेत्वभावहेतुत्वात् प्रतिबध्नात्यदृष्टवत् ॥ 349 ॥

कार्याभावो यतः स्वाभावाख्यहेतोरभावतः ।

सति तस्मिन्नभूत्तेन शक्तिस्तम्भकता गता ॥ 350 ॥

कारणाभावमात्रेण कार्याभावस्य सिद्धितः ।

शक्तिस्तम्भकता तेन कल्प्याकल्पकसंसदि ॥ 351 ॥

सर्वथा कारणाभावाद्भिन्नः स्यात् प्रतिबन्धकः ।
न चेद्दण्डाभावतश्च प्रतिबन्धकता भवेत् ॥ 352 ॥

तस्माच्छङ्कापनोदाय परीक्षापेक्षणं क्वचित् ।
तदभावे सह ज्ञानैः प्रामाण्यं च स वीक्षते ॥ 353 ॥

अथ प्रामाण्यानुमितेः पूर्वं प्रामाण्यसंशयः ।
सर्वत्राप्यस्ति तेनैतत्साक्षिणा वीक्ष्यते कथम् ॥ 354 ॥

अतोनुमानत्तत्तद्धि प्रामाण्यमनुमीयते ।
इत्यक्षिणी निमील्यैव वदन्तं प्रति चोच्यते ॥ 355 ॥

अनानुभविकः सोयं संशयः केन कल्प्यते ।
प्रामाण्यग्रहणोपायाभावादिति मतं यदि ॥ 356 ॥

तदा तेऽन्योन्याश्रयाख्य महादोषो भविष्यति ।
संशयानुपपत्त्यैव प्रामाण्येक्षणशिक्षणम् । 357 ॥

न चेद्घटत्वतद्वत्व तत्प्रकारकतादिकम् ।
उपनीतमनीतं वा साक्षात् कुर्याद्धि साक्ष्यसौ ॥ 358 ॥

यद्यस्ति संशयस्तेयं तदैवास्य पराभवः ।
पराभूते सति ह्यस्मिन्नीक्षणं स्याद्गुरीक्षणं ॥ 359 ॥

प्रामाण्यवीक्षणाभावादेव संशयकल्पना ।
एवं च कथमन्योन्य संश्रयस्त्वां जिहासति ॥ 360 ॥

पृथुबुध्नोदरत्वादेर्विशेषस्य प्रदर्शनात् ।
कथं समीपस्थ घटपटाद्यर्थेषु संशयः ।
यन्मूलो ज्ञानमानत्व सन्देहस्ते भविष्यति ॥ 361 ॥

यथा प्रामाण्यानुमानात् प्रामाण्यस्य विनिर्णयः ।
तथा घटत्वप्रत्यक्षात् घटत्वास्यापि निर्णयः ॥ 362 ॥

शङ्काधानं यथा तत्र मूलदार्ढ्यान्न ते मते ।
तथा निर्दोषाक्षजन्यज्ञानदार्ढ्यादिहापि न ॥ 363 ॥

तस्मात् प्रामाण्यशङ्काया बीजं भर्जितमत्र ते ।
निर्बीजा सा लता गर्भस्रावेणैव गता भवत् ॥ 364 ॥

दोषशङ्काकृतोप्येषु न स्यात् प्रामाण्यसंशयः ।
समीपस्थघटाद्यर्थ ज्ञानेषु कुत एव सा ॥ 365 ॥

तत्सन्निकृष्टदृष्टार्थ ज्ञानमानत्वसंशयः ।
अजानतां जानतां वा नास्ति चक्षुष्मतां सतां ॥ 366 ॥

नायं घट इति प्रोक्ते भवत्येवेति यत्पुनः ।
भवन्ति प्रतिवक्तारस्तत्र किं कारणं वद ॥ 367 ॥

यद्यर्थे तत्र विश्वासस्तर्हि तेन च साक्षिणा ।
ग्रहणे न तरां तस्य विघ्नो द्वैमातुरो ह्यसौ ॥ 368 ॥

किं च वित्तव्ययायास साध्ये कर्मणि कर्मिणाम् ।
प्रामाण्यनिश्चयोऽवश्यं निश्यङ्कायैप्रवृत्तये ॥ 369 ॥

स चेत् स्वतो न तर्हि स्यादनवस्थाख्यदूषणम् ॥ 370 ॥

यद्यर्थनिश्चायादेव प्रवृत्तिरिति मन्यसे ।
तर्हि प्रामाण्यसन्देह स्थलेऽप्यर्थस्य निश्चयात् ॥ 371 ॥

आवश्यकात् प्रवृत्तिः स्याद्यत्र प्रामाण्यसंशयः ।
तत्राप्युपान्तगमने किं न स्यादर्थनिश्चयः ॥ 372 ॥

अतः प्रामाण्यनिर्णीत्यै प्रवर्तेत न कश्चन ॥ 373 ॥

यद्यर्थनिश्चयाश्वासः प्रामाण्यस्य विनिश्चये ।
अनवस्था तर्हि सुस्था निश्यङ्कासु प्रवृत्तिषु ॥ 374 ॥

किं चार्थनिश्चयव्याप्तः प्रामाण्यस्यापि निश्चयः ॥ 375 ॥

प्रकारत्वे विशेषत्वे न कदाप्यस्ति संशयः ।

घटत्ववत्त्वनिर्णीतिर्विशेष्ये याऽवशिष्यते ।

प्रामाण्यनिर्णयो ह्येष स एव ह्यर्थनिर्णयः ॥ 376 ॥

अतो गृहीतप्रामाण्यं ज्ञानमेव प्रवर्तकम् ।

प्रवृत्तेरर्थनिर्णीति जन्यत्वोक्तौ च किं न ते ॥ 377 ॥

तज्ज्ञानग्राहकेणैव तद्ग्रहे नानवस्थितिः ।

अन्येन तु ग्रहेत्युग्रां कस्तरेत्तां सुदुस्तराम् ॥ 378 ॥

घटे घटत्वेसत्वे हि घटज्ञानस्य मानता ।

पटादौ च पटत्वादेः सत्त्वे तज्ज्ञानमानता ॥ 379 ॥

तत्तद्वत्त्वं तेषु तेषु व्यवसायेऽवसीयते ।

ततोऽनुव्यवसायेऽपि तद्भानं स्याद्धि तद्बलात् ॥ 380 ॥

एवं च ज्ञानयाथार्थ्यं ज्ञानग्राहकसाक्षिणा ।

कथं न गृह्यते ज्ञानं यदि स्यात्सविकल्पकम् ॥ 381 ॥

यद्यस्य निर्णयो न स्यात् ज्ञानद्वारैव वेदनात् ।

ज्ञानोपनीतसौरभ्यनिर्णीतिस्तर्हि चक्षुषा ।

सुरभीदं चन्दनं चेत्याकारा जायते कथम् ॥ 382 ॥

घटोऽयमिति धीर्देश कालयोरुपनीतयोः ।
निर्णयाय कथं शक्ता न हि तत्राप्यनिश्चयः ॥ 383 ॥

उपनायकतज्ज्ञान दाढ्यार्त्तत्संशयो न चेत् ।
दृढज्ञानोपनीतेर्थे कथमत्राप्यनिर्णयः ॥ 384 ॥

ज्ञातो मया गुरूक्तार्थ इति यो वेत्ति साक्षिणा ।
यथा तस्यास्ति विश्वासस्तस्मिन्नर्थे तथैव हि ॥ 385 ॥

ज्ञातो घटः पटो ज्ञात इत्यादावपि साक्षिणा ।
ज्ञानस्यूततया भातोऽप्यर्थः किं नावसीयते ॥ 386 ॥

इति शुश्रुम धीराणां तदुक्तमृषिणेति च ।
श्रुत्यास्वोक्तार्थदाढ्यार्थं पूर्वैरप्युक्ततोच्यते ॥ 387 ॥

वाचोगोचरताज्ज्ञानेऽप्यर्थसत्ता यथेयते ।
ज्ञानगोचरताज्ञानेऽप्यर्थसत्ता तथेयताम् ।
न चेच्चारांश्चारयन्तो नृपाश्च स्युरकोविदाः ॥ 388 ॥

किं चेदं निरणायीति प्रोक्तेर्थे सत्त्वनिर्णयः ।
अस्त्येव निकटस्थेषु धीश्च निश्चयरूपिणी ॥ 389 ॥

अतो विनिश्चितोर्थोयमित्यनुव्यवसायवान् ।

अर्थसत्तारूपमेव तत्प्रामाण्यं च निर्णयेत् ॥ 390 ॥

किं च प्रामाण्यानुमित्याप्युपस्थिततदग्रहः ।

साक्षिणि स्याद्यतस्तत्राप्युपनीतं तदीयते ॥ 391 ॥

न किं प्रमावानहमित्याकारा निश्चयात्मिका ।

जायतेऽनुव्यवसितिः प्रामाण्येऽनुमितेपि ते ॥ 392 ॥

व्याप्तिजानुमितेर्दार्ढ्यादुपनीतस्य निर्णये।

अक्षजानुभवे दार्ढ्यं किंनास्त्यत्रोपनेतरि ॥ 393 ॥

नापि प्रामाण्यसन्देहाज्ज्ञानादार्ढ्यस्य विप्लवः ।

दृढरूढज्ञानशक्त्या संशयस्यैव हिंसनात् ॥ 394 ॥

घटत्ववत्त्वे सन्देहः स्यात्तन्निश्चयविच्युतौ ।

सन्देहात्तच्च्युतेश्चोक्तौ किं दोषं नानुपश्यसि ॥ 395 ॥

किं प्रत्यक्षममानं ते किं वा दुर्बलमन्यतः ।

साभासत्वं द्वयोश्चास्ति मानत्वं चोभयोः समम् ॥ 396 ॥

प्रबलाक्षोपनीतेऽर्थे निर्णयो यदि नेष्यते ।

दुर्बलानुमयाऽऽनीते विश्वासो न तरां तदा ॥ 397 ॥

ज्ञातस्यैव पुनर्ज्ञाने प्रामाण्यं गृह्यते किल ।

तादृश्याद्ये दृढज्ञाने कुतो वा तन्न गृह्यते ॥ 398 ॥

परतस्त्वस्य रक्षार्थं यद्येष नियमस्तव ।

स्वतस्त्वपरिरक्षार्थं युक्तियुक्तो ममाप्ययं ॥ 399 ॥

किं च प्रवृत्तिसामर्थ्यात् प्रामाण्यानुमितिस्तव ।

प्रवृत्तेश्च समर्थत्वं केन निर्णीयते वद् ॥ 400 ॥

न हि तत्रानुमा तेऽस्ति साक्षिणा केवलेन चेत् ।

पिता तवानुमानस्य साक्षी रक्ष्यो हि सर्वथा ॥ 401 ॥

दूरे प्रामाण्यशङ्का चेन्नोपान्ते सा कुतो नृणां ।

ज्ञाने ज्ञातेऽर्थतोऽर्थेच्छोः कोटिस्मृत्या बुभुत्सया ।

प्राप्तशङ्कातरोर्मूलं छेत्तुं कोऽन्यःपरश्वधः ॥ 402 ॥

अतोत्र तन्निरोधाय विशेषावसितिर्ध्रुवा ।

संशयस्य ह्यनुत्थानमेककोट्यवधारणे ॥ 403 ॥

तस्मात्कथं न निर्णीत समीपस्थार्थधीषु सा ।

अतोत्र संशयोच्छित्त्यै वाच्यः प्रामाण्यनिश्चयः ॥ 404 ॥

नात्र प्रवृत्तिसामर्थ्यमन्यद्वास्त्यनुमापकम् ।

यतो गृहीतप्रामाण्य ज्ञानजातीयतापि न ।

न वार्थनूत्नज्ञानत्वात् स्वतस्त्वं कस्त्यजेत्ततः ॥ 405 ॥

समीपगमने सत्येवार्थसामर्थ्यशोधनम् ।

तत्प्रमानुमितेः पूर्वं प्रामाण्यं साक्षिणेक्ष्यते ॥ 406 ॥

साक्ष्युच्छिष्टकृताहारा तेऽनुमाऽस्योपजीविनी ।

साक्षी तदक्षाद्यध्यक्षो नोपेक्ष्योयं मुमुक्षुभिः ॥ 407 ॥

अप्रामाण्ये स्वतस्त्वं न युक्तियुक्तमतो न तत् ॥ 408 ॥

भ्रमज्ञानज्ञेयरूप्यत्वाद्यभावो ह्यमानता ।

तत्सत्त्वग्राहिणी भ्रान्तिः साक्षी चान्तःस्वतन्त्रदृक् ।

उपनायकशून्येन बाह्यं तद्गृह्यते कथम् ॥ 409 ॥

अतोनुमानतो रूप्यत्वाभावोपस्थितिर्यदा ।

तदा तदपि गृह्णीयादिति सर्वमनाकुलं ॥ 410 ॥

नापि प्रमाया जनको दोषाभावो गुणोपि वा ।

असल्लिङ्गपरामर्शाद्यतो यादृच्छिकाऽनुमा ॥ 411 ॥

सल्लिङ्गस्य परामर्शो गुणस्तेऽनुमितौ मतः ।

तदभावेपि जातेयमनुमा यत्प्रमात्मिका ।

सर्वत्र च प्रमायास्तद्गुणजत्व कथा वृथा ॥ 412 ॥

यो धर्मो व्यतिरेकेण व्यभिचारी स कार्यकृत् ।
कथं स्यात्कारणं यस्मादन्वयिव्यतिरेकि च ॥ 413 ॥

दण्डे सति घटाभावादन्वयस्य निरूपणम् ।
यस्मिन् सत्येव यदिति प्राज्ञाः प्राहुर्विवेकिनः ॥ 414 ॥

दण्डे सत्येव हि घटो दण्डाभावे न कुत्रचित् ।
अतोऽन्वयोक्तिर्मान्यैवं नान्यथा व्यभिचारतः ॥ 415 ॥

दण्डे सत्यपि मृत्पिण्डाद्यभावे यद्घटोपि न ।
रासभे सत्यपि घटो जायते च स्वकारणात् ॥ 416 ॥

अतोत्र दोषे सति च भ्रमाभावो न दूषणम् ।
दोषे सत्येव तु भ्रान्तिरिति सोपि यतोऽन्वयी ॥ 417 ॥

एवं च ज्ञानसामग्र्यां सत्यामेव प्रमा भवेत् ।
तदभावे तु न भवेदित्येवालं ममापि हि ॥ 418 ॥

तस्माद्भ्रमस्य सामग्र्यां प्रमा सामग्र्यपि प्रमाम् ।
सामान्यरूपां कुर्यादित्याक्षेपो निर्निबन्धनः ॥ 419 ॥

सुहृद्भावेन पृच्छन्तं प्रति तु प्रतिबन्धिका ।

एका फलबलात्तत्र नापरेत्युत्तरं वदेत् ॥ 420 ॥

याद‍ृच्छिके यद‍ृच्छैव भ्रमस्य प्रतिबन्धिका ।
दोषस्य जागरूकत्वात्तद्रोधे तदपेक्षणम् ॥ 421 ॥

प्रमासामग्र्येव शक्ता स्वफलं साधयेत्तदा ।
अतो याद‍ृच्छिके सा भूत्तन्मात्रे तदपेक्षणात् ॥ 422 ॥

अन्यत्रसापि नापेक्ष्यागुणात्तत्कप्रमोदयः ॥ 423 ॥

यतो वह्न्यनुमा सेयं ततो धूमत्वधीबलात् ।
तज्जन्मवाच्यं नान्यस्माद्यद्धूमस्याग्निलिङ्गता ॥ 424 ॥

यथान्यत्र भ्रमाकारा सा धीर्धूमभ्रमादभूत् ।
तथैवेयं जनौ कोपि न विशेषो नयोर्द्वयोः ॥ 425 ॥

प्रवृत्युत्तरकालं तु विसंवादादसौ भ्रमः ।
संवादेन प्रमा सेयमिति निर्णीयते बुधैः ॥ 426 ॥

उत्पत्तिस्तूभयोरेक प्रकारा नात्र संशयः ।
तस्मादुक्तो गुणोन्यो वा कल्पनीयो न जन्मनि ॥ 427 ॥

लिङ्गभ्रमाख्यानुमान दोषे सत्येव याऽभवत् ।
दोषाभावानपेक्षैव सेयं याद‍ृच्छिक प्रमा ॥ 428 ॥

प्रमया नान्वयो यस्य व्यतिरेकोपि यस्य न ।

दोषाभावः स कुत्रापि न प्रमां प्रति कारणम् ॥ 429 ॥

एवं च भावाभावाख्य गुणजानैव या प्रमा ।

तत्स्वतस्त्वं महत्तत्वमित्याहुस्तत्ववादिनः ॥ 430 ॥

कार्यस्यैवं व्यवस्थित्या सर्वमासीदनाकुलम् ॥ 431 ॥

तस्यापि चोत्तरं ब्रूमो यस्तथापि दुराग्रही ।

यद्यर्थसत्तात्र गुणस्तथापि न गुणाज्जनिः ॥ 432 ॥

परोक्षानुमितेर्जन्मन्यर्थो यत्ते न कारणम् ।

अन्यथाभाव्यनुमितेरसम्भवमनुस्वर ॥ 433 ॥

नाप्यैश्वरार्थधीरत्र गुणो भवितुमर्हति ।

यद्धीत्वेनाखिले कार्ये सा हेतुर्न गुणत्वतः ॥ 434 ॥

गुणत्वेनापि हेतुत्वे कल्पनागौरवं भवेत् ।

स्वतस्त्वेनान्यथासिद्धेः कल्पकं च न किञ्चन ॥ 435 ॥

लिङ्गभ्रमादेव सा भूदनुमा लैङ्गिकी यतः ।

अर्थसत्तादयस्तद्धीमानत्वस्यानुमापकाः ॥ 436 ॥

किं चार्थधीत्वतः सा स्यात्तत्तदर्थेषु कारणम् ।
ज्ञानधीत्वेन च ज्ञाने न गुणोसौ भ्रमेपि यत् ।
तत्त्वदुक्तगुणोत्थाभूदेवमप्यनुमा न सा ॥ 437 ॥

करोमीदमिदं चेति तत्तत्कार्यं करोत्यपि ।
अन्यबुद्ध्यान्यकरणमभ्रान्तस्य कथं वद ॥ 438 ॥

गुणानपेक्ष एवासौ भ्रमं कुर्यात् किल प्रभुः ।
गुणैः किल प्रमां कुर्यान्न स्वतन्त्रेऽन्यतन्त्रता ॥ 439 ॥

भ्रमज्ञानं यथा कुर्यात् प्रमां कुर्यात्तथैव हि ।
द्विप्रकारतया कर्तुं किं स तार्किककिङ्करः ॥ 440 ॥

अर्थप्रमा यदि गुणः प्रमायामैश्वरीर्यते ।
भ्रान्तार्थो रजतादिः सन्नन्यथाख्यातिवादिनः ।
अर्थसत्ताप्रमा चैशी तद्भ्रमेप्यस्ति ते मते ॥ 441 ॥

त्वदुक्तगुणसञ्जातौ द्वौ च जातौ भ्रमाभ्रमौ ।
गुणजत्वात् प्रमात्वं चेत् द्वयोरपि कुतो न तत् ॥ 442 ॥

यदि तत्र सतोर्थस्य प्रमैशी ते गुणस्तदा ।
लघ्वी तत्रार्थसत्तैव गुणोऽभून्न तु तत्प्रमा ॥ 443 ॥

सा चानुमायां हेतुर्न गुणजा सा प्रमा कथम् ॥ 444 ॥

गुणस्य सत्वमात्रेण प्रामाण्यं भण्यते यदि ।

तदा सामान्यसामग्री मात्रजन्या प्रमा मम ।

सर्वाप्यभूत् स्वतस्त्वस्य केन वा हानिरुच्यताम्॥ 445॥

ईदृग्गुणाच्छ्रुतीनां च मानता जानतां भवेत् ।

केन तासां जनिः कल्प्यातेन ते हीनताप्यभूत् ॥ 446 ॥

अनभूतारोपकाले गुर्वी साप्यस्ति ते मते ।

लघुश्च पक्षो हन्ति त्वां गुरुश्चापि निहन्त्यहो ॥ 447 ॥

उपादानापरोक्षत्वेनैव सा कारणं किल ॥ 448 ॥

कर्तृज्ञानं तथैवानुत्पन्नकार्येषु कारणम् ।

न चेद्घटादिकर्तृत्वं कुलालस्य न शोभते ॥ 449 ॥

ज्ञानोपादानमात्मा ते तद्धीत्वेनैश्वरीमतिः ।

कारणं स्यादर्थधीत्वेनापि हेतुत्वकल्पनम् ।

त्वच्छास्त्रगौरवायैव भारस्ते गौरवाय न ॥ 450 ॥

पुंनिष्ठस्तु गुणो लोके पुंसि तज्ज्ञानधर्मिणि ।

गुणोन्यत्रानुमान्यत्र चित्रं शास्त्रप्रवर्तनम् ॥ 451 ॥

सर्वज्ञेशप्रमा नृणां गुणश्चेत् क्व भ्रमो भवेत् ।
गुणे सति प्रमावश्यम्भावाद्दोषविरोधिनि ॥ 452 ॥

प्रसिद्धगुणसन्त्यागे नाप्रसिद्धगुणोहनम् ।
न गुणः शोधितधियां सुधियां कुधियामपि ॥ 453 ॥

दोषे सत्यप्रमा सर्वा दोषाभावे न सा क्वचित् ।
तत्स्वतस्त्वं न तत्तत्वमिति तत्वविदां मतम् ॥ 454 ॥

ज्ञानसामान्यसामग्री ज्ञानं सञ्जनयेद्ध्रुवम् ।
कार्यस्योपार्जिकामेव यत्सामग्रीं विदुर्बुधाः ॥ 455 ॥

ज्ञानं च ज्ञेयसापेक्षं ज्ञेयं चास्ति यथायथा ।
तथैव विषयीकुर्यात्स्वयोग्यं सति साधने ॥ 456 ॥

घटोयमिति हि ज्ञाने चक्षुषा च घटेन च ।
तत्संसर्गेणैव चालमेवमेव स्थलान्तरे ॥ 457 ॥

सेयं ज्ञानस्य सामान्यसामग्री सा च धीः प्रमा ।
तन्न प्रमाख्यबोधस्य साधनेऽन्यानुधावनम् ॥ 458 ॥

गोवत्सजनने गोभिर्गोवृषैरेव पूर्यते ।
विजातीयस्य वत्सस्य तत्सदृक्षो परोपि च ॥ 459 ॥

महिषो वा पिशाचो वा कश्चिन्निश्चीयते यतः ।

अतः स्वयोग्यार्थबोधे चक्षुषान्यन्न मान्यते ॥ 460 ॥

स्वयोग्यविपरीतार्थधीषु दोषोऽप्यपेक्ष्यते ॥ 461 ॥

इन्द्रियस्यार्थसम्बन्धो ज्ञानसामान्यकारणम् ।

यच्चक्षुः शुक्तिसंयोगि सा च रूप्योपमा रुचा ।

प्रतीत्या व्यवहृत्या चारोप्यं रूप्योपमं किल ॥ 462 ॥

इत्थं रूप्यभ्रमस्तस्यां मष्यादेर्न भ्रमोत्र तत् ॥ 463 ॥

चक्षुस्थपीतपित्तेन योगाच्छङ्केपि पीतधीः ।

अतः पारम्पर्यतोर्थसम्बन्धोस्ति भ्रमेपि च ॥ 464 ॥

सादृश्यं सदृशान्यार्थज्ञापनाय स्वयं पटु ।

तदेकत्वज्ञापनाय दोषाश्लेषमपेक्षते ॥ 465 ॥

अतोन्यस्यान्यताबोधे दोषोप्यन्विष्यते बुधैः ।

अत्यन्तमसतोर्थस्य सत्ताधीः कथमन्यथा ॥ 466 ॥

विशेषणाभेदबोधे विशेष्येन्द्रियसङ्गमः ।

प्रमास्वलं मे सामान्यसामग्री सा भ्रमेपि यत् ॥ 467 ॥

अतो घटोयमित्याद्या घटाद्यैक्यप्रमा मम ।

साक्षात्कारिज्ञानहेतुमात्रजन्याखिलाभवत् ॥ 468 ॥

भ्रमे विशेषशुक्त्यक्षिसंयोगोस्ति विशेषणम् ।

रजतं तु न तत्सङ्गि भिन्नत्वात्तन्न तस्य धीः ॥ 469 ॥

प्रमायां कॢप्तसामान्यसामग्रीमात्रतो भवेत् ।

असन्निकृष्टतद्दृष्ट्यै दोषोप्येष्टव्य एव हि ॥ 470 ॥

विशेषणस्य भेदेक्षणा तत्संसर्गोप्यपेक्ष्यते ।

सापि सामन्यसामग्री यद्भ्रमेप्यस्ति तादृशि ॥ 471 ॥

वस्तुतः काकिनिगृहे काककोकिलवत्तयोः ।

प्रमायां च भ्रमे चाक्ष्णः किं न काकगृहान्वयः ॥ 472 ॥

तत्रापि कोकिलोऽसङ्गी तद्भ्रान्तिर्दोषजैव तत् ।

अतश्चोक्तं समस्तं च तत्वमासीदनाकुलम् ॥ 473 ॥

यथा घटादिकार्येषु दण्डत्वेनैव लाघवात् ।

हेतुता दण्डदार्ढ्यादि त्ववच्छेदकमेव ते ॥ 474 ॥

तथा चक्षुश्च चक्षुष्ट्वेनैव हेतुर्लघुत्वतः ।

अदुष्टत्वं तु तन्निष्टममवच्छेदकमस्तु मे ॥ 475 ॥

अभावगुणजाप्येवं यान सा न गुणान्तरात् ॥ 476 ॥

भ्रमे त्वत्यन्तासतोपि सत्ताया बोधसाधने ।
दोषस्य हेतुतावश्यं वाच्या तत्परतो प्रमा ॥ 477 ॥

यद्वा चक्षुः प्रमाहेतुर्दोषस्तु प्रतिबन्धकः ।
प्रतिबन्धस्य चाभावो न हेतुरिति साधितम् ॥ 478 ॥

यादृच्छिकार्थनिर्बाधबोधेस्मिन् दृष्टिलिङ्गजे ।
व्यभिचारात् प्रमाहेतुर्दोषाभावो न कुत्रचित् ॥ 479 ॥

गुणान्तरं च सल्लिङ्गपरामर्शादिशब्दितम् ।
यतोऽत्रैव न तच्चातो न प्रमाकारणं क्वचित् ॥ 480 ॥

तस्माद्द्विरूपज्ञानस्य सामग्री च द्विरूपिणी ।
सामान्या प्रायिके ज्ञाने यतः सर्वत्र सर्वदा ॥ 481 ॥

प्रमैव प्रायशो नृणां क्वाचित्केतु ततोऽपरा ।
काचादिदोषजाभ्रान्तिर्न हि सर्वस्य सर्वदा ॥ 482 ॥

उत्पत्तावपि च ज्ञप्तौ तस्मात्सद्भिरुदीरितम् ।
स्वतस्त्वं परतस्त्वं च तत्वं वित्त्वस्य साधकम् ॥ 483 ॥

विमता सन्निकृष्टापूर्वार्थादोषजदृष्टिदृक् ।
ज्ञानप्रामाण्यार्थसत्त्वोल्लेखेन नियता मता ॥ 484 ॥

प्रामाण्यसंशयघ्नाप्रामाण्याग्राहि प्रमात्वतः ।
यथा तवानुमेत्युक्तस्वतस्त्वेऽस्त्यनुमापि मे ॥ 485 ॥

प्रामाण्यस्य विरोध्येवा प्रामाण्यं भण्यते यतः ।
तस्मात् कुत्सितशङ्कां च हुङ्कारेणैव वारयेत् ॥ 486 ॥

जानामि घटमेवाहमित्याकृत्यैव कीर्त्यते ।
यत्सा तस्साधयेदेव कृत्स्नापि ज्ञानमानताम् ॥ 487 ॥

दूरस्थेतु घटं जानामीतिधीर्जायते परम् ।
न तु सावधृतिस्तत्र मानत्वावधृतिश्च न॥ 488 ॥

व्यवहारस्य वैचित्र्ये कथं न ज्ञानचित्रता ।
अतोनुकूलस्तर्कोपि कर्कशी कुरुतोऽनुमाम् ॥ 489 ॥

प्रमा न गुणतो जन्या ज्ञानत्वादप्रमा यथा ।
इत्युत्पत्तौ चानुमितिर्बाधाभावाद्भवेद्धि नः ॥ 490 ॥

दोषाभावोपि यद्दोषी कोसावत्र गुणो गुणी ॥ 491 ॥

विस्तरस्त्वस्य सर्वस्य मूलशास्त्रमहार्णवे ।
द्रष्टव्यस्तत्तटस्थाणुमणिसङ्ग्राहिणो वयम् ॥ 492 ॥

अत्र प्रतीतरजतस्यात्र सत्त्वं न बाधकात् ।
साधकाभावातश्चान्यत्रापिसत्ता न सेत्स्यति ॥ 493 ॥

नह्यत्र दृष्टं रजतमन्यत्रास्तीति धीर्नृणाम् ।
प्रतीतिरेव हि गतिस्तत्तदर्थव्यवस्थितौ ॥ 494 ॥

इन्द्रियस्यैव सम्बन्धाद्विशेषणविशेष्ययोः ।
द्वयोश्च दीर्भवेत्तत्र प्राग्विशेषणधीर्वृथा ॥ 495 ॥

पूर्वं ज्ञातोप्यनुमितौ विशेष्यः पर्वतो यतः ।
प्राग्विशेषणधीरर्थसाक्षात्कारे वृथैव तत् ॥ 496 ॥

व्याप्तिज्ञानाय वह्न्यादेर्व्यापकत्वेन धीः पुरा ।
अपेक्ष्यते परं साध्यवैशिष्ट्येधीर्न सिद्धधीः ॥ 497 ॥

असन्निकृष्टदृष्टिं च यो दोषः साधयेद्भ्रमे ।
स तस्याज्ञातमात्रान्न बिभेतीति मे मतिः ॥ 498 ॥

सर्वत्राप्यसतो ज्ञानं यदि चैकत्र नेष्यते ।

तर्हि तत्रासतो ज्ञानं कथं तत्रेति चिन्त्यताम् ।

दोषाच्चेत्तद्बलादेव सर्वत्राप्यसतोस्तु धीः ॥ 499 ॥

असत्प्रतीतौ मानं च प्रतीतिरियमेव नः ।

अत्र प्रतीतं यन्मूर्तमिदं नान्यत्र नात्र च ॥ 500 ॥

किञ्चरूप्यस्य  शुक्तेश्च तादात्म्यमसदीक्ष्यते ।

न चेत् प्रवृत्तिरभिलापो वा तत्र कथं नृणाम् ॥ 501 ॥

व्याश्रयस्यापि रूप्यस्य शुक्त्यभिन्नत्वधीर्भ्रमे ।

नचेत्तर्हि भवेद्रूप्यस्मरणं च भ्रमस्तव ॥ 502 ॥

पुरोवर्त्युल्लेखिनी च यदि व्याश्रयधीर्भ्रमः ।

इदं च रजतं चेति शाब्दीधीः स्यात्तदा भ्रमः ॥ 503 ॥

असंसर्गाग्रहं चापि यदि भ्रान्तावपेक्षसे ।

तदा मीमांसकाचार्यस्यान्तेवासी त्वमप्यभूः ॥ 504 ॥

यदा क्षीरस्य नीरस्य क्षीरेणैक्यं प्रतीयते ।

तदा तादात्म्यमात्रस्यासत्त्वं ते द्वे च नाऽसती ॥ 505 ॥

यतः क्षीरं च तत्रास्ति नीरं चास्ति निगूहितम् ।

अतस्तादात्म्यमात्रस्यासत्त्वं तत्र तयोस्तु न ॥ 506 ॥

यदि तादात्म्यवत्तस्य प्रतियोगी च तत्र न ।

तदा तस्यापि चासत्त्वमिति तत्वविदो विदुः ॥ 507 ॥

अतः सता संवलितमसच्चेक्ष्यं न संशयः ।

अधिष्ठानस्य चासत्त्वं यो वदेन्न स युक्तिमान् ॥ 508 ॥

इदन्ताधारशुक्त्यादिर्यतः सर्वत्र चार्थकृत् ।

रूप्यादिर्न तथा तस्मात्तन्मात्रमसदीर्यते ।

यथावस्थितसर्वार्थवादिभिस्तत्ववादिभिः ॥ 509 ॥

यद्गुणो न प्रमाहेतुर्दोषाभावस्य नेष्यते ।

अनाप्ततार्किकोक्तत्वादाप्तोक्तत्वं गुणो न तत् ॥ 510 ॥

तस्मान्नित्यैव वेदाख्यविद्या विद्यावतां मते ।

नित्यायां च कथं द्वैतमद्वैतं किल ते प्रियम् ॥ 511 ॥

तत्स्वतस्त्वेन सर्वत्र प्रामाण्यं गृह्यते श्रुतौ ।

पुन्दोषमूलदोषस्याभावात्तच्च  न चाल्यते ॥ 512 ॥

अतत्वावेदकत्वोक्तिरतो वेदे न शोभते ।

अतत्वावेदकस्तस्य गुरुरेवेति मे मतिः ॥ 513 ॥

अकामः काम्यविधिना कुतो वा न प्रवर्तते ।

लिङ् लोट् तव्यप्रत्ययान्तपदोपेतविधेर्बलात् ॥ 514 ॥

यदीष्ट साधनं तस्य तन्नेत्येवाप्रवर्तकम् ।

तर्ह्यावश्यकमिष्टस्य हेतुत्वं बोधयेद्धि यत् ।

तदेव वाक्यं मानं स्याल्लोटायुक्तं लटापि वा ॥ 515 ॥

यागे विधिः कुतो वेदे क्रियान्तरविधिं विना ॥ 516 ॥

यद्यस्ति स्वर्गहेतुत्वं याग एवेति मन्यसे ।

तर्हि सिद्धविधेः पृष्टलम्बी तव विधिर्ह्यभूत् ॥ 517 ॥

अतस्त्येनैव विधिना वाक्सर्वा मानतां व्रजेत् ।

अस्त्यायुरिति वाक्यं च नो चेन्मानं भवेन्नते ॥ 518 ॥

तस्मादाचार्यतरणिसरणिः शोभतेतराम् ।

यः स्वान्वितिमिरान् कुर्वन् सदा हृद्व्योम्नि जृम्भते ॥ 519 ॥

गृष्योर्मिथो विरोधे हि हत्वैकामपराङ्मुखीम् ।

विरोधशान्तिं कः कुर्याद्विना म्लेच्छकुमारकान् ॥ 520 ॥

तृणपिण्याकदानेन कृत्वार्थान्तरलालसाम् ।

ततः प्रच्यावयेदेकां कृद्धाप्यन्याध्वना व्रजेत् ॥ 521 ॥

एवं श्रुतयो विरोधेपि यावागन्यार्थवर्तिनी ।

तां तदर्थपरां कृत्वा मोचयेत्कलहं तयोः ॥ 522 ॥

अतत्वावेदिकात्वेका तत्वस्यावेदिका परा ।

इत्याद्युक्तिस्त्वमानत्वप्राप्त्यासुत्याजनं श्रुतेः ॥ 523 ॥

सादृश्यैक्ये स्थानमत्त्योरैक्ये व्याप्तैक्यपूर्वके ।

सावकाशैक्यवाग्भेदवाक्तु स्वार्थपरायणा ॥ 524 ॥

एकीभूतास्तु कुरवः एकीभूतौ नृपाविमौ ।

ऐक्याद्वयस्य ऋभुमानित्याद्युक्तिर्विचार्यताम् ॥ 525 ॥

लिङ्गानुशानसं यस्मादेके मुख्यान्यकेवलाः ।

इत्याह भेद एवैक्यं मुख्यता वा ततो भवेत् ॥ 526 ॥

यदा तदैक्यशब्दोयं भेदं वक्त्यखिलेशितुः ।

वक्ति सर्वोत्तमत्वं वा प्रतिवक्ति कथं भवान् ॥ 527 ॥

एवं निर्गुणवाक्यं च सामान्यवचनत्वतः ।

दोषरूपगुणाभावपरं कर्तुं हि शक्यते ॥ 528 ॥

एष सर्वेश इत्यादि विशेषवचनं तु यत् ।

अन्यार्थशून्यं तत् स्वार्थं प्राणत्यागेपि न त्यजेत्॥ 529॥

न हिंस्यादिति वाक्यं हि क्रतोरन्यत्र मान्यते ।

तद्वद्वर्थविभक्त्यन्तसर्वशब्दान्वितां श्रुतिं ।

श्रौतादन्यत्र नयता तच्छून्या किं न नीयते ॥ 530 ॥

अतःसामान्यतो यत्तु निषेधवचनं श्रुतौ।

विशेषवाक्यविहितं न हि तत्प्रतिषेधति ॥ 531॥

योसौ निर्गुणइत्युक्तः शास्त्रेषु जगदीश्वरः ।

प्राकृतैर्हेयसंयुक्तैर्गुणहीनत्व मुच्यते ।

इति पाद्मे त्रयस्त्रिंशाध्याये रुद्रस्य वागियं ॥ 532॥

शब्दस्य लब्ध्वा योग्यार्थमयोग्यार्थौ न मृग्यते ।

दुग्धार्थी बुद्धिमान् दोग्धि कस्तं बस्तगलस्तनम् ॥ 533 ॥

सन्ध्यायां वन्दते योगी सन्ध्यां भोगी तु सुन्दरीम् ।

युगपन्मतिभेदस्तद्भिन्नयोरेव नान्यथा ॥ 534 ॥

सखायौ सयुजौचेति मतिस्थानभिदे स्फुटं ।

यत्प्रत्याहततोप्याह भेदवाग्भेदमेव हि ॥ 535 ॥

ऐक्योक्तेः स्वविरोधिन्याः सख्यस्थानैक्यवादिनी ।

यद्वती चाह तद्वाणी कृपाणीयं विरोधिनां ॥ 536 ॥

नारायणः परं ब्रह्म नान्यद्ब्रह्मततः परम् ।

प्राक् सृष्टेरप्सु यश्येते वटपत्रपुटे प्रभुः ॥ 537 ॥

बन्धकीभूतसत्वादिगुणानां विवर्जनात् ।

स एव निर्गुणं ब्रह्मेत्युक्तः सद्गुणबृंहितः ॥ 538 ॥

तन्मुकुन्दाभिदं ब्रह्म वेदाख्यब्रह्मवर्णितम् ।

ब्राह्मणानां परं दैवं ब्रह्मसूत्रप्रकाशितम् ॥ 539 ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम्।

विश्वं नारायणं देवमक्षरं परमं पदम् ॥ 540 ॥

विश्वतः परमां नित्यं विश्वं नारायणं हरिम् ।

विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ॥ 541 ॥

पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्।

नारायणं महाज्ञेयं विश्वात्मानं परायणम्॥ 542 ॥

नारायणपरो ज्योतिरात्मानारायणः परः ।

नारायणं परंब्रह्म तत्वं नारायणः परः ॥ 543 ॥

यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेपि वा ।

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥ 544 ॥

इतिस्पष्टा ह्युपनिषत्परम्ब्रह्माह तं प्रभुम् ॥ 545 ॥

विश्वतः परमत्वं च विश्वशम्भूमितां तथा ।

विश्वोपजीव्यतामात्मेश्वरताक्षरते तथा ॥ 546 ॥

शाश्वतत्वाच्युतत्वे च महाज्ञेयत्वमेव च ।

अन्तर्बहिश्च विश्वस्य व्याप्तत्वं चाप्यनन्तताम्॥ 547 ॥

ब्रह्मधर्मानिमान् सर्वान् यस्मिन्नारायणेश्रुतिः ।

सहस्रशीर्ष्णि पुरुषे तन्नाम्नैव पुनः पुनः ॥ 548 ॥

आम्नाते सङ्कलय्याहमहातात्पर्यपूर्वकम् ।

स एव हि परंब्रह्म ब्रह्मलक्षणवेदिनाम् ॥ 549 ॥

परंब्रह्म परञ्ज्योतिः परंतत्वम् परंपदम् ।

परमात्मेति च ब्रह्मनाम्ना नारायणं प्रभुम् ॥ 550 ॥

उद्दिश्य पौनःपुन्येन ब्रह्मणो लक्षणानि च ।

सर्वाण्युक्त्वोत्तरग्रन्थे परीक्षा च यतः कृता।

श्रुत्या लक्षणशास्त्रस्य मर्यादामनुसृत्य हि ॥ 551 ॥

श्रृङ्गग्राहितया तस्य हृद्गुहायां प्रदर्शनात् ।
उक्तलक्षणपूर्णस्य परमात्माभिधस्य च ॥ 552 ॥

राजा राजसु मुख्यो हि महाराज इतीर्यते ।
आत्माऽन्यात्मसु मुख्यश्च परमात्मा तथा प्रभुः ॥ 553 ॥

यस्तु प्रस्तावितः पूर्वमात्मानारायणः परः ।
परमात्मेति चात्रोक्तः स एव स्यान्न संशयः ॥ 554 ॥

तत्स ब्रह्मेति वाक् तत्तदभिधामाह नाऽभिदाम्।
महेश्वरशिवश्रुत्योः पौनरुक्त्यभयादपि ॥ 555 ॥

प्रागुक्तार्थोपसंहर्त्री महेश्वरमहीश्वरे ।
शयानमाह तस्यैक्ये कस्यासौ स्यान्महेश्वरः ॥ 556 ॥

विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति ।
इत्यैक्योक्तेः परंचान्यागतिमाह ततोपि न ॥ 557 ॥

यद्विश्वं पुरुषाख्यं तमुपजीवति तत्सदा ।
विश्वं पुरुष इत्युक्तं यत्तदोर्नित्ययोगतः ॥ 558 ॥

श्रुत्यर्थमित्थमेवाहुः पुङ्क्षैब्याद्ये तु भिध्यति ।
कश्चिन्द्याच्छ्रुतिसुन्दर्याः सौन्दर्यं चरणद्वये ॥ 559 ॥

अतः श्रुत्यर्थमीमांसा निपुमानां विवेकिनाम् ।

मते नारायणो देवः परं ब्रह्म न चापरः ।

इति निर्णीयते नो चेच्छ्रुतिरेषा प्रकुप्यति॥ 560 ॥

देवानामवमोग्निर्वैविष्णुस्तु परमः प्रभुः ।

तदन्तरेण ब्रह्माद्याः सर्वा अन्यास्तु देवताः ॥ 561 ॥

ऋग्वेदब्राह्मणं ह्यादावेवन्तरतमत्वतः ।

देवान् सर्वान् विविच्योक्त्वाविष्णोः परमतां जगौ ॥ 562॥

तस्मात्तु परमं  वस्तु न किञ्चिदपि शंसति।

एते प्रधानदेवेषु तेष्वप्येषक्रमः किल ॥ 563 ॥

अतो विष्णुः परंब्रह्म सर्वश्रुतिमतादभूत् ।

विष्णोरन्यत् परं परंब्रह्म न श्रौतमिति चाप्यभूत् ।

वेदव्याख्यानरूपं यद्ब्रुवन्ति ब्राह्मणं बुधाः ॥ 564 ॥

उक्तार्थस्य समस्तस्य प्रमाणेन प्रसिद्धताम्।

वैशब्देनाह तद्वक्ति सर्वमानैश्य सिद्धताम् ॥ 565 ॥

श्रुत्या स्मृत्यानुमानेन प्रत्यक्षेण च योगिनाम् ।

विष्णोः सर्वोत्तमत्वं हि सिद्धमित्याह सा श्रुतिः ॥ 566 ॥

अतस्त्रिदेवतैक्यं स्यान्नपुराणशतैरपि ।

विरोधे त्वनपेक्षं स्यादिति यत्सूत्रशासनम् ॥ 567 ॥

यत्ता लक्ष्म्यादिभृग्वन्ता देवा देव्याश्च मध्यगाः ।

तत्ताः स्त्रीपुंसयोः शक्तदेवतोक्त्या श्रुतिर्जगौ॥ 568 ॥

नान्वश्नुवन्ति ते विष्णो महित्वमितरेत्विति ।

यतः श्रुतिरतोप्यैक्यं तेन नान्यस्य कस्यचित् ॥ 569 ॥

जातो वा जायमानो वा विष्णो कश्चित्पुमांस्तव।

महिम्नोन्तंपरंनापेत्याह काचिच्छ्रुतिः प्रभुम् ॥ 570 ॥

तस्मान्नित्योस्यमहिमा न कदापि निवर्तते।

सत्यः सो अस्यमहिमेत्युक्तेश्च न निवर्तते ॥ 571 ॥

अतस्त्वन्निर्गुणत्वं तु नास्य स्याद्धि कदाचन ।

तस्मात् त्रिगुणशून्यत्वान्निर्गुणोप्ययमेव हि ॥ 572 ॥

ब्रह्मायं गुणपूर्णत्वात् परमश्चोत्तमत्वतः ।

तन्निर्गुणं च परमं ब्रह्मनारायणः सदा ॥ 573 ॥

न च तद्गुणमिथ्यत्वान्निर्गुणाऽवसरस्तव ।

नित्यस्य ब्रह्मवन्मिथ्यात्वस्यैवानुपपत्तितः ॥ 574 ॥

सत्यः सो अस्यमहिमेत्याह तत्सत्यतां च वाक् ।

अतस्तन्निर्गुणोक्तिश्च त्रिगुणानां विमोचिका ॥ 575 ॥

नित्यः  सत्यश्च महिमा कथं तद्ध्रासतामियात् ॥ 576 ॥

नञा परशुना छिन्ने पदे त्वां नानुयाति सा ।

गुणसत्यत्वनित्यत्वकारूत्तेजितमूर्तिना ॥ 577 ॥

एवं चानिर्गुणत्वार्था यत्ते निर्गुणतां क्षिपेत् ।

अतस्तद्गुणमिथ्यात्वसाधकं च न किञ्चन ॥ 578 ॥

तदुक्त गुणसत्यत्वनित्यत्वे नौपचारिके ॥ 579 ॥

नेह नानेत्यादि वाक्यमपि तस्मान्न तान् क्षिपेत् ।

नित्यं सत्यं परंब्रह्म किं शून्यत्वश्रुतिः क्षिपेत् ॥ 580 ॥

किञ्च ब्रह्मणि तद्वाक्यं नानाभूतं निषेधति ॥ 581 ॥

अभिन्नसुगुणस्तोममन्वजानाद्धि सा स्फुटं ।

न चेत् ब्रह्मणि जीवैक्यमपि शक्यमपोहितुं ॥ 582 ॥

अभिन्नधर्मधर्मित्वमपि शक्यं तवैक्यवत् ।

एकशेषोपि तद्वन्न लोकमर्यादयापि न ॥ 583 ॥

पर्यायशब्दावाच्यत्वादज्ञातत्वाद्विवादतः ।

ऐक्यं न ब्रह्ममात्रं ते गुण्यभिन्नगुणस्तथा ॥ 584 ॥

तच्च ब्रह्मणि सामर्थ्यविशेषात् घटते मम ।

तव तूक्तैक्यवादेस्मिन्निर्विशेषमतं गतम् ॥ 585 ॥

न विद्यते विशेषस्तु यस्मादित्यखिलेशताम् ।

निर्विशेषश्रुतिस्तस्मात् प्राहास्माकं तवापि च ॥586 ॥

व्यवहारादनुगतात्सर्वत्रानुगता सदा ।

जातिश्चैकाखिलार्थेषु सत्ताद्यावर्तते किल ॥ 587 ॥

इति ब्रवीति कोप्यज्ञः स प्रष्टव्यो विवेकिभिः ।

व्यवहारानुगमनं नाम तस्यैकता किमु ॥ 588॥

उत तस्यैक धर्मेणावाच्छिन्नत्वमुदीर्यते ।

एकाकारत्वमथवा वक्तव्यं नापरं हि तत् ॥ 589 ॥

नाद्यः प्रयोजकासिद्धेर्वादिनोरुभयोरपि ।

प्रतिवादिमतासिद्धेर्द्वितीयोपि न शोभते ॥ 590 ॥

अप्रयोजकतादोषस्तृतीयं पक्षमाक्षिपेत् ।

नानासमानव्यवहारेण धर्मोपि तादृशः ॥ 590 ॥

सिध्येत्परं तस्य सर्वत्रैकता किं कृता वद् ।

यक्षानुरूपो हि बलिः प्राचां वाचमनुस्मर ॥ 592 ॥

अखण्डजातेरेकैको यद्यंशो व्यक्तिषूच्यते ।

घटास्तर्हि घटांशाः स्युर्घटस्तु स्यान्न कश्चन ॥ 593 ॥

सम्पूर्णपटताशून्य पटांशेष्वंशधीरिव ।

सम्पूर्णजात्यनाधारे स्यादंशत्वप्रमा परम् ॥ 594 ॥

आकाशांशेषु चाकाशशब्दोक्तिरुपचारतः ।

अवकाशप्रदत्वाख्ययोगसम्भवतोपि वा ॥ 595 ॥

अनेकव्यञ्जकव्यङ्ग्या यथैका जातिरुच्यते ।

तथानेकघटत्वेभ्यो वागेकैव प्रवर्ततां ॥ 596 ॥

शब्दैक्यं च न ते पक्षे ततस्तत्रापि चैकताम् ।

स्वनियन्तुर्नियम्योसौ न सहेतेति मे मतिः ॥ 597 ॥

कारणत्वान्यनेकानि तत्र तत्र तवापि च ।

तदवच्छेदकस्यापि कथं न स्यादनेकता ।

यो गुरूणां गुरुस्तस्य गुरुतैव हि शोभते ॥ 598 ॥

व्यञ्जकानुगतोक्तिश्च जातिष्वनुगतैव वाक् ।

न किलैकेन नियता मध्ये यत्रेकता कुत ॥ 599 ॥

प्रलये सर्वदेशे च जातिर्नित्यास्ति चेत्तदा।

व्यक्त्यानायुतसिद्धा सा यावश्यं नापराश्रया ॥ 600 ॥

अबावेषु न किञ्चित्ते विशेषेषु न किञ्चन ।

एकं नियामकं तस्मात्ततोन्यत्रापि तद्वृथा ॥ 601 ॥

बहुकृद्बहुताव्याप्तस्तच्छून्यो याचते हि तां ।

एकः कुठारो यत्कार्यलक्षे व्यापारलक्षवान् ॥ 602 ॥

तस्मादनेककार्येषु कस्मादेको विमृग्यते ।

तत्तद्व्यक्त्यन्वयी सोपि तत्तत्कर्ता यतोन्ततः ॥ 603 ॥

अतो धर्मस्य धर्मैक्यं धर्मिणां चैकता भवेत् ।

इत्यादि दोषैर्दूष्यं न पोष्यमेवाखिलैर्बुधैः ॥ 604 ॥

एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति ।

इति श्रुतेर्घटो नील इति व्यवहृतेरपि ॥ 605 ॥

नेक्षेतोद्यन्तमितिवद्दृङ्ग्मात्रस्य निषेधने ।

नार्थासत्त्वमिति प्राह विपश्चित् किल कश्चन ॥ 606 ॥

तस्यापि सूते युक्तिस्त्री सदुत्तरकुमारकम् ।

यः परेषां कण्ठमणिं जिघृक्षति रणाङ्कणे ॥ 607 ॥

सूर्योदयोपि दिविजैर्दितिजैः स्वेन चेक्ष्यते ।

दोषादभीरुभिर्दोषमजानद्भिर्नरैरपि ॥ 608 ॥

नग्नस्त्री च स्वनयनैः स्वसखीनयनैरपि ।

रन्तॄणां रागकलुषचक्षुषा चेक्ष्यते किल ॥ 609 ॥

श्रुतिश्च चक्षुषैवैषां वीक्षणं नानुमन्यते ।

ईक्षादि चाक्षुषं ज्ञानमनुमानागमादिभिः।

अन्वमंस्त च तज्ज्ञानमतस्तद्बाधनं कुतः ॥ 610 ॥

दर्शनायोग्यधर्मेषु पृथक्त्वस्य च दर्शनम् ।

ज्ञानरूपं प्रसक्तं स्यात् पश्यार्थं तद्वदन्ति हि ॥ 611॥

तस्मात्तस्य निषेधे  स्यादप्रामाणिकतैव हि ।

अर्थाभावानिनाभूता निन्दा सर्वत्र चेदृशी ॥ 612 ॥

केशस्य पूर्णब्रह्मत्वादीशोपि स्वगतां भिदां ।

नान्वमन्यत तेनेयं केन मान्या मनीषिणा ॥ 613 ॥

यस्य कालविशेषे दृङ्निषेद्या स न बाध्यते ।

यस्य दृक्तु सदा नेति सामान्येनैव वार्यते ।

तत्रार्थस्यापि बाधः स्यादप्रामाणिकता हि सा ॥ 614 ॥

इदानीं न घटो दृष्ट इत्युक्ते न घटो मृषा ।

नरश्रृङ्गं नैव दृष्ट इत्युक्ते तु तदैव न ॥ 615 ॥

अतस्त्वदुक्तदृष्टान्तो विषमोभूद्विचारणे ॥ 616 ॥

द्रष्टव्यो नैव दोषोस्मिन्नित्युक्ते तददोषता ।

यथा सिद्ध्येत्तथा धर्मपार्थक्येक्षणशिक्षणे ।

धर्माणामपृथक्त्वञ्च सिद्ध्येदेव मम प्रभौ॥ 617 ॥

द्वितीयाभिनिवेशेन न भयं स्यादिति चोदिते ।

द्वितीयस्यैव बाध्यत्वं किं नोचुस्तव पूर्वजाः ॥ 618 ॥

त्रयाणामेकभावानां यो न पश्यति वैभिदाम् ।

इत्युक्तिस्ते भिदां द्वेष्टुमैक्यं पोष्टुं च भूः किल ॥ 619 ॥

सर्वत्र भेदमिथ्यात्वं साधयंस्त्वं दुराग्रही ।

कथमद्याद्वितीयस्मिन् भिदामाधातुमिच्छसि ॥ 620 ॥

किञ्चेयं श्रुतिरेवादौ नेहनानास्ति किञ्चन ।

इत्यादिना भिदामेनां निषेधति पदे पदे ॥ 621 ॥

अतस्तज्ज्ञाननिन्दापि मिथ्याभूतार्थदृक्त्ववतः ।

इति मन्यामहे तस्माद्धर्मा धर्म्यात्मकाः प्रभोः ॥ 622 ॥

धर्मिसत्त्वेपि यन्नश्येत्तत्र भेदोपि मृग्यते ।

भेदस्यासाधारणं हि कार्यं नाशाविनाशनं ॥ 623 ॥

अनश्यद्रिपुहस्तो यद्भिनत्त्यन्य विनाशिनम् ॥ 624 ॥

नाप्यैक्यवाक्यबलतो विरोधिगुणविप्लवः ॥ 625 ॥

विरोधिगुणसन्त्यागे स्यादैक्यं वाक्यगोचरम् ।

अविरुद्धो हि वाक्यार्थो योग्यता यदपेक्षिता ॥ 626 ॥

यदि वाक्योदिताद्वैतादेव तद्गुणमोचनम् ।

तदान्योन्याश्रयो दोषो वाक्यमर्थान्तरे नयेत् ॥ 627 ॥

किञ्चैकतोक्तिर्नायुक्ता सादृश्यैक्यस्य सम्भवात् ।

सत्यनित्यगुणत्यागः सर्वथा नोपपद्यते ॥ 628 ॥

अतः कस्य बलात्कस्य त्याग इत्येव चिन्त्यतां ।

न चेच्छून्योक्तिबलतः सत्यं ब्रह्मैव सन्त्यज ॥ 629 ॥

व्यावहारिकता सत्ता नित्यत्वं चिरकालता ।

गुणेषु यदि तर्हि स्याद्ब्रह्मण्यपि तथैव ते ॥ 630 ॥

सन्दिग्धश्रुतिपङ्कस्थनैर्गुण्यस्तम्भलम्बिनः ।

कथं सत्यतया श्रौतधर्माः स्युर्व्यावहारिकाः ॥ 631 ॥

तदाप्यबाधे सत्याः स्युर्बाधे तु श्रुत्यमानता ।

अतोभ्यर्थ्यः स एवार्थो यत्र वाग्द्वन्द्वमानता ॥ 632 ॥

कथं स्वरूपस्याबाधे शक्तिबाधो भवेद्वद ।

किमच्छिद्रघटे त्याज्या जलाहरणयोग्यता ॥ 633 ॥

स्वाभाविकी ज्ञानबलक्रिया चेत्याह हि श्रुतिः ॥ 634 ॥

पीलुपाकेन पिठरपाकतो वा गुणक्षयः ।

एकत्र धर्मिणो नाशोन्यत्रधर्मान्तरं किल ॥ 635 ॥

सति धर्मिणि धर्माणां क्वात्यन्ताभाव इष्यते ।

क्षणमुत्पन्नमगुणमित्यप्याहाग्रहात्परम् ।

तन्तुना पटनिर्माणे किं मध्ये शुक्लता गता ॥ 636 ॥

धर्मिणो धर्मविकृतौ विकारोस्त्येव कश्चन ।

अविकारी तु यो धर्मी तद्धर्मोपि ह्यविक्रियः ।

किमाप्यपरमाणूनां शुक्लतायाः क्वचित् क्षयः ॥ 637 ॥

द्विपाकप्रक्रियातोपि पाकायोग्ये न विक्रिया ।
हरिस्तु दहनान्तस्थः पीताग्निर्मुक्तचेतनः ॥ 638 ॥

अतस्तद्रूपसौन्दर्यशौर्यधैर्यपराक्रमाः ।
स्वातन्त्र्यवशितेशत्वपूर्वाः सर्वे गुणा ध्रुवाः ॥ 639 ॥

यदन्यवरतोऽप्राप्तास्तेन नौपाधिका इमे ।
अनौपाधिकधर्माणां धर्म्यनाशे न नाशनम् ॥ 640 ॥

ज्ञानं च मानसं क्षय्यं साक्षिज्ञानं त्वनश्वरम् ।
पूर्वनाशे परं ज्ञानं भावना वा मनस्यपि ॥ 641 ॥

मनस्त्वाणुत्वपूर्वास्तु धर्मास्तत्रापि धर्मिवत् ।
सति धर्मिणि धर्माणां सर्वथा कुत्र मुण्डनम् ॥ 642 ॥

धर्म्यसत्त्वेपि धर्मः सन् प्रतियोगित्वपूर्ववत् ।
सति धर्मिणि धर्माणामसत्त्वं तु न कुत्रचित् ॥ 643 ॥

रूप्यबाधे हि रूप्यत्वबाधो दृष्टो भ्रमेपि च ।
अतः श्रौतात्मधर्माणां बाधोप्येष न लौकिकः ॥ 644 ॥

घटादिधर्मास्तत्सत्तासमसत्ता यतोखिलाः ।
अतः सत्यात्मधर्माश्च सत्याः स्युर्नात्र संशयः ॥ 645 ॥

अदृष्टकल्पना कुर्याद्दुरदृष्टस्य कल्पनाम् ।
सत्या नित्यास्ततो धर्माः सत्ये नित्ये च धर्मिणि ॥ 646 ॥

ध्वनिस्तूपाधितो जातो नासौ स्वाभाविको गुणः ॥ 647 ॥

त्रिक्षणस्थायि यत्प्राहुः शब्दं बुद्धिं च कर्म च ।
अतोपि न ध्वनिर्व्योम्नि स्वभावो नश्वरोह्यसौ ॥ 648 ॥

अणुत्वं परमाणोर्यन्महत्त्वं महतोपि च ।
अवकाशप्रदत्वं यद्गगनस्य कदा न तत् ।
अतः स्वाभाविका धर्मा नश्येरन् धर्मिणः क्षये ॥ 649 ॥

श्रुतौ स्मृतौ च कीर्त्यन्ते धर्माः स्वाभाविकाः हरेः ।
सत्या नित्या स्वभावाश्च ये धर्मास्ते न मायिकाः ॥ 650 ॥

अविद्यया कथं विद्या शक्तिस्तेजो बलं धृतिः ।
अमायिकब्रह्मवत्तद्धर्माः सर्वेप्यमायिकाः ॥ 651 ॥

सत्यत्वाच्च स्वभावत्वान्नित्यत्वात् ब्रह्मवत्सदा ।
अमायिका ब्रह्मधर्मा इति स्यादनुमापि नः ॥ 652 ॥

स्वनिष्ठधर्मपाधातुः स्यादुपाधेरुपाधिता ।
मायाभिन्नत्वाजडत्वसत्त्वचित्त्वात्मतादयः ॥ 653 ॥

व्याप्तत्व नित्यशुद्धत्वमुक्तत्वाद्या हरेर्गुणाः ।

जडेष्वसम्भाविताः स्युर्मायोपाध्या हि ताः कथम् ॥ 654 ॥

हन्त मायाबद्धतापि न मायोपाधिका त्वयि ।

सर्वेश्वरत्वपूर्वं तत् कः कुर्वीत महाप्रभौ ॥ 655 ॥

निरीक्षतो यस्य दृष्टिर्माययाण्वपि नाज्यते ।

इत्याह पञ्चमस्कन्धे तद्द्रष्टृत्वादयः प्रभोः ।

स्वाभाविका भवेयुर्हि तदभावः कदा वाद ॥ 656 ॥

किञ्चोपाधिर्बिम्बमेव प्रतिबिम्बस्य शोभते ।

स्वधर्माधायकत्वेन मायादिः स्फटिकादिवत् ।

निमित्तमात्रं तत्सङ्गात्तन्नाम्ना भण्यते परम् ॥ 657 ॥

तस्माद्ब्रह्मस्थसुगुणा एव तत्प्रतिबिम्बके ।

दृश्येरन्नान्यतस्ते स्युः सूर्यकश्रीर्हि सूर्यतः ॥ 658 ॥

बिम्बस्य गुणसर्वस्वमनौपाधिकमेव हि ।

तन्नाशनाशितद्ध्रौव्ये ध्रुवमवाभवद्धि तत् ॥ 659 ॥

प्रतिबिम्बस्य सर्वस्य यद्बिम्बं ब्रह्म तद्धि मे ।

तच्च सत्यं च नित्यं च निर्गुणं स्यात्कदाचन ॥ 660 ॥

सगुणप्रतिबिम्बेस्मिन् बिम्बत्वाद्रुद्रपुष्पवत् ।

स्वाभाविकगुणं ब्रह्म किं तेभून्नानुमानतः ॥ 661 ॥

स्वाभाविकी ज्ञानबलक्रिया चेत्याह तच्छ्रुतिः ।

यन्मूलं सगुणं ते स्यात् स एवास्मकमीश्वरः ॥ 662 ॥

अतः सगुणमेवार्थ्यं त्वयापि च मयापि च ।

निर्गुणाशां त्यज भज श्रीशं मे सगुणं प्रभुम् ॥ 663 ॥

वचसां गौरवायैव सगुणद्वयकल्पनम् ।

न चेत्स्यात्सिद्धसगुणभजने गौरवं तव ॥ 664 ॥

अस्तु मायाविना मायादर्शितं वस्तु मायिकम् ।

मायाविदेहेन्द्रियेच्छाप्रयत्नादित्वमायिकम् ॥ 665 ॥

एवं चामायिकमभूद्धरेर्देहेन्द्रियादिकम् ।

शक्ति सौन्दर्यधैर्यादिभार्याभवनपूर्वकम् ॥ 666 ॥

गुणिनां हि गुणस्तुत्या स्वस्यापि स्यान्महाफलम् ।

यन्ममावसितं भारस्यार्धं गुणनिरूपणे ॥ 667 ॥

विश्वान्तःपातिनो ह्युक्तस्यास्य यत्सत्यताप्यभूत् ।

लोकदृष्ट्यैव न पुनः श्रुतिस्मृतिविचारणात् ॥ 668 ॥

नित्यज्ञानबलैश्वर्यभोगोपकरणाच्युत ।

इति तुष्टाव तत्स्रष्टा पञ्चरात्रे निजं प्रभुम् ॥ 669 ॥

न यत्र माया तत्रापि महिमा स्मर्यतेस्य तत् ।

उल्लङ्घ्य लोकमर्यादां धर्मत्यागः कथं प्रभौ ॥ 670 ॥

अतः स्वाभाविकं सर्वं ज्ञानैश्वर्यादिकं हरेः ।

कथं तस्य निवृत्तिः स्याच्चैतन्यस्यानिवर्तने ॥ 671 ॥

तद्धर्मबाधायोगेन बाध्यं स्यादैक्यमेव ते ।

अर्तापत्तिस्तवैवाभूदनर्थापत्ति कारणं ॥ 672 ॥

वृथैव गुणसन्त्यागे वैदुष्यं ते गमिष्यति ।

अत्यागे महिमाध्रौव्यान्निर्गुणं स्यात्कदा तव ॥ 673 ॥

अतोनवसराद्दुःस्थमश्रौतं च परोदितम् ।

ब्रह्मैष नित्यो महिमेत्याद्या वाक् तत्र तत्र हि ॥ 674 ॥

एको दाधार विश्वानि भुवनानीति चापरा ।

तं स्तौति सर्वाधारत्वात् परंब्रह्म स एव हि ॥ 675 ॥

सर्वस्यधारता सर्वव्यापिता केशवस्य चेत् ।

अन्यद्ब्रह्म किमर्थं ते व्यर्थत्वादपि तद्गतम् ॥ 676 ॥

यो नः पिता विधातेति सृष्टिश्चाश्रावि केशवात् ।

अतो भुक्त्यै न ते ब्रह्म मोक्षमिच्छेज्जनार्दनात् ॥ 677 ॥

एक एवेश्वरस्तस्य भगवान् विष्णुरव्ययः ।

इति स्मृतेर्नापि मुक्त्यै व्यर्थमेवाभवत्ततः ॥ 678 ॥

व्याप्तं चैतन्य युग्मं चेद्ब्रह्मणि द्वैतकल्पनात् ।

अनर्थश्च भवेत्तस्माद्ब्रह्मैको विष्णुरेव हि ॥ 679 ॥

प्रागुक्तयुक्त्या सगुणनैर्गुण्यं यन्मृतौ च न ।

अतोन्यन्निर्गुणं वाच्यं तदा ब्रह्मद्विता न किं ॥ 680 ॥

एवं चावसराभावदुःस्थं व्यर्थमनर्थदम् ।

विष्णोरन्यत्परम्ब्रह्म को विद्वान् वक्तुमर्हति ॥ 681 ॥

**नास्ति नारायणसमं न भूतं न भविष्यति ।**

**एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहं ॥ 682 ॥**

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।

क्षरः सर्वाणि भूतानि कूटस्थोक्षर उच्यते ॥ 683 ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।

यो लोकत्रयमाविश्य भिभर्त्यव्यय ईश्वरः ॥ 684 ॥

यस्मात् क्षरमतीतोहमक्षरादपि चोत्तमः ।

अतोस्मि लोके वेदे च प्रतिथः पुरुषोत्तमः ॥ 685 ॥

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।

मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ 686 ॥

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।

जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ 687 ॥

रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः ।

ब्रह्मा मामाश्रितो नित्यं नाहं कञ्चिदुपाश्रितः ॥ 688 ॥

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।

वेदशास्त्रात् परं नास्ति न दैवं केशवात्परम् ॥ 689 ॥

इति भारतवाक्यानि स्पष्टीकुर्वन्ति तं प्रभुम् ॥ 690 ॥

उपक्रम्याखिलेशत्वं पुरा नारायणस्य यत् ।

मध्येभ्यस्तं तदेवांतेप्युपसञ्जह्रुरञ्जसा ॥ 691 ॥

तस्माद्भारतवाक्यानां लक्ष्मैकार्थसिद्धये ।

विष्णोरत्युत्तमत्वाख्यमर्थमाहेति सिद्ध्यति ॥ 692 ॥

नारायणपरा वेदा नारायणपरा मखाः ।

नारायणपरा योगा नारायणपराः क्रियाः ॥ 693 ॥

नारायणपरा ज्ञानं नारायणपरं तपः ।

नारायणपरो धर्मो नारायणपरा गतिः ॥ 694 ॥

सृजामि तन्नियुक्तोहं हरो हरति तद्वशः ।

विश्वं पुरुषरूपेण परिपाति त्रिशक्तिभृत् ॥ 695 ॥

स एव भगवान् लिङ्गैस्त्रिभिरेतैरधोक्षजः ।

स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः ॥ 696 ॥

तमुपागतमालक्ष्य सर्वे सुरगणादयः ।

प्रणेमुः सहसोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः ॥ 697 ॥

तत्तेजसा हतरुचः सन्नजिह्वाः स साध्वसाः ।

मूर्ध्र्युधृताञ्जलिपुटा उपतस्थुरधोक्षजम् ॥ 698 ॥

अप्यर्वाग्वृत्तयो यस्य महित्वे स्वभुवादयः ।

यथामति गृणन्ति स्म कृतानुग्रहविग्रहं ॥ 699 ॥

देवासुराणां मघवान् प्रधानस्तस्य शङ्करः ।

तस्य ब्रह्मा प्रभुस्तस्य स्वयं नारायणः किल ।

द्विजानां देवतानां च यो देवः स्वयं किल ॥ 700 ॥

निमित्तमात्रमीशस्य विश्वसर्गनिरोधयोः ।

हिरण्यगर्भः शर्वश्च कालाख्यारूपिणस्तव ॥ 701 ॥

सरस्वत्यास्तटे राजन्नृषयः सत्रमासत ।

वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् ॥ 702 ॥

तच्छ्रुत्वा मुनयः सर्वे विस्मिताः मुक्तसंशयाः ।

भूयांसं श्रद्दधुर्विष्णुं यतः शान्तिर्यतोऽभयम् ॥ 703 ॥

इत्याद्यनन्तवाक्यानि सन्ति भागवते स्फुटम् ।

सर्वोत्तमपरब्रह्मभावे नारायणस्य हि ॥ 704 ॥

समस्तधर्मशून्यं तन्निर्गुणं कुत्र कथ्यते ॥ 705 ॥

सत्यं शौचं दया दानं त्यागः सन्तोष आर्जवम् ।

शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ 706 ॥

ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो धृतिः स्मृतिः ।

स्वातन्त्र्यं कौशलं कान्तिः सौभगं मार्दवं क्षमा ॥ 707 ॥

प्रागल्भ्यं प्रश्रयं शीलं सह ओजो बलं भगः ।

गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोनहङ्कृतिः ॥ 708 ॥

इमे चान्ये च भगवन्नित्या यत्र महागुणाः ।

प्रार्थ्या महत्त्वमिच्छद्भिर्नच यान्ति स्म कर्हिचित् ॥ 709 ॥

तेनाहं गुणपात्रेण श्रीनिवासेन साम्प्रतम् ।

शोचामि रहितं लोकं पाप्मना कलिनेक्षितम् ॥ 710 ॥

इति भागवते स्पष्टं धराधर्मकथान्तरे ।

गुणानां नित्यताभ्यासान्निर्गुणं स्यात्कदा वद ॥ 711 ॥

महागुणान् स्थापयन्ती महीयसि मही हरौ ।

जडतुच्छगुणाभावं नैर्गुण्योक्तेर्गतिं ददौ ॥ 712 ॥

**मय्यनन्तगुणेऽनन्ते गुणतोनन्तविग्रहे ।**

**यदासीत्तत एवाद्यः स्वयम्भूः समभूदजः ॥713 ॥**

इति भागवते कृष्णो निःसङ्ख्यान् स्वगुणानपि ।

अनन्तानाह देहांश्चाप्यनन्तानवतारगान् ॥ 714 ॥

देशतः कालतश्चैव गुणतोपि ह्यनन्तता ।

अतस्त्वन्निर्गुणब्रह्म कस्मिन् देशे कदा भवेत् ॥ 715 ॥

सर्वेभ्यो देशकालेभ्यः प्रायस्तत्तु बहिष्कृतं ।

लज्जया शशशृङ्गस्य मध्येलीनमभूत्सदा ॥ 716 ॥

समस्त धर्मशून्यं च ब्रह्मान्यत्किल वर्तते ।
स्वय तद्धर्शनात् सर्वधर्मशून्यो भवेत्किल ॥ 717 ॥

यदा मानेन तेनेदं साध्यते मोक्षसिद्धये ।
दृश्यते च तदा मानमेयता ज्ञानदृश्यता ॥ 718 ॥

इति धर्मद्वयं प्राप्तं तत्पदेन च वाच्यता ।
लक्ष्यता वा यतोवश्यं तेन प्राप्ता पदार्थता ॥ 719 ॥

व्यावृत्त्यै शशश्रृङ्गस्य वस्तुत्वं सर्वथा तव ॥ 720 ॥

अतस्तत्साधयन्नेव तद्रूपमवसादयन् ।
साधकश्चासि तस्य त्वं बाधकश्चेति किं परैः ॥ 721 ॥

मृण्मयस्य हि लिङ्गस्य मज्जनं रूपमार्जनम् ।
न चेत् प्रमाणशून्यत्वाद्गतमस्नेहदीपवत् ॥ 722 ॥

ब्रह्मशब्देन चाप्युक्ता गुणबृंहिततैव हि ।
अतस्तत्पदयोश्च स्यात् परस्पर विरुद्धता ॥ 723 ॥

यदि ज्ञापनमात्रेण पुनस्तेषां निवृत्तता ।
मानशक्तेः पुनः प्राप्त्या निर्गुणं ते कदापि न ।
तद्गानां ज्ञापकत्वे तु नोक्तदोषो निवर्तते ॥ 724 ॥

अन्यगानां ज्ञापकत्वे ज्ञाप्यस्याप्यन्यनिष्ठता ।

असतो ज्ञापकत्वे स्याज्ज्ञाप्यमप्यसदेव हि ॥ 725 ॥

आरूपितेन धूमेन सिध्येदारोपितोऽनलः ।

शूद्रीप्रसूतपुत्रस्य शूद्रता लोकसम्मता ॥ 726 ॥

व्यावहारिकसत्वं तु राजाश्वखुरताडनम् ।

सशेषबाधाद्यदतिक्रूरं निश्शेषबाधनम् ॥ 727 ॥

ब्रह्मज्ञानेन बाधो हि सर्वबाधो भवन्मते ।

ब्रह्मप्रमाबाध्यता च  व्यावहारिकसत्यता ॥ 728 ॥

त्रिकालासत्त्वसाम्ये तु किं ज्ञानान्तरतः फलम् ।

परप्रतारणेन स्याद्दोषोधिकतरस्तव ॥ 729 ॥

किञ्च बाधस्य बाध्यत्वे गुणानां स्यादबाध्यता ।

बाधस्याबाध्यतायां तु सदद्वैतमतं गतम् ॥ 730 ॥

तस्यापि ब्रह्मरूपत्वे पुनर्धर्मित्वमापतेत् ।

जडत्वं भावसापेक्षप्रतीतित्वमभावता ।

इत्याद्यभावधर्माणां ब्रह्मण्येव प्रसक्तितः ॥ 731 ॥

अभावधर्मशून्यत्वे निषेधत्वं च तस्य न ।
निषेधप्रतियोगित्वं गुणानां नेत्यबाध्यता ॥ 732 ॥

बोध्यं चेन्निर्गुणत्वं स्यान्निर्गुणत्वं न सिद्ध्यति ।
न बोध्यं निर्गुणत्वं चेन्निर्गुणत्वं न सिद्ध्यति ॥ 733 ॥

अतः शुभगुणाम्भोधिर्हरि सर्वेश्वरेश्वरः ।
ततः परतरं नान्यदिति सर्वं मनोरमम् ॥ 734 ॥

एष निष्कण्टकः पन्था यत्र सम्पूज्यते हरिः ।
कुपन्थं तं विजानीयात् गोविन्दरहितागमम् ॥ 735 ॥

इति भारतवाक्यं हि गोविन्दरहितागमम् ।
कुपन्थं वक्त्यतोप्यासीन्निर्मूलं निर्गुणं तव ॥ 736 ॥

अवैष्णवपुराणानामवैष्णवमतस्य च ।
अवैष्णव श्रुतीनां च कुपथत्वमभूदहो ॥ 737 ॥

हरेर्भिन्नत्वपूज्यत्वस्वामित्वप्रतिपादिका ।
निष्कण्टका माध्वशुद्ध पद्धतिश्चेति सिद्ध्यति ॥ 738 ॥

सम्यक्त्वार्थोपसर्गोसावसम्यत्त्वं निषेधति ।
सत्योभूत्तेन भेदादिरस्तं तत्समपूजनम् ॥ 739 ॥

शैवं ब्राह्मं वैष्णवं च पुराणमखिलं यतः ।

अतस्तेभ्यः पुराणेभ्यो यद्बहिस्तच्छ्रुतेर्बहिः ॥ 740 ॥

ब्रह्मविष्णुशिवेभ्योपि ह्यन्यद्ब्रह्म मतं तव ।

न हि लोकस्य सम्मत्या पुराणं तत्र किञ्चन ॥ 741 ॥

षट्कं षट्कं पुराणानां राजसं तामसं किल ।

षट्कं तु विष्णुविषयं सात्विकं मोक्षदं किल ॥ 742 ॥

पाद्मस्य पूर्वकाण्डस्तु पूर्वपक्षो भवेद्ध्रुवम् ।

यतः पञ्चपुराणेभ्यः सात्विकेभ्यो बहिष्कृतः ॥ 743 ॥

विस्तरोस्य प्रमेयस्य ह्युत्तरत्र भविष्यति ।

तत्सात्विकपुराणोक्तो विष्णुर्ब्रह्मस्मृतेर्बलात् ॥ 744 ॥

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।

बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यति ॥ 745 ॥

इति स्मृतेः सत्पुराणभारतोक्तप्रकारतः ।

यच्छ्रुतेर्योजना तस्माद्विष्णुर्ब्रह्मश्रुतेर्बलात् ॥ 746 ॥

वेदे रामायणे चैव पुराणे भारते तथा ।

आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते ॥ 747 ॥

मां विधत्तेऽभिधत्ते मां विकल्प्योऽपोह्य इत्यहं ।

इत्यस्या हृदयं साक्षान्नान्यो मद्वेद कश्चन ।

वेदैश्च सर्वैर्वेद्योहमेवेत्यवदधार हि ॥ 748 ॥

पूर्वाद्भारतवाक्याच्च परात् भागवतोदितात् ।

स्पष्टगीतोक्तितः सर्ववेदार्थौ विष्णुरेव हि ॥ 749 ॥

वेदमध्यगता निर्गुणोक्तिरप्याह तं प्रभुम् ।

निर्गुणो निष्कलोनन्तोऽभयोचिन्त्योचलोच्युतः ।

इति विष्णोर्दिव्यनामसहस्रे पठनादपि ॥ 750 ॥

श्रुत्याख्यराजकन्या यत्सर्वास्मृतिसखीवशा ।

अतस्तदुक्तमार्गेण सा व्रजेन्नत्वदुक्तितः ॥ 751 ॥

किञ्चाखण्डार्थवादं ते स्मर वाक्यं पदानि च ।

यत्र स्वार्थविशिष्टार्थपरं नैव हि किञ्चन ॥ 752 ॥

यस्मात्त्वदुक्तवाक्यार्थस्त्वयैव त्याजितोखिलः ।

तस्मादैक्यं नैव सिद्ध्येन्निर्गुणत्वादिकं च ते ॥ 753 ॥

इत्थं ह्यनशनेनैव श्रुतीस्त्वं तु जिघांससि ।

सत्यं कदशनेनापि नित्या सा वाग्जिजीविषेत् ॥ 754 ॥

सर्वार्थार्थपरित्यागात् सङ्कोचं को न मानयेत् ।
अतो निर्गुणवाग्वव्रे हरिं त्रिगुणवर्जितम् ॥ 755 ॥

विमतः परमो मुक्तः परमात्मा घटादिवत् ।
मुक्तत्वाद्भावधर्माणामपि धर्मित्यबाधिता ।
अनुमा सगुणब्रह्मसाधिका बाधिका तव ॥ 756 ॥

बन्धाभावाधिकरणो मुक्तोह्यत्रविवक्षितः ।
बन्धश्च चेतनस्यैव न घटे नापि मोचिते ॥ 757 ॥

अभावद्वैतवादे ते कथं नाभावधर्मिता ।
अव्याहतमतिर्मुक्ते बन्धाभावं न को वदेत् ॥ 758 ॥

मुक्तत्वं नास्ति चेत्तर्हि बद्धत्वेनैव धर्मवान् ।
बद्धपूरुषवत् स्याद्धि व्याहतिस्तु तवाधिका ॥ 759 ॥

पराङ्गीकारसिद्धेन हेतुना परदूषणम् ।
भक्तेषु करुणाबन्धबद्धस्तु स्यान्ममापि हि ॥ 760 ॥

नोभयं चेद्द्वयाभावाद्भावधर्मी घटादिवत् ।
बन्धो बन्धध्वंसरूपमुक्तत्वं च न यत्परे ।
नित्यमुक्तेनापि घटे ततः का मे क्षतिर्वद ॥ 761 ॥

अभावाधारत्वतो वा भावधर्मी कपालवत् ।
समस्तधर्माभावेपि ह्यभावाधारता दृढा ॥ 762 ॥

यतश्चाभावरूपोसौ विना साध्यं न गच्छति ।
अतो नासिद्धिशङ्कास्य नानैकान्त्यं च कुत्रचित् ॥ 763 ॥

गच्छन् स्वाभावदो यस्मात्तिष्ठंश्च स्वाश्रयत्वकृत् ।
गान्धर्वोद्वाहशीलस्य कुत्रस्याद्व्यभिचारिता ॥ 764 ॥

मुक्तत्वं भावधर्मो यत्तत्सत्वे धर्मवान्न किं ॥ 765 ॥

अभावाधारतात्मायमर्धनारीश्वरो यतः ।
तत्स्वाधारे स्थले मूर्धभूषां योषां न किं दिशेत् ॥ 766 ॥

नित्यत्वं धर्मशून्यत्वं सरूपत्वमबाध्यताम् ।
ब्रह्मण्यानन्दरूपत्वमनानन्दविरोधिताम् ।
ज्ञानरूपत्वमज्ञानशून्यतां नित्यशुद्धताम् ॥ 767 ॥

धर्मानेतान्विमुक्तानामप्यवश्यमपेक्षिताम् ।
को वा निवारयेद्वादी शून्यत्वस्यनिवारकान् ॥ 768 ॥

व्यावहारिकमस्तीतिव्याहतेर्मूलभूरियम् ।
त्रिकालनास्तिता सेति ह्यस्तितानास्तिताप्यभूत् ॥ 769 ॥

मुक्तत्वव्याहतिश्च स्याद्यावहारिकसङ्गमे ।

मुक्तादिः स्यान्मुक्तितादिर्नैति च व्याहतेर्गृहम् ॥ 770 ॥

किं व्याहतिपुरन्ध्रीणां पाणिग्रहणमस्ति ते ॥771 ॥

विप्रः स्याद्विप्रता नैव गोमान् स्याद्गौर्न काचन ।

धनी नैव धनं चेति कोनून्मत्तो वदेद्वद ॥ 772 ॥

तस्मान्निर्गुणतावाणी व्याहतिस्वैरिणीगृहम् ।

इदं नैव विशेत् साध्वी त्वस्सङ्गात् प्रविशेद्यदि ॥ 773 ॥

स्वैरिणीसङ्गदोषेण स्वयं च व्याहता भवेत् ।

यत् स्वोक्तनिर्गुणत्वाख्यगुणेनैव व्यरुध्यत ॥ 774 ॥

यदि ब्रह्मणि नैर्गुण्यं धर्मं स्वार्थं समर्थयेत् ।

अनुमानुग्राहकं सा मानं तर्हि भविष्यति ।

न स्थापयेच्च नैव स्यात् साधिका बाधिका मम ॥ 775 ॥

न हि छत्रिपदं राजभृत्ये छत्रमनादधत् ।

धर्मं निर्मूलयेत्तस्य छत्रछायाविरोधिनं ॥ 776 ॥

न हीयं पूतनावाणी या शब्देनैव भीषयेत् ॥ 777 ॥

अतो निष्कारणं ब्रह्मधर्मानेतान् मनोरमान् ।
निषेधतो गतिः सा स्याद्याधर्मैर्नैव साध्यते ॥ 778 ॥

सुखरूपमितीयं वाक्सुखरूपत्ववादिनी ।
तद्योगाद्रूपमप्याह न सा हि स्वाग्रहानुगा ॥ 779 ॥

विप्ररूपत्वशून्यो हि न शूद्रो विप्ररूपकः ।
सुखरूपत्वशून्यं यत्सुखरूपं च नैव तत् ॥ 780 ॥

सुखरूपार्थ सद्भावे कथं तच्छब्दलक्षणा ।
जलप्रवाहरूपेऽर्थे किं गङ्गापदलक्ष्यता ॥ 781 ॥

अतो मुक्तिरमुक्तिः स्यादियं तार्किकमुक्तिवत् ।
मुक्तत्वहेतोरुच्छित्तिः साध्याभावे ततो ध्रुवा ॥ 782 ॥

एवं च निर्गुणं ब्रह्म निर्गुणादिश्रुतेरपि ।
उक्तरीत्या बहिर्भूतमश्रौतमभवद्ध्रुवम् ॥ 783 ॥

श्रुतिस्त्रीसङ्गशून्यं तद्ब्रह्म भिक्षुरभूत्तव ॥ 784 ॥

अन्यापोहेन तत्सङ्गे छद्मस्त्रीसङ्गदोषतः ।
भ्रष्टस्वधर्ममित्यार्यैस्त्यक्तं बाह्यानुपाश्रयत् ॥ 785 ॥

अस्मद्ब्रह्म प्रतिद्वन्द्वं सर्वमानमनोरमम् ।
अनन्तसुगुणस्तोममुखेन परितो दिशम् ।
अपारोपनिषन्नारीमुखान्याचुम्ब्य जृम्भते ॥ 786 ॥

अतोऽनुकूलतर्काख्यमन्त्रिणा सर्वतो दिशम् ।
पालिता मेऽनुमानाख्यराजाज्ञा राजतेतराम् ॥ 787 ॥

अतः श्रुतिपुराणस्था निर्गुणाख्या हरिं प्रभुम् ।
निर्गुणब्रह्म मद्दासीसङ्घेवासीन्नमत्प्रियम् ॥ 788 ॥

अहं पतिव्रतैवासं तत्रोपक्रमवागियम् ।
उपसंहारवाक्येयं सदा त्वत्पक्षपातिनी ।
साक्षिणीति निगत्यात्ममनःशौद्ध्यं प्रबोध्य च ॥ 789 ॥

अन्यार्थशून्या मान्यार्थमुत्त्वा शरणमीयुषी ।
स्वस्वामिनो गुणान् हित्वा जग्रास प्राकृतान् गुणान् ॥ 790 ॥

नैर्गुण्येनैव गुणिता नैर्गुण्यं च न चेन्नञौ ।
सगुणत्वं स्थिरीकृत्य विरुद्धार्थत्वकारकौ ॥ 791 ॥

बद्धसेतुनिरूढाम्भः सेतुभङ्गे स्रवेद्ध्रुवम् ।
यथा हि निर्गुणत्वस्य (त्यागे)च्छेदे सर्वगुणागमः ।
घटाभावक्षयो नाम घटस्यागतिरेव हि ॥ 792 ॥

सङ्कोचे परसङ्कोचः श्रेयान् मुख्यार्थलाभतः ॥ 793 ॥

कपिञ्जलाधिकरणन्यायानुसरणादपि ।
अनन्तसुगुणच्छेदात्त्रिगुणच्छेदनं वरम् ॥ 794 ॥

किञ्च निर्गुणतां स्वार्थं क्षिपन्तीं सगुणश्रुतिः ।
अबाध्यस्वार्थवर्गेण कपोले ताडयिष्यति ॥ 795 ॥

यद्यभावोस्तिभावस्याप्यभावाभावता न किं ।
सर्वं नास्तीति वदता किमभावोपि रक्ष्यते ॥ 796 ॥

नेह नानेति वाक्यार्थरूपत्वाच्चेत्ततोपि किं ।
अर्थत्यागे श्रुतेरप्रामाण्यं स्यादिति धीर्यदि ।
गुणश्रुतीनां बह्वीनां नाप्रामाण्याद्बिभेषि किं ॥ 797 ॥

एवं सगुणवाद्युक्तयुक्तित्यागो न मे गुणः ।
इति मत्वा निर्गुणाख्या भेजे हरिपदाम्बुजम् ॥ 798 ॥

किञ्च निर्गुणशब्देन लक्ष्यं चेन्निर्गुणं कथम् ।
मुख्यार्थबाधमूलैव लक्षणेति सतां मतम् ॥ 799 ॥

वाच्यत्वं न परो वक्ति तेन स्यान्मे गतिर्वृथा ।
इत्याद्यालोच्य सा वाणी प्राणेशमतमन्वगात् ॥ 800 ॥

वाच्यत्वेनैव गुणिता वाच्यत्वेनिर्गुणोक्तितः ।

लक्ष्यत्वेनैव गुणिता लक्ष्यत्वे निर्गुणोक्तितः ।

नोभयं चेदशाब्दत्वधर्मेण स्याद्धि धर्मिता ॥ 801 ॥

व्यावहारिकतायां च बाधाद्धर्मो न सोऽर्थकृत् ।

गुञ्जापुञ्जाग्निना कुञ्जे किं जायेत हिमौषधं ॥ 802 ॥

इति सर्वं समालोच्य श्रुतिः सा व्याहतेर्भयात् ।

अव्याहतगतिं विष्णुं अव्याजस्नेहतोऽभजत् ॥ 803 ॥

मृषा चेन्निर्गुणत्वं स्यात्सगुणत्वश्रुतेर्बलात्।

सत्यासगुणता तर्हि सिद्ध्येदद्वैतवर्तव ॥ 804 ॥

अतत्वावेदकं वाक्यं न हि तत्वस्य बाधकम्।

अतत्वतत्वयोश्चैव न विरोधोऽस्ति कश्चन ॥ 805 ॥

न मृषा निर्गुणत्वं चेन्निर्गुणत्वश्रुतिर्गता ।

तेनैव सगुणत्वाप्तेर्भावमात्रनिषेधने ।

अन्योन्याभावभेदस्य पट्ट बन्धो भविष्यति ॥ 806 ॥

बन्धध्वंससदाभावौ विरुद्धौ यत्सदातनौ ।

मन्त्रिणौ मन्त्रशक्त्या तं सदा बोधयतो नृपम् ॥ 807 ॥

भटौ चाग्रेसरौ तस्य रिपुसेनामुखागतौ ।
अल्पज्ञत्वबहुज्ञत्वाभावौ चोभयपार्श्वगौ ॥ 808 ॥

पृथक्त्वं तु गुणं भावभेदं हन्त्वैक्यवाक् तव ।
अभावधर्मवद्भेदोप्यभावात्माऽस्तु निर्भयः ॥ 809 ॥

अन्योन्याभावातिरिक्तं पृथक्त्वं तत्ववादिना ।
निषेद्धुं शक्यते जीवे विभागाख्याभिधा तथा ॥ 810 ॥

तयोरन्य इति प्रोक्तस्त्वन्योन्याभाव इष्यते ।
श्रुतिप्रामाण्यरक्षायै नैर्गुण्ये त्वद्विवेकवत् ॥ 811 ॥

आत्महत्येव यल्लोके परहत्यापि दूषणम् ।
अतः स्वव्याहतेर्भीतौ भयं भेदश्रुतेर्नकिं ॥ 812 ॥

ज्ञातत्वाभावधर्मित्वपूर्वात्सा न बिभेति किं ॥ 813 ॥

व्यवस्थितादियं तत्त्वं पदार्थत्वाच्च ते श्रुतिः ।
कथं न भीता भेदं वा विशेषं वा विना वद ।
विशेषो नास्ति भावस्ते भेदाऽभावो गतिर्ध्रुवा ॥ 814 ॥

व्यावहारिकभेदाच्च नात्र तत्त्वं पदार्थता ।
यत्सत्ययोरैक्ययोग्यचितोरेव कथा तव ॥ 815 ॥

यद्वा ब्रह्मस्थितैक्यस्य भावरूपस्य तद्रिपोः ।

निर्गुणोक्तिः शिरश्छिन्द्यात्तेनैवास्याः पराभवे॥ 816 ॥

सर्वज्ञसर्वशक्तित्वश्रुतिरर्थबलोर्जिता ।

पट्टं बध्नाति भेदस्य हन्ति चास्य विरोधिनः ॥ 817 ॥

किञ्च सङ्कोचमार्गेण पलायनपरां श्रुतिं ।

प्रबलानन्तसगुणश्रुतिः कोणे क्वचित् क्षिपेत् ॥ 818 ॥

व्यावहारिकता चात्मधर्माणां स्यात्तदैव हि ।

यद्यहं प्रतिषेधामि नोचेत्ते स्युरबाधिताः ॥ 819 ॥

अहं च मुख्यतः स्वार्थपरैवान्यविरोधिनी ।

न हि गङ्गापदं लक्ष्ये तीरे स्वार्थविरोध्यपि ।

तीरत्वघोषावासत्वपार्थिवत्वादिकं क्षिपेत् ॥ 820 ॥

अतः शाब्दत्वादिधर्मबलादन्यनिषेधिका ।

कथं तानेव बाधेहं हसिष्यति सहोदरी ।

कृतघ्नं दूषयन्ती वागुपजीव्यविरोधिनीम् ॥ 821 ॥

बाध्यस्य चोपजीव्यत्वमबाध्यं चोपजीवकम् ।

न श्रुतं न हि सत्सर्पो रज्जुसर्पोपजीवकः ॥ 822 ॥

ततोपि निर्गुणत्वं न स्वोपजीव्यस्य बाधकम् ॥ 823 ॥

तस्माच्छाब्दत्व बोध्यत्व धर्मित्वादि गुणानुगा ।
एकत्र च्छिन्नधारेण कुठारेण परं वने ॥ 824 ॥

तज्जातीयं कथं चिन्द्यां मन्दाशङ्कितदुर्गुणान् ।
छिनद्मि मन्दधारापीत्यगान्निर्गुणवाग्बहिः ॥ 825 ॥

उपजीव्यसजातीयाः सर्वेपि ह्युपजीव्यवत् ।
भर्तुः सहोदराः सर्वे किं न पोष्याः स्वभर्तृतत् ॥ 826 ॥

किञ्च सर्वज्ञत्वपूर्वापूर्वसर्वगुणा हरौ ।
तत्तच्छ्रुतिप्रसक्ताश्चेन्निषेध्याः स्युर्न चान्यथा ॥ 827 ॥

तत्तच्छ्रौतपदान्येषां प्रसक्त्यै स्युस्तदैव हि ।
यदि मुख्यतयैवैतानभिदध्युर्गुणानपि ॥ 828 ॥

मुख्यवृत्तिश्च गुणिनि तत्तत्सत्तामपेक्षते ।
कथं तत्रैव तद्धर्मसत्तापेक्षावती पुनः ॥ 829 ॥

तांस्तत्रैव निषेधामि याऽहं तदुपजीविनी ।
यदा यत्र घटस्तत्र तदा किं तन्निषेधनम् ॥ 830 ॥

इत्थं प्रसञ्जकं वाक्यं यस्मादासीत् प्रसाधकम् ।

अतोपि सा श्रुतिः सर्वाद्युपजीव्यैव मे भवेत् ॥ 831 ॥

बिभेमि तद्विरोधाय त्रिगुणास्तु जडात्मकाः ।

जीवेषु प्रमिता भ्रान्त्या प्राप्ता ब्रह्मणि निर्मले ।

निरवद्यश्रुतिस्थेम्ने निषेध्या इत्यगाद्बहिः ॥ 832 ॥

अभावशेषे याप्याशा सुगुणद्रोहिणां हरेः ।

तस्याश्चोक्तात्मधर्माणां पक्षपातो भयङ्करः ॥ 833 ॥

अभावे गौरवं प्राहुर्भावे च लघुतां बुधाः ।

चित्रं श्रुत्यङ्गना धत्ते शिलां न किल मालिकाम् ॥ 834 ॥

भावो हि योषितां भूषा भावो वाचां च भूषणम् ।

तं भावं वाग्वधूरेषा दूषयेत् केन हेतुना ॥ 835 ॥

किञ्च किञ्चनशब्दस्य भावं यो वेत्ति कञ्चन ।

अभावशेषं सकथं दोषं न मनुते बुधः ॥ 836 ॥

स्वप्याहतिभयात् स्वार्थनाभावं यर्हि वारयेत् ।

न मारयेत् तर्हि नित्यां स्वां च भावस्वाभाविनीं ॥ 837 ॥

मानत्वधर्मनाशः स्याद्भावप्रतिषेधने ।
धर्मिनाशो भवेद्धन्त भावार्थप्रतिषेधने ॥ 838 ॥

सति धर्मिणि धर्मस्य चिन्तामाहुर्विपश्चितः ।
धर्मिनाशाद्भयं नोचेद्धर्मनाशेन किं भयम् ॥ 839 ॥

यदि तत्वज्ञानतायै न बोध्यस्य निषेधनम् ।
तदर्थमेव तद्योग्यबोधकं च न बाध्यताम् ॥ 840 ॥

वक्तृत्वगुणबाधे हि श्रुतेर्बाधे न बोधकम् ।
नेह नानेति वाक्ये तु साक्षाद्बाधान्न बोधकम् ॥ 841 ॥

सतोपि दोषतो दोषः स्वासत्त्वे किं न दुष्टता ॥ 842 ॥

धर्मी सर्वात्मना रक्ष्यो न चेत् ब्रह्मैव शाम्यति ।
तदिहेति पदात्सच्चेत्तत्पदं चात एव सत् ॥ 843 ॥

व्यावहारिकसत्त्वेन बोधकं यदि बोधकम् ।
व्यावहारिकसत्त्वेन बोध्यस्याप्यस्तु बोध्यता ॥ 844 ॥

घटधीरिव तद्धीश्च स्यादविद्यानिवर्तिका ॥ 845 ॥

एवं च यदि बोध्यस्य तत्वतायां भरो मम ।
बोधकस्यापि तद्भावे भरोऽवश्यमपेक्षितः ॥ 846 ॥

न हि वन्ध्या सुतं सूते नाप्यात्मानं जिघांसति ।

अतो भावाभावतया न विभागो ममोचितः ॥ 847 ॥

तद्यत्र नास्ति तत्तत्र निषेधामीति वागियं ।

त्रैगुण्यवर्जिते विष्णौ गुणत्रयमदूषयत् ॥ 848 ॥

ह्रीमत्या मम सङ्कोचगमनं नैव दूषणम् ।

गुणिनां गुणनिन्दातु महादोषप्रदा किल ॥ 849 ॥

इति निर्गुणवाक् धर्मवशीकृतमतिः प्रभोः ।

धर्मनिर्मूलनं धर्मं न मेन इति मे मतिः ॥ 850 ॥

अपि चैकत्वधर्मस्य सत्त्वे भावगुणोस्ति ते ।

तदभावे गतं शास्त्रमैक्यमेकत्वमेव तत् ॥ 851 ॥

सुन्दोपसुन्दन्यायेन निर्गुणैक्यश्रुती मिथः ।

विरोधेन हते कुर्यान्मायामततिलोत्तमा ॥ 852 ॥

इत्यालोच्य नैर्गुण्यश्रुतिरैक्यश्रुतिं सखीम् ।

आदाय भारतीप्राणनाथं शरणमीयुषी ।

स्वमिथ्यात्वभयाभावात्तदुक्तार्थेष्ववर्तत ॥ 853 ॥

विद्वत्प्रयोगबाहुल्याच्छब्दस्यार्थोऽभिधीयते।
पदलब्यत्वतो नैव यद्वातद्वा निगद्यते ॥ 854 ॥

न हि पङ्कजशब्देन भेकं लोकोऽनुमन्यते।
किंवा सुवर्णशब्देन वह्निः केनापि कथ्यते ॥ 855 ॥

अशब्दे ते प्रयोगो न प्रयोगबहुता कुतः ॥ 856 ॥

श्रौतस्मार्तप्रयोगश्च हरावेव प्रदर्शितः ।
बलात्त्वया स नीतश्चेत् कूर्मरोम्ण्यपरो नयेत् ॥ 857 ॥

तत्तत्पदार्थसामर्थ्यानुपमर्देन शब्दतः ।
अर्थो बोध्यो न शब्दस्य सत्त्वादर्थोपमर्दनम् ॥ 858 ॥

गुरौ गुरुपदं हि स्यात् उपदेशादिकैर्गुणैः ।
भारेण तु शिलायां स्यात् कल्पनायां बहुत्वतः ॥ 859 ॥

कन्यकानुदरेत्युक्ते काष्ठं संयोजयन्ति किं ॥ 860 ॥

अशोभनगुणैः पूर्णे प्रयुक्ता निर्गुणाभिदा ।
सुशोभनगुणानेव निषेधति न तान् गुणान् ॥ 861 ॥

सशूभनगुणैः पूर्णे प्रयुक्तं तत्पदं हरौ ।
अशोभनगुणानेव निषेधति न शोभनान् ॥ 862 ॥

यस्मात्तत्पुरुषः श्रेष्ठः तस्मादगुणसंज्ञया ।
गुणोऽप्रधानो नेतीशे प्रोक्ता सर्वप्रधानता ॥ 863 ॥

अप्रधानं जगदिदं सृष्टौ यस्माद्विनिर्गतम् ।
स निर्गुणो हरिः सर्वस्रष्टृत्वाख्यमहागुणः ॥ 864 ॥

शिवः शक्तियुतः शश्वत्त्रिलिङ्गो गुणसंवृतः ।
वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ 865 ॥

ततो विकारा अभवन् षोडशामीषु वर्त्मसु ।
उपधावन् विभूतीनां सर्वासामश्नुते गतिं ॥ 866 ॥

हरिस्तु निर्गुणः साक्षात् पुरुषः प्रकृतेः परः ।
स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥ 866 ॥

इति भागवते प्रोक्तो हरिरेव हि निर्गुणः ।
समस्तगुणसम्पूर्णं श्रुत्यास्मृतिसमार्थया ।
केवलो निर्गुणश्चेति व्यापी देवः स कथ्यते ॥ 869 ॥

अतस्त्रीगुणशून्यत्वाद्गुणसर्वस्वबृंहितः ।
स एव निर्गुणं ब्रह्म शुद्धं ब्रह्म स एव नः ॥ 869 ॥

नैर्गुण्याख्यो महामोक्षो यत्पादभजनाद्भवेत् ।

शबलं ब्रह्म स किल गङ्गा यत्पदसङ्गतः ।

सद्यः शुद्धिकरी नृणां सो शुद्धः किल दुर्धियां ॥ 870 ॥

मोक्षस्य निर्गुणत्वं च त्रैगुण्योज्झितत्तैव हि ।

समस्त धर्मशून्यत्वे मोक्षाय प्रयतेत कः ॥ 871 ॥

धर्माय यशसेऽर्थाय ज्ञानाय यतते जनः ।

लुप्त्यैसमस्तभाग्यानां कोनून्मत्तः प्रवर्तते ॥ 872 ॥

सगुणप्रीतिलभ्यस्य नैर्गुण्यं तद्वदेव हि ।

यथोपास्ते तथैवासौ भवतीति हि वेदवाक् ॥ 873 ॥

न हि निर्गुणशब्दोयं चिन्मात्रस्य विवक्षया ।

भाविनैर्गुण्यदृष्ट्या वा शिवस्यापि प्रसक्तितः ॥ 874 ॥

अतो नैर्गुण्यशब्दोयं हरौ त्रिगुणवर्जनात् ।

मुक्तोपि तेन तच्छब्दो गुणबद्धाः शिवादयः ॥ 875 ॥

प्रकृतेः पारगत्वोक्त्या निर्गुणोतद्गुणो हरिः ।

प्राकृताहङ्कृतेरुक्त्या सगुणस्तद्गुणः शिवः ॥ 876 ॥

इत्येव सर्वथा वाच्यं न चेद्व्यर्थै विशेषणे ।

गुणसंवरणं चोक्तं भवेदावरणैर्गुणैः ॥ 877 ॥

सम्पत्तेः प्राकृतत्वेन तद्बद्धोपासनेन सा ।

तद्धीना तु न सेत्याह या वाक्सा वक्ति मन्मतम् ॥ 878 ॥

उपक्रमानुगुण्यार्थमर्थोत्रावश्यको ह्ययम् ।

न चेत् प्रक्रमरोधेन वाक्यं स्यान्मत्त्यभाषितम् ॥ 879 ॥

किञ्चाप्राकृतपुंसोस्य चिन्मात्राकारता ध्रुवा ।

स च सार्वज्ञादिधर्मा सर्वधर्मच्युतिः कदा ॥ 880 ॥

स सर्वदृगिति प्रोक्तो वाक्येस्मिन्नेव सद्गुणः ।

एकः साक्षी देव इति श्रुतिवाक्येपि सद्गुणः ।

अतस्त्वदर्थकथने स्वविरुद्धैव वाग्भवेत् ॥ 881 ॥

निषेद्धुमनुवादश्चेत् सिद्धं मम समीहितम् ।

अनूद्यते निर्गुणत्वमेक इत्यादिकोक्तितः ।

निषेद्धुमिति यच्छक्यं वक्तुं तद्वन्मयापि हि ॥ 882 ॥

अभावस्यानिषेधात्मा भावोपि हि विदां मते ।

बहुत्वान्मन्निषेधानां प्रबलत्वं च विद्यते ॥ 883 ॥

समुच्चिनोति किं श्रौतश्चशब्दोन्यनिषेधने ।
यद्येकता पक्षपाती मध्यस्थातिक्रमस्तदा ॥ 884 ॥

सञ्ज्ञारूपो गुणः सा हि धर्ममात्रगुणाः परे ।
प्रबलेन कृतस्नेहो दुर्बलान्नस गच्छति ।
स्थानभ्रंशं स्वार्थनाशं सह ते न हि सोऽव्ययः ॥ 885 ॥

एकत्वरूपमैक्यं च निषेध्यं स्यात्कथञ्चन ।
एकपात्रस्थपक्वान्ने पाकश्चैकविधो भुवि ।
अतस्तत्तद्गुणौघेषु त्यागोऽत्यागश्च नेष्यते ॥ 886 ॥

आदिरन्त्येन सहितस्तन्मध्यपतितान् गुणान् ।
सङ्गृह्णात्यन्ततो नान्त्यः प्रत्याहारमनुस्मर ॥ 887 ॥

दूरस्थमर्त्यपानीयपानार्थं सेतुभेदने ।
तृषितानेकमध्यस्थतृप्तेः पश्चात्स तृप्यति ॥ 888 ॥

तव प्रियैक्यरक्षार्थं सङ्कोचे तु नञः कृते ।
मम प्रियगुणौघस्य रक्षा पूर्वं भविष्यति ॥ 889 ॥

इयं राजवधूः कामचारा वराङ्गना न ते ।
स्वेच्छानुसारसञ्चारो मानच्छेदाय ते भवेत् ॥ 890 ॥

व्यासः श्रौतगुणाम्भोधौ नैकत्यागं च मन्यते ।

सर्वधर्मोपपत्तेश्चेत्याह यत्स्वयमञ्जसा ॥ 891 ॥

वेदवेदार्थमखिलं वेदव्यासः सतां पतिः ।

सहि श्रुतिसतीकण्ठसूत्रसूत्रकृदीश्वरः ॥ 892 ॥

नञो विभज्ययोगे तु श्रौतं तत्तन्निषेधनम् ।

समस्त नञ्वभागस्यायोगादार्थं निषेधनम् ॥ 893 ॥

अतस्तवार्थिकादस्मान्निषेधान्मे विधिः श्रुतः ।

बलीयांस्तन्निषेधाय दुर्बलोऽसौ न शक्नुते ॥ 894 ॥

एक इत्यादि शब्दानां नञ्योगादर्शनाच्छ्रुतौ ।

सम्भावितक्रियायोगाद्भवतीत्येव योजना ॥ 895 ॥

न चेद्वाक्यमपूर्णं स्यात्समस्तपदसंस्थितः ।

निषेधार्थो यतः शब्दो बुधैश्चेत्तुं न शक्यते ॥ 896 ॥

पुनस्तेषामेव बाधे वाक्यं स्यान्मत्तभाषितम् ।

अतस्त्रिगुणशून्यत्वान्निर्गुणत्वं बलाद्भवेत् ॥ 897 ॥

अनुवादकलिङ्गं च यत्तदित्यादिकं न हि ।

भिन्नवाक्यतया यत्र निषेधस्तत्र तद्भवम् ।

एकवाक्ये निषेधे तु नञ् लिङ्गमितरत्र तत् ॥ 898 ॥

मानसिद्धानुवादे तु तेनैव स्युर्गुणा हरेः ।
निषेध्यश्च न ते मानामानतादूषणं शृणु ॥ 899 ॥

निर्गुणत्वे स्थिरे तेनमानानां स्यादमानता ।
तत्सत्वे चाविरुद्धं ते निर्गुणत्वं स्थिरं भवेत् ॥ 900 ॥

निर्गुणोक्तौ गुणोक्त्यैव निषेध्यस्यानुवादनात् ।
एकत्वाद्यनुवादत्वकथा चेयं वृथा तव ॥ 901 ॥

वेदैकप्राप्तसार्वज्ञपूर्वसर्वगुणा हरेः ।
अमानत्वार्हवेदान्यमानप्राप्तौ न कश्चन ॥ 902 ॥

वाक्यार्थे तेप्यसन्देहात्समयं प्राप्ततापि न ।
कथमित्थमपूर्वार्था गुणोक्तिरनुवादिका ॥ 903 ॥

श्रुतिप्राप्तस्य च श्रुत्या निषेधे मानता हता ।
एतद्बाधे सावकाशे निर्गुणैक्यागमे तव ।
विश्वासः स्यात्कथं नृणां गजे मग्ने क्व गर्दभः ॥ 904 ॥

हिमस्य भेषजं ह्यग्निरिति श्रुत्याप्यनूदिते ।
किमेका मानता वह्नेः शीतता वा भवेद्वद ॥ 905 ॥

अतोनुवादमात्रेण नार्थस्य स्याद्विदूषणं ।
बहुप्रमाणसंवादाद्दार्ढ्यमेव भविष्यति ॥ 906 ॥

निषेद्धुमनुवादश्च मानसिद्धस्य नेष्यते ।
निषेध एवान्यगामी स्वादहिंसाश्रुतौ यथा ॥ 907 ॥

दृढप्रत्यक्षसिद्धौष्ण्यं यानुवक्ति श्रुतिः सती ।
न मुञ्चति निषेद्धुं सा यथायागवियोगभीः ॥ 908 ॥

एवं हरेर्हि सार्वज्ञं सा श्रौतं न निषेधति ।
दिव्येन्द्रियशरीरत्वं दिव्येच्छां च कृपालुताम् ।
नित्यत्वं ब्रह्मगुरुतां नित्यानन्दत्वमेव च ॥ 909 ॥

वंशस्य यद्धशार्धं तत् स्मात्मनोपि भवेदिति ।
श्रौतस्यास्य त्यागसाम्यात् स्वार्थत्यागप्रसक्तितः ॥ 910 ॥

उपदेष्टुरभावेन स्वाप्रचाराच्च शङ्किता ।
जगत्कर्तुरभावेन चाद्ये तृणामभावभीः ॥ 911 ॥

सर्वशक्तेरभावे च दैत्योपद्रवशङ्किता ।
सर्वेश्वरत्वाभावे च ब्रह्मासाध्याकृतेर्भयात् ॥ 912 ॥

इत्थं श्रौतगुणेभ्यो यच्छ्रुत्या एव प्रयोजनम् ।

अतस्तेषामभावं च सा स्वाभावं मनुते सती ॥ 913 ॥

प्राक् सृष्टेश्च सतस्तस्य सेहे नाज्ञानकार्यताम् ।

बाधां न सेहे नित्यां स्वां नित्यं धर्तुं यदीप्सितम् ॥ 914 ॥

अमुख्यनित्यतायां च ब्रह्मते स्यात्तथैव हि ।

विष्ठितं ब्रह्म यावत्ते तावद्वाक्किल विष्ठिता ॥ 915 ॥

उपसर्गस्तयोः सर्गो नोत्सर्गश्चेति शंसति ।

तस्माच्छ्रुतेर्हि विच्छेदे बधिरं ब्रह्म ते भवेत् ॥ 916 ॥

बधिरं च न तज्जीवेत् सलज्जमिति मे मतिः ॥ 917 ॥

अतः कर्तृत्वभोक्तृत्वफलदातृत्वपूर्वकात् ।

श्रुत्युक्तसर्वसर्वस्मादन्यत्किञ्चिन्निषेधति ॥ 918 ॥

स्वयं सङ्कुचितान्नोपि मानी ज्ञातिसुखं दिशेत् ।

अनेकश्रुतिरक्षार्थं पदमल्पनिषेधि तत् ॥ 919 ॥

निषेधबलवत्त्वे तु भेदवाग्बाधिका तव ।

तादात्म्यप्रतिषेधत्वं भेदस्याखिलसम्मतम् ॥ 920 ॥

अन्धानां नास्तितावाक्यैर्बाध्यं स्यादस्तितावचः ।

शून्योक्तिर्ब्रह्मसत्त्वोक्तेर्बाधिकेत्यतिसङ्गटम् ॥ 921 ॥

विरुद्धार्थमतोबाध्यमविरुद्धं न बाध्यते ।

अहेः पुच्छं हि कश्छिन्द्यान्मुखं छिन्दन्ति सर्वशः ॥ 922 ॥

सर्वधर्मैष सर्वज्ञः सर्वस्येशान इत्यपि ।

श्रुतयः स्मृतयो गायन् गुणानित्यादयो न किं ॥ 923 ॥

मय्यनन्तगुणेऽनन्ते गुणतोनन्तमविग्रहे ॥ 924 ॥

जन्मकर्माभिधानानि सन्ति मेऽङ्ग सहस्रशः ।

न शक्यन्तेनुसङ्ख्यातुमनन्तत्वान्मयापि हि ॥ 925 ॥

इत्यादि भगवद्वाक्यं श्लोक्यं स हि भुजङ्गजित् ॥ 926 ॥

किञ्चानिर्गुण इत्येव पदच्छेदे लसत्पदम् ।

वाक्यं स्यान्नाङ्गनिच्छेदस्तस्येत्यतिसमञ्जसम् ॥ 927 ॥

समयप्राप्तनैर्गुण्यत्याजनं च फलं भवेत् ॥ 928 ॥

श्रुतिः स्वोक्तगुणस्थेम्ने नैर्गुण्यं प्रतिषेधति ।

इति सङ्गतिरप्यस्ति वाक्यस्याप्येकवाक्यता ॥ 929 ॥

किञ्च निर्गुणतावाक्ये गुणमात्रनिषेधने ।
ज्ञानानन्दाद्यभिमतगुणानां स्यान्निषेधिका ॥ 930 ॥

यद्यभिन्नं सुखं ज्ञानं गुणाः सर्वेप्यभेदिनः ।
सन्तु नेहेति वाक्यस्य भयाद्भंगता हरेः ॥ 931 ॥

अनयैव गुणादीनामभेदोक्त्यास्त्वभिन्नता ।
गुणत्वोक्तिशतैश्चोक्तैर्गुणताप्यस्तु का क्षतिः ॥ 932 ॥

निर्गुणोक्तिश्च बिन्नानां गुणानामस्तु बाधिका ॥ 933 ॥

भेदाभेदप्रमाणाभ्यां भेदाभेदौ यथा तव ।
फटादौ गुणकर्मादेस्तथात्र स्तां गुणैकते ।
नामुख्या तत्र गुणता यथात्रापि तथैव न ॥ 934 ॥

नेह नानेति भेदस्य साक्षादत्र निषेधनात् ।
गुणत्वघटकं चान्यत्कल्प्यमङ्कुरकर्तृवत् ॥ 935 ॥

नह्यबाधितकार्यस्य दृष्टहेतोरभावतः ।
अभावं मन्यते लोकाः किन्त्वन्यमनुमन्यते ॥ 936 ॥

न शक्यन्तेनुसङ्ख्यातुमनन्तत्वान्मयापि हि ।
इतीरियन् गुणादीनामानन्त्यं स्वगुणादिषु ।
गुणादित्वं च किं तत्वमुत्सिसृक्षति स प्रभुः ॥ 937 ॥

पक्षीकृत्य गुणान् हेतूकृत्यानन्तत्वमञ्जसा ।
अनन्तजीवसंस्थात्मतनुवत्सङ्ख्ययोज्झितिम् ॥ 938 ॥

प्रसाधयन् प्रभुः पक्षासिद्धिं हेतोरसिद्धताम् ।
यतो न सहते तस्मादनन्तत्वं गुणाश्च ते ॥ 939 ॥

नोपचारादितः सिद्धास्तत्सर्वं च स सर्वदा ।
आत्मशक्तिविशेषेण सर्वथा विर्वहेत्परम् ॥ 940 ॥

यतः सूत्रकृदप्याह विचित्रां शक्तिमात्मनि ।
धनी वक्ति धनानन्त्यमनुवक्त्यनुयाय्यपि ॥ 941 ॥

प्रतिवक्ति कथं यस्तौ न श्रृणोति न पश्यति ।
अतो विष्णोर्गुणानन्त्यमभूत्सर्वमनोरमम् ॥ 942 ॥

मिथ्योपाधिकसार्वज्ञमिथ्यात्वान्नैकतेति चेत् ।
सत्यविश्वस्य सामर्थ्यादिति तस्योत्तरं वदेत् ॥ 943 ॥

सत्यत्वे यदि सन्देहो मिथ्यात्वे कस्य निश्चयः ।
कलहेन विरुद्धेऽस्मिंस्तत्सत्यत्वे न बाधकम् ॥ 944 ॥

घटोपाधिकवृत्तेश्च मनोरूपत्वमिष्यते ।
घटस्तु न मनोरूपो बाह्योसावान्तरं मनः ॥ 945 ॥

अतः सार्वज्ञैकतायां सर्वस्यैक्यं च नोच्यते ।
मिथ्यारजतदृष्टेश्च साक्षिणः सत्यता तव ॥ 946 ॥

मिथ्याभूतार्थसम्बन्धान्मिथ्याज्ञानं यदीष्यते ।
सत्येशज्ञानसम्बन्धादर्थाः सत्याः कथं न ते ॥ 947 ॥

तत्पादसङ्गीसलिलादशुद्धस्य हि शुद्धता ॥ 948 ॥

निर्दोषेश्वरचिद्योगात्सत्यता लोकसम्मता ।
अबाधितार्थसम्बन्धाद्बाध्यताशा वृथा तव ॥ 949 ॥

यदि सोपाधिकत्वं ते मिश्रणं क्षीरनीरवत् ।
तादा सर्वज्ञ योगीन्द्रहृदये स्याद्विदारणम् ॥ 950 ॥

शब्दाच्च शशश्रृङ्गस्य ज्ञाने श्रृङ्गी भवान् भवेत् ।
अत्यन्तासच्च ते ज्ञानं स्यात्तेन ह्यतिसङ्कटम् ॥ 951 ॥

ज्ञानेनान्तःस्थितेनैव बहिस्थजगतो यदि ।
सम्बन्धः कश्चिदेव स्यात्तदैक्ये किंनु बाधकम् ।
सौरालोको जगद्व्यापी मण्डलाभिन्न एव हि ॥ 952 ॥

किञ्च नानापदार्थानां भ्रमोपि ब्रह्मचित्तव ।
मिथ्यार्थज्ञानरूपं ते ब्रह्म किं नाभवत्तदा ॥ 953 ॥

सत्यार्थज्ञानरूपोसौ कथं मिथ्या मम प्रभुः ॥ 954 ॥

मिथ्यार्थज्ञानरूपत्वात्वद्ब्रह्मैवाभवन्मृषा ।
अतस्त्वद्विषचूर्णेन तवैवाभूद्धि सङ्कटम् ॥ 955 ॥

अतो भगवतो धर्माः सर्वे सर्वेश्वरात्मकाः ।
तच्छक्त्या धर्मधर्मित्वमेकताऽनेकतादि च ॥ 956 ॥

तस्माद्गुणानृतत्वाशा नारीगर्भस्रवोप्यभूत् ।
नेह नानेति वाक्येन भिन्नस्यैव निषेधनात् ॥ 957 ॥

अतोस्मदुक्तसद्युक्तिशृङ्खलाभि पदे पदे ।
बद्धाया ब्रह्मसुगुणसर्वस्वद्रोहदोषतः ॥ 958 ॥

कारागृहनिविष्टाया निर्गुणोक्तेः न मोचकः ।
विनात्रिगुणशून्यत्वरूपार्थस्य प्रदानतः ।

नापरः कोप्युपायः स्यादिति सर्वस्य सम्मतम् ॥ 959 ॥

अभिन्नगुणसत्यत्वध्रौव्याद्ब्रह्मसुखादिवत् ॥ 960 ॥

अभेदेप्यन्यशेषो न यथा तव तथा मम।

अन्यथा तार्किको जीयान्मोक्षः स्यादप्रयोजकः ॥ 961 ॥

यथासुखाभाववादाद्भिन्नस्त्वं प्रतिवाद्यभूः ।

तथा निर्गुणतावादाद्गुणवादी भवाम्यहम् ॥ 962 ॥

गुणता गुणिता च स्यात् सुखता सुखिता यथा ।

आनन्दं ब्रह्मणो विद्वानित्यप्याह श्रुतिः स्फुटम् ॥ 963 ॥

यद्यमुष्योपचारत्वं जितं तार्किकबालकैः ।

दुःखाभावपरत्वं हि श्रुतीनां वक्त्यसौ खलः ॥ 964 ॥

अतो गुण्यात्मका एते गुणग्राह्या यथाश्रुतं ।

पर्यायशब्दावाच्यत्वं तवापि च ममापि च ॥ 965 ॥

अतस्तन्मात्रतैतेषां न वाच्या शब्दकोविदैः ।

प्रभोः शक्ति विशेषेण सर्वं तद्धि समञ्जसम् ॥ 966 ॥

निर्गुणत्वश्रुतिस्तस्मान्नैवं सद्गुणबाधिका ।

अधर्मधर्मदुःखेर्ष्याद्वेषादीन् प्रतिषेधति ॥ 967 ॥

यस्य यस्मिन् मनोद्वेषस्तद्गुणस्तेन नेक्ष्यते ।
न चेद्ब्रह्मानन्तगुणं कथं निर्गुणमब्रवीत् ॥ 968 ॥

यत्नः कृत्स्नोपि विज्ञानशक्त्याद्यर्थं हि योगिनाम् ।
सार्वज्ञ शौर्यसौन्दर्यपूर्वैश्वर्यामि कस्त्यजेत् ॥ 969 ॥

गुणोणुरपि सम्पोष्यो दोषो दूष्यो बुभूषिभिः ।
गुणांस्त्यजेत्कथं दोषान् भजेद्वा तत्परः प्रभुः ॥ 970 ॥

सर्वं हरतु सर्वस्वं विद्यां को विदुषो हरेत् ।
किं गुणांस्त्याजयन् विष्णोर्निर्गुणत्वं गुणं त्यजेत् ॥ 971 ॥

ज्योतिष्ट्वेन हि चन्द्रस्य स्वरूपज्ञानवान् पुनः ।
चन्द्रत्वेनैव तं ज्ञातुं कश्चन्द्र इति पृच्छति ॥ 972 ॥

अतः कश्चन्द्र इत्येष प्रश्नः प्रश्नविदां मते ।
किं लक्षणक इत्येव स्वार्थमर्थातुरो भजेत् ॥ 973 ॥

चन्द्रत्ववान् क इत्येव वाक्यस्यार्थो यतः स्फुटः ।
स्वरूपमात्रप्रश्नत्वं स्वरूपासिद्धमेव ते ॥ 974 ॥

एवं लक्षणवाक्यं च लक्षणं वक्ति नापरम् ।
अपृष्टोत्तरमेव स्याद्रूपमात्रनिरूपणे ॥ 975 ॥

अतो लक्षणवाक्यत्वं विरुद्धो हेतुरेव ते ॥ 976 ॥

सत्यज्ञानादिवाक्यं तद्विशिष्टब्रह्मतत्परम् ।
लक्षणप्रश्नवाक्यत्वाच्चन्द्रलक्षणवाक्यवत् ॥ 977 ॥

स्वरूपमात्रज्ञानस्य पदेनैकेन सम्भवात् ।
व्यर्थं पदान्तरं च स्याज्ज्ञातस्य ज्ञापनेन किं ॥ 978 ॥

यदि सत्यादिपदतो लक्ष्ये ब्रह्मणि केवलं ।
व्यावृत्तिः स्यादसत्यादेस्तेन सार्थक्यमिष्यते ॥ 979 ॥

तर्हि गङ्गापदाल्लक्ष्ये तीरेपि न्यायसाम्यतः ।
व्यावृत्तिः स्यादगङ्गायास्तीरे स्यान्मज्जनं सदा ॥ 980 ॥

अन्यव्यावृत्तिरपि हि तदा स्याद्यदि तत्पदम् ।
स्वार्थं समर्पयेत्तर्हि साप्यर्थाल्लभ्यते परम् ॥ 981 ॥

साक्षादन्यापोह एव न ह्यर्थो भवतो मते ।
अतः सत्यत्वपूर्वार्थं यदि ब्रह्मणि नार्पयेत् ।
कथं व्यावर्तयेद्ब्रह्म विपक्षे तूक्तमेव हि ॥ 982 ॥

किञ्च मुख्यार्थबाधे हि लक्षणा तेन सत्यता ।
ज्ञानतानन्तता चैव भवेद्ब्रह्मणि बोधिता ॥ 983 ॥

सत्यत्वरहितं ब्रह्म मिथ्यैव स्याद्घटादिवत् ।

सद्रूपमपि तन्न स्यात्तद्वत्तेनैव हेतुना ॥ 984 ॥

न चेच्छशविषाणं च सद्रूपं ब्रह्मवद्भवेत् ।

केवलान्वयिधर्मत्वात्सत्त्वे सत्त्वं च वर्तते ॥ 985 ॥

अतः सत्यत्वरहितं मिथ्यैव स्यान्न संशयः ।

शिरसो मुण्डने तस्माच्छिखामुण्डनमप्यभूत् ॥ 986 ॥

यदि सत्यपदेनापि ब्रह्मलक्ष्यं भवेत्तव ।

तर्हि तत्पदवाच्यं मे जगत्सत्यं भविष्यति ॥ 987 ॥

गङ्गापदेन या वाच्या सैव गङ्गा यतो नृणाम् ।

अतस्त्वल्लक्षणा सर्वजगतो रक्षणाय मे ॥ 988 ॥

ब्रह्मैक्यवाक्यमपि ते स्वरूपपरमेव हि ।

एवं चेद्द्वतमद्वैतममानत्वान्नृश्रृङ्गवत् ।

भेदश्च श्रुतिमुख्यार्थः सुस्थिरो भूदिति स्थितम् ॥ 989 ॥

दुर्जनः सज्जनस्यार्थमुज्जिहीर्षेच्छनैः शनैः ।

किं नोचुर्वेदवाच्यस्य स्वपदैरप्यवाच्यताम् ।

अन्धस्यान्ध्यं हि सन्दध्युरपदेपदसम्पदः ॥ 990 ॥

अलक्षणं किलार्थोर्थो लक्षणोक्तेर्न लक्षणम् ।
स्वयं भूत्वा स्वमातैव वन्ध्येत्यतिखलो वदेत् ।
व्यावर्तकोक्तिर्व्यावृत्त्यै न व्यावर्तक वाक्किल ॥ 991 ॥

नासां छित्वापि दुष्टः स्वामन्यस्याशकुनं चरेत् ।
सत्यादिपदमुख्यार्थः सत्यादन्यत्किलानृतम् ॥ 992 ॥

इच्छतोवृद्धिमल्पस्य मूलं नष्टं भवेद्ध्रुवम् ।
सत्वादिमुण्डने किं न लक्ष्यत्वाद्यैः सखण्डता ॥ 993 ॥

शान्तिकर्मणि वेतालोत्थानं स्यादबुधस्य हि ।
अखण्डत्वाद्यभावे तु सैवायाद्धि सखण्डता ॥ 994 ॥

परायुधैः परं छिन्द्याच्छस्त्रसिक्षाविचक्षणः ।
अवाच्यपदलक्ष्यत्वे मुख्यार्थावाच्यता क्षतेः ॥ 995 ॥

विरुद्धयोः सतोर्योगः स्वमूलाघातिनोर्भवेत् ॥ 996 ॥

मुनेः शक्त्या किं न वने वैरिणः सह शेरते ।
तच्छक्त्यापि न वैराग्यं कामेन सह तद्धृदि ।
बहिर्वा तपसो विघ्नकारिणः सन्ति राक्षसाः ॥ 997 ॥

अणुत्वं च महत्वं च तथैव घटयेच्छ्रुतम् ।

स्वैश्वर्यस्य विरोधीनि घटयेन्नात्मनि प्रभुः ॥ 998 ॥

अणिमा महिमा चैव गरिमा लघिमा तथा ।

यदैश्वर्यमतः शक्त्या घटयेदिदमात्मनि ॥ 999 ॥

अनन्तसुगुणस्तोममनन्ताकारसौभगं ।

तथाप्यनन्यतां तेशु सर्वैश्वैश्वर्यसिद्धितः ।

निजैश्वर्याभिवृद्ध्यर्थं घटयेच्छक्तितः प्रभुः ॥ 1000 ॥

बलज्ञानक्रियादीनां सिसृक्षासञ्जिहीर्षयोः ।

नित्यत्वे महिमोन्नत्या शक्तिव्यक्त्यात्मना स्थितिम् ।

स्वसामर्थ्यविशेषेण घटयेत् सर्वमीदृशम् ॥ 1001 ॥

भेदहीनेपि भेदस्य कार्यं यो घटयेच्छ्रुतम् ।

स सामर्थ्यविशेषो हि विशेष इति गीयते ॥ 1002 ॥

परप्रकाशो दीपो न किं स्वस्य प्रकाशकः ।

विशेषोऽन्यत्र निर्वाही स्वनिर्वाही कथं न सः ॥ 1003 ॥

बन्धं मोक्षं सुखं दुःखं भिन्नाभिन्नत्वमन्यतः ।

जन्मनित्यत्वमित्यादि महापापफलं नृणाम् ।

अतिनैच्यकरं स्वस्य घटयेत् कथमात्मनि ॥ 1004 ॥

शक्तः स्वदोषं प्रदहेद्दृह्णीयाच्चेत्त्वशक्तता ।
नृहेरेर्नखरक्रौर्यं किं स्वोदरविदारणम् ॥ 1005 ॥

अशन्ययो योगहेतोरदृष्टौ न ह्ययो न तत् ।
किं मृषा घटकादृष्टेर्बहुश्रुत्युक्तसद्गुणः ॥ 1006 ॥

अन्नं दद्द्धि पुरुषो दर्वीं काञ्चित् प्रकल्पयेत् ।
अभिन्नधर्मतां वेदो यथा तच्छक्तिकल्पकः ॥ 1007 ॥

मूलाभेदेपि कृष्णाद्या नानन्ताः किं न सन्ति किं ।
यथानन्ताश्च सन्तश्च न भिन्ना मूलसद्गुणाः ॥ 1008 ॥

अन्यार्थशून्या वाक्केत्स्यादयुक्तार्थाऽऽर्थिकार्थवाक् ।
यथेशाभिन्नगुणवागर्थाच्छक्ति विशेषवाक् ॥ 1009 ॥

गुणत्वस्य गुणित्वस्य तदभेदस्य चेश्वरे ।
प्रामाणिकस्य घटनाशक्त्यैव स्यात्सुखादिवत् ॥ 1010 ॥

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।
एवं धर्मान् पृथक्षश्यंस्तानेवानुविधावति ॥ 1011 ॥

इति श्रुतिर्यतो धर्मबाहुल्यप्रतिपादिका ।
निषेधति पृथग्भावमात्रं सैव विशेषवाक् ॥ 1012 ॥

आपातानुपपन्नार्था सोपपादकवाङ्चेत् ।
अमानं स्यान्नतद्युक्तमतस्तं च बलात् स्पृशेत् ॥ 1013 ॥

त्रिक्षणस्थायियागाख्यकर्मणः स्वर्गहेतुताम् ।
कालक्षेपेपि शंसन्ती यथार्थी सैव पुण्यवाक् ॥ 1014 ॥

न सहेत गुणश्लोकान् दोषश्लोकान् खलोर्जयेत् ।
त्यक्तानेकगुणोक्तीनां किं न वैगुण्यवाग्भरः ॥ 1015 ॥

निष्फलं जन्मिनां जन्म परलोकफलं न चेत् ।
यथा त्रिगुणशून्यत्वाद्गुणपूर्णोपि निर्गुणः ॥ 1016 ॥

ज्ञानादिगुणशून्यत्वं चेतनस्य न हि क्वचित् ।
अतो निर्गुणवाक्यार्थो न सर्वगुणशून्यता ॥ 1017 ॥

तस्माद्विष्णोर्गुणाः सर्वे नित्याः सत्याश्च सर्वदा ।
अनन्ताः श्रुतिसद्युक्तिसिद्धाश्चेत्यतिमङ्गलम् ॥ 1018 ॥

वादिराजाख्ययतिना साधिता युक्तिमल्लिका ।
गुणसौरभसर्वस्वं मुदे विष्णोर्न्यवेदयत् ॥ 1019 ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्वादिराज पूज्यचरणविरचितायां युक्तिमल्लिकायां गुणसौरभं सम्पूर्णं ॥

## शुद्धि सौरभं

महत्सु गुणसारेषु दोषान्वेषणधीर्मुधा ।

अनन्तगुणहृद्योपि निरवद्यो न किं हरिः ॥ 1 ॥

योसौ लघीयसो दोषो नासौ दोषो गरीयसः ।

अपि संहृत्य निखिलमपवादी किमच्युतः ॥ 2 ॥

यद्भावि तद्भवत्येव यदभावि न तद्भवेत् ।

कल्पान्ते तल्पकल्पं यत्पत्रमासीन्न पादपः ॥ 3 ॥

कृतिर्न कारणे यस्य तस्य कार्यं कतो भवेत् ।

लये सतः प्रागभावाभावान्न हि हरेर्भवः ॥ 4 ॥

नाभिजन्माविधिस्तस्य क्रोधाज्जातस्त्रिलोचनः ।

नारायणो मूलरूपि जातः कस्माद्विचार्यताम् ॥ 5 ॥

अतोभूद्देहलीदीपः प्रलये सत्त्वमीशितुः।

कल्पान्ते यल्लयं रुन्धे कल्पादौ जन्म च प्रभोः ॥ 6 ॥

पूर्णप्रवृत्तिरन्यार्थां न वै पूर्त्यर्थमात्मनः ।

तटाकोत्सिक्ततोयैः किं तटाकस्यैव पूरणम् ॥ 7 ॥

सुखस्यानन्तरं दुःखं भ्रमो न प्रमया सह ।
न हि पूर्णसुखज्ञानो दुःखभ्रान्त्यवकाशवान् ॥ 8 ॥

प्राग्जन्मार्जितदुष्कर्म दुःखमूलं ध्रुवं नृणाम् ।
न कर्मणा वर्धते यो नो कनीयान् कुतोस्य तत् ॥ 9 ॥

क्षुत्पिपासादि मर्त्यानामप्यामुक्तेर्न सर्वदा ।
बृहच्छरीरः किं भुङ्क्ते ब्रह्माण्डं यस्य रोमसु ॥ 10 ॥

महान् हि रक्षकोल्पस्य  महान्तं स न रक्षति ।
उद्धार महीमादौ वराहस्तं दधार कः ॥ 11 ॥

महान्तो हि कथां कर्तुं सञ्चरन्ति तथा तथा ।
अनन्तासनतः पुत्राऽऽनेतानीताबलः किल ॥ 12 ॥

मूलं यो वेत्ति कस्तस्य पत्रं सन्दर्शयेत्तरोः ।
यः सर्वगो न सो योगी तस्य दुःखप्रथा वृथा ॥ 13 ॥

सीताकृतानि व्यसनासीश्वरस्य कुतोस्य हि ।
स्त्रीकृतं कश्मलं रामो नाश्नुवीतेति च स्फुटम् ।
श्रीमद्भागवते प्रोक्तं निरवद्यस्ततः प्रभुः ॥ 14 ॥

यत्पञ्चमशिरश्छेदो बबाधेपि कपालिनं ।
तद्वधेप्यनघो योन्ते स किं रक्षोवधेऽघवान् ॥ 15 ॥

शक्तोपि राजा भृत्यस्य हस्तं सङ्गृह्य गच्छति ।
स्वनींतगद्रभश्वादेर्लङ्का शङ्कास्पदं किल ॥ 16 ॥

स्वयं भीरुर्गभीरस्य स्वभावं भवयेत् स्ववत् ।
नखभिन्नाब्जजाण्डस्य चिन्ता हन्तासुरात्किल ॥ 17 ॥

कुक्षौ यस्याखिलालोका लक्ष्यन्ते स्म शिशोः किल ।
जननं मरणं चास्य न युक्तं युक्तिविन्मते ॥ 18 ॥

न हि कल्पान्तसमयो यः स्वर्गारोहणक्षणः ।
न च कल्पादिकालोसौ यत्रावातरदच्युतः ॥ 19 ॥

यद्विप्राङ्घ्र्यङ्कनं वैकुण्ठस्थमूर्तौर्हि वक्षसि ।
तदेव देवकीगर्भजातस्य किल वक्षसि ॥ 20 ॥

अतस्तदेव हि भवेदिदं रूपं न चापरं ।
न चेत् कुप्यन्ति योधानां कलाकुशलमन्त्रिणः ॥ 21 ॥

प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् ।
आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम् ॥ 22 ॥

इति भागवते प्रोक्तामुद्धवोक्तिं न विस्मर ।
विस्तरोस्य प्रमेयस्य कृष्णकाव्ये प्रदृश्यताम् ॥ 23 ॥

ये पार्थरथसूतस्य विश्वरूपेरणात्पुरा।
विलग्ना दशनाग्रेषु चूर्णीभूताश्च सर्वशः ।
दृष्टास्तच्छरवेगेन छेदो वेधः कथं प्रभोः ॥ 24 ॥

पिशाचाविष्टदेहेपि प्रायश्छेदो न दृश्यते ।
मन्त्रेण कुण्ठिता धारा न छिनत्ति नरान् हि यत् ।
हरेश्छेदः श्रुतिप्रोक्तसार्वज्ञच्छेद एव तत् ॥ 25 ॥

ब्रह्माण्डकर्परच्छेदे यन्नखाग्रच्छिदापि न ।
को युक्तिमांस्तस्य विष्णोश्छेदं सम्भावयेच्छरैः ॥ 26 ॥

रोमछेदो जगच्छेदो यद्रोम्णि निखिलं जगत् ।
नियन्ता योखिलच्छेत्तुः स छेद्यः केन वा वद ॥ 27 ॥

स्वाहारस्य विच्छेदे दक्षं पशुपतेरपि ।
अच्छेद्यमकरोद्यस्तु तस्य छेदं करोति कः ॥ 28॥

अक्रम्योरसि दक्षस्य सितधारेण हेतिना ।
छिन्दन्नपि तदुद्धर्तुं नाशक्नोत्र्यम्बकस्तदा ॥ 29 ॥

शस्त्रैरस्त्रान्वितैरेनमनिर्भिन्नत्वचं हरः ।

विस्मयं परमापान्नो दध्यौ पशुपतिश्चिरम् ॥ 30 ॥

दृष्ट्वा संज्ञपने योगं पशूनां स पतिर्मुखे ।

यजमानपशोस्तस्य कायात्तेनाहरिच्छिरः॥ 31 ॥

इति भागवते प्रोक्तमतश्चित्रं किमुच्यते ॥ 32 ॥

यत्कृपालेशतस्त्रातं प्रह्लादं किल रक्षसां ।

चिच्छिदुर्नास्त्रशस्त्राणि कश्चिन्याात्तं महाप्रभुं ॥ 33 ॥

सन्ध्यर्थं हस्तिनपुरीं प्रविष्टं किल कौरवाः ।

न बद्धुमपि यं शेकुः कश्चिन्याात्तं महाप्रभुम् ॥ 34 ॥

अतोऽज्ञजनमोहाय नटिवद्दर्शयेत्परम् ।

सुधादृष्ट्यामृताशेषस्वसैन्योज्जीवनैकदः ॥ 35 ॥

नटो नाट्यकृते नारी नार्येवाज्ञस्य किं दृशा ॥ 36 ॥

गन्धस्य ज्ञापने चक्षुर्घ्राणानुसरणं चरेत् ।

उपनीतो यतो गन्धश्चक्षुषापि प्रकाश्यते ॥ 37 ॥

श्रौतार्थज्ञापने मानान्युपजीवन्ति यच्छ्रुतिम् ।

अतः श्रुत्येकगम्येऽर्थे श्रुतिरेव बलीयसी ॥ 38 ॥

तद्विरुद्धं तु यन्मानमुपजीव्यविरोधतः ।

न स्वार्थसाधकं तस्मादज्ञदृङ्म्नेशदोषदृक् ॥39 ॥

न हि मन्ददृशां दृष्ट्या रत्नस्यानर्घता गता ।

किन्तु मन्दैव दृग्रत्नपरीक्षा शास्त्रतो भवेत् ॥ 40 ॥

श्रुतिस्तु निरनिष्टोसौ निरवद्य इति प्रभुम् ।

स्पष्टमाचष्ट तत्कष्टं द्रष्टुमीष्टे क ईशितुः ॥ 41 ॥

न कर्मणा वर्धते यो नोकनीयान् परः प्रभुः ।

न भूत्यै नांहसो हत्यै तस्य यात्रा शिवार्चनम् ॥ 42 ॥

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।

नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ 43 ॥

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।

इति गीतावचनतः समाधत्स्व मनः सदा ॥ 44 ॥

ईजे च भगवान्रामो यत्रास्पृष्टोऽपि कर्मणा ।

लोकस्य सङ्ग्रहायेशो यथान्योऽघापनुत्तये ।

इति भागवतोक्त्या च स्वस्थचित्तः सदा भव ॥ 45 ॥

अथापि भगवद्दोषं वृथा यो मनुते नरः ।
तं दोषेषुः शिलाक्षिप्तदारुप्रोतशरोपमः ।
श्रुत्याकृष्टगुणोत्सृष्टेर्धानुष्कमनुधावति ॥ 46 ॥

तस्मात् स्वमूलरूपे च स्वावतारेषु च प्रभुः ।
अवद्यगन्धविधुरः इति सर्वं मनोरमम् ॥ 47 ॥

इदं  रूप्यं रूप्यतात्रेत्येवं वा भ्रमविग्रहः ।
अन्योन्यधर्मानध्यस्य चान्योन्यात्मकतां तथा ॥ 48 ॥

इति भाष्यकृतो भाषा तेन भ्रान्तिर्द्विरूपिणी।
तादात्म्यारूपरूपो वा धर्मारोपात्मिकापि वा ॥ 49 ॥

नाज्ञानमहमित्यस्ति नाज्ञानत्वं मयीत्यपि ।
भ्रमो ब्रह्मणि तेन स्यात्कथमज्ञानकल्पना ॥ 50 ॥

अज्ञोहमिति तु ज्ञानं सिद्धाज्ञानस्य वेदनम् ।
उक्ताकारद्वयायोगात् सिद्धिश्च भ्रमरूपिणी ॥ 51 ॥

नास्त्येवेति कुतोऽज्ञानं कल्पितं स्यादियं तु धीः ।
नाज्ञानकल्पनारूपा ततोऽज्ञानमकल्पितम् ॥ 52 ॥

नाज्ञानमन्यधर्मोयं ब्रह्मज्ञानैकवादिनः ॥ 53 ॥

अतद्वति च तद्वत्त्वज्ञानं चेत्स्यादयं भ्रमः ।

अज्ञातवच्च ते ब्रह्मतद्वत्ताधीः कथं भ्रमः ॥ 54 ॥

अज्ञानारोपतस्तत्र तद्योगस्याप्यभाववाक् ।

अज्ञानारोपमूलैव स च सर्वत्र दुर्लभः ॥ 55 ॥

अन्योन्यधर्माध्यासोस्ति तत्राध्यासस्तवापि न ।

अतो नाज्ञानसंसर्गारोपोप्ययमभूत्तव ॥ 56 ॥

तत्त्वैव सन्निकृष्टस्य सन्निकर्षे कथं भ्रमः ।

घटवद्भूमिघटयोः संयोगो यदकल्पितः ॥ 57 ॥

दोषाभावाच्च नाज्ञानभ्रान्तिर्युक्ता मते तव ।

तमो अन्यभ्रमदोषोपि न हि दोषः स्वदर्शने ॥ 58 ॥

तमोन्तरं च तमसः प्रमायै स्याद्भ्रमाय न ।

तेनाज्ञानान्तरं चाज्ञानस्योपोद्बलकं भवेत् ॥ 59 ॥

प्रमाया एव हेतुः स्यात्तद्भूयस्त्वे क्वतद्भ्रमः ।

अतद्वति हि तद्धीत्वे भ्रमः स्यान्नतु तद्वति ॥ 60 ॥

अनाद्यज्ञानवादे च तस्याज्ञानं न किञ्चन ॥ 61 ॥

किञ्च प्रातीतिकाज्ञानं कथं स्वभ्रनुकारणम् ।

भ्रमात्पूर्वो हि दोषः स्याद्दोषजश्च भ्रमो भवेत् ॥ 62 ॥

दोषे धीः स्याद्भ्रमाकारा भ्रमे सत्येव तच्च सत् ।

प्रातीतिकं भवेद्दोष इत्यन्योन्याश्रयो ध्रुवः ॥ 63 ॥

किञ्चाज्ञानाध्यासरूपी साक्ष्यनादिर्मते तव ।

जन्वैवास्य न युक्तं तद्दोषजत्वं तु दूरतः ॥ 64 ॥

अमानत्वस्वतस्त्यं स्याद्दोषाजन्यो भ्रमोपि चेत् ।

अतः प्रमीयमाणत्वात्त्वय्युज्ञानमकल्पितम् ॥ 65 ॥

तत्वज्ञानायोग्यताख्यदोषोऽस्त्यासुर साक्षिषु ।

तन्मूलत्वं च तज्ज्ञाने विशेषाद्घटते मम ॥ 66 ॥

निर्विशेषचितो दोषः कः स्याज्जन्म च किं तव ।

अज्ञानारोपवादस्तदज्ञानादेव केवलम् ॥ 67 ॥

अज्ञानारोपमूलस्ते शास्त्रविस्तृतपादपः ।

मूलस्य दुर्बलत्वे तु सोपि वाताहतः पतेत् ॥ 68 ॥

सत्याज्ञानभवं विश्वमसत्यं केन हेतुना ।

आम्रस्य बीजतः किं स्याद्विषवृक्षस्य सम्भवः ॥ 69 ॥

सत्याज्ञानागतो भेदो ज्ञानबाध्यः कथं तव ।

सत्याज्ञाननिवृत्तेश्चायोगान्मोक्षः कथं तव ॥ 70 ॥

अज्ञानासम्भवे क्व स्यात् प्रतिकर्मव्यवस्थितिः ।

ऐक्यस्यावरणाभावच्छास्त्रवेद्ये च किं भवेत् ॥ 71 ॥

अज्ञानासम्भवाद्ब्रह्मभ्रान्त्या सर्वं न कल्पितम् ।

अज्ञानासम्भवादेव शास्त्रं सर्वं गतं तव ॥ 72 ॥

किञ्चाज्ञानस्य विज्ञानमहमित्येव देहिनाम् ।

आशा ब्रह्माश्रिताज्ञाने पश्य किं केन सङ्गतम् ॥ 73 ॥

ऐक्यात्तदेव चेद्ब्राह्ममन्योन्याश्रयता तदा ॥ 74 ॥

ऐक्यसिद्धौ भवेदज्ञं ब्रह्म तस्याज्ञतावशात् ।

जीवभावे भवेदैक्यं ततोऽन्योन्याश्रयो न किं ॥ 75 ॥

तान्यहं वेद सर्वाणीत्युक्त्या कृष्णस्य सर्वदा ।

अस्ति सर्वज्ञताध्यक्षं न त्वज्ञानापरोक्षधीः ।

मनसाध्यातमेवार्थं वदेद्वाचा किलाखिलः ॥ 76 ॥

अतः सर्वज्ञताध्यक्षहर्यक्षस्य गुहामिमां ।

अज्ञानाध्यक्षहरिणी जैवी नैव विविक्षति ॥ 77 ॥

प्रत्यक्षमेषयोर्युद्धे तज्जैक्यं जम्बुकायते ।

तस्माद्ब्रह्माश्रिताज्ञानप्रत्यक्षं मरणेपि न ॥ 78 ॥

प्रत्यक्षेणाज्ञता सिद्धौ ब्रह्मणो ज्ञानरूपिणः।

अविद्यादुर्घटत्वेन घटना स्यात्कथ्चन ॥ 79॥

तद्सिद्धौ श्रौतसार्वज्ञस्यैवानुभवे सति ।

उपयन्तुरभावात्ते कुमारीभूषणं वृथा ॥ 80 ॥

मायां व्युदस्य चिच्छक्त्येत्युक्तिश्चश्रूः क्षणे क्षणे ।

उदूढामपि तां कन्यां हन्यादेवेति मे मतिः ॥ 81 ॥

स्वानर्हालङ्कृतिं तस्याः सहेत कथमैश्वरीं ।

नापि जीवस्य योग्येयमन्योन्याश्रयदोषतः ॥ 82 ॥

जीवोप्यज्ञानकल्प्यस्ते सोज्ञानस्य कथं मही ।

न हि भार्यैव भर्तारं सूते यत्नशतैरपि ॥ 83 ॥

जीवसिद्धौ तदाधारमज्ञानं ते प्रसिध्यति ।

अज्ञानसिद्धौ तत्कल्प्यो जीवः सिध्येन्न चान्यथा ॥ 84 ॥

यद्यज्ञानं विनैव स्याज्जीवोऽनादिः स्वतस्तदा ।

सत्यो जीवेशभेदः स्यात्तस्मादज्ञानकल्पितः ।

जीवोऽवश्यं त्वया वाच्यः कथं नान्योन्यसंश्रयः ॥ 85 ॥

जीवोपाधिरविध्यैव लयो सुप्तौ च वर्तनात् ॥ 86 ॥

अनादित्वे नानवस्थादोषस्य स्यात् क्वचिच्छमः ।

अन्योन्याश्रयदोषस्तु क्षोण्यां शून्यप्रतिक्रियः ।

यदङ्कुराद्धि यद्बीजं किं तद्बीजात्तदङ्कुरः ॥ 87 ॥

तस्मादविद्याप्रत्यक्षं मन्ये पाण्डित्यशून्य ते ।

पूर्वोत्तरप्रमेयस्याविद्याया एव साधकं ॥ 88 ॥

एकाज्ञानेपि सर्वोऽज्ञ स्यादैक्यबलतो न चेत् ।

एकदुःखेपि दुःख्यन्यः स्यादैक्यस्य समाश्रयात् ।

एकानुभूतिः सर्वस्येत्यागतो जातिसङ्करः ॥ 89 ॥

व्यावहारिकभेदेन समाधानेत्विदं गतम् ।

एकं सन्धित्सतः पुच्छमपरं च्यवते तव ॥ 90 ॥

अतोनुभवमाश्रित्य जीवाज्ञाने मतं गतम् ।

ऐक्येन तमतिक्रम्य ब्रह्माज्ञाने मतं गतम् ॥ 91 ॥

जीवोऽज्ञो न जगत्कर्ता यः कर्ता तस्य नाज्ञता ।

अतोऽज्ञानभ्रमायोगाद्भ्रान्तिः शास्त्रकृतस्तव ।

कथञ्चिद्भ्रमयोगोपि भ्रान्तिः शास्त्रकृतस्तव ॥ 92 ॥

जीवानुभूतमज्ञानं सर्वज्ञे केन नीयते ।

हा वत्सगलरज्ज्वैव दिग्गजं बद्धुमिच्छसि ॥ 93 ॥

जीवसर्वस्वमज्ञानं त्वं राज्ञे दातुमिच्छसि ।

न तद्दरिद्रवित्तं स महाराजो दिदृक्षति ॥ 94 ॥

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।

इति श्रुतिसती साध्वी त्वामध्वनि रुणद्धि च ॥ 95 ॥

सम्पूर्ण स्वसुखज्ञाने संसारो मुक्तिरेव ते ।

तदज्ञाने तु नाज्ञानबोधोऽवच्छेदको ह्यसौ ॥ 96 ॥

अहमंशे न तेऽज्ञानं किन्त्वानन्दादिके परम् ।

यद्भातं न तदज्ञातमिति वाक्यमनुस्मर ॥ 97 ॥

अतोवच्छेदकज्ञानाभावान्नाज्ञानधीस्तव ।

अवच्छेदकतज्ज्ञाने भव एवापुनर्भवः ॥ 98 ॥

यथा लोकपुरस्कारश्चक्षुषः सर्ववस्तुनः ।
ग्रहणेप्यस्ति तमसो ग्रहणे तु स नेष्यते ॥ 99 ॥

सिद्धव्याप्तेस्तु सङ्कोचो विरुद्धत्वाद्धि केवलम् ।
अत्रापि तत्पुरस्कारे न स्यादज्ञानमेव हि ॥ 100 ॥

अतो व्याप्तेश्च सङ्कोचं कृत्वा सामान्यतो ग्रहः ।
वाच्योऽवच्छेदकादीनामज्ञानं तु विशेषतः ।
इति सर्वैः समाधेयं त्वं सर्वेभ्यो बहिष्कृतः ॥ 101 ॥

ज्ञानविरोधितेऽज्ञानं ज्ञाने सति कुतो न तत् ।
विरोधिचेत्परन्यायतरोस्त्वं मूलसेचकः ॥ 102 ॥

ज्ञानाभावपदार्थस्य सर्वथाऽभाव एव चेत् ।
अत्यन्ताभावशून्यं तज्ज्ञानं स्यात् परमार्थसत् ॥ 103 ॥

विद्यमानस्य चार्थस्य यथासम्भवमेव धीः।
किं जात्यन्धमते नास्ति चित्ररूपवती क्षितिः ॥ 104 ॥

अज्ञानस्य हि दौर्घट्यं यथा ते भूषणं सदा ।
तथा तज्ज्ञानदौर्घट्यमपि भूषणमस्त्विदं ॥ 105 ॥

किमेककुण्डलत्वेन कुण्डलद्वयवान् भव ।

दुर्घटस्य हि यो हन्ता स स्यादत्यन्तदुर्घटः ॥ 106 ॥

किञ्च भावाज्ञानवादे दुर्घटत्वं यथेष्यते ।

अभावाज्ञानवादेपि दौर्घट्यं तद्वदिष्यताम् ॥ 107 ॥

अज्ञानत्वाविशेषेण द्वयोरपि समत्वतः।

पक्षपाते हेत्वभावात् पक्षपातो भवेत्तव ॥ 108 ॥

नित्यज्ञानमते ज्ञानसामान्याभाव एव न ।

चक्षुषा ब्रह्मविज्ञानस्याभावोऽज्ञानमुच्यते ॥ 109 ॥

निष्किञ्चनपदं वित्तविशेषाभाववाग्यथा ।

एवं च मानसं ज्ञानं स्यादेव प्रतियोगिनः ॥ 110 ॥

परोक्षरूपं तज्ज्ञाननं तदभावश्च नोच्यते ।

ब्रह्मापरोक्षभावेन न जानामीति वाक्तु सा ॥ 102 ॥

प्रत्यक्षवृत्तिवैरेपि न जानामीति ते यथा ।

प्रत्यक्षवृत्त्यभावेपि न जानामीति मे तथा ॥ 112 ॥

अतो मम मतेऽज्ञानज्ञाने दौर्घट्यमेव न ॥ 113 ॥

दौर्घट्यमेकं भूषा चेत् किं न स्याद्भूषणान्तरम् ।

परस्योत्तरमेवं च स्यादित्येव तदीरितम् ॥ 114 ॥

परासिनातिक्रूरेण या ह्यविद्या क्षतापि न ।

यतो ब्रह्मचिता नाशो नाज्ञानस्य भवन्मते ॥ 115 ॥

स्वसन्तानासिना मन्दधारेण छिद्यते किल ।

अविद्यकमनोरूपविद्यया नाशकीर्तनात् ॥ 116 ॥

मनसोपि हि चिद्योगाच्छक्तिरर्थप्रकाशने ।

अज्ञाननाशने च स्याच्छक्तिस्तद्योगतः परम् ॥ 117 ॥

न चेद्धटादितुल्यस्य जडस्य द्वितयं च न ।

भूताविष्टाच्च भीतस्यभूतात्कथमभीतता ॥118॥

सिद्धं पश्यति चेद्ब्रह्म जगन्नभ्रमजं तव ।

कल्पयित्वैव पश्येच्चेत्सर्वं स्यात्सार्वकालिकम् ।

अमुक्तेः कल्पकाज्ञानब्रह्मचैतन्ययोः स्थितेः ॥ 119 ॥

अतोदैनन्दिनलयः कल्पान्तप्रलयोपि वा ।

कथं स्यात्तस्य नित्यस्य दर्शनस्य न हि क्षयः ॥ 120 ॥

भ्रमकल्प्यं हि सर्वं ते कालादृष्टादिकं जगत् ।

भ्रमस्य नित्यसिद्धत्वात्किं किं न स्यात्सदा तव ॥ 121 ॥

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ।

गौरियं वाक् शुनी नेयं पुच्छं तस्या विचारय।

यतः प्रकृतिरेवैषा मायापुच्छेत्र गीयते ॥ 22 ॥

यथाकुलालश्चक्रीस्यात्तथा मायी तया सृजन् ॥ 123 ॥

किं न कोशस्थवित्तेन धनी राजा वनेचरः ।

मतुपा सर्वसर्वस्वं गळे तस्य न निक्षिप ॥ 124 ॥

सर्वज्ञं खलु तद्ब्रह्म कथमज्ञानवद्भवेत् ।

स्वरूपस्य सदा दृष्टेः सर्वस्यान्यस्य चाञ्जसा ॥ 125 ॥

असङ्गस्य यतः सङ्गो विनाऽज्ञानं न युज्यते ।

अतः सार्वज्ञमप्यज्ञानापेक्षमिति यन्मतं ॥ 126 ॥

स प्रष्टव्यः किमज्ञानं सन्धानकरणी तव ।

किं वा द्रवत्वनिबिडत्वार्हसीसादिधातुवत् ॥ 127 ॥

व्यापिनी चिन्न नेतव्या नाऽनेतव्या च केनचित् ।

अतः स्वतस्तत्तदर्थसङ्गस्तस्या भविष्यति ॥ 128 ॥

असङ्गत्वश्रुतेर्भीतिस्तवापि च ममापि च ॥ 129 ॥

यदि स्वभावतोऽसङ्ग इत्यर्थः स्याच्छ्रुतेस्तव ।

ममाप्युपादितोऽसङ्ग इति स्यादुक्तयुक्तितः ॥ 130 ॥

किञ्च त्वदज्ञानतोपि सङ्गस्तस्य कथं वद।

यदसङ्ग इति श्रुत्या सर्वसङ्गो निषिध्यते ॥ 131 ॥

अथाज्ञानान्यसङ्गो नेत्यर्थेऽनर्थपरम्परा ।

या श्रुतिर्निरनिष्टं तंनिरवद्यं च शंसति।

महाशक्तिमतस्तस्य सा दोषं किल शोषयेत् ॥ 132 ॥

सर्वेश्वरत्वकर्तृत्वसर्वव्यापित्वपूर्वकान् ।

गुणान् पोषयितुं कस्मान्नादोषं शोषयेज्जगत् ॥ 133 ॥

स्वसङ्गवन्मङ्गलार्थं सङ्गमङ्गीकरोति तत् ।

अज्ञानदुःखकर्मादिलेपरूपमपाकरोत् ॥ 134 ॥

अथवा दुर्जनैः सङ्गं स्नेहरूपं निषेधति ।

प्रमातृत्वप्रमेयत्वसङ्गं वा तैर्न्यवारयत् ।

अतस्त्वच्छरपातस्य लक्ष्यं वक्षोऽभवत्तव ॥ 135 ॥

किञ्च सार्वज्ञमज्ञानसापेक्षमिति यद्वचः ।
मूकोहमितिवत्तच्च विरुद्धमिति मे मतिः ॥ 136 ॥

मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ।
इति भागवतोक्त्या यच्चिदप्यज्ञाननाशिनी ।
स्वरूपज्ञानमप्यज्ञानस्य वैरि न संशयः ॥ 137 ॥

सुखज्ञाने सति तदा तदज्ञानं च कोन्वभूत् ।
सत्यज्ञानेऽनवच्छिन्नसुखं वा कोन्वभूद्भवेत् ॥ 138 ॥

यद्भातं न तदज्ञातमिति यत्तत्वदीपने।
स्वयमप्याह सार्वज्ञाज्ञत्वे तद्दूरदूरगे ॥ 139 ॥

अज्ञताऽखिलसंवेत्तुर्घटते न कुतश्चन ।
इत्युक्तमत एवार्यैः कार्यधुर्यैर्महात्मभिः ॥ 140 ॥

ज्ञाने सत्येव चाज्ञानं यदीदं तर्हि किं नञा ।
नाम्नि विप्रतिपत्तिस्ते जानतां ज्ञानमेव तत् ॥ 141 ॥

यदि तन्मानसं ज्ञानं रुणद्धि तव निष्कले ।
न ब्रह्मणि मनोप्यस्ति तस्याज्ञानं तु केन तत् ॥ 142 ॥

अज्ञानकल्प्यं सर्वं ते मन आदि जगत्रयम् ।

प्राक् सृष्टेर्न तदज्ञानं नाज्ञो भ्रान्तोपि चापरः ॥ 143 ॥

सृज्यजीवस्य मनसो वृत्त्या नाश्यत्वतो यदि ।

तदज्ञाने तव मतं युक्तिर्नाङ्गीकरोति तत् ॥ 144 ॥

अन्यज्ञानेनान्यनिष्ठस्याज्ञानस्यानिवर्तनात् ।

किं देवदत्त ज्ञानेन यज्ञदत्ताज्ञानता गता ॥ 145 ॥

ऐक्येन तत्समाधानमपि दत्तोत्तरं तव।

ऐक्ये सति तदज्ञानं तत्सिद्धौ च तदेकता ॥ 146 ॥

स्वाज्ञानादेव तद्ब्रह्म जीवतामेति चेद्धि सा ।

अतोन्योन्याश्रयाच्चात्र नञर्थो नाश्यता न ते ॥ 147 ॥

कथमावरणे सत्ये वान्यस्याप्यपरोक्षधीः ।

ज्ञानोत्पत्तिविरोध्येव यस्मादावरणं विदुः ॥ 148 ॥

तदुत्पत्त्यविरोधे तन्नाश्यताशापि किं कृता ।

बन्धस्यैव कुतो नाशस्तर्हि नस्याच्छ्रुतेर्बलात् ॥ 149 ॥

आज्ञानमेवज्ञानेन नाश्यं बन्धस्तु नेति वाक् ।

तदा स्याद्यदि नाशाच्च प्राक्तयोः स्याद्विरुद्धता ॥ 150 ॥

मनसोह्यचिदंशस्ते घटप्रायो  न नाशकः।

चिदंशस्य बलान्नाशे कथं ब्रह्मचितिस्थितिः ।

अतो ब्रह्माश्रिताज्ञाने नञःकार्यं न विद्यते ॥ 151 ॥

अस्य विद्येति विद्यैव तत्पदेनोच्यते हरौ ।

तदधीना रमाचाभिमन्यमानाऽथवा जडा ।

ताभिः सृष्टमिदं विश्वं भ्रान्त्युत्थं केन कथ्यताम् ॥ 152॥

यन्मिथ्यात्वं परो वक्ति स्वाज्ञानस्य तथैव तत् ।

यस्मात्तदस्मदीशानेनाभूदस्ति भविष्यति॥ 153 ॥

निरनिष्टो हि सोसङ्गो निरवद्यः परः प्रभुः ।

अनीदृग्जीवता तस्य नाज्ञानेन न कर्मणा ॥ 154 ॥

अज्ञानासम्भवादेवनाध्यासोप्यखिलेश्वरे ।

लेपायोग्ये नभोदेशे  न पङ्को नापि तन्मलम् ॥ 155 ॥

तान्यहं वेद सर्वाणि नत्वं वेत्थ परन्तप ।

इति गीतावचनतो यः सर्वज्ञ इति श्रुतेः ॥ 156॥

अहमज्ञ इति प्रोक्तं त्वत्प्रत्यक्षं न मत्प्रभोः ।

अनुमायाश्च बाधोभूदागमोन्यार्थमागमत् ॥ 157 ॥

अतो ब्रह्माश्रितज्ञानपक्षो निर्मूल एव ते ।

अज्ञानं ब्रह्मणि न चेत्तत्रेदं कल्पितं च न ।

उपादानं तवाज्ञानमुपादेयप्रदेशि तत् ॥ 158 ॥

अज्ञानापगमे तत्तच्चैतन्यं तस्य तस्य दृक् ।

इत्यादि प्रकिया सर्वा विक्रियाभूत्तवाधुना ॥ 159 ॥

किञ्चाहमज्ञ इत्येव ह्यज्ञानस्याकृतिस्तव ।

मामहं न विजानामीत्याकारश्च निगद्यते ॥ 160 ॥

एवं चाज्ञानवद्ब्रह्म नैव विश्वभ्रमो भवेत् ।

इदं जानामीति सर्वभ्रान्तिर्यस्मात् प्रदृश्यते ॥ 161 ॥

सर्वं जानामि सर्वं च न जानामीति चैकदा ।

विरुद्धाकारसम्पत्तिरनानुभविकी चितः ॥ 162 ॥

अथज्ञानस्यापगमे भ्रमत्वं यदि कथ्यते ।

अज्ञानकल्पितत्वोक्तिरयुक्ताभूत्तदा तव ॥ 163 ॥

अज्ञानरूपमेवास्य प्रपञ्चस्य विचारणे।

वक्तयनारोपितत्वाख्यमहिमानं ततः स्फुटम् ॥ 164 ॥

विषयाश्रितमज्ञानं यद्यावरणमिष्यते ।

तर्ह्यैकवृत्त्या तन्नाशे सर्वैर्दृश्येत वस्तु तत् ॥ 165 ॥

विषयावरकं दीपस्तमिस्त्रं नाशयेद्यदा।

तदा तद्वस्तु सर्वैश्च सुव्यक्तं किं न दृश्यते ॥ 166 ॥

यद्यज्ञानान्तरं तन्न पुनरावरणं भवेत् ।

तर्हि केनापि तद्वस्तु न दृश्येताऽऽवृतत्वतः ॥ 167 ॥

यदि ज्ञातृविभेदेन कल्प्येतावरणं घटे ।

तदा ह्यदृष्टस्य बहोः कल्प्यत्वात्गौरवं भवेत् ॥ 168 ॥

न हि तत्तद्गुहालोकैर्नाश्यतामिस्त्रराशयः ।

घटादिषु प्रदृश्यन्ते ततोप्रामाणिकं त्विदम् ॥ 169 ॥

अतः पुङ्गतमेवेदं तमः मर्त्या हि तामसाः ॥ 170 ॥

पुंसु काचादिदोषाश्च यतः सन्ति पृथक् पृथक् ।

अतो नानात्वमप्येषामनायासेन सिद्ध्यति ॥ 171 ॥

नाश्यनाशकयोर्ज्ञानाज्ञानयोरेकदेशता ।

तमः प्रकाशवत्सिद्धा नान्धकारोपि चेतने ।

दीपो वा चेतनगतस्ततस्तौ यत्र कुत्रचित् ॥ 172 ॥

ज्ञानं तु ज्ञातृपुंस्येव तन्नाश्याज्ञानमप्यतः ।

वक्तव्यं ज्ञातृपुरुषे ब्रह्मणि स्यात्कथं वद ॥ 173 ॥

ज्ञानाज्ञाने हि पुंधर्मौ पुंस्थावेवार्थसाधकौ ।

किं न पुंनेत्रगः काचो बाह्यार्थावरणक्षमः ।

अतस्तवानुमानं च परकैङ्कर्यमाचरेत् ॥ 174 ॥

स्वदेशगतमज्ञानं प्रमाणज्ञानतस्तव ।

सिध्यत् प्रमातृपुरुषे यतः सिद्धमभूद्बलात् ।

प्रमाता जीव एवेति जीवाज्ञानमभूद्धि तत् ॥ 175 ॥

चक्षुषा सन्निकृष्टार्थज्ञानं स्यादन्तरेव हि ।

जानामीत्यान्तरत्वस्य सुखादाविव सिद्धितः ॥ 176 ॥

परोक्षज्ञानकरणाज्ज्ञानमन्तर्भवेद्यथा ।

तथाऽपरोक्षकरणाज्ज्ञानमप्यन्तरेव हि ॥ 177॥

यदि शब्द सहायेन मनो वैकुण्ठमाविशेत् ।

पुनर्निवृत्तिशून्यं स्याद्धीर्घनिद्रा भवेत्तदा ॥ 178 ॥

मनोयात्रा तु जीवस्य यात्राकाले परं भवेत् ।

अन्तःकरणमेव तस्मादन्तःकार्यकरं हि तत् ॥ 179 ॥

अतो ज्ञानवदज्ञानमान्तरं साक्षिणो बलात् ।

एकदेशत्वमनयोर्नाश्यनाशकयोर्ध्रुवम् ॥ 180 ॥

न चेदन्याश्रितज्ञानमन्याज्ञानं निवर्तयेत् ।

अज्ञानमप्यान्तरं तन्न बाह्यविषयाश्रितम् ॥ 181 ॥

अहमज्ञ इति ह्यक्षं जीवाज्ञानस्य साधकं ।

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।

इति वेदेन मायेयं जीवगैवेति गीयते ॥ 182 ॥

ऐक्येन च प्रमाणानामन्यथीकरणं वृथा ।

ऐक्यासिद्धेरयुक्तं च प्रमाता जीव एव हि ।

न चेत्सर्वैक्यतः सर्वमस्तव्यस्तं भवेत्तव ॥ 183 ॥

अज्ञानं ज्ञातृपुंनिष्ठं ज्ञानेनैकाश्रयत्वतः ।

सुखवद्धुःखवच्चेति ह्यनुमाप्यस्त्यभादिता ॥ 184 ॥

मृदादिकमुपादानं कार्ये कार्ये च विद्यते ।

अतो जगत्सर्जनार्थमपि नाज्ञानमिष्यते ॥ 185 ॥

मायी मायाधीश्वरत्वात् गोमान् गोपालको यथा ।

तस्माद्ब्रह्माश्रिताज्ञानमज्ञानादेव वर्णितं ॥ 186 ॥

जीवस्तु मायासुप्तत्वान्न स्वानन्दादिवीक्षते ।

मायाऽभावे सतीक्षेत तस्माज्जीवाश्रितैव सा ॥ 187 ॥

जीवस्वरूपानन्दादीनाच्छादयति केवलम् ।

अहमित्येव तद्रूपज्ञानेन प्रतिबन्धिका ।

इमं तु न दहेत्युक्तं मन्त्रशक्त्या यथाऽनलः ॥ 188 ॥

सा सत्या प्रकृतेरंशभूता जीवेषु तिष्ठति ॥ 189 ॥

नारायणप्रसादेन काचिदक्षिमलोपमा ।

नश्येद्वस्त्रावृतिप्राया काचिच्चापसरेत्ततः ॥ 190 ॥

जीवस्याच्छादिका त्वेका परस्याच्छादिका परा ।

द्वयं जीवगतं नित्यं हरिस्तूभयमोचकः ॥ 191 ॥

उभयोश्चातिदूरस्थो न चेत्ते मोचयेत्कथम् ।

निगडेन निबद्धाङ्घ्रिर्न हि राजा विमोचकः ॥ 192 ॥

अस्मिन्नर्थे श्रुतिर्मानं पुराणानि च भूरिशः ।

अनिर्वाच्या तु या माया साऽनिर्वाच्यैव धीमताम् ॥ 193 ॥

यो मायां वक्त्यधीशाने स प्रष्टव्यस्तयेशितुः ।

भ्रमः सम्पाद्यते नेति न चेद्विद्यैव तामपि ॥ 194 ॥

निरस्तकुहकत्वोक्त्या नोरीचक्रुः परं हरौ ।

आद्ये त्वविद्येव तस्मात् कल्पोयं च विकल्पभीः ॥ 195 ॥

स्वदोषाच्छादनायाल्पो निर्दोषेष्वपि तं वदेत् ।

जीवे सम्भवदज्ञानं ब्रह्मण्यपि न किं जगुः ॥ 196 ॥

किं मलैः समलस्यास्य निर्मलस्य मलं मलम् ।

नीलिमा दूषणं भानोः  स्वर्भानोस्तु स भूषणम् ॥ 197 ॥

स्वयं ह्यशक्तः शक्तस्याप्यशक्तिं प्रथयेत्खलः ।

स्वज्ञानवद्धरेर्ज्ञानं किं नाज्ञानानुगं जगौ ॥ 198 ॥

अनृतं वदतो वाक्यमसम्बद्धं भवेद्ध्रुवं ।

ज्ञानस्य सहकार्यस्य हानिर्नावरणे किल ॥ 199 ॥

सगृद्भ्रष्टः खलः पश्चाद्भ्रष्टताया बिभेति किं ।

सर्वज्ञाज्ञानदौर्घट्यं किं नाभाषत भूषणं ॥ 200 ॥

ममाहं न विजानामि मां जानाम्यहमित्यपि ।

सर्वस्यानुभवात् स्वस्य विषयोपि स्वयं भवेत् ॥ 201 ॥

परस्मिन्समवेता या  क्रिया तत्फलशालियत् ।

तत्कर्मेति हि भाट्टोक्तलक्षणानुपपत्तितः ॥ 202 ॥

दृष्टार्थस्य कथं त्यागो वक्तव्यं लक्षणान्तरम् ।
किं नु किंपुरुषो नास्ति किंनरो वा विलक्षणः ॥ 203 ॥

कर्मत्वस्यानिरुक्त्या हि दृश्याध्यासो दृशीरितः ।
परोक्तलक्षणे भक्त्या तत्कुतोद्य निरुच्यते ॥ 204 ॥

अन्त्यश्चरणसंयोगो ग्रामेण सह यो भवेत् ।
न तत्फलमनुद्देशात् क्रियाया बहुदूरतः ॥ 205 ॥

ग्रामं पदा स्प्रष्टुमेव न हि कोपि व्रजेत् पुमान् ।
ग्रामस्थधनपूर्वार्थप्राप्तिरेव प्रयोजनं ॥ 206 ॥

न चेद्पदे पदे पुंसः क्रियया स्याद्विभागवान् ।
पूर्वः प्रदेशः संयोगशाली स्यादुत्तरोपि च ॥ 207 ॥

त्वदुक्तलक्षणेन स्याद्विषयत्वं तयोरपि ।
अतः स्वरूपसम्बन्धविशेषः स हि कश्चन ॥ 208 ॥

इत्येव सर्वथावाच्यं न चेत् ज्ञानक्रियाफलं ।
अर्थाभिलपनं पुंसि तच्छालित्वं कथं घटे ॥ 209 ॥

अतीतानागते भावान्नार्थस्थाज्ञातताफलम् ।
ज्ञानस्य विषयत्वं तज्ज्ञाततास्यान्न चापरा ॥210 ॥

सा च नात्माश्रयात्कर्मलक्षणान्तर्गता भवेत् ।

क्षुद्ररज्जोरभावेन लब्धा गौः किं विसृज्यते ॥ 211 ॥

न हि ते भगवन् व्यक्तिं विदुर्देव न दानवाः ।

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम।

इति गीता विरोधश्च स्वावेद्यत्वमते भवेत् ॥ 212 ॥

यतोत्र वचनैः सर्वैः कर्तृकर्मक्रियैकता ।

विभक्तीनां विभागेन व्यक्तमेव प्रदृश्यते ॥ 213 ॥

कथं पुंकल्पनामात्रमूलं लक्षणमेव ते ।

अन्यथीकुरुते सर्वसम्मतं स्पष्टमागमं ॥ 214 ॥

ज्ञानं प्रत्यक् पराक् ज्ञेयमिति बाह्यार्थधीस्थले ।

नान्तरे यन्मनोज्ञाने ज्ञेयं प्रत्यक् परस्तव ॥ 215 ॥

जडे ज्ञानास्वरूपत्वाज्ज्ञानज्ञेयविभिन्नता ।

ज्ञानरूपे तु किं न स्याज्ज्ञानता ज्ञेयतापि च ॥ 216 ॥

मनोनुमित्या मानस्या किं नानुमिमते बुधाः ।

ज्ञानरूपं तु यद्वस्तु स्वेनापि ज्ञेयमेव तत् ।

अतः स्वरूविज्ञाने स्वयमात्मा प्रकाशतां ॥ 217 ॥

श्रुतेः स्मृतेः कुतो बाधः क्रियतेनुभवस्य च ।
यतस्तदात्मानमेवावेदित्युपनिषज्जगौ ॥ 218 ॥

न चेदेवमसम्बद्धं वदतो मरणे कथम् ।
विलपेत् पट्टमहिषी स्वोरस्ताडनपूर्वकम् ॥ 219 ॥

अवान्तरविशेषेण यद्येकत्रापि तद्भवेत् ।
अत्माकर्मक्रियाज्ञानमित्यत्रापि विशेषणे ।
अवकाशोस्ति यच्छब्दा अपर्यायास्तयोः सदा ॥ 220 ॥

मामहं न विजानामीत्यत्र कर्तृत्वकर्मते ।
यथैकस्य तथा क्वापि क्रियाकर्मैक्यमुच्यताम् ॥ 221 ॥

अभिधाख्याभिधेयत्वमभिधानाम्नि किं न ते ।
प्रमाणसदसत्त्वाभ्यां व्यवस्था च भविष्यति ॥ 222 ॥

किं ज्ञानपदजन्यं यज्ज्ञानं स्वविषयं च तत् ।
न हि तस्याप्यवेद्यस्य व्यवहारो भवन्मते ॥ 223 ॥

तत्र स्वविषयत्वं तत्स्वप्रकाशत्वमागतम् ।
जडेपि क्वचिदेवं चेच्चेतनेषु कुतो न तत् ॥ 224 ॥

यदि स्वावेद्यतास्वप्रकाशत्वमिति मन्यसे ॥ 225 ॥

तदा वदाम शब्दस्य विरुद्धार्थपरिग्रहे ।

को हेतुरिति यद्येकस्यैव कर्तृत्वकर्मते ॥ 226 ॥

विरुद्धे इति भीतोसि शब्दायोग्यार्थकल्पनात् ।

कुतो न भीः किं च सा भीर्धावन्तं त्वानुधावति ॥ 227 ॥

दोषोयं परवेद्यत्वे समो यस्माद्विचारणे ।

आत्मनो वृत्तिवेद्यत्वे कर्तृकर्मैक्यमागतम् ॥ 228 ॥

सुखादेः साक्षिवेद्यत्वे क्रियाकर्त्यैक्यमापतेत् ।

क्रियाकर्मैक्यमप्येवं न्यायसाम्यात्कुतो न ते ॥ 229 ॥

किं च साक्ष्येव विषयावच्छिन्नाऽज्ञानदृक् त्वया ।

वाच्यावश्यं यतो वृत्तिनाश्यस्यान्यात्र नैव दृक् ॥ 230 ॥

विषयश्च स्वयं तस्य स्वावेद्यत्वे च कीर्तिते ।

अज्ञानवेदनस्यैव भवेदत्यन्तवेदना ।

अवच्छेदकदृग्व्याप्तं यतोवच्छिन्नदर्शनम् ॥ 231 ॥

ज्ञानरूपत्वतः किं स्यात्तत्तद्गोचरतां विना ।

घटज्ञानं ज्ञानमिति किमन्यव्यवहारकृत् ॥ 232 ॥

अतोऽज्ञानं स्वविज्ञप्त्यै क्षिपेत्तत्स्वप्रकाशतां ।

चित्रमत्रापि ते बाणस्तव प्राणापहारकः ॥233 ॥

किञ्च प्रागुक्तदृष्टान्तत्रितयं च न विस्मर ।

यत्र कर्मक्रियैक्यं च साक्षादेव निदर्शितम् ॥ 234 ॥

वृथा वागर्थदम्पत्योर्नायोगाय मतिं कुरु ॥ 235 ॥

अतः स्वावेद्यता त्याज्या स्ववेद्योपि भवेत् प्रभुः ।

न चेत् स्वानन्दानुभवो मुक्तौ मुक्तस्य किं बलात् ॥ 236 ॥

अतः स्वविषयो यस्य प्रकाशो विद्यते सदा ।

स एव स्वप्रकाशाख्य इति सर्वं समञ्जसम् ॥ 237 ॥

मुखेनातिप्रसन्नोपि हृदि हालाहली खलः ।

जल्पतः स्वप्रकाशत्वं स्वावेद्यत्वं यतो हृदि ॥ 238 ॥

अन्यानजानन्नप्यन्धो जानात्यहमिति स्फुटम् ।

स्वपरज्ञानशून्योसौ घटः स्यादथवा पटः ॥ 239 ॥

किं स्वादुना गुडेनापि यद्रसो नानुभूयते ।

किं स्वरूपसुखेन स्याद्यदि तन्नानुभूयते ॥ 240 ॥

चोरस्य चोरः शिष्टोपि शिष्टशिष्टस्य केवलम् ।

स्वाज्ञं तत्किल सर्वज्ञं मुक्तं स्वानन्दभोक्तृ च ॥ 241 ॥

यदि स्वरूपविज्ञानं नैव स्वविषयं भवेत् ।

तदा स्वव्यवहारश्च कथं तस्मादुदीर्यताम् ॥ 242 ॥

घटज्ञानं मनोरूपं न मनोव्यवहारकृत् ।

विषयस्य घटस्यैव व्यवहारकृदिष्यते ॥ 243 ॥

अतस्तद्विषयज्ञानमेव तद्व्यवहारकृत् ।

ज्ञानस्वरूपतामात्रं व्यवहारेऽप्रयोजकम् ॥ 244 ॥

सुखरूपत्वमप्येवं मनसि व्यभिचारतः ।

न फलं किन्तु निर्दुःखसुखस्यानुभवः फलम् ॥ 245 ॥

तथैव सुखरूपत्वं ज्ञानरूपत्वमात्मनि ।

न फलं यन्मनोबाह्यज्ञानरूपं सुखात्मकम् ॥ 246 ॥

यथा मानससौख्यस्य साक्षिणानुभवः फलम् ।

संसारे मुक्तिकाले च फलं वाच्यं तथैव हि ॥ 247 ॥

न चेदपुरुषार्थत्वं मुक्तेः स्यादुक्तवर्त्मना ।

तस्मात् स्वरूपानन्दस्य नानुभूतिः कथं तदा ॥ 248 ॥

स्वगोचरत्वमेवातो वक्तव्या स्वप्रकाशता ।

आनर्थक्यं न चेत् मुक्तेः स्वप्रकाशपदस्य च ॥ 249 ॥

स्वस्य प्रकाशो यस्य स्यात् स्वप्रकाशं तदेव हि ।

गीतावाक्ये कर्मताया व्यक्तोक्तिश्च विरुध्यते ।

हार्दं हालाहलं तस्मात् स्वस्यैव क्लेशकारकं ॥ 250 ॥

नित्यशुद्धं तु यद्ब्रह्म परब्रह्म तदेव हि ।

नित्यशुद्धश्च भगवान्नित्यमुक्तो मम प्रभुः ।

बन्धमूलो यतो दोषो बन्धाभावे न कश्चन ॥ 251 ॥

तवब्रह्मत्वविद्याख्यदोषेण कलिलं सदा ।

अनादिकालमारभ्य देहे देहे च संसरन् ॥ 252 ॥

भवपङ्केन मलिनं कथं शुद्धं भवेद्वद ।

ब्रह्मत्वमाग्रहादेव जीवचैतन्यमेव तत् ॥ 253 ॥

बन्धस्यावास्तवत्वेन बद्धं शुद्धं तदेव चेत् ।

तवाशेयं श्रुतिस्त्वाह सखायौ सयुजौ सदा ॥ 254 ॥

खगावश्चदनश्नन्तौ देहे देहे कृतास्पदौ ।

द्वासुपर्णेत्यादिरूपा सा तवाशालतां दहेत् ॥ 255 ॥

बन्धमिथ्यात्वतो मुक्तमस्तुबद्धं कथं भवेत् ।
शुक्तौ रूपत्वमिथ्यात्वे शुक्तितैव न रूप्यता ॥ 256 ॥

व्यावहारिकता या ते राजखड्गकक्षतिर्हि सा ।
मरणे न विशेषोस्ति बद्धत्वं गतमेव ते ॥ 257 ॥

अतो बद्धोपरस्तस्मान्नित्यमुक्तोपि चापरः ।
इत्येव सर्वथा वाच्यमित्थं सूत्रकृदाह हि ॥ 258 ॥

अवयोश्च मतौ द्वौ स्थित्यदनाभ्यामितीरितौ ॥ 259 ॥

गुहां प्रविष्टावात्मानौ हि तद्दर्शनतस्त्विति ।
सूत्रं व्याकुर्वतो जीवपरौ द्वौ हृदि ते मते ॥ 260 ॥

सत्वं रजस्तम इति गुणा जीवस्य नैव मे ।
इति त्रिगुणशून्यत्वं स्वस्योक्त्वा हरिरञ्जसा ।
स्वाधीनगुणतो बन्धो जीवस्यैवेति शंसति ॥ 261 ॥

बद्धो मुक्त इति ह्याख्या गुणतो मे न वस्तुतः ।
गुणस्य मायामूलत्वान्न मे बन्धो न मोक्षणम् ॥ 262 ॥

मदधीनगुणाज्जीवे बद्धाख्या न स्वभावतः ।
इति पूर्वार्धवाक्यार्थो मे धनाज्जीवतीतिवत् ॥ 263 ॥

स्वस्यैव गुणतो बन्ध इत्यर्थस्तूक्तवाक्यतः ।

उत्तरार्धोत्तरश्लोकपर्यालोचनया च न ॥ 264 ॥

मायामूलगुणाभावान्न मे मोक्षो न बन्धनम् ।

इत्युत्तरार्धं यत् कृष्णस्य स्वबन्धं निषेधति ॥ 265 ॥

एकस्यैव ममांशस्य जीवस्यैवं महामते ।

बन्धोस्याऽविद्ययानादिर्विद्यया च तथेतरः ॥ 266 ॥

स्वभिन्नांशस्य जीवाख्यखगस्यैकस्य केवलम् ।

बन्धश्च बन्धान्मोक्षश्च न स्वस्येत्याह स प्रभुः ॥ 267 ॥

एवमित्यनुवादेन यथा जीवस्य बद्धता ।

पूर्वश्लोकेपि भवति तथैवार्थं वदेद्बुधः ॥ 268 ॥

अतो जीवस्य बद्धत्वं मुक्तत्वं च परात्मनः ।

नित्यमुक्तत्वमेवेति पद्यद्वन्द्वेन सिध्यति ॥ 269 ॥

सखायौ द्वौ सुपर्णौ च देहनीडकृतास्पदौ ।

खादत्येकः पिप्पलान्नं निरन्नोप्यन्य ईश्वरः ॥ 270 ॥

बलेन भूयान् स विभुर्नित्यमुक्तस्ततो परः ।

जीवो बद्धोऽविद्ययान्धः पूर्वो विद्यामयः किल ॥ 271 ॥

इति पूर्वोक्तमेवार्थं स्पष्टमाह पुनः प्रभुः ।

अतः पूर्वोक्तवाक्यार्थोप्यस्मदुक्तो न चापरः ॥ 272 ॥

नित्यमुक्तो नित्यबद्ध एक एवेति मे मतिः।

इत्थं बद्धस्य मुक्तस्य चैक्यशङ्काकृदुद्भवम् ॥ 273 ॥

मुहुः प्रबोधयन् कृष्णः कथं वक्ति तदेकतां ।

अतः सिद्धान्तपद्येस्मिन् द्वितामेव वदेत् कृती ॥ 274 ॥

एतावित्यतिदेशेन पूर्वं च प्रस्तुतिर्द्वयोः ।

अबद्धबद्धयोर्वाच्या तच्छोच्या कृष्णबद्धवाक् ॥ 275 ॥

द्वयोरेकस्येति चार्तः सुस्थोभूत्तत एव मे।

भिन्नांशता च तद्भेदस्यान्ते स्वेनैव कीर्तनात् ॥ 276 ॥

अत्रोक्तो नित्यमुक्तश्च न मे मोक्षो न बन्धनम् ।

इत्याह यः पुरा युक्त्या स एव स्यान्न संशयः ॥ 277 ॥

बन्धस्य नित्यतोक्तिश्च तथा मुक्तेश्च नित्यता ।

पुरा परोक्ततन्मिथ्यार्थत्वं युक्त्या न्यवारयत् ॥ 278 ॥

तवापि मुक्तेर्मिथ्यात्वं कथमर्थो भवेद्वद ।

पदद्वयनिबद्धैकरज्वाप्राप्तिर्द्वयोरपि ॥ 279 ॥

याद‍ृच्छिकस्य पङ्कस्य क्षालनम् च यदृच्छया ।
वस्तुस्वभावतो नेति ममत्वर्थौ निराकुलः ॥ 280 ॥

यत्प्राङ्नैव म इत्याह तेन सोऽवास्तवं च तत् ।
स्वस्मिन्निषेधतीशाने स्वस्य जीवस्य चेत्यपि ॥ 281 ॥

नेति ब्रवीति स्वानिष्टं जीवो मच्छक्तितोऽग्रहीत् ।
इति वक्तुं स पद्येस्मिन् प्राह मे गुणतस्त्विति ॥ 282 ॥

तेनैव वक्ति स्वाधीनमनिष्टं स्वस्य नेत्यपि ।
मोहं चासुरजीवानां सम्मुग्धोक्त्याऽकरोत्प्रभुः ॥ 283 ॥

स्वातन्त्र्यगुणतो बद्धाख्यां व्याख्यान्ति मे बुधाः ।
बन्धादिवस्तुतस्तन्नाम बन्धोज्झितस्य मे ।
नेति विद्वत्प्रसिद्धिं सूचयन् शंसति प्रभुः ॥ 284 ॥

आख्यापदस्य चाख्यानमेवं सत्येव शोभते ।
मोक्षो बन्धनमित्येव नोचेदूचे कुतोन्ततः ॥ 285 ॥

अस्वतन्त्रस्य जीवस्य बद्धाद्याख्या तु वस्तुतः ।
इति सूचयता चात्र मुक्तामुक्तद्वितोदिता ॥ 286 ॥

मायाया अपि मूलं मे स्वातन्त्र्याख्यगुणो यतः ।
अतो मायामयो बन्धस्तद्ध्वंसो वा कथं मम ।
इति तत्रैव हेतुं च व्यनक्तीति मतिर्मम ॥ 287 ॥

स्वस्यैव नित्यमुक्तत्वं वक्ष्यन्नादौ श्रुतीरितां ।
बद्धाद्याक्यामात्मनीत्थमन्वर्थामकरोद्धवम् ॥ 288 ॥

भ्रान्तत्वे दोषमूलत्वं वदेन्नगुणमूलताम् ।
बद्धाख्यां गुणतः शंसंस्तद्धियं त्वगुणोद्भवां ।
अभिप्रैति न दोषोत्थां गुणजन्या च धीः प्रमा ॥ 289 ॥

इत्थं प्रमाया विषयः प्रमिनन्तीति च श्रुतौ ।
श्रुतो बन्धः कथं मिथ्या सत्त्वं हि ज्ञानदो गुणः ॥ 290 ॥

सात्विकाश्च सुरर्ष्याद्यास्तद्बन्धो न भ्रमोद्भवः ।
एवं च तद्वद्दुःखात्माबन्धोऽन्यत्र कथं भ्रमः ॥ 291 ॥

प्रमातारोपि बन्धस्य प्रमिन्वन्ति न ते हरिम् ।
अतो ह्यविद्यया बन्ध इत्युक्तं न मृषात्वतः ।
इत्थं भागवते प्रोक्तं कृष्णेनैवोद्धवं प्रति ॥ 292 ॥

अजोनुबद्धः सगुणैर्न वेद त्वां गुणात्परम् ॥ 293 ॥

सत्वं रजस्तम इति भवन्ति प्रकृतेर्गुणाः ।

एषु हि प्राकृताः प्रोक्ता (प्रोता) आब्रह्मस्थावरादयः॥ 294 ॥

भगवन् जीवलोकोयं मोहितस्तव मायया ।

अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु ॥ 295 ॥

इत्यक्रूरेण निर्णीतः कृष्णो बन्धोज्झितः प्रभुः ।

जीवान् सर्वान् गुणैर्बद्धान् मायाबद्धांश्च शंसता ॥ 296 ॥

मायामयोयं गुणसम्प्रवाहस्ते न विद्यते ।

इति शक्रेण कथितं कृष्णं प्रत्येव सादरम् ॥ 297 ॥

प्रागुक्तवाक्यतोपि द्वौ मुक्तामुक्तौ प्रसाधितौ ॥ 298 ॥

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय ।

उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ 299 ॥

सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।

निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ 300 ॥

इति कृष्णेन गीतायां कर्माबद्धत्वमात्मनः ।

जीवानां गुणबद्धत्वं चोक्तं वाक्यद्वयेन हि ॥ 301 ॥

सोमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ।

परान्तकाले सर्वेपि विमुच्यन्ते परामृतात् ॥ 302 ॥

परामृतपदेनात्र नित्यमुक्तः स्फुटोदितः ।

श्रुतयः स्मृतयश्चैव मुक्तामुक्तद्विितां जगुः ॥ 303 ॥

तन्मुकुन्दः परब्रह्म नित्यमुक्तत्वतः प्रभुः ।

मुक्ताश्च नित्यमुक्ता न नित्यमुक्तस्तदापि राट् ॥ 304 ॥

तदधीनत्वबन्धेन भक्तिबन्धेन वा हरेः ।

मुक्तोपि बद्धो यत्तस्मान्नित्यबद्धोप्यसौ भवेत् ॥ 305 ॥

नित्यसंसारिसद्भावोप्यनेनैव प्रसिध्यते ।

तदा यथाश्रुतोवाक्यस्यार्थः स्वस्थो भविष्यति ॥ 306 ॥

एवं च नित्यमुक्तस्य नित्यबद्धस्य चैकता ।

कदास्यात्तौ यतो धर्मौ विरुद्धौ सार्वकालिकौ ॥ 307 ॥

अतो मिथ्यात्वकथनेप्याशादेशान्तरं गता ।

ब्रह्मवद्वा मोक्षवद्वा यन्नित्यं तत्कथं मृषा ॥ 308 ॥

अनादिगुणसम्बन्धात्तेनौपाधिकतैव हि ।

अवास्तवत्वं प्रागुक्तं न मिथ्यात्वमिति स्थितं ॥ 309 ॥

स्वयं दुःखी परस्यापि दुःखमाकाङ्क्षते खलः ।

ब्रह्म संसारीत्युक्तमन्यथा केन हेतुना ॥ 310 ॥

बद्धस्तु बद्ध एव स्याद्राज्ञो बद्धत्व कीर्तनात् ।

यथा मुकुन्दबन्धोक्त्या बन्धनिर्बन्धभुग्जनः ॥ 311 ॥

यद्यबद्धः स वै बद्धो नित्यमुक्तत्वगीर्वृथा ।

बन्धमिथ्यात्वतः सा चेत् बद्धः को नाम सिध्यति ॥ 312 ॥

अनुत्तीर्णः स्वयं पङ्कात्किमन्वोत्कारको भवेत् ।

यदि बद्धं परंब्रह्म कः स्याद्बन्धस्य मोचकः ॥ 313 ॥

दरिद्रदर्शनेन स्यान्नैव दारिद्र्यनाशनम्।

धनिनोऽघृणिनो दूरादाराद्वा दर्शनेन किम् ॥ 314 ॥

तस्माच्छुद्धः स भगवानशुद्धं योग्यचेतनम्।

श्रवणादियुतं भक्तं प्रीतः शुद्धीकरिष्यति।

इति वाच्यमतः शुद्धौ शुद्धान्तरम् भवेत् ॥ 315 ॥

यद्यन्य एव मलिनःपटो धौत पटान्तरात्।

स धावनेपि धौतोन्यः पटः स्यात् काभिदा तयोः ॥ 316 ॥

अतः स्याधर्म्यमेवाह मुक्तानां हरिरात्मना ।

पेटीस्थानेकपटवत् सायुज्यमपि युक्तता ॥ 317 ॥

किं चेदं शबलत्वं ते किं मायाशबलत्वतः ।

उत सर्वैश्वरत्वादि सद्गुणाम्भोधिसम्भ्रमात् ॥ 318 ॥

मायादूरत्ववाक्यानि पूर्वं धिक्कुर्वते मतम् ।

नित्यमुक्तत्व सिद्ध्यर्थं प्रागुक्तवचनानि च ॥ 319 ॥

अज्ञाने जीवगत्वस्यैवोक्तत्वाच्च न तन्मतम् ॥ 320 ॥

हरेरिच्छापि मायाख्या मायाख्या प्रकृतिर्जडा ।

भ्रमहेतुश्च मायैका मायेयं त्रिविधा मता ॥ 321 ॥

हरेः शक्तिश्च तेजश्च तथा मायापदोदिते ।

महामायेत्यविद्येति नियतिर्मोहिनीति च ।

प्रकृतिर्वासनेत्येवं तवेच्छानन्त कथ्यते ॥ 322 ॥

इत्थं पुराणवचनं तथा भागवते ध्रुवः ।

मायाख्यया स्वशक्त्येति मायाख्यां शक्तिमाह हि ॥ 323 ॥

अन्तस्थः सर्वभूतानामात्मा योगेश्वरो हरिः ।

स्वमायया वृणोद्गर्भं वैराट्याः कुरुतन्तवे ॥ 324 ॥

यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियम् ।

वैष्णवं तेज आसाद्य समशाम्याद्भृगूद्वह ॥ 325 ॥

इति भागवते सूतो मायेत्युक्त्वा पुनश्चताम् ।
वैष्णवं तेज इत्याह स्वमाया किल सा हरेः ॥ 326 ॥

इच्छादिरूपा या माया तया मायामयोस्त्वयम् ।
स्वच्छन्दवृत्तिता सर्वशक्तता च समर्थता ॥ 327 ॥

सिध्येन्महात्मनस्तेन मानिन्यं न हि किञ्चन ।
प्राचुर्यार्थौ मयट् शब्दो वक्ति तैः पूर्णतां किल ॥328 ॥

अनेकार्थपदस्यार्थो ग्राह्यः प्रकरणोचितः ।
न हि सैन्धवशब्देन वक्त्यश्वं भुक्तिकामुकः ॥ 329॥

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
इति श्रुतौ तु या मायेत्युक्ता सा प्रकृतिर्जडा ॥ 330 ॥

सर्गादौ मायया विश्वं सृजतीति वचोपि च ।
मायाख्यां प्रकृतिं प्राह यास्योपादानकारणम् ॥ 331 ॥

जगतो हेतुभूता तु माया सर्वगता शुभा ।
विकृताकारतोऽनित्या नित्यामूलस्वरूपतः ॥ 332 ॥

न सा भ्रान्तिकरी शुद्धा मुक्तामुक्तप्रदेशगा ।
सूक्ष्मरेणुमयी सा च तन्तुवायस्य तन्तुवत् ॥ 333 ॥

वशगा यस्य देवस्य तया स शबलः कथम् ।

न हि स्वर्णकृतो हस्तः सौवर्णः शबलोपि वा ॥ 334 ॥

नापि तन्तुमयी तन्तुवायमूर्तिरतः प्रभुः ।

अप्राकृतमहाकायो यद्रोम्णि प्राकृतं जगत् ॥ 335 ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।

अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टदा ॥ 336 ॥

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।

हेतुनानेन कौन्तेय जगद्विपरिवर्तते ।

इति कृष्णः स्वयं प्राह प्रकृत्यध्यक्षतां परम् ॥ 337 ॥

निमित्तमात्रं तत्रात्मा निर्गुणः पुरुषर्षभः ।

व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ।

इति वाक्ये निमित्तत्वमात्रोक्तेश्च न तन्मयः ॥ 338 ॥

निर्गुणत्वोक्तितश्चाभूत् सा दूरे त्रिगुणात्मिका ।

अहायस्कान्तदृष्टान्तोप्यसक्तस्य नियन्तृताम् ॥ 339 ॥

तमसः पारगत्वं च श्रुत्या स्मृत्या च कीर्त्यते ।

अतो जगदुपादानमायाशबलता गता ॥ 340 ॥

विदितोसि भवान् साक्षात्पुरुषः प्रकृतेः परः ।

केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् ॥ 341 ॥

इति भागवते कृष्णः प्रकृतेः पर एव सन् ।
केवलानुभवानन्दरूपः स्पष्टं निरूपितः ॥ 342 ॥

स्वदृष्टमद्भुतं रूपं शिशोस्तस्य चतुर्भुजम् ।
इत्थमस्तौत्किल पिता दीप्तश्रीवत्सकौस्तुभम् ॥ 343 ॥

अतोप्राकृतएवाभूद्दिव्याकारो हरेरसौ ।
जडामिश्रसुखज्ञानात्मक हस्ताङ्घ्रिरोमुखः ॥ 344 ॥

भ्रमहेतुस्तु या माया जीवे जीवे च सङ्गता ।
सा नैव श्रूयते देवे या जीवेपि न मुक्तिगे ॥ 345 ॥

किं पुनर्नित्यमुक्तेस्मिन् जडमायानुपद्रवः ॥ 346 ॥

विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ।
विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥ 347 ॥

नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने ।
न यत्र श्रूयते माया लोकदृष्टिविकल्पना ॥ 348 ॥

त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः ।
मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ 349 ॥

स एव जीवलोकस्य मायामोहितचेतसः ।

विधित्सुः स्वेन वीर्येण श्रेयो धर्मादिलक्षणम् ॥ 350 ॥

इति भागवते प्रोक्तचतुर्मुखमुखोक्तितः ।

कृष्णस्य बन्धकीभूतमायादूरत्वनिर्णयात् ॥ 351 ॥

न यत्र मायेत्याद्युक्त्या यल्लोकोपि न मायिकः ।

कथं मायामयाकारस्तल्लोकेशो भवेद्वद ॥ 352 ॥

माया जया कृतिः शान्तिरिति रूपचतुष्टयम् ।

श्रियोस्ति या हरेर्जाया वासुदेवादिरूपिणः ॥ 353 ॥

नामधेयानि कुर्वन्ति स्थानानि च नरा भुवि ।

माया नारायणीशाना शारदेत्यम्बिकेति च ॥ 354 ॥

इति भाष्यतं देवी माया भगवती भुवि।

बहुनामनिकेतेषु बहुनामा बभूव ह ।

इति भागवतोक्त्या च माया दुर्गात्मिका रमा ॥ 355 ॥

या कैङ्कर्यकरी तस्य सर्वदा सहचारिणी ।

तयैव मायी स जगन्निर्ममे मायया तया ॥ 356 ॥

यो नः पिता विष्णुरसौ लोकमाता हि सेन्दिरा ।

तस्मात् स्वरूपमायेच्छाबाह्ये श्रीप्रकृती वशे ॥ 357 ॥

चतुर्थी तु चतुर्थार्थी न स्मरेद्ब्रह्मदां हरौ ॥ 358 ॥

विज्ञानास्त्रेण यो मायामहरद्बाणमन्त्रिणः ।

अन्यैरहस्यमानां च सा कथं सात्वतर्षभे ॥ 359 ॥

मयामाया हि सा सत्यान्मिथ्यार्थान् दर्शयेत्परम् ।

त्रिविधा देवमायेयं सत्यासत्यार्थकारिणी ॥ 360 ॥

तव त्वनिर्वाच्यमया न सुरे नापि चासुरे ॥ 361 ॥

मदान्धे तु महादैत्ये गुरोरप्यवमन्तरि ।

तवोपमा कथञ्चित्स्यान्मिथ्यात्वं नास्तिता यदि ॥ 362 ॥

गुरं च गुरुणा दत्तां विद्यामुद्धतधीरसौ ।

यतो धिक्कुरते वाचा स आचार्यो भवेत्तव ॥ 363 ॥

अनिर्वाच्यत्वपक्षस्य त्वनिर्वाच्यो परो गुरुः ।

प्रच्छन्नबौद्धराद्धान्तो यत्त्वं सदसतोर्बहिः ॥ 364 ॥

पक्ष्योन्यस्तु सभामध्ये हास्यायस्यात्परं नृणाम् ॥ 365 ॥

मलिनद्रव्यसंयोगे मालिन्यं वाससोपि हि ।

शुद्धसमायोगे श्लाघ्यं स्यात् स्वर्गिणामपि ॥ 366 ॥

किं न कौसुम्भकुसुमरक्तिमा वस्त्रभूषणम् ।
न किं कुङ्कुमसौगन्ध्यं गन्धसौगन्ध्यवर्धनम् ॥ 367 ॥

शौक्ल्योत्तेजकयोगे स्याद्वस्त्रस्य ह्यतिशुक्लता ॥ 368 ॥

शक्तिसौन्दर्यशौर्यादियोगाच्छ्लाघ्यतरो हरिः ।
ज्ञानेनाज्ञानादिदोषान्यद्दूरे द्रावयेत्प्रभुः ॥ 369 ॥

यदि स्वरूपज्ञानस्य नाज्ञानप्रतिकूलता ।
तदा मुक्तस्य चाज्ज्ञानात् पुनः संसारिता पतेत् ॥ 370 ॥

भ्रान्त्युत्थितस्य तत्रैव भूयो भूयो भ्रमोस्ति हि ।
नष्टाज्ञानस्य च भ्रान्त्या कल्पनापि पुनः पुनः ॥ 371 ॥

अज्ञानभ्रान्तये दोषः कल्प्याज्ञानान्न चापरः ।
प्रातीतिकं च तेऽज्ञानं नापि स्वभ्रमकारणम् ॥ 372 ॥

अतो भ्रान्त्येककल्प्यस्य कुत्र कुत्र न कल्पना ।
अनादि नास्ति चेत्किं नश्छिन्नं मायैव कल्प्यताम् ॥ 373 ॥

अतः स्वरूपज्ञानेन ज्वलज्ज्वालोज्ज्वलेन हि ।
अज्ञानोच्चाटनं वाच्यं यत्सङ्गात् मानसोपि चित् ॥ 374 ॥

मायां व्युदस्य चिच्छक्त्येत्युक्तं वाक्यमनुस्मर ।

दोषेण शबलो दूष्यो गुणेन तु मनः प्रियः ॥ 375 ॥

गोःशाबल्यं न किं लाल्यं श्वित्रिणश्चित्र रूपवत् ।
नित्यमुक्तत्वशुद्धत्ववचनात् क्वास्य दोषिता ॥ 376 ॥

क्रियावेशप्रसङ्गेन कर्तृत्वं न चितो यदि ।
तर्हि ज्ञप्तिश्च चिन्न स्यात् सा धात्वर्थक्रिया यतः । 377 ॥

निष्क्रियं त्विति वेदस्य पक्षपातो न विद्यते ।
क्रियामात्रनिषेधित्वाद्वयं च प्रतिषेधति ॥ 378 ॥

परास्येति श्रुतिः प्राह सहज्ञानबलक्रियाः ।
अतः श्रौतमिदं त्यक्त्वा स्वगोत्रकलहाक्षमा ।
श्रुतिर्निषेधतीशे द्वे पुण्यपापाभिधे क्रिये ॥ 379 ॥

दुःशब्दस्पर्शरूपादीन् विषयान् जडविग्रहम् ।
अशब्दत्वादिका वाणी निवारयति वैदिकी ॥ 380 ॥

नचेन्निष्कलशब्देन न स्यात् ज्ञानकलापि ते ।
कथंचित्तत्समाधाने सर्वत्रैवं मतिं कुरु ॥ 381 ॥

अशब्दश्रुतिलक्ष्यत्वे मुख्यार्थाशब्दता गता ।
अशब्दश्रुतिवाच्यत्वे मुख्यार्थाशब्दाता गता ॥ 382 ॥

अशब्दश्रुत्यबोध्यत्वे मुख्यार्थशब्दता गता ॥ 383 ॥

यद्यशब्दश्रुतेरर्थः सर्वथा शब्ददूरता ।
तर्हीयं च श्रुतिस्तत्र मानं नेति जितं परैः ॥ 384 ॥

कथञ्चित् शब्दयोगे तु श्रुतेर्मुख्यार्थता गता ।
यथायोग्यार्थकथने जितं स्वत्प्रतिवादिभिः ॥ 385 ॥

यद्यस्पर्शश्रुतेर्थः सर्वथा स्पर्शशून्यता ।
न स्पृशेत्तर्ह्यविद्यापि जितं त्वत्प्रतिवादिभिः ॥ 386 ॥

कथञ्चित् स्पर्शितायां तु श्रुतेर्मुख्यार्थता गता ।
तथा योग्यार्थकथने जितं त्वत्प्रतिवादिभिः ॥ 387 ॥

यद्यस्ति मायिको देहः श्रुतेर्मुख्यार्थता गता ।
सोपि नैवास्ति चेत्तर्हि माया वन्ध्याऽभवत्तव ॥ 388 ॥

यथायोग्यार्थकथने जितं त्वत्प्रतिवादिभिः ॥ 389 ॥

सर्वथा रूपराहित्ये रुग्मवर्णं श्रुतिर्गता ।
मायारूपेण रूपित्वे श्रुतेर्मुख्यार्थता गता ।
यथायोग्यार्थकथने जितं त्वत्प्रतिवादिभिः ॥ 390 ॥

मायिकोर्थो निषेधस्य वारको यदि नेष्यते ।

घटे सत्यपि किं भूमिरघटेति न कथ्यते ॥ 391 ॥

किन्तु प्रमाणसिद्धोर्थः स्वतस्तं च्यावयेद्बली ।
कन्यकानुदरेत्यादौ यथा व्यवहृतौ सताम् ॥ 392 ॥

आदित्यवर्णं तमसः परस्तादिति वैदिकी ।
वागविद्यानिवृत्तौ च रूपमाह परात्मनः ॥ 393 ॥

रूपं स्पर्शतो व्याप्तं तौ साकाराश्रितौ सदा ।
ततश्चैतन्यमात्रेपि श्रुता साकारता महा ॥ 394 ॥

अतः स विश्वतश्चक्षुर्विश्वतो मुख एव च ।
विश्वतो बाहुरीशोसौ विश्वतः पात्परः प्रभुः ॥ 385 ॥

मायाभावेपि यो देहो ज्ञानानन्दात्मको ह्यसौ ।
सुखरूपं हि तद्ब्रह्म ज्ञानरूपं न मृण्मयं ॥396 ॥

सत्वादि मृण्मयां कोयं मायासन्तान एव हि ।
मायामयमिदं विश्वं रोमकूपेप्यणुः किल ॥ 397 ॥

महाकायस्य कायोसौ चिन्मयो न हि मृण्मयः ।
न यत्र श्रूयते माया सद्वादेस्तत्र का कथा ॥ 398 ॥

स्वकार्यैः सह माया यद्रोमकूपं न पूरयेत् ।
तस्याव्याप्तं शरीरं तच्छिद्रूपं न जडोद्भवम् ॥ 399 ॥

सुखज्ञानसुखस्पर्शः सुखगन्धः सुखाकृतिः ।
नखादिस्वशिखान्तं च सुखतेजोमयः प्रभुः ॥ 400 ॥

अलौकिकशरीरेषु विद्यते ह्यशरीरता ।
यथाऽदृश्यशरीरोत्थदैवीवागशरीरवाक् ॥ 401 ॥

विलक्षणशरीरत्वान्न तद्दुःखादिकारणम् ।
अजीर्णता मनुष्यान्नाद्देवान्नादजरोऽमरः ॥ 402 ॥

कर्तृता न चितश्चेत्स्यादकृतागमसङ्कटम् ।
कर्तृता मिलिते चेत्स्यादुभयोरपि कर्तृता ॥ 403 ॥

विशिष्टस्य हि कर्तृत्वे विशेष्यस्यापि कर्तृता ।
वस्तुतः कर्तृतां को वक्त्ययनात्मनि युक्तिमान् ॥ 404 ॥

मत्यैर्वर्त्येयत्स्वतन्त्रः कर्तेत्याहुर्विपश्चितः ॥ 405 ॥

यथा दण्डमृदाद्यर्थैर्विशिष्टो लक्षितोपि वा ।
कुलाल एव घटकृत्ते सर्वे कारकान्तरम् ॥ 406 ॥

देहान्तःकरणाद्यैश्च विशिष्टो लक्षितोपि वा ।

जीव एव तथा कर्ता तत्सर्वं कारकान्तरम् ॥ 407 ॥

मनो हि कारणं तस्य देहोधिकरणं स्मृतम् ।
कर्तृत्वे कोस्ति दायादी मायापि करणान्तरम् ॥ 408 ॥

विशिष्टार्थविमर्शैर्भूयतश्चिन्मात्रकर्तृता ।
मुसलाच्च त्वचं कश्चिन्मोचयेत्तद्विचक्षणः ॥ 409 ॥

अतो विशिष्टकर्तृत्ववादं शिष्टा न मेनिरे ।
सहकार्यैव तत्रापि जडं कर्ता तु चेतनः ॥ 410 ॥

द्वावुद्दिश्यकृते यागे देवतात्वं द्वयोरपि ।
द्विदैवत्वं हि तत्कर्म सङ्कल्पो देवते इति ॥ 411 ॥

समूहालम्बनज्ञाने विषयत्वं यथा पृथक् ।
तथा विशिष्टविज्ञाने विषयत्वं पृथक् पृथक् ॥ 412 ॥

व्यासज्यवृत्तिधर्मोयं न हि द्वित्वपृथक्त्ववत् ॥ 413॥

केवलस्य ह्यकर्तृत्वे किं नश्चिन्नं हरिश्च नः ।
कालप्रकृतिकर्माद्यैः सहैव कुरुते जगत् ॥ 414 ॥

देहान्तःकरणाद्येव कर्तृत्वे घटकं यदि ।
आनन्दमात्रकरणदेहादेरस्तु कर्तृता ॥ 415 ॥

विदितोसि भवान् साक्षात् पुरुषः प्रकृते परः ।

केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् ।

इति भागवते प्रोक्तेः का नो हानिरतो वद ॥ 416 ॥

यदि दृष्टं जडस्यैव सहायत्वं गृहे गृहे ।

तदा दरिद्रदेशस्तः स्वर्णकुम्भजलं त्यजेत् ॥ 417 ॥

सुवर्णगरुडस्थस्य यात्रा स्वस्था भवेत् किल ।

साक्षाद्गरुडकण्ठस्थश्चित्रं यात्राऽक्षमः किल ॥ 418 ॥

यदा हि रूपनिष्पत्तिर्मुक्तौ जीवस्य जायते ।

न हि तत्प्राकृतं रूपं स्वेनेत्यस्य विरोधतः ॥ 419 ॥

मुक्तत्वव्याहतेश्चातश्चिद्रूपं रूपमुच्यते ॥ 420 ॥

येन पर्येति सस्त्रीको यानैर्गच्चति पश्यति ।

हसति क्रीडते रूपं देहोयं नात्र संशयः ॥ 421 ॥

फलाध्याये हि सम्पद्याविहायेति यमादरात् ।

असूत्रयत्सूत्रकारः समोक्षः परमोध्रुवः ॥ 422 ॥

यत्रत्वस्येति वाक्यं तु प्रवृत्तं तर्कमुद्रया ।

दृढीकरोतीममर्थं यत्तर्कोन्तिविपर्ययः ॥ 423 ॥

अव्ययोक्तेरनेकार्थे शासने त्वनुशासनात्।

सामान्यवचनं ह्येतत्पूर्ववाक्तु विशेषवाक् ॥ 424 ॥

जम्बुको मेषयुद्धार्थी वृद्ध्यर्थी पोषकोजनः ॥ 425 ॥

न चेत् कामान्निता कामरूपिता गानकर्तृता ।

भोक्तृता सर्वकामानं कुप्यन्त्येते विमुक्तिगाः ॥ 426 ॥

तव त्वापातवाक्यार्थात् शून्यतैवेत्यपार्थता ।

चित्रचिद्रूपदेहास्तज्जीवाः सर्वेपि सर्वदा ॥ 427 ॥

चिद्रूपाकारहेतुत्वाल्लिङ्गदेहेपि तत्पदम् ।

बन्धे तु प्राकृतोप्यस्ति मुक्तौ चिन्मात्रकं वपुः ॥ 428 ॥

हरेस्तु नित्यमुक्तस्य देहः सर्वत्र सर्वदा ।

बलज्ञानप्रभासौख्यसौन्दर्यादि गुणात्मकः ॥ 429 ॥

तस्यैष आत्मा विवृणुते तनूं स्वामिति श्रुतिः ।

भगवत्प्राप्तितः पश्चात्तनुं वक्ति विमुक्तिगां ॥ 430 ॥

तदापीशतनो साक्षात्कारं वा वक्ति वाग्घि सा ।

अर्थद्वयं यतो वाक्यस्यास्य श्लोक्यं बुधैः सदा ॥ 431 ॥

तनुः शरीरमेवेयं रूपमात्रं न वै तनुः ।

घटस्वरूपे किं कश्चिद्विगश्चित् प्राह देहतां ॥ 432 ॥

स्वामित्युक्त्या तनुः सा च स्वरूपैवेति सिद्ध्यति ।
जडान्यदेहनिर्मोक्षात् स्वीयत्वार्थो ह्यपार्थकः ॥ 433 ॥

दृङ्मात्रं जडदेहस्य किं महाकरुणाफलं ॥ 434 ॥

अनादिनित्यता चास्य व्यक्तिमात्रप्रकीर्तनात् ।
सिद्धा तेन च संसिद्धा जडान्यैव तनूरियं ॥ 435 ॥

अतः श्रुत्यर्थतत्वज्ञास्तनुं मुक्तपरात्मनोः ।
चिदानन्दमयीं प्राहुर्न प्राहुर्जडदेहिताम् ॥ 436 ॥

सा च जन्मजरारोगह्रासनाशाद्यभावतः ।
न क्लेशदा तयोस्तस्मात्कथं दोषावहा वद ॥ 437 ॥

किं तु सौन्दर्यसौरभ्यप्रभामन्दस्मीतेक्षितैः ।
आलिङ्गनैरालपनैश्चित्रमाल्यानुलेपनैः ॥ 438 ॥

परार्घ्यभूषणैर्मौक्तनृत्तवादित्र कीर्तनैः ।
भोगैश्च विविधैर्नित्यं महोत्साहावहैव हि ॥ 439 ॥

अतस्तया शबलता न विद्वज्जनसम्मता ॥ 440 ॥

ददतीशं बलं च त्वच्छबलत्वं बहिः क्षिपेत् ।

बिन्दुमात्राधिकत्वेपि प्रबलो दुर्बलं क्षिपेत् ॥ 441 ॥

चित्रप्रकाशबलतः शबलो वास्तु नः प्रभुः ।
यतोस्य हासो धवलस्तनुर्नीलाऽधरोरुणः ॥ 442 ॥

नान्तं न मध्यं नैवादिं यस्यापश्यद्रणेर्जुनः ।
अनन्तबाहुजठरवक्त्रनेत्रभ्रमद्भ्रुवः ।
विश्वरूपाख्यरूपस्य दृष्टस्य ज्ञानचक्षुषा ॥ 443 ॥

अनन्तगन्धाभरणान्यनन्तकुसुमानि च ।
अनन्तान्यम्बराण्यस्य केन दत्तानि सर्वदा ॥ 444 ॥

सवित्री तस्य देहस्य नादितिर्नापि देवकी ।
यो दौत्यमाचरद्देहः स एवैतादृशः किल ॥ 445 ॥

अनाद्यनन्तदेहेस्मिन् क्व निराकारता च ते ।
दिव्यदृष्ट्यैव  दृष्टोयं कथं मायामयो भवेत् ॥ 446 ॥

मायादूरत्ववाचा च नेदं मायामयं वपुः ॥ 447 ॥

अपरिच्छिन्नदेहोयं पार्थप्रत्यक्षगोचरः ।
परिच्छिन्नभवान्मायामयो नैवेति मे मतिः ॥ 448 ॥

तत एव स सत्योभून्नित्यश्च परमात्मवत् ।

ब्रह्मवच्चिन्मयोप्यासीत्त्वन्नयानैवमन्नयात् ॥ 449 ॥

क्वानन्तसूर्यसङ्काशप्रकाशो मुक्तिदः प्रभुः ।
क्वते तमोमयी मायायं प्रपन्नोपि यां करेत् ॥ 450 ॥

प्रायो दग्धपटप्राया या यज्ज्ञानोदये हृदि ।
मायानिस्तरणोपायः सोयं मायामयः किल ॥ 451 ॥

अस्त्यस्तितोक्तौ नास्तीति प्रतिवागतिवादिनि ।
सहस्रशीर्षा श्रौतो यो नैकशीर्षाप्यसौ किल ॥ 452 ॥

छली सूर्याच्छादनाय करं कोपि प्रसारयेत् ।
सप्रकारं हि यं विद्वान्मुच्येत स किलाल्पकः ॥ 453 ॥

अतः पुरुषसूक्तस्य विराट् पुरुषसूक्तताम्।
वदन्तो वादिनः पूर्वोत्तरज्ञानविवर्जितः ॥ 454 ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम् ॥ 455 ॥

इति नारायणस्यैव याजुषोपनिषज्जगौ ।
यतः सहस्रशीर्षत्वं ततः पुंसूक्तगोप्यसौ ॥ 456 ॥

अग्निर्मुखं त इत्याद्यैः पद्यैर्यं कृष्णमम्बुनि ।
अक्रूरोस्त्रौत्स एवार्थात् पुंसूक्तार्थो हि धीमताम्॥ 457 ॥

तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिं ।
पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥ 458 ॥

इति भागवते विष्णौ पुरुषाख्यामुदीरयन् ।
यतः पुरुषसूक्तं च तत्सूक्तं स्पष्टमुक्तवान् ।
अतोप्यकुशलास्ते वै वेदार्थकथनोद्यताः ॥ 459 ॥

साक्षान्मोक्षाङ्गतोक्तेः सा मूर्तिरप्राकृतैव हि ।
न हि प्राकृतविज्ञानादप्राकृतपदं भवेत् ॥ 460 ॥

सहस्राक्षिशिरःपादैर्यतोत्यन्तविलक्षणः ।
पुरुषः पूर्ववाक्येन विश्वव्याप्तश्च कीर्त्यते ॥ 461 ॥

उतामृतत्वस्येशानो यदन्नेनातिरोहति ।
एतावानस्य महिमा ततो ज्यायांश्च पूरुषः ।
इत्युत्तरत्र चेशत्वपूर्वोस्य महिमोच्यते ॥ 462 ॥

अतः पुरुष एवेदं सर्वमित्यपि नैक्यवाक् ।
उपक्रमोपसंहारौ यद्वाक्यार्थनियामकौ ॥ 463 ॥

यदधीना यस्य सत्ता तत्तदित्येव भण्यते ।

राजैव राष्ट्रमित्यादि प्रयोगस्तन्निदर्शनम् ॥ 464 ॥

अतः पुरुष एवेति पुंसः स्वातन्त्र्यवागियं ॥ 465 ॥

पूर्वोक्तरोक्तसुगुणरत्नमालामहामणिम् ।
मध्ये बिभर्ति न पुनः काचं वाचामगोचरम् ॥ 466 ॥

यत्स्वप्रकाशात्मरूपमैक्यं ते वाक्यदूरगम् ॥ 467 ॥

विरुद्धधर्मास्त इमे साक्षान्मोक्षाङ्गताबलात् ।
अनिवर्त्याश्च सत्याश्च कदैक्यावसरो वद ॥ 468 ॥

एवं विद्वानिति ज्ञानं श्रूयते सप्रकारकं ।
निष्प्रकारकधीवेद्यं तेऽद्वैतं नात्र शोभते ॥ 469 ॥

एतावानस्य महिमा ततो ज्यायांश्च पूरुषः ।
इति पूर्वोक्तमहिमा ज्यायस्त्वे हेतुरुच्यते ॥ 470 ॥

अतः पूर्वोदितोप्यर्थः सर्वोपि महिमाभवेत् ।
न चेद्विरुद्धो हेतुः स्यादनुवादोप्यनन्वितः ॥ 471 ॥

सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ।
इति स्मृत्यनुसारेण मर्त्यामृतपदोक्तयोः ॥ 472 ॥

मुक्तामुक्तचितोरीशो ह्युत्तरार्धे स कथ्यते ।

अतो जडपदार्थस्यापीशत्वं वक्ति पूर्ववाक् ॥ 473 ॥

दृश्यमानमिदं सर्वं प्रायशो जडमेव हि ।
न चेदतिविरुद्धोक्तिरियं स्यात् सर्ववादिनाम् ।
मुक्तामुक्तचितोरीशः कथं सर्वजडात्मकः ॥ 474 ॥

देहोप्यात्मान चेत्सर्वं दृश्यमानमिदं जडम् ।
कथं परुष एव स्यादेवेत्यत्यन्तदुर्घटम् ॥ 475 ॥

विशिष्टैक्यं हि तस्यार्थो यज्जीवेपि न युज्यते ॥ 476 ॥

नष्टानुत्पन्नजडतो भूतभव्यपदोदितात् ।
ऐक्यं त्वनादिनित्यस्य पुरुषस्येति को वदेत् ॥ 477 ॥

भावाभावविरोधश्च नास्ति किं सर्वसम्मतः ।
घटोपि विद्यमानोयं न हि नष्टघटात्मकः ॥ 478 ॥

पूर्वोक्तमर्थं सर्वं च तच्छब्दोयं परामृशेत् ।
कथं विरुद्धयोरेकफलसाधनता वद ॥ 479 ॥

अनपेक्षितसन्त्यागः स्वापेक्षितपरिग्रहः ।
कथं स्यात्सूक्तसूत्रेस्मिन् दृढबद्धार्थसन्मणौ ॥ 480 ॥

स्वेच्छानुसारिव्याख्याचेन्मीमांसा किं निबन्धना ।

सूत्रच्छेदं विना मध्यमणेर्नैव हि सङ्ग्रहः ॥ 481 ॥

छिन्ने सूत्रे त्वनालम्बः परामर्शोप्ययं पठेत् ।

अतो ज्ञानैकसाध्योर्थो न स्यात्ते स्यात्तमोन्ततः ॥ 482 ॥

तस्मान्मीमांसकैरार्यैरुक्त एवार्थ इष्यते ।

अन्योह्यनर्थः श्रोतुर्वा वक्तुर्वा न मनोहरः ॥ 483 ॥

व्यत्यासश्च विभक्तीनां वेदव्यासस्य सम्मतः ।

अन्नेनेति तृतीयां यो द्वितीयार्थैन्वशिक्षत ॥ 484 ॥

अतः पुरुष एवेति प्रथमा पञ्चमी यदा ।

सदा सर्वनिमित्तत्वमहिमा पुंसि वर्ण्यते ॥ 485 ॥

यदा तु सप्तमी सर्वाधारत्वं वर्णयेत्तदा ॥ 486 ॥

सूक्तस्यैकार्थता चैवं सत्येव स्यान्नचान्यथा ।

यतः सर्वजगत्कर्ता पुरुषः सोऽत्र कीर्त्यते ॥ 487 ॥

अपि भिक्षाटनं कृत्वा ज्ञातीन् रक्षितुमर्हति ।

यदीयं भारती भीमसेनदर्शितपद्धतिः ॥ 488 ॥

न चेत्कथमभेदार्था यतो वाक्यं भिनत्ति सा ।

सम्भवत्येकवाक्यत्वे वाक्यभेदो हि दूषणं ॥ 489 ॥

जडात्मैक्यं प्रसङ्गेन मुख्यार्थस्तु तवापि न ।
यच्चायां तु प्रवृत्तेन सदन्नं किं न याच्यते ॥ 490 ॥

किञ्च पुरुषसूक्तेस्मिन् सर्वस्य पुरुषात्मता ।
यद्यर्थस्तर्हि कार्यार्थं व्यर्थं तेन तदर्थनम् ॥ 491 ॥

का भूः कुतो भरस्तस्याः कः स्वयं कश्च पुरुषः ।
एतावदपि सूक्तार्थं ध्याता धाता न वेत्ति किं ॥ 492 ॥

पुरुषात् पुरुषस्यैव भये पुरुषपूजनम् ।
पुरुषः कुरुते कस्मात्तस्मादस्मन्मतं स्मर ॥ 493 ॥

व्यावहारिकभेदाच्चेत्तर्हि कार्यानुरोधिनः ।
तस्यानुकूलमेवार्थं वक्ति सूक्तं न वैरिणम् ॥ 494 ॥

अन्ततः परमार्थश्च स एव स्याद्धि कार्यकृत् ।
सर्वैक्यं सर्वकार्याणां भञ्जकं कस्य रञ्जकम् ॥ 495 ॥

बोध्यत्वं बोधकत्वं च साध्यसाधकतां तथा ।
गुरुं शिष्यं च यद्घ्नन्ति तन्नहन्ति हि कः पुमान् ॥ 496 ॥

वर्णाश्रमविबेधस्य शून्याशून्यव्यवस्थितेः ।
साधकः परमार्थोर्थो बाधकोर्थस्तु बाध्यते ॥ 497 ॥

यदि सर्वैक्यमर्थो न वाक्यं स्यात्तर्ह्यनर्थकम् ।

गौणार्थानुसृतौ विष्णोः स्वातन्त्र्याख्यगुणं वदेत् ॥ 498 ॥

सङ्कोचेप्यल्पजडतः स्यादैक्यं न तु जीवतः।

इदं पदार्थो हि जडो यत्ते जीवोनिदं पदः ॥ 499 ॥

तत्पूर्वस्वोत्तरार्थघ्नं स्वोपस्थात्रर्थघातकम् ।

अयुक्तं च जडाद्यैक्यमुक्तं चेत् सूक्ततैव न ॥ 500 ॥

विशिष्टचिद्धि बाहुल्यात्सर्वं स्यान्नतदैक्यवत् ।

चिन्मात्रमबहुत्वात्ते न सर्वाख्यं यदैक्यवत् ॥ 501 ॥

अथवैक्यपरं वाक्यमेतदस्तु न मे भयम् ।

तन्मुख्यार्थं च युक्तं च यथास्यात्तां कथां श्रृणु ॥ 502 ॥

असह्यदेहिदेहेषु सोत्यतिष्ठद्दशाङ्गुलम् ।

इति पूर्वश्रुतौ पुंसो रूपबाहुल्यमीरितं ॥ 503 ॥

प्रादेशगात्रतोक्त्यैषां प्रोक्ता मध्यममानता ।

तत्तदङ्गुलिमानानां प्रोक्ता चाल्पाल्पमानता ॥ 504 ॥

स्थानभेदेन रूपानन्त्याच्चात्यल्पप्रमाणतः ।

पूर्वोक्तव्याप्तपुरुषाद्रूपाणां भेदशङ्किनी ॥ 505 ॥

श्रुतिः पुरुष एवेदं सर्वं रूपकदम्बकम् ।
इत्यभिन्नत्वमाहैषां प्राक् स्वोक्तव्याप्तपूरुषात् ॥ 506 ॥

भेदाभेदादिशङ्काया वारणायावधारणम् ॥ 507 ॥

आविर्भावात्तिरोभावात् भूतं भव्यं भवच्च तत् ।
भूतभव्यभवद्देहे यद्रूपं परमात्मनः ॥ 508 ॥

विशेषशक्त्या सर्वं च निर्वूढुं शक्यते किल ।
पूर्वोत्तरविरुद्धोर्थः श्रुतेरेवं भवेन्मम ॥ 509 ॥

पूर्वोत्तरविरुद्धार्थः स्वतश्च व्याहतस्तव ॥ 510 ॥

स्थानस्थानित्वकथनाज्जायस्त्वेशत्वकीर्तनात् ।
जडार्थस्यापि सर्वत्वात् कथमैक्यार्थता वद ॥ 511 ॥

भेदसौरभसर्वस्वे स्यादस्यार्दस्य विस्तृतिः ।
शुद्ध्युद्धारे तदुद्धारस्त्वन्योन्यमतिमिश्रणात् ॥ 512 ॥

अतो विचारवातोऽयं सौरभे सौरभान्तरम् ।
सम्योजयति तद्गन्धः (तद्ग्रन्थः)सोयं जनमनोहरः ॥ 513 ॥

तथापि तत्तदर्थस्य तत्रतत्र विशेषतः ।
विचारणात् सौरभाणां सर्वस्वं भाति पञ्चधा ॥ 514 ॥

अग्रतो जातपुरुषं रुद्रं पशुपतिं पुरा।
देवाः सर्वेपि यजनयोग्यत्वाद्यज्ञनामकम् ।
प्रौक्षन् बर्हिषि यूपे तमबध्नन् पुरुषं पशुम् ॥ 515 ॥

देवाः पुरुषमेधेन तेन यज्ञेन सर्वषः ।
अयजन् यज्ञपुरुषं पूज्यत्वाद्यज्ञनामकम् ॥ 516 ॥

तमित्युक्तिर्हविः पुंसो यो वध्यो वक्ष्यते पशुः ।
स हि प्रोक्षस्तेन तस्मादित्यादिश्चात्र पुंस्तुतिः ॥ 517 ॥

ज्यायस्त्वं महिमाव्याप्तिरमृतत्वेशतादिकम् ।
न हि वध्यपशोर्देवस्रष्टृङ्गत्वं तदिज्यता ॥ 518 ॥

अकेन सर्वथा शून्यं निर्दुःखं मोक्षमेव हि ।
नाकाभिधं प्रापुरन्ते नाकिप्राप्यः स एव हि ।
नाकोन्यस्य तु नाकस्य सिद्धत्वात्पूर्वमप्यलम् ॥ 519 ॥

पूर्वं मुक्ता यत्र सन्ति देवाः किल सहस्रशः ।
तैः सहैव स्थितिर्मोक्षे देवानां नापरत्र हि ॥ 520 ॥

यं धाताप्याह वेदाहं महान्तं पुरुषं त्विति ।
आदित्यवर्णः सकिल तमसः पार एव हि ।
सदा तिष्ठति तेनासौ नित्यमुक्तः परः प्रभुः ॥ 521 ॥

यः स्वावयवतो देवानिन्द्राग्निप्राणपूर्वकान् ।
असृजत् सर्ववेदांश्च प्रोक्तवान् स्वहृदि स्थितान् ॥ 522 ॥

यो गुरुः सर्वदेवानां पिता च प्रभुरेव च ।
चराचरजगत्कर्ता देवाराध्यपदाम्बुजः ॥ 523 ॥

देवानामपि कैवल्यदाता धातुश्च यो महान् ।
नित्यमुक्तश्च भगवान् परब्रह्म स एव हि ॥ 524 ॥

श्रीश्च लक्ष्मीश्च यत्पत्न्यौ सूक्तान्ते तस्य कीर्तिते ।
अतः पुरुषसूक्तोक्तः साक्षान्नारायणः प्रभुः ।
स्पष्टं भागवते चोक्ता पुंसूक्ते विष्णुसूक्तता ॥ 525 ॥

तस्मादजायत विराडिति यः पुंसुतो विराट् ।
सहस्रशीर्षापि पुमानसावेव किलाद्भुतम् ॥ 526 ॥

इत्थं सूक्तोक्तमहिमा यस्य सर्वेश्वरस्य हि ।
परम्ब्रह्म स एवैको नारायण इति स्थितम् ॥ 527 ॥

तमुक्तविधया विद्वान् मुक्तः स्यान्नान्यथा किल ।
अतो मुमुक्षुभिर्ज्ञेयमिदं ब्रह्म न चापरम् ॥ 528 ॥

मुक्तावनुपयोग्यन्यद्ब्रह्म यद्यस्ति तत्तव ।

तमो जिगमिषोर्मुक्तियोग्यानामिदमेव नः ॥ 529 ॥

साकारसगुणश्रीशसेवैकामृतपद्धतिः ।

नान्यस्य सेवा मोक्षस्य पन्था इत्याह हि श्रुतिः ॥ 530 ॥

अतो मुकुन्दादितरद्ब्रह्मवेदविनिन्दितम् ।

मोक्षेन्तरङ्गहेतुत्वान्मुख्यं ब्रह्म स एव हि ॥ 531 ॥

वादिराजाख्ययतिना साधिता युक्तिमल्लिका ।

शुद्धिसौरभसर्वस्वमद्धा विष्णोर्न्यवेदयत् ॥ 532 ॥

॥ इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीमद्वादिराज पूज्यचरण विरचितायां युक्तिमल्लिकायां शुद्धिसौरभं सम्पूर्णम् ॥

# भेदसौरभं

सर्ववस्त्वात्मकत्वं च यदनन्तत्वमीरितम् ।
तदयुक्ततमं मन्ये युक्तायुक्तविचारणे ॥ 1 ॥

समस्तवस्तुस्वरूपत्वं न तावत् स्वस्य शोभते ।
जडानृतविरोधित्वं यद्ब्रह्मणि जगौ स्वयम् ॥ 2 ॥

श्रुतिः प्राग्ज्ञानमित्याह यतस्तज्जडरूपता ।
न तस्याश्च मता नापि शब्दस्य हृदयङ्गमा ॥ 3 ॥

यद्देशतो व्याप्तिमाह देशतः सोन्तशून्यताम् ।
कालतो व्याप्तिमाचष्च कालतश्चान्तशून्यताम् ॥ 4 ॥

विभोस्तदणुरूपत्वं नित्यस्यानित्यरूपताम् ।
कथं पुनरसौ ब्रूयान्नहि स स्वात्मघातकः ॥ 5 ॥

देशकालव्याप्ततोक्त्या यत्तद्भिन्नमभूत्पुरा ।
कथं पुनर्वस्तुरूपात्तत एव तदेकता ॥ 6 ॥

सकृच्छ्रुतांतशब्देन परिच्छेदं स्थलद्वये ।
वदंस्तदैव भेदं च कथमेकत्र वक्ति सः ॥ 7 ॥

न हि द्विजिह्वः शब्दोसौ नापि त्रिक्षणवर्तिनः ।
विरम्य व्यापृतिर्युक्ता नापि साविदुषां मता ॥ 8 ॥

देशकानान्तशून्यत्वं देशे काले च वर्तनम् ।
यथावस्त्वन्तशून्यत्वं तथा वस्तुषु वर्तनम् ।
भवेत्परं विधानैकपङ्क्तौ यत्परिवेषणम् ॥ 9 ॥

बुवस्त्वाश्रयत्वं वा भवेल्लोकनिदर्शनात् ।
रत्नतोऽनन्त इत्याहुर्यातो रत्नाकरं जनाः ।
तथा गुणानन्तता च स्याद्गुणैः पूर्णता हरेः ॥ 10 ॥

अन्तो नेत्येव शब्दार्थः स तु योग्यो विमृश्य(ग्य)ते ।
देशतः कालतश्चान्तो नाम देशाच्च कालतः ॥ 11 ॥

परिच्छेदः स चेयत्ता सा च क्वचिदसङ्गतिः ।
क्वचिच्च सङ्गतिस्ताभ्यां शून्यता सर्वसङ्गमः ॥ 12 ॥

तत्सर्वदेशकालेषु सम्बन्धोऽनन्तता यथा ।
समस्तगुणसम्बन्धो गुणानन्त्यं तथा विभोः ॥ 13 ॥

अतो न पङ्क्तिभेदोस्ति पङ्क्तिपावनपङ्क्तिषु ।
अन्तस्य तन्निषेधस्य सर्वत्रैकविधत्वतः ॥ 14 ॥

सम्बन्धश्च यथायोगं संयोगो द्रव्ययोस्तयोः ।

गुणानां गुणिनश्चैवं गुणगुण्यात्मता परम् ॥ 15 ॥

शिशोर्वृद्धस्य यूनश्च यथायोग्यं हि बोजनम् ।

भिन्नभिन्नान्नदाने हि पङ्क्तिभेदं विदुर्भुधाः ॥ 16 ॥

एकान्नस्य यथायोगं दाने को नेति शंसति ।

अतो वस्तुपरत्वोक्तिर्वस्तुतत्त्वाज्ञतावशात् ॥ 17 ॥

किं चान्तशून्यतैवात्र शक्योर्थो योग्यतावशात् ।

अनेयमन्यद्योग्यं च नैत्रदुक्तप्रकारतः ॥ 18 ॥

महत्त्वस्य विरोधित्वादपि नैतदिहोचितम् ॥ 19 ॥

आधारभूतौ यद्देशकालावखिलवस्तुनः ।

ताभ्यामवध्यभावस्तु तौ द्वौ सर्वौ च नः प्रभोः ।

आधारभूतावित्यर्थे फलत्याधाररूपिणः ॥ 20 ॥

गुणाश्चाधेयरूपास्ते तैरवद्युज्झितिर्हरेः ।

सर्वस्य गुणराशेश्च स्वस्मिन्नाहिततां नयेत् ॥ 21 ॥

यद्धर्मी स्वयमाधारो धर्मास्त्वाधेयरूपिणः ।

अतोन्तशब्दस्त्रिस्थान्यामप्यवद्यर्थको भवेत् ॥ 22 ॥

नार्थभेदस्ततोस्माकं मते सुजन सम्मते ।
वस्तुस्वभावानुगुण्यात्फलं स्वात्यम्बुकार्यवत् ॥ 23 ॥

महद्गुणत्वाद्यमनन्तमाहुरिति च स्फुटम् ।
यतो भागवते प्रोक्तं ततोप्येतदसङ्गतम् ॥ 24 ॥

अर्थद्वये न सन्देहस्तृतीयेऽर्थे हि शंशयः ।
अतो विशिष्य तं व्यासो निर्णयायान्ववर्णयत् ॥ 25 ॥

सद्भावं यापयेद्यस्मात् सत्यस्तस्मात् किल प्रभुः ।
भावप्रधानो निर्देशोस्त्यन्तर्णीतो यतश्च णिच् ॥ 26 ॥

सत्त्वं सृष्टिः संहृतिश्च जीवनं च विदां मते ।
कार्यात्मना विशरणं कारणस्य जनिर्मता ॥ 27 ॥

सद्लृधातोर्विशरणं चार्थ इत्यपि सम्मतम् ।
यतः प्रागसतः सत्वमुत्पत्तिरिति चोच्यते ॥ 28 ॥

अवसाधनमप्युक्तं तद्धात्वर्थतया यतः ।
ततः सत्त्वं संहृतिश्च भवेच्छब्दविदां मते ॥ 29 ॥

विद्यमानत्वमप्याहुः सत्त्वं जीवनमेव तत् ।
इदं चाद्यैः प्रकरणैस्त्रिभिर्विव्रियते किल ॥ 30 ॥

यत आत्मन आकाश इति ऊतजनिं परात् ।
आह सृष्टिर्महासृष्टिस्तेन नाल्पेति शंसति ॥ 31 ॥

ब्रह्मणो लक्षणं नो चेत् कुम्भकारेपि गच्छति ।
अबाध्यत्वमपीतो न तत्सृष्टिकथयापि न ॥ 32 ॥

वाग्विश्वं सत्यमित्याद्या यद्बाध्यं जगज्जगौ ।
ततोपि न यतोन्यत्र गतं प्राहुरलक्षणम् ।
सूत्रे जन्मादिहेतुत्वलक्षणोक्तेश्च नेतरत् ॥ 33 ॥

अतः श्रुतिमतं वेत्ति प्राणोसौ भारती पतिः ।
अन्यस्तामन्यथीकुर्वं च्छून्ये तमसि पात्यते ॥ 34 ॥

अतः स्वेतरसर्वस्य स्रष्टृता सत्यता भवेत् ॥ 35 ॥

पुनरन्नमयत्वोक्त्या महासंहर्तृतोच्यते ।
अद्यतेऽत्ति च भूतानीत्युक्तेः संहर्तृतान्नता ॥ 36 ॥

प्राचुर्यार्थो मयट् प्रोक्तः स्वयं सूत्रकृतैव हि ।
सूचनात् खलु तत्सूत्रमतः पञ्चसुतं नयेत् ॥ 37 ॥

इति लक्षणसूत्रोक्तं तृतीयं लक्षणं श्रुतिः ।
प्राहान्नमयता वाचा निन्द्यदेहस्तुतिर्न सा ॥ 38 ॥

रौद्रव्यापरता शङ्का छेदाया स्यादितः कथा ॥ 39 ॥

प्राणनं जीवनं प्रोक्तं प्राचुर्यार्थे यतो मयट् ।
अतः प्राणमयत्वोक्त्या महापालकतोच्यते ॥ 40 ॥

सर्वसामान्यवेत्तृत्वं ज्ञानत्वमिति च श्रुतिः ।
मनोमयगिरा प्राह यतो धातुः स बोधने ॥ 41 ॥

यतो घटपटत्वादि सामान्यान्यपि वस्तुषु ।
सन्ति चित्रेष्वनन्तानि तत्तद्वेत्तापि सर्ववित् ॥ 42 ॥

विशिष्य सर्ववेत्तृत्वं ज्ञानत्वमिति सा पुनः ।
विज्ञानमयतोक्त्या वीत्युपसर्गयुताऽब्रवीत् ॥ 43 ॥

प्रागुक्तज्ञानतामात्रं सर्वज्ञत्वेऽनयत्ततः ।
न चेद्धटादिवृत्तेश्च ज्ञानत्वात्स्यादलक्षणम् ॥ 44 ॥

सृष्ट्युक्त्या प्राप्तसार्वज्ञलक्षणस्येदमीरणम् ॥ 45 ॥

आनन्दमयवाचान्ते स्वोक्तानन्तत्वमेव सा ।
जगौ किल तदानन्त्यमानन्दादि गुणैर्न किम् ॥ 46 ॥

यद्यानन्दो भवेन्नासौ कथं सृज्यं सृजेदिति ।
श्रुत्युक्तं सा जगौ सृष्टौ पूर्णानन्दाख्यलक्षणम् ॥ 47 ॥

सृष्ट्याद्यष्टकमध्यस्थज्ञानमोक्षप्रदत्वयोः ।
उपयुक्ततया चैतद्द्वयं सूत्रकृतो मतम् ॥ 48 ॥

व्याप्तत्वसर्वशक्तत्वदयालुत्वादिकान् गुणान् ।
सृष्ट्यर्थान् सङ्ग्रहीतुं सा प्रागनन्तगुणान् जगौ ॥ 49 ॥

तत्तत्पूर्त्यै तत्र चैकं गुणं पूर्णमवर्णयत् ॥ 50 ॥

जन्मादिकर्तृतोक्त्या च सूत्राभिप्रेतलक्षणम् ।
गुणानन्त्यं किल हरेस्ततोप्यानन्त्यमाह सा ॥ 51 ॥

यद्यप्सेकैकसुगुणसम्पूर्तिरपि लक्षणम् ।
जीवात्यन्तविभेदाय तथापि बहुकीर्तनम् ॥ 52 ॥

पृथक् पृथग्लक्षणतां वक्तुं वानन्तविस्तृतेः ।
अशक्यावा सर्व(सि)शुद्ध्यै तत्राद्यगुणशोदनम् ॥ 53 ॥

गुणाः सर्वेपि सिद्धाः स्युरानन्दस्य प्रपञ्चने ।
इत्यानन्दमयं स्तौति सर्वेयं वाऽन्तिमस्तुतिः ।
यदियं षड्प्रकरणे गुणानेवागृणात् प्रभोः ॥ 54 ॥

साकारत्वविदुःखत्वाप्राकृतत्वस्तितादयः ।

एकैकाङ्गबृहत्त्वाद्याः किं न सिध्यन्ति तत् स्तुतौ ।

यतः प्रियशिरस्त्वाद्या अपि तस्य स्तुतौ स्तुताः ॥ 55 ॥

यतः सूत्रकृता मान्त्रवर्णिकं गीयते त्विति ।

प्रोक्तैकवाक्यता तस्मान्मन्त्रार्थोन्यः कथं वद् ॥ 56 ॥

एवं श्रुत्यर्थकुशलाः सर्वत्राप्येकवाक्यताम् ।

कुर्युस्त्वाचार्यवंतश्चेत्तिरस्कुर्युन्नचेच्छ्रुतिम् ॥ 57 ॥

सूत्रोक्तसूचितान्येवं लक्षणानि श्रुतिः सती ।

प्राक् प्रस्ताव्य पुनश्चैवं विचार्योपरता किल ॥ 58 ॥

प्राक् सर्वकर्तृतां पश्चात्तत्सिद्ध्यै सर्ववेतृताम् ।

सुखशक्तिकृपाद्याप्त्यै सान्ततोऽनन्ततां जगौ ॥ 59 ॥

मुखतः सूत्रकारोक्तं प्रागुक्तं ब्रह्मलक्षणम् ।

पश्चात्तत्सूचिते वा द्वे लक्षणे सान्वशिक्षत ॥ 60॥

इमां हि शास्त्रमर्यादामाचार्यस्तत्ववादिनाम् ।

वेद तस्मात्तदुदितं तत्वं नान्यदिति स्थितम् ॥ 61 ॥

इतोप्यनन्तशब्दार्थो न परोदीरितो भवेत् ।

अनन्तमिति चैकत्र श्रुतिराह स्थलान्तरे ॥ 62 ॥

आनन्दमिति तत्स्थाने प्राह तेनात्र योग्यता ।

गुणस्यैवास्ति तत्त्यागे दोषः स्यादिति तर्कये ॥ 63 ॥

यतोस्त्येकपदस्यानेष्वजहत् स्वार्थलक्षणा ।

आनन्दादिगुणैस्तस्मादानन्त्यं स्यादिदं प्रभोः ॥ 64 ॥

श्रुत्योरेकार्थतैवं स्यादन्यथा भिन्नवाक्यता ॥ 65 ॥

नाल्पे सुखमिति श्रुत्या पूर्णत्वं सुखकारणम् ।

यदुच्यते ततो देशकालसद्गुणपूर्णता ॥ 66 ॥

आनन्दत्वस्य सिद्ध्यर्थं हेतुत्वेनेह कीर्त्यते ।

इति वा सङ्गतिर्वाच्या समाख्या वाक्ययोस्तयोः ॥ 67 ॥

सौन्दर्येण समग्रेण ज्ञानेन च बलेन च ।

पूर्णस्य ह्याप्तकामस्य विभोर्नित्यस्य च प्रभोः ॥ 68 ॥

सुखमेव भवेत्पूर्णं दुःखस्यावसरोपि न ।

तत्पूर्णसौख्यसिद्ध्यर्थमानन्त्योक्तिश्च शोभते ॥ 69 ॥

अतो देशाच्च कालाच्च गुणतश्चान्तशून्यता ।

श्रुत्युक्तं तदनन्तत्वं नान्यत्तत्वमिति स्थितं ॥ 70 ॥

अनन्तश्रुतितश्चैव ह्यनन्तगुणता यतः।

सिद्धा ततश्च नैर्गुण्यवादो मोदाय नेष्यते ॥ 71 ॥

किञ्चोक्तरीत्या देशाच्च कालाच्च गुणतस्तथा ।

नान्त इत्युदिते सर्वदेशकालगुणैः सदा ।

सम्बन्ध इति शब्दस्य शक्यार्थस्त्वेक एव च ॥ 72 ॥

स च योग्यतया धर्मे धर्मधर्मित्वमिष्यते ।

संयोगो देशकालाभ्यामिति सर्वस्य सम्मतम् ॥ 73 ॥

एवं च वस्तुतोप्यस्य नान्त इत्युदिते सति ।

सर्वैश्च वस्तुभिः सिद्ध्येत्सदा सम्बन्ध एव हि ॥ 74 ॥

स च कुण्डपटादौ चेत् संयोगो देशकालवत् ॥ 75 ॥

तत्तत्गुणक्रियाद्यैश्चेत् केषाञ्चिद्वादिनां मते ।

संयुक्तसमवायादिः स्यात्सम्बन्धोपरोपि वा ॥ 76 ॥

अयं च देशव्याप्त्युक्त्या गतार्थत्वान्न सार्थकः ॥ 77 ॥

यदि स्वनिष्ठसद्धर्मैः सम्बन्धः शुभवस्तुभिः ।

तदा स्याद्धर्मधर्मित्वं तच्चानन्त्यं गुणेन हि ।

अतस्तन्न पृथक् प्रोचुस्तत्वज्ञास्तत्ववादिनः ॥ 78 ॥

धनैः पूर्णस्तदैव स्याद्धनं च बहुलं यदि ।

तद्गुणैः पूर्णता वाचा गुणानां पूर्णताप्यभूत् ॥ 79 ॥

अनन्तगुण इत्युक्त्वा प्रागसङ्ख्यान् गुणान् स्मृतिः ।

गुणांश्च पूर्णान् सैवाह ह्यनन्तगुणतस्त्विति ॥ 80 ॥

महद्गुणत्वादिति च महत्तामाहतां गुणे ।

महत्वं त्वपरिच्छिन्नत्तिरिति सर्वे विदुर्बुदाः॥ 81 ॥

यथास्ति देशादानन्त्ये देशस्याप्यन्तशून्यता ।

तथा गुणेनानन्त्येपि गुणस्याप्यन्तशून्यता ॥ 82 ॥

वाच्यावश्यं न चेत्तस्य गुणतोऽनन्ततैव न ।

न चाल्पबलवान् मर्त्यो बलेनानन्त उच्यते ॥ 83 ॥

गुणसङ्ख्यावधिर्नेति योऽनन्तगुण ईरितः ।

स एव गुणतोऽनन्तः प्रत्येकं गुणपूर्तितः ॥ 84 ॥

इत्येव वाच्यः स्मृत्यर्थो न चेत्स्यात्पुनरुक्तता ।

तत्सिद्धाः स्मृतियुक्तिभ्यां गुणाः पूर्णाः पृथक् पृथक् ॥ 85 ॥

न चेत्स क्वचिदज्ञः स्यात् कदाचिद्वाज्ञता पतेत् ।

तद्देश कालव्याप्तस्य धर्मव्याप्तिर्बलादपि ॥ 86 ॥

किं संयोगवदन्येपि गुणा रूपरसादयः ।

अव्याप्यवृत्तयो धर्मिव्याप्तौ व्याप्या गुणाश्च तत् ॥ 87 ॥

सङ्कोचानौचित्यतश्च गुणतोऽनन्तता त्वियम् ।

बहुत्वाच्च महत्त्वाच्च गुणानामिति गम्यते ॥ 88 ॥

अपरिच्छिन्नधर्माणां तत्सत्यानां स्वधर्मिवत् ।

परिच्छिन्नत्वदज्ञानकल्पितत्वकथावृथा ॥ 89 ॥

अमायिको हरिः सिद्धस्तद्धर्मा अप्यमायिकाः ।

अणुभ्योऽखिलजीवेभ्यो विभेदश्च विभोरभूत् ॥ 90 ॥

विरुद्धधर्मध्रौव्येण भेदोपि ध्रुवतामगात् ।

अतोऽनन्तश्रुतिर्वादद्वयस्याप्युत्तरं ददौ ॥ 91 ॥

तत्त्रिवर्णं पदमिदं त्रिविक्रमपदोपमम् ।

पराजयाय दैत्यानां जयाय च सतामभूत् ॥ 92 ॥

सर्वोपनिषदामर्थं निर्णेतुं बादरायणः ।

निर्ममे ब्रह्मसूत्राणि सूचनात् सूत्रमुच्यते ॥ 93 ॥

अतस्तत्सूचितं ग्राह्यं किं पुनः सकृदीरितं ।

तदभ्यस्तं समस्तं तु चूडारत्नायते विदां ॥94 ॥

निर्णायकानुसारेण निर्णेयस्य गतिं विदुः ।

अध्वनीनस्य सह्यध्वा यो दीपेन प्रदर्शितः ॥ 95 ॥

चोरः प्रदीपनाशं च कामयेत् कामुकोपि वा ।

राज्ञ्या राजगृहं रात्रौ यान्त्या सोर्थ्यः पदे पदे ॥ 96 ॥

अतः सूत्रं तिरस्कृत्य यः श्रुत्यर्थमतत्ववित् ।

वक्ति स श्रुतिसुन्दर्याः कण्ठात् सूत्रं जिहीर्षति ॥ 97 ॥

उपकर्तर्यपकृतिः कृतघ्नस्यैव शोभते ।

धर्मवक्री कथं जह्यात् सूत्रं स्वार्थकृते कृतम् ॥ 98 ॥

सतीमप्यस्यतीं कर्तुं चकमे दशकन्धरः ।

सा वायुतनयादेशैस्तप्ता तन्मार्गमन्वगात् ॥ 99 ॥

ब्रह्मशब्दबलात्पुच्छमेव ब्रह्मेति दुर्धियः ।

श्रुतिः सूत्राध्वनाऽऽनन्दमयं ब्रह्मर्चि शंसति ॥ 100 ॥

प्राक् प्रस्ताव्यानन्दमयं श्लोके तत्रोदिते श्रुतिः ।
द्विरुक्तब्रह्मशब्देन कथं ब्रह्म न तं जगौ ॥ 101 ॥

श्लोकश्लोक्यो यतोन्यत्र सर्वत्राङ्गीकृतोऽत्र च ।
श्लोक्योऽङ्गेव यदि ब्रह्मशब्दशक्त्यापकृष्यते ॥ 102 ॥

तर्ह्येकस्य द्वयोः शक्त्या स्यादङ्गिन्येव कर्षणम् ।
द्वयोर्हि शक्तिर्महती चतुर्भिः सङ्गृहीतयोः ॥ 103 ॥

दृढसूत्रनिबद्धस्य कथं चास्यापकर्षणम् ।
उत्कर्षो ह्यस्मदर्थे स्यादपकर्षस्त्विहोच्यते ॥ 104 ॥

सर्वोत्कृष्टा च विद्येयमुत्कर्षं सहते परं ।
अपकर्षेपि ते कोशस्यैकदेशं विशेन्न सा ॥ 105 ॥

अतः श्रुतेः सूत्रकृतश्चैको मार्गो निरर्गलः ।
खलस्य सूत्रभाष्यार्थं प्रवृत्तस्यापरो भवेत् ।
निमित्तसाम्येपेकत्र पक्षपाता दुराग्रही ॥ 106 ॥

उभयोर्ब्रह्मताऽयोगादेकत्यागो यदीष्यते ।
सर्वस्य ब्रह्मता तर्हि केन वा घोषिता भुवि ।
शिष्यो ब्रह्म गुरुब्रह्म सर्वं ब्रह्म जगत्किल ॥ 107 ॥

मोदानन्दप्रमोदादि न ब्रह्म किल चिन्मये ।

ब्रह्मणः सुखरूपत्वे सुखस्य ब्रह्मता न किं ॥ 108 ॥

आनन्दं ब्रह्म कं ब्रह्मेत्यादि वेदो न किं श्रुतः ॥ 109 ॥

विरुद्धजीवब्रह्मैक्ये यस्याशा भूयसी तव ।

अङ्गाङ्गिनोः कुतो नैक्यमेकजातीययोर्वद ॥ 110 ॥

केशस्य ब्रह्मता दृष्टा केशवस्यापि किं न सा ॥ 111 ॥

पुच्छस्य ब्रह्मतायां तु मध्यस्याब्रह्मता कथम् ।

मृत्पुच्छं मृण्मयस्योक्षण इत्यज्ञाभाणकं स्मर ॥ 112 ॥

किं च त्यजसि चेदेकं पूर्वं त्यज भजापरं।

साक्षात् सूत्रविरुद्धार्थे मतिरासीत् कथं तव ।

उत्सूत्रभाष्यं दुर्भाष्यं लक्षणज्ञान् विचारय ॥ 113 ॥

क्रीडतेनन्तरूपैर्यस्तांश्चैकी कुरुते प्रभुः ।

तदा मूलं न किं ब्रह्म तानि  रूपाणि वा न किं ॥ 114 ॥

पादौ ब्रह्म करौ ब्रह्म मध्य ब्रह्म शिरो हरेः ।

ब्रह्मैवेदं सर्वमिति श्रुत्या ह्येषोर्थ ईरितम् ॥ 115 ॥

आब्रह्माण्डं हि पादोस्य रोम्णि ब्रह्माण्डराशयः ।
शिशोर्मुखे जगत्सर्वं किं न पूर्णं परात्मनः ॥ 116 ॥

अनन्दमयमध्यस्यानन्दो ब्रह्मेति किं न सा ।
सहेतुकं ब्रह्मभावमाहासंशयनुत्तये ॥ 117 ॥

अङ्गस्य पूर्णतायां हि किं वाच्याङ्गिनि पूर्णता ।
पदस्थौल्यादिति स्थौल्यं किं नास्तीबकलेवरे ॥ 118 ॥

पुच्छे ब्रह्मपदादन्यन्न ब्रह्म यदि ते मते ।
तर्ह्यनानन्दता पुच्छे मध्यस्यानन्दता श्रुतेः ॥ 119 ॥

क्रयविक्रयपक्षे स्यादुभयोश्च द्विरूपता ।
तदुत्सूत्रस्वभावत्वादेव सूत्रविसर्जनम् ॥ 120 ॥

यस्त्वं समन्वयाध्यायात्पादमेकं व्ययोजयः ।
तस्यानन्दमयात्पुच्छविच्छेदे किं भयं च तत् ॥ 121 ॥

प्राचीनचुम्बने मन्ददन्तभङ्गस्तवोचितः ।
न व्यासस्य खलश्रेणीदन्तभङ्गकृतो हरेः ॥ 122 ॥

यद्यानन्दमयः कोशस्तत्पुच्छे ब्रह्मता कथं ।
साकारस्य जडस्यास्य ब्रह्मता न हि ते मते ॥ 123 ॥

अधिष्ठानतया ब्रह्मत्वोक्तावन्यत्र किं न सा ॥ 124 ॥

यद्यानन्दमयो ब्रह्मपुच्छस्य ब्रह्मता कथं ।
उभयोर्ब्रह्मताऽयोगे महान् किल तवाग्रहः ॥ 125 ॥

अतो तत्वावेदिकेयं श्रुतिरासीत्तवैव हि ।
सूत्रकल्पद्रुमच्छेदे कुठारः क्वास्ति ते वद ॥ 126 ॥

श्रुतौ महानादरस्ते सर्वे जानन्ति पण्डिताः ।
ब्रह्मण्याम्रेडितश्रुत्या तटस्थं यस्य लक्षणम् ॥ 127 ॥

किञ्च श्रुतावादरश्चेत् पुच्छस्य ब्रह्मतास्तु ते ।
अन्यस्याब्रह्मता कस्मात् स्वीकृता न हि सा श्रुता ॥ 128 ॥

विशिष्यैकत्र यद्युक्तमर्थान्नान्यत्र तद्यदि ।
तर्हि युक्तिबलादेव ब्रह्मता न श्रुतेर्बलात् ॥ 129 ॥

युक्तिस्तु दुर्बला साक्षात्सूत्रादाप्ततमोदितात् ।
अतस्तवेषुस्त्वां हन्ति गुणेत्वन्यायकल्पना ॥ 130 ॥

यदेकत्र विनिर्णीतः शास्त्रार्थो ह्यपरत्र च ।
इत्याहुरार्यास्तत्तेऽर्थः स्वार्थं व्यभिचरेदपि ॥ 131 ॥

पादस्य ब्रह्मतोक्तौ हि सर्वस्य ब्रह्मता बलात् ।

यतो भवेत्ततस्तेर्थः प्रबलार्थहतो भवेत् ॥ 132 ॥

एवं च युक्तिश्रैष्ठ्येपि यदग्रे सूत्रखण्डनम् ।

अर्थादुत्सूर्थभाष्यत्वमुत्तरत्रापि तद्वदेत् ॥ 133 ॥

किञ्च निर्विकृतेरेव निमित्तत्वं परात्मनः ।

कुलालवद्यतो युक्ता तदयुक्ता तटस्थता ॥ 134 ॥

पञ्चमी च निमित्तेऽस्तु यदि पाणिनिशिक्षया ।

उपादाने पञ्चमीयं तस्य शिक्षान्तरं स्मर ॥ 135 ॥

यतः पदं यतः प्रोक्तं तेन सार्वविभक्तिकम् ।

तदपूऽसृजतेत्याद्या प्रथमा च सहस्रशः ॥ 136 ॥

अतो विभक्तिव्यत्यासोप्यत्र सर्वत्र शोभते ।

सोपि छन्दसि तेनोक्तस्ततः कानुपपन्नता ॥ 137 ॥

स्वमूलसूत्रमुत्सृज्य श्रुतौ कृतरतेस्तव ।

परसूत्रं परित्यज्य कुतो नासीत् श्रुतौ रतिः ॥ 138 ॥

छन्दस्युभयथाप्यस्ति कार्यं नास्ति द्वयी गतिः ।

लक्षणस्य तटस्थत्वे सर्वं कार्यमकर्तृकम् ॥ 139 ॥

जिज्ञास्ये लक्षणं नाभूदजिज्ञास्येऽस्ति यन्ति किं ।
तद्ब्रह्मेत्युपदेश्यं किं जिज्ञासा कस्य कथ्यताम् ॥ 140॥

यदि श्रुत्या पुच्छमेव ब्रह्मलक्षणवत्तदा ।
श्रुतेर्बलाद्ब्रह्म भवेदनन्यार्थां यतस्त्वियम् ॥ 141 ॥

अन्तःसूत्रमिवोक्तं च बहिःसूत्रं विसृज्यताम् ॥ 142 ॥

यदि ते पाणिने सूत्रे भराच्छ्रुतितिरस्कृतिः ।
लक्षणस्य तटस्थत्वं तर्हि व्यासानुशासनात् ।
ब्रह्मानन्दमयं भूयात् पुच्छं स्यात्तव पृष्ठतः ॥ 143 ॥

अतः पुच्छश्रुतिस्तेऽभूत् ह्रस्वकौपीनपुच्छवत् ।
एकं सन्धित्सतो वाक्यमपरं च्यवते यतः ॥ 144 ॥

यदा मूलभ्रमादेव टीकां त्यजसि सम्मताम् ।
तदा मूलप्रमारुद्धां टीकां काकोपि न स्पृशेत् ॥ 145 ॥

परिस्पन्दिक्रियामात्रं मास्तु वा व्याप्तवस्तुनः ।
जगज्जन्मादिकरणक्रिया हेया कुतो वद ॥ 146 ॥

निमित्तवस्तु तद्ब्रह्म जगज्जालस्य कालवत् ।
उपादानत्ववार्ता च नात्र श्रौताध्वशोधने ॥ 147 ॥

लक्षणस्य तटस्थत्वकथापि व्याहता तव ।

यद्व्याप्तं लक्ष्यमात्रे स्यादलक्ष्ये नैव वृत्तिमत् ॥ 148 ॥

तल्लक्षणं नास्य साधारणधर्मोपि तत्किल ।

कथमन्यगतो धर्मो लक्षणं स्यात्तदीर्यताम् ॥ 149 ॥

काकोपि हि गृहस्थस्य गृहस्थो बोधयेद्गृहम् ।

गते तस्मिंस्तेन कृतमुत्तृणत्वं हि बोधकम् ॥ 150 ॥

कदाचिद्गुरुसम्बन्धः कुरु सम्बन्ध एव च ।

गुरोष्टीका कुरोः क्षेत्रमित्यत्रापि हि वर्तते ॥ 151 ॥

सर्वथा तदसम्बद्धस्तत्रोपकुरुते कथं ।

महिष्याः क्षीरवत्वे स्याद्गोवृषस्य तु किं फलम् ।

काकस्य कार्ष्ण्याद्धवलः प्रासादस्यान्न चेत्तव ॥ 152 ॥

किं चोपलक्षणं ह्येतल्लक्षणं तु न तादृशं।

घटस्य लक्षणं पश्य पटस्य ब्राह्मणस्य च ॥ 153 ॥

व्यतिरेक्यनुमानं हि लक्षणं पक्षधर्मता ।

व्यावृत्तिश्च विपक्षेभ्यस्तस्य चावश्यकी न किं ॥ 154 ॥

कथं सूत्राभिमतयो यत्तदोर्वृत्तिरुच्यतां ।

यदुक्तलक्षणोपेतं तद्ब्रह्मेति हि योजना ॥ 155 ॥

तल्लक्षणस्य ताटस्थ्ये ज्ञेयतापि तटे तव ॥ 156 ॥

यदि लक्षणवन्माया भ्रान्त्यधिष्ठानतैव ते ।

ब्रह्मलक्षणमाशास्यं तर्हि सूत्रकृतः प्रभोः ।

आरोपोस्या यत इति वचने का दरिद्रता ॥ 157 ॥

अन्तरा ब्रह्मसूत्राणि किमब्रह्मापि सूचितम् ॥ 158 ॥

श्रुतेरनुसृतौ च स्यात्तटस्थं नैव लक्षणम् ।

यत्पदोदितमेवार्थं तत्पदेन हि सा जगौ ॥ 159 ॥

एवं च निर्गुणत्वोक्त्या तटस्थं लक्षणं न ते ।

अरोपादिष्टानताख्यधर्मस्यावश्यकत्वतः ।

तटस्थमायायोग्यस्य बोध्यत्वादेरवर्जनात् ॥ 160 ॥

किञ्च निर्गुणता ध्रौव्ये लक्षणस्य तटस्थता ।

लक्षणस्य च ताटस्थ्ये निर्गुणत्वं ध्रुवं भवेत् ।

अतोन्योन्याश्रयः स्यान्न परमात्मपदाश्रयः ॥ 161 ॥

श्रुतिमात्रबलोसि त्वं श्रुतिसूत्रबला वयं ॥ 162 ॥

अथोपादानता प्राप्ता पाणिनेरनुशासनात् ।

सा चायुक्ता ब्रह्मणीति तटस्थं लक्षणं यदि ।

इदं च तर्हि युक्तं नेत्युत्प्रेक्षाजायते मम ॥ 163 ॥

व्यासस्य शासनं ज्यायः पाणिनेरनुशासनात् ।

अमुख्यमेव बाध्यं स्यान्नामुख्यान्मुख्यबाधनम् ॥ 164 ॥

स च श्रौतमिमं धर्मं ब्रह्मण्यनुशशास हि ।

अतः पाणिनिसूत्रं तदन्यत्र स्यान्न लक्षणम् ।

जारानुसरणाज्ज्यायः पत्युः पादोपसर्पणम् ॥ 165 ॥

अविकारित्वतस्तस्यनैवोपादानता मता ।

अतः कर्तैव जगतः श्रुतौ सूत्रे च कथ्यते ॥ 166 ॥

निष्क्रियत्वश्रुतिश्चास्य क्रियया शास्त्यलेपनम् ।

अकर्तारां हि तं प्राहुर्यः कृत्वापि न लिप्यते ।

श्रुतिसूत्रोक्तकर्तृत्वबाधाय यतते न सा ॥ 167 ॥

मणिः प्रवर्तते मालाकारसन्दर्शिताध्वना ।

न चेदाकाशशब्दोक्तं परं ब्रह्म कथं वद ।

आकाशश्रुतिसामर्थ्याज्जडाकाशः कथं न सः ॥ 168 ॥

तदानन्दमयं कोशं कर्तुं स्वेन निरूपितम् ।
गुणे त्वन्यायक्लृप्त्याख्यन्यायं स्वयमहो जहौ ॥ 169 ॥

प्रधाने ब्रह्मसूत्रेस्मिन्यदन्यायं चिकीर्षति ।
गुणभूतान्यसूत्रार्थे बहुमानपुरस्कृतः ॥170 ॥

स इदं सर्वमसृजतेति श्रुतिसमाख्यया ।
कर्तृत्वमिह हेतुत्वं नोपादानत्वमिष्यते ॥ 171 ॥

वेदे वेदानुसरणं पाणिनेश्च स्थले स्थले ।
यतश्च यत इत्येतत्पदं सार्वविभक्तिकम् ॥ 172 ॥

यतोर्थानुपपत्तिश्च शब्दस्यानुपपत्तितः ।
प्रबला लक्षणावृत्तेर्न चेदवसरः कथं ॥ 173 ॥

ब्रह्मजिज्ञासया प्राप्तं सुतं प्रति पिता कुतः ।
अन्यगं लक्षणं ब्रूयाद्वोच्ये ब्रह्मण्यसम्भवि ॥ 174 ॥

स्वगृहे दीपिकाभावे प्रार्थयन्तेऽन्यदीपिकां।
सति ब्रह्मस्थकर्तृत्वे तटस्थं स कुतो वदेत् ॥ 175 ॥

मोक्षोपयोगिज्ञानाय साक्षान्मोक्षविरोधिनि ।
अज्ञाने स्थितदुर्धर्मं को ज्ञानप्रस्तुतो वदेत् ॥176॥

आनन्दादेव विज्ञानादेवेति यमसौ भृगुः ।

ब्रह्म पश्यन्निरणयत्कथं सोन्यं गतो वद् ॥ 177 ॥

अपायेऽवधिभूतं यद्ध्रुवं तत्रास्ति पञ्चमी ।

स्वोदराच्च प्रधानस्यापाये तादृक् सृजन् प्रभुः ॥ 178 ॥

अतस्तेनैव सूत्रेण पञ्चमी परमात्मनि ।

जनिधातुप्रवेशेपि यतो न विकृतो ह्यसौ ॥ 179 ॥

जनिकर्तुः प्रकृतिरित्यत्र प्रकृतिशब्दतः ।

उपादानं तु स ब्रूते तस्य चावसरोत्र न ॥ 180 ॥

कार्याकारेण विकृतेनोपादाने तु पञ्चमी ।

मृद्घटो जायते क्षीरं दधि जातमिति क्षितौ ।

लोकाव्यवहरन्त्यस्मादिदन्त्विति न कश्चन ॥ 181 ॥

शृङ्गस्याप्येकदेशस्य शराकारेण न विक्रिया ।

तत्राप्यविकृते भागे पञ्चमी विक्रियावधौ ॥ 182 ॥

सा च तेनैव सूत्रेण तस्मात्त्वमिव नः प्रभौ ।

विरोधाचरणात् सूत्रं चित्रं तद्यत्र कुत्रचित् ॥ 183 ॥

अवकाशं न लभते व्यर्थतामर्थतोऽगमत् ।

जनिकर्तुः प्रकृतिरित्युक्तिस्तन्न भयङ्करी ॥ 184 ॥

यथोपादानता मुक्त्वा यस्तटस्थीकरोति ताम् ।

अबद्धं स पठित्वान्ते कुचोद्यं कुरुतेऽबुधः ॥ 185 ॥

किञ्चोपादानमात्रेण कार्यं स्यान्नावयोर्मते ।

अतः कर्तुरवश्यत्वे न तद्वाच्यं कथं वद ॥ 186 ॥

तस्मात्त्वयापि वक्तव्यः कर्तैवात्र न चापरः ।

ईक्षितृत्वबलान्नो चेत् कथं साङ्ख्यं जिगीषसि ॥ 187 ॥

तव यः श्वा कथं व्याघ्रः स परस्य भविष्यति ।

अनिच्छतापि कर्तृत्वमतो वाच्यं त्वयापि हि ॥ 188 ॥

जडे च नैव कर्तृत्वमीशासिद्धिप्रसङ्गतः ।

तस्मात्तटस्थतास्यस्याल्लक्षणस्य कथं वद ॥ 189 ॥

क्रियावेशप्रसङ्गेन कर्तृत्वं न चितो यदि ।

जडावेशप्रसङ्गेन तद्धिज्ञानं कथञ्चिति ॥ 190 ॥

जडामिश्रं हि तद्ब्रह्मकेवलश्रुतिचोदनात् ।

समः समाधिर्मिथ्यात्ववार्तया ते द्वयोरपि ॥ 191 ॥

मम तु ब्रह्मगाज्ञानं मृषा शास्त्रार्थवत्त्वतः ।

कर्ता जीवोपि हि यदा शक्तः किमु तदा प्रभुः ॥ 192 ॥

निष्क्रियत्वश्रुतेर्भीश्चेत् कथं स्यात्ते गतागतं ।

व्यावहारिकमेतच्छेत्क्रियेयं चास्तु तादृशी ।

न हि निष्क्रियवागेकां क्रियामेव निषेधति ॥ 193 ॥

चित्रं चित्रक्रियागारसंसारे न तटस्थता ।

जगज्जन्मादिकरणक्रियामात्रे तु सा किल ॥ 194 ॥

मम सर्वज्ञ इत्युक्त विज्ञानक्रियया सह ।

यो निरित्युक्तकर्तृत्वक्रियास्त्येव न विक्रिया ॥ 195 ॥

निष्क्रियत्वश्रुतेः सत्त्वात्तटस्थं लक्षणं यदि ।

तर्ह्यज्ञानं तटस्थं स्यादद्वितीयश्रुतेर्बलात् ॥ 196 ॥

अनादि ब्रह्मणोऽज्ञानमनाद्येव हि ते मते ।

द्वितीयं तत्कृतं तस्मात्तृतीयमखिलं जगत् ।

तेनाविद्यानिषेध्यैव वागेषेति मतिर्मम ॥ 197 ॥

किं चाविकारवचनाज्जगद्रूपविकारकृत् ।

तटस्थमस्तु तेऽज्ञानं ब्रह्मनिर्मलवस्तु तत् ॥ 198 ॥

अतः प्रथमतः सूत्रकृदुक्ते ब्रह्मलक्षणे।

असम्भवोऽतिव्याप्तिश्च सिद्धान्तो यस्य धीमतः ।

सभाष्यकृत् किल गुरुः श्रोता तत्र च कश्चन ॥ 199 ॥

तटस्थः कोपि न स्यादित्यकरोद्ब्रह्मलक्षणम् ।

यतः शिक्षणमेवेदं सूत्राणां नार्थरक्षणम् ॥ 200 ॥

अतो लक्षणसूत्रस्य बलाज्ज्ञानबलादिभिः ।

गुणैर्युक्तमभूद्ब्रह्मलक्षणेन गुणेन च ॥ 201 ॥

सजातीयविजातीयव्यावृत्तिश्च यतः फलम् ।

चेतनाचेतनजगद्भिन्नमासीत्ततः सदा ॥ 202 ॥

पितृत्वाच्च परित्वाच्च तदभूदुत्तमोत्तमम् ।

पूर्वसूत्रे विमुक्त्यर्थं ज्ञेयत्वोक्तेर्न मायिकम् ॥ 203 ॥

नेहा नानेति वाक्याच्च गुण्यभिन्ना गुणाश्च ते ॥ 204 ॥

गुणगुण्यादिभावाच्च बोध्यबोधकभावतः ।

तद्विशेषाश्च ते सूत्रकर्तृकर्मवदेव हि ॥ 205 ॥

आनन्दमयसूत्रोक्तरीत्या सोपि सुखाकृतिः ।

निराकारः कथं कुर्याद्धस्तहस्तकुलालवत् ॥ 206 ॥

तस्मात्समस्तश्रुत्यर्थसूचनात् सूत्रमुच्यते ॥ 207 ॥

एवं यो वेत्ति सूत्रार्थं स बन्धात्परिमुच्यते ।

न चेत् सूत्रार्थविच्छेदाच्छिद्यते यमकिङ्करैः ॥ 208 ॥

विस्तरस्त्वस्य सर्वस्य भाष्यादिष्वेव दृश्यताम् ।

मूलशास्त्रार्णवोत्सिक्तबिन्दून् वन्दामहे वयम् ॥ 209 ॥

तस्मादुत्सूत्रभाष्यस्य कर्ता दुर्भाष्यकृद्भवम् ।

भाष्यकारास्तु भगवान् मध्वो विद्वच्छिरोमणिः ॥ 210 ॥

अतः परकृतं भाष्यं भाष्यं नाभूत्सभान्तरे ।

तस्मात् सूत्रोदितोह्यर्थो निराकर्तुं न शक्यते ॥ 211 ॥

स च स्थित्यदनाभ्यां चेत्याह भेदं सयुक्तिकम् ।

द्विशाखा सम्मतिं भेदे भेदेनैनमधीयते ॥ 212 ॥

उभयेपीति सूत्रेसौ भेदोक्त्या चान्यतां क्वचित् ।

भेदस्य व्यपदेशाच्चान्य इत्यत्र स सूत्रकृत् ॥ 213 ॥

क्वचिच्च भेदव्यपदेशादित्यूचे तथा क्वचित् ।

भेदव्यपदेशाच्चेत्याह सूत्रद्वयं त्विदम् ॥ 214 ॥

विशेषणेन भेदस्य व्यपदेशेन चेति च ।

सयुक्तिकं भेदमाह यत्सार्वज्ञं विशेषणम् ॥ 215 ॥

शारीरोनुपपत्तेर्न नेतरोऽनुपपत्तितः ।

इति सूत्रद्वये चोक्तो भिन्नो जीवः सयुक्तिकम् ॥ 216 ॥

यन्न प्रतीके न हि सः इति सूत्रे स सूत्रकृत् ।

प्रतीको ब्रह्मनैवेति स्पष्टमाचष्ट भिन्नताम् ॥ 217 ॥

प्रतीकाख्याहि नामादिप्राणपर्यन्तदेवताः ।

देवतैकस्यचायोगे नरैक्ये का कथा ततः ॥ 218 ॥

मुक्तोपसृप्यतामाह तद्योगं शास्ति मुक्तिगम् ।

सुप्त्युत्कान्त्योर्भिदामाह स्पष्टं जीवः परात् पृथक् ॥ 219 ॥

उपदेशादिति प्राह फलाध्यायेपि स प्रभुः ।

मुक्तं जीवं च सम्पद्याविहायेति पृथग्जगौ ॥ 220 ॥

जगद्व्यापारवर्जं त्वित्यत्र सावधिवैभवम् ।

मुक्तस्याह हरिं सर्वजगज्जन्मादिकारणम् ।

वक्तिस्मादौ ततोप्यन्यो मुक्तानां परमा गतिः ॥ 221 ॥

भेदमाघोषयामास सूत्रे सूत्रे स सूत्रकृत् ।
पञ्चधा यो भिनत्तीदं स भेदः केन वार्यते ॥ 222 ॥

व्यासविस्तृतमूर्तीनां श्रुतीनां तत्पदे पदे ।
जीवेशभेदे तात्पर्यमितिहासपुराणयोः ॥ 223 ॥

श्रीव्यासकृतयोर्नित्यं महातात्पर्यमत्र हि ।
सूत्रानुसारियत्सर्वं शास्त्रमित्यतिमङ्गलम् ॥ 224 ॥

स्वस्मिन्नध्यात्मसम्बन्धभूमस्त्वादेव केवलम् ।
प्राणोहमिति शक्रेण प्रोक्तं तत्प्राणतास्य न ॥ 225 ॥

इत्यैक्यवचसां सूत्रे लक्षणागतिरीरिता ।
सोहं ब्रह्माहमित्यादिरीत्या शाखाप्रलम्बिनाम् ॥ 226 ॥

वक्तुरात्मोपदेशोपि शक्रस्यात्मा हरिर्न चेत् ।
आत्मेतितूपगच्छन्तीत्यत्र जीवात्मनः कथम् ।
हरिणैक्यं वदेद्व्यासो न हि ते शक्रतोधिकाः ॥ 227 ॥

ईषदध्यात्मसम्बन्धात्तादृग्वाक्यप्रवर्तनम् ।
असूचयद्धि सूत्रेस्मिंस्तेनैक्यं न क्वचित्तव ॥ 228 ॥

परमात्मेति तद्ब्रह्म जानन्ति ज्ञापयन्ति च ।
इत्यर्थौ मे सशब्दोयत्स्वभावे परमात्मनि ॥ 229 ॥

यः सत्त्वाच्चावरस्येति सत्तां वक्तितरस्य च ।
अप्रधानस्य सर्वस्य स मिथ्यात्वं कथं वदेत् ॥ 230 ॥

स्वतन्त्रकारणस्यान्यस्येशे शून्यत्वतः परम् ।
तदनन्यत्वमप्याह क्वचित्सूत्रे स सूत्रकृत् ॥ 231 ॥

युदुच्चस्य न नीचैक्यं यतः सच्च न बाध्यते ।
अतोधिकरणेस्मिंश्च मिथ्यात्त्वादेः कथापि न ॥ 232 ॥

अप्रधानस्य जगतः सत्वं सिद्धमभून्मम ।
हेतुं करोति यद्यासः तत्सत्वं केन नेष्यते ॥ 233 ॥

किं च भोक्तुः परात्मत्वापत्तेः सोप्यविभागवान् ।
इति चेन्नेति यां पूर्वपक्षीकृत्य निषेधति ॥ 234 ॥

अविभागाभिदां जीवब्रह्मणोरेकतां तु ताम् ।
सिद्धान्तयति यः सूत्रभाष्यकृत् किल दोष्यसौ ॥ 235 ॥

भोक्त्रापत्तेस्तदविभागश्चेत्स्याल्लोकवत्त्विति ।
एकीभवन्ति वाचात्रप्राप्तमुक्तैक्यशङ्कया ॥ 236 ॥

एकीभवन्ति गोष्ठेषु गाव इत्यादिलोकवत् ।

स्यादित्साह समाधानं तेन मुक्तोपि नैक्यवान् ।

इति प्राप्तमतो भेदं परमार्थी चकार सः ॥ 237 ॥

तस्माद्भेदोऽप्रतिद्वन्द्वस्तत्र तत्रोदितो भवेत् ।

मुक्तोपसृप्यताद्युक्त्या स्थिरीचक्रे पुनश्च तम् ॥ 238 ॥

चेतनाचेतनजगद्ब्रह्मैक्याद्भोग्यवस्तुनः ।

भूकृतापि भवेत्तेन विभागो भोक्तृभोगयोः ॥ 239 ॥

न स्यादिति यदीहार्थः शङ्काग्रन्थस्य कथ्येते ।

तर्हि नेति समाधात्रा जडैक्यं नैव कथ्यते ॥ 240 ॥

इत्येव वाच्यं शङ्कां तामङ्गीकृत्य समादधत् ।

नाभिप्रैतीममर्थं स सूत्रकृद्वदतां वरः ॥ 241 ॥

मम तु प्रापकीभूतवेदस्योक्तस्य का गतिः ।

इति शङ्कां समाधातुं लोकदृष्टिमदर्शयत् ।

ऐक्यं तु नोररीचक्र इति सर्वं समञ्जसम् ॥ 242 ॥

तस्मादनेन सूत्रेण पराभेद्येन सूत्रकृत् ।

बबन्धाद्वैतिनां कण्ठं वाग्बन्धायेति मे मतिः ॥ 243 ॥

एवं च श्रुतिसूत्रादौ न क्वप्यैक्यं विविक्षति ।

सौत्रयुक्तिशरव्रातघातभीरुपदे पदे ॥ 244 ॥

तद्गुणत्वात्तु तत्त्वोक्तिरित्यन्यत्र प्रलम्बिनाम् ।

तत्त्वमस्यादिवाक्यानां गौणीं गतिमसूत्रयत् ॥ 245 ॥

इदं परास्त्रमन्त्राणामुपसंहारकौशलम् ॥ 246 ॥

तद्गतद्गश्रुतिशतं साक्षीकृत्य स सूत्रकृत् ।

जीवेशभेदसद्गत्वं सूत्रे सूत्रेप्यसूत्रयत् ॥ 247 ॥

इदं च स्वास्त्रमन्त्राणामभ्यासेन पुनः पुनः ।

शक्तेरुत्तेजनं तस्मात्तस्याग्रे कस्य शूरता ॥ 248 ॥

मुक्तोपसृप्यताद्युक्त्या यस्माद्भेदं सयुक्तिकम् ।

चक्रे तेन निराचक्रे मिथ्यात्वाख्यशराहतिम् ॥ 249 ॥

मोक्षार्थब्रह्ममीमांसामारभ्य स पदे पदे ।

यतो निरणयद्भेदमतस्तत्वं महद्धि यत् ॥ 250 ॥

सूचनात् खलु तत्सूत्रं तादृशैः सूत्रसञ्चयैः ।

इत्थमाघोषितो योर्थस्तत्तत्वं तत्ववादिनाम् ॥ 251 ॥

गुणैर्लिङ्गाभिधैर्यस्मात् प्रतिसूत्रं विपक्षिणः ।

प्रत्याक्षिपत्यभगवांस्तद्ब्रह्मगुणबृंहितम् ॥ 252 ॥

किं च शाणशितैर्बाणैः प्रत्यर्थिमुखमुद्रणम् ।

कुर्वन्नामंस्तबाणाग्रन्यूनतां स रणाग्रणीः ॥ 253 ॥

अतः सदाप्यबाध्यत्वं गुणानां व्यासशासनात् ।

साध्यं स्वयमसिद्धेन कः सादयति पण्डितः ॥ 254 ॥

यस्मादारोपितो हेतुः साध्यमारोपयेत्परम् ।

यक्षानुरूपोबलिरित्युक्तं वाक्यमनुस्मर ॥ 255 ॥

शब्दानां मुख्यवृत्तिं च शब्दैः सिद्धान्तयन् जगौ ।

न चेद्धेतोरनैकान्त्यं तद्ब्रह्मणि न लक्षणा ॥ 256 ॥

मुख्यान्वयी न चेत् कस्मात्समन्वयमसूत्रयत् ।

ब्रह्मसम्बन्धतः शक्रे प्राणनाम कुतो वदेत् ।

वेदैश्च सर्वैर्वेद्योहमेवेत्याह कुतः प्रभुः ॥ 257 ॥

तत्तन्नामोक्तधर्माणां यदि ब्रह्मणि नान्वयः ।

रूपमात्रस्यैकनाम्ना सिद्धेः शास्त्रमनर्थकम् ॥ 258 ॥

द्युभ्वाद्यायतनत्वाद्या धर्माः सर्वत्र वर्णिताः ।
निर्विशेषं क्व मीमांसा क्वेयं सल्लिङ्गशब्दभूः ॥ 259 ॥

अतोनन्तगुणं ब्रह्मेत्येव सूत्रकृतो मतम् ।
मुक्त्यर्थं कथिता धर्मामिथ्येत्यपि न शोभते ॥ 260 ॥

अतः सूत्राक्षरं मूलं न ते शास्त्रस्य दृश्यते ।
तन्मन्ये प्रक्रियामूलं त्वत्पूर्वार्जितदुष्क्रियाम् ॥ 261 ॥

तत्त्वस्याऽवेदकं किञ्चित् किञ्चित्तत्वस्य वेदकम्।
इति वेदेषु यद्वैधं न तत्सूत्रकृतो मतम् ॥ 262 ॥

एकस्य मानता स्याच्छेत् कुतः सूत्रकृतो वद ।
श्रुतीनामविरोधाय द्वितीयाध्यायविस्तरः ॥ 263 ॥

जीवेशभेददार्ढ्योक्तेरहमज्ञ इतीरितम् ।
अज्ञप्रत्यक्षमप्यज्ञं त्वामेव कुरुते परः ॥ 264 ॥

गुरूक्तमन्यथीकुर्वञ्च्छिष्यो दूष्यो विपश्चिताम् ।
नानाशास्त्रार्थनिपुणैर्यदुक्तं तत्तथैव हि ॥ 265 ॥

प्रियं किल शोत्रनेत्रनासाकेशाननादिकम्।
शिरः पदं हि केशादिकण्ठान्ताङ्गस्यवाचकं ॥ 266 ॥

मोदप्रमोदौ दोर्द्वन्द्वं पार्श्वद्वन्द्वं खिल प्रभोः।

दक्षिणोत्तरहस्तौ हि मध्यपक्षौ विदुर्बुधाः॥ 267 ॥

आनन्दः किल मध्योरःस्थलनाभ्युदरादिकम् ।

आत्मशब्दोदितं रूपमेतावद्धि विनिश्चितम् ॥ 268 ॥

बृहत्सुखं किलाऽस्याङ्घ्रिजङ्घोरुकटिपूर्वकम् ।

मुदः प्रमुद इत्युक्ता मुदत्रोक्ता समाख्यया ।

इयदेव हि मध्यस्य पुच्छं च स्थितिकारणम् ॥ 269 ॥

प्रियमोदप्रमोदानन्दात्मोर्ध्वाङ्गस्य पादपि ।

सजातीयो यतो वश्यं ततो ब्रह्मबृहत्सुखम् ॥ 270 ॥

प्रियमोदप्रमोदानन्दादि सर्व सुखं हि तत्।

प्राचुर्यार्थमयड्वाच्यं सर्वं पूर्णं च तत्किल ॥ 271 ॥

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते।

कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि ॥ 272 ॥

इति पञ्चविधानन्दं मुक्तौ वक्ति यतः श्रुतिः।

अतोत्रापि ब्रह्मपदं मुन्नामसुखसूचकम् ॥ 273 ॥

प्रतिबिम्बसमाकारं बिम्बं किं नावलम्बते ।

अतः समासमोक्त्याच मुच्चमुञ्चति नाच्युतम् ॥ 274 ॥

पादादिकेशपर्यन्तमेवमानन्दरूपताम् ।

श्रुतिस्तु स्पष्टमाचष्ट सूत्रकारोप्यसूत्रयत् ॥ 275 ॥

मुख्यार्थस्य परित्यागे पुच्छं ब्रह्मेति गच्छति ।

सा निर्णिनाय पुरुषविध एवेति तद्वपुः ।

कोशात्मदेहसादृश्यस्योक्तेः कोशाच्च भिन्नताम् ॥ 276 ॥

आशासानस्य ते कोशान् पञ्चस्थान्यां च वञ्चक ।

शिर आदिपदं मुख्यं मुख्यायोगे हि लक्षणा ॥ 277 ॥

यतश्च सैव पुरुषविध एवेति तद्वपुः ।

विनिर्णयति तेनास्य तनुरासीदबाधिता ॥ 278 ॥

अतः पूर्णानन्दमात्रं सुखाद्याकारसुन्दरम् ।

नारायणं परं ब्रह्म प्रियमेवेति च श्रुतिः ॥ 279 ॥

अवधारयन्ती प्रकृतिप्राकृतांशविवर्जितम् ।

केवलानुभवानन्दरूपाकारमनोहरम् ॥ 280 ॥

साक्षादाह श्रुतौ यस्य प्रीतिरस्ति मनीषिणः ।
स निराकारतां तस्य कथं ब्रूयान्महात्मनः ॥ 281 ॥

अतो व्यासमतस्थं स्वं मन्यमानस्ततोऽन्यथा ।
यो वर्णयति किं नास्य प्रक्रिया विक्रिया किल ॥ 282 ॥

व्याख्यारब्धा न तद्धोक्तुमारब्धं स्वस्य दुष्कृतम् ।
को व्याख्याता निजं मूलमादावेव निकृन्तति ॥ 283 ॥

इत्थं निर्णायके सूत्रे स्पष्टं भेदस्य साधनात् ।
श्रुतिस्मृतिपुराणादौ निर्णेये यत्कचित्कचित् ॥ 284 ॥

भेदो नास्तीति वचनं तद्विरोधं निषेधति ।
निर्णायकानुसारेण निर्णेयस्य गतिं विदुः ॥ 285 ॥

टीकानुसारतो ह्यर्थो मूलस्योन्नीयते बुधैः ।
मूलकर्तृकृता टीका धार्यैव शिरसाखिलैः ॥ 286 ॥

भेदशब्दो हि विद्वद्भिर्मिथो भेदे प्रयुज्यते ।
भ्रमे विरोधे धीभेदे नाशेन्योन्यविमिश्रणे ।
असंयुक्ततयान्योन्यस्थितिश्चापि भिदोच्यते ॥ 287 ॥

भिन्नासेनामित्रभेदः क्षीरनीरविभेदनम्।

भिन्ननीरत्ववाञ्छाघे भिदुराम्भस्त्ववागपि॥ 288 ॥

विमिश्रतामाह यस्मात्तस्माद्भेदो विमिश्रणम् ।

द्वैधं च भेदोपायश्च पृथग्धी केत्युदीरितम् ॥ 289 ॥

छिन्नभिन्नमिति प्राहुर्नष्टं घटपटादिकम् ।

भ्रमो भिदा भिनत्यर्थानन्यथीकुरुते यतः ॥ 290 ॥

त्रयाणामेकभावानां यो न पश्यति वैभिदाम् ।

इति तस्योक्तिरव्यक्ता तद्व्यक्तोक्तीर्विचारय ॥ 291 ॥

वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् ॥ 292 ॥

तच्छ्रुत्वा मुनयः सर्वे विस्मिता मुक्तसंशयाः ।

भूयांसं श्रद्दधुर्विष्णुं यतः शान्तिर्यतो भयम् ॥ 293 ॥

शापप्रसादयोरीशा ब्रह्मविष्णुशिवादयः ।

सद्यः शापप्रसादोऽङ्गशिवो ब्रह्मा न चाच्युतः ॥ 294 ॥

मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभम् ।

यद्बाधसे गुहाध्वान्तं प्रदीपप्रभया यथा ॥ 295 ॥

देवासुरमनुष्येषु ये भजन्त्यशिवं शिवम् ।
प्रायस्ते धनिनो ब्रह्मन्न तु लक्ष्मीपतिं हरिम् ॥ 296 ॥

अत्रापि भृगुरुद्रोक्तिरत्युच्चं हरिमाह हि ।
पूर्वाव्यवहितोक्त्या च सर्वेशो विष्णुरीर्यते ॥ 297 ॥

हेतुगर्भैकभावानामिति तन्मध्यगैव वाक् ।
अतोपि बुद्धिभेदस्य निषेध इति सिध्यति ॥ 298 ॥

मुनिभिश्चर्चितं तत्र तत्र गत्वा विनिश्चितम् ।
भयहृत्त्वेन च प्रोक्तं कथं स्याद्यावहारिकम् ॥ 299 ॥

इदं तु दक्षयज्ञघ्नक्रूरकिङ्करशङ्किता ।
मुनिना तत्प्रिया योक्तमिति स्याद्यावहारिकम् ॥ 300 ॥

विशिष्टैक्यं च ते नास्ति ततोऽन्योर्थस्तवैव हि ।
अमुख्यवृत्तिः किल ते मुख्यार्थे सति सा कथम् ॥ 301 ॥

विभजस्व यथान्यायं नैव भेदो यथा भवेत् ॥ 302 ॥

यन्निमित्तं स वै शापो यादृशो द्विजसत्तम ।
कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ॥ 303 ॥

इत्यस्मिन्नेव यद्ग्रन्थे तत्र तत्र प्रयुज्यते ।
विरोधे भेदशब्दोयं सामादौ लौकिकैरपि ।
अतोयं मुख्य एवार्थो मुख्ये सति लक्षणा ॥ 304 ॥

अथवा वागियं तेषामेकार्थविषयाः सदा ।
ये भावस्तद्भिदानेति बुद्धिभेदं निषेधति ॥ 305 ॥

तदैव यत्प्रसज्येत निषेधस्तस्य युज्यते ।
शैववैष्णवयोर्वैरं मिषतां तु तयोरपि ।
विरोधशङ्का तत्रैव प्रसक्ता सा निषिध्यते ॥ 306 ॥

रूपभेदप्रसक्तिस्तु सदा त्रिस्थानवासिनाम् ।
अतोत्रैव न तत्प्राप्तिर्निषेधोयं च तस्य न ॥ 307 ॥

पूज्यपूजकभावेन प्रेम्णस्तत्रैव दर्शनात् ।
विरोधस्तु निषेधार्हः कथं भेदो निषिध्यते ॥ 308 ॥

तदैव तत्सभामध्ये त्रिरूपाणां त्रिलिङ्गिनाम् ।
स्तोतृस्तव्यतया नम्यनन्तृभावेन च स्थितेः ॥ 309 ॥

तमुपागतमालक्ष्य सर्वे सुरगणादयः ।
प्रणेमुः सहसोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः ॥ 310 ॥

तत्तेजसाहतरुचः सन्न जिह्वाः स साध्वसाः ।
मूर्ध्न्युद्धृताञ्जलिपुटा उपतस्थुरधोक्षजम् ॥ 311 ॥

अप्यर्वाग्वृत्तयो यस्य महित्वे स्वभुवादयः ।
यथामति गृणन्ति स्म कृतानुग्रहविग्रहम् ॥ 312 ॥

इति पूर्वोक्तविस्पष्टवाक्यादस्पष्टनिर्णयः ।
न हि तात्कालिका ज्ञानी त्रिकालज्ञानवान्मुनिः ॥ 313 ॥

महिम्न्यर्वाग्वृत्तयश्चेत् कथं तेधिकवृत्तिना ।
हरिणैक्यं प्राप्नुवन्तीत्यादिवाक्यं विचार्यताम् ॥ 314 ॥

यन्मायया गहनयेत्युक्तं मध्ये भृगोर्वचः ।
आश्रयाश्रयिभावाद्यैः स्वरूपैक्यं निषेधति ॥ 315 ॥

त्रयाणामेकभावानां यो न पश्यति वैभिदाम् ।
इत्यन्तिमं वचस्तच्च कथं हन्त्यादिमध्यमौ ॥ 316 ॥

त्रयाणामेकभावानां यो न पश्यति वै भिदाम् ।
आदिमध्यान्तपद्यानां स शान्तिमधिगच्छति ॥ 317 ॥

यदि स्वरूपभेदस्य निन्दैवेयं भवेत्तदा ।

व्यर्थोच्छिष्टाहुतेराज्ञा सर्वा शर्वाहुतिः यतः ।

निर्मूल एव कलहो निर्मूला शान्तिरप्यभूत् ॥ 318 ॥

पारमार्थ्येन भेदोयं यदि नेति मतं तव ।

अपारमार्थ्येन तदा नेत्यार्यस्य मतं भवेत् ।

अतः सुस्थितएवायं भेदोभूत्पदकल्पने ॥ 319 ॥

कथमार्यो न चरमो वाक्यप्रामाण्यरक्षणात् ।

अनार्यश्च कथं नाद्यो वाक्यप्रामाण्यशिक्षणात् ॥ 320 ॥

न चेदपारमार्थ्येन तत्त्वमस्यादि वागपि ।

वक्त्यैक्यं पारमार्थ्येन त्वं त्वमेवासि तच्च तत् ॥ 321 ॥

इत्याहेति भवेच्छ्रुत्या मिथ्यार्थस्तन्न कथ्यते ।

मुख्ये बाधेप्यमुख्यार्थः कथ्यते सावकाशया ॥ 322 ॥

सोनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् ।

भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥ 323 ॥

इत्यसंयुक्तताभेदो ग्रन्थेस्मिन्नेव कथ्यते ।

असंयुज्यस्थितिं तेषामियं वाक्तन्निषेधति ।

सदा संयुज्यवसतामङ्गहृत्पद्मधामसु ॥ 324 ॥

उक्ता विरोधसिद्ध्यर्थमर्थोयं च निगद्यते ॥ 325 ॥

देवानुद्दीपयन् विष्णुर्देवैरूपैः किलाविशत् ।
असुरानासुरैरूपै नागनागाकृतिः किल ॥ 326 ॥

अन्तः सर्वत्र तद्रूपरूपो विष्णुश्च तिष्ठति ।
तद्ब्रह्मस्थब्रह्मरूपाच्छिवस्थः शिवरूपतः ।
पृथक् स्थितस्य विष्णोर्वाग्भेदमेषा निषेधति ॥ 327 ॥

संयुच्यैव स्थितिं प्रोक्तां स्थिरीकर्तुमिदं वचः ।
हृदिस्थरूपप्रेमित्वाद्वैरं वा तयोर्हरौ ॥ 328 ॥

अन्तर्यामिविवक्षायां भेदो नाशो भ्रमोपि वा ।
मिश्रणं वा क्रमादेषु त्रितयं वाङ्निषेधति ॥ 329 ॥

अभेदघटनायोक्ता त्रयाणामप्यनाश्यता ।
नश्यद्देहेप्यनाशाय तद्देहे भ्रमशून्यता ।
अविद्याद्यैरमिश्रत्वं तदभ्रान्त्यै निगद्यते ॥ 330 ॥

अन्तर्यामिविवक्षायां मुख्यास्यादेकभावना ।
भिन्नभिन्नमनस्कत्वान्न चेन्नातोपि तस्य वाक् ॥ 331 ॥

रूढलक्षणयान्यत्र बुद्धेरैक्यं च भिन्नता ।
विषयस्यैक्यभेदाभ्यामुक्ते मुख्यं तु तद्गरौ ॥ 332 ॥

शब्दो नेयो ह्यनेकार्थे निर्णितोर्थः क्व नीयते ।
पुत्रो न पुत्रीति वाक्यं निर्णीतार्थानुसारि हि ॥ 333 ॥

अतो निर्विशेषराशिस्थो विषबिन्दुश्च निर्विषम् ।
ग्रन्थेस्मिन्नेव यद्वह्वी त्रयाणां भेदवाक् स्फुटा ॥334 ॥

श्रृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमात् ।
येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि ॥ 335 ॥

मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दं तथैव च ।
आग्नेयं तु षडेतानि तामसानि निबोध मे ॥ 336 ॥

वैष्णवं नारदीयं तु तथा भागवतं शुभम् ।
गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥ 337 ॥

सात्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥ 338 ॥

ब्रह्माण्डं ब्रह्मवैवर्तं मार्काण्डेयम् तथैव च ।
भविष्यद्वामनं ब्राह्मं राजसानि निबोध मे ॥ 339 ॥

सात्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गताः शुभाः ।

तथैव तामसा देवि निरयप्राप्तिहेतवः ॥ 340 ॥

तथैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणान्विताः ।

सात्विका राजसाश्चैव तामसाः शुभदर्शने ॥ 341 ॥

वासिष्ठं चैव हारीतं व्यासं पाराशरं तथा ।

भारद्वाजं काश्यपं च सात्विका मुक्तिदाः शुभाः ॥ 342 ॥

वामनं याज्ञवल्क्यं च आत्रेयं दाक्ष्यमेव च ।

कात्यायनं वैष्णवं च राजसाः स्वर्गदाः शुभाः ॥ 343 ॥

गौतमं बार्हस्पत्यं च सांवर्तं च यमस्मृतम् ।

शाङ्ख्वं चौशनसं देवि तामसा निरयप्रदाः ॥ 344 ॥

किमत्र बहुनोक्तेन पुराणेषु स्मृतिष्वपि ।

तामसा निरयायैव वर्जयेत्तान्विचक्षणः ॥ 345 ॥

शास्त्राण्यपि च सर्वाणि त्रिविधानि महामते ॥ 346 ॥

यानि सत्त्वपरं विष्णुं वदन्ति परमेश्वरम् ।

तानि सर्वाणि शास्त्राणि सात्विकानि मतानि वै ॥ 347 ॥

प्रजापतिं कृशानुं च तथा देवीं सरस्वतीम् ।
परत्वेन वदच्छास्त्रं राजसं परिचक्षते ॥ 348 ॥

यच्छास्त्रं लिङ्गपारम्यं परं देवमुमापतिम् ।
तमः प्रवर्तकं वक्ति तत्तामसमुदाहृतम् ॥ 349 ॥

सत्वनिष्ठा हि पुरुषा विष्णुमेव यजन्ति ते ।
ब्रह्माणं राजसाः सर्वे तमोनिष्ठास्तु शूलिनम् ॥ 350 ॥

इति पाद्मे गारुडे च त्रिदेवपदसेविनाम् ।
विरुद्धं त्रिप्रकारत्वं तद्ग्रन्थस्य त्रिरूपता ।
कथं त्रिदेवतैक्यं स्यात्समत्वं वा कथं वद ॥ 351 ॥

कृष्णरामादि भक्तेषु तद्ग्रन्थेष्वपि नेदृशः ।
विभागो दृश्यते तस्माद्ब्रह्मेशौ न हरिः स्वयम् ॥ 352 ॥

पञ्चसात्विकसाचिव्यात् स्पष्टगारुडवाग्बलात् ।
पाद्मस्य ह्युत्तरः काण्डः स्वयं सिद्धान्त एव सन् ।
संज्ञा शक्त्या च पूर्वांशं पूर्वपक्षीकरोति हि ॥ 353 ॥

ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥ 354 ॥

इति गीतोक्तिमार्गेण त्रयाणामधिकारिणाम् ।
गतित्रयं दातुमेव चक्रे व्यासात्मको हरिः ।
त्रिविधानि पुराणानि बुद्धो बौद्धागमं यथा ॥ 355 ॥

हेयाहेयविभागश्च सात्विकेष्वेव दर्शितः ।
योग्यानां बुद्धिशुद्ध्यर्थं यतस्ते सात्विकप्रियाः ॥356 ॥

राजसे तामसे चैव विवेकोऽयं न दर्शितः ।
अयोग्यानामबोधार्थं ततस्तत्रैव ते रताः ॥ 357 ॥

एवं पुराणकर्त्रैव स्वकृतग्रन्थराशिषु ।
ग्राह्याग्राह्यविभागोक्तेर्न सन्देहो विवेकिनाम् ॥ 358 ॥

तस्माच्छैवब्राह्मणपक्षपुराणवचनाश्रयात् ।
न तत्वप्रच्युतिः कार्या कार्याकार्यविवेकिना ॥ 359 ॥

द्वितीयाभिनिवेशेन भयं स्यादिति यद्वचः ।
तच्चात्मदेहगेहादिद्वयशब्देन भण्यते ॥ 360 ॥

तत्राग्रहाद्भयं ते स्यात्ततो भक्त्या भजेश्वरम् ।
इत्याह नो चेद्वाक्यस्य पूर्वोत्तरविरुद्धता ॥ 361 ॥

आत्मतोन्यद्द्वितीयं चेद्भयं तत्राग्रहाद्यदि ।

तर्हीशभक्तिभजनरूपे मुख्ये द्वितीयके ।

कथमन्ते विधिश्च स्याद्यत्पूर्वाधे निषिध्यते ॥ 362 ॥

गुरुदेवतयोरात्मा चित्तं यस्येति विग्रहे ।

पदं तदपि वक्तीशभजकस्य गुणान्तरम् ॥ 363 ॥

न चेत् प्रागुक्तभजनं विरुद्धार्थः कथं वद ।

लिङ्गर्थः सोऽपि बलवान् विशेषणपदार्थतः ॥ 364 ॥

अतो ग्रान्थिकमुद्राज्ञो नापातार्थेन तुष्यति ॥ 365 ॥

पूर्वोत्तराविरुद्धार्थं वदेन्मीमांसया बुधः ।

न चेदाकाशशब्देन परं ब्रह्म कथं जगुः ॥ 366 ॥

ग्रन्थेस्मिन् देहगेहादिभयहेतुतयोच्यते ।

स्थले स्थले तत्समोक्त्या तस्यैव स्याद्द्वितीयता ॥ 367 ॥

सद्धर्मं साधुभिः सङ्गं तत्पूरुषनिषेवणम् ।

यो ह्यपेक्षितमाचष्टे निराचष्टे कथं हि तत् ॥ 368 ॥

अपि चाभिनिवेशस्य भयदत्वे स एव हि ।

त्याज्यः स्यात् सोपि बाध्यो न द्वितीयं केन बाध्यते ॥ 369 ॥

अतोऽद्वितीयभावस्य कथमाशात्र कथ्यताम् ।
गृहात् प्रव्रजिते भिक्षौ किं गेहं भस्मसाद्भवेत् ॥ 370 ॥

द्वयोयं देहगेहादिः स्वभावेनैव देहिनाम् ।
अविद्यमानोभिमानाद्भाति स्वीयतया किल ॥ 371 ॥

सर्वथा विद्यमानत्वे शशश्रृङ्गायितो भवेत् ।
पारमार्थ्येन तादृत्त्वं तव मे तूक्तवर्त्मना ॥ 372 ॥

ईशात्सर्वेश्वराद्विष्णोरपेतस्य ततः प्रभोः ।
ब्रह्मणस्तु द्वितीयेपि ब्रह्मण्यभिनिवेशतः ॥ 373 ॥

निर्गुणाख्येभिमानेन भयं भवति यन्नृणाम् ।
विपर्ययः स्मृतिश्च स्यान्मुकुन्दब्रह्ममोचनात् ॥ 374 ॥

सगुणस्य द्वितीयं हि निर्गुणं स्यान्नचापरम् ।
निरर्थोसि निरर्थाख्यं भेदकं यदि मुञ्चसि ॥ 375 ॥

द्वितीयकोटिस्थेशात्ते द्वितीयं स्यात्तदेव हि ॥ 376 ॥

अतो भक्त्या तमेवेशं भजेद्यस्तु गुरुर्भुवि ।
देवता च भवेत्तादृशाचार्यै यत्नवान् बुधः ॥ 377 ॥

इति वाक्यार्थमालोच्य त्यजान्यद्भज नः प्रभुम् ॥ 378 ॥

अविद्यमानो ह्यत्यन्तासन्नपि द्वयशब्दितः ।

द्वितीयो निर्गुणाख्यात्मा ध्यातुर्नैर्गुण्यवादिनः ।

दुर्धिया भाति तत्वं तु तत्र किन्त्वच्युताभिधः ॥ 379 ॥

अस्मात्पद्यद्वयात्पूर्वपद्ये स्पष्टोदितः किल ।

उपर्युपरि चक्राङ्कोऽधो नारायणश्च यः ॥ 380 ॥

दैवत्वेनासदीशादेर्वा द्वयस्याग्रहाच्च भीः ।

गुरुत्वेन तु तत्सेवाऽसूचिपूर्वविशेषणात् ॥ 381 ॥

त्वमेवाहमिति प्रोक्तेप्यैक्याशा नैव शक्यते ।

त्वमेवाहमिति प्राहुरतिस्निग्धं यतो जनाः ॥ 382 ॥

अहं पृथक् पृथक्त्वं किं त्वमेवाहमिति प्रभुः ।

स्वमन्त्रिणमति प्रेम्णा किं न वक्ति प्रियंवदः ॥ 383 ॥

तस्मादेतादृशे वाक्ये प्रतीतार्थे तु बाधिते ।

प्रेमग्राह्यमबाधे तु स्वरूपैक्यमिति स्थितिः ॥ 384 ॥

अहं भवान्नचान्यस्त्वं त्वमेवाहं विचक्ष्वभोः ।

न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि ॥ 385 ॥

इति भागवते प्रोक्ता ततो हंसस्य वागपि ।

लोकानुसारिणी बोध्यहंसे प्रेमैव शंसति ।

बोध्यबोधकयोरङ्गसुङ्गयोरैक्यवादिनी ॥ 386 ॥

अथवा बिम्बभूतस्य स्वस्य स्वप्रतिबिम्बतः ।

जीवाद्वृत्त्यविनाभावं न त्वैक्यं वक्ति बाधितम् ॥ 387 ॥

विशिष्टैक्यानभिमतेर्मुख्यार्थस्तु तवापि न ।

अमुख्यार्थानुसारेण कुतो लोकव्यतिक्रमः ॥ 388 ॥

बर्हिष्मन्नेतदाख्यानं पारोक्ष्येण प्रकीर्तितं ।

यत्परोक्षप्रियो देवो भगवान् विश्वभावनः ।

इति पौरञ्जनोपाख्यानोपसंहारवागियम् ॥ 389 ॥

अतः परोक्षतस्तत्वमत्र सर्वत्र कीर्ततम् ।

इतोप्यापादद्दश्योर्थौ नात्र मान्यो मनीषिणा ॥ 390 ॥

अहं भवान्नचेत्येकं वाक्यं वात्र विभिद्यते ।

तेन हंसान्तराभेदं हंसराट् स्वस्य निन्हुते ॥ 391 ॥

अन्यस्त्वमित्यन्यदेव वाक्यं तेनात्मभिन्नताम् ।

तस्य ब्रवीति हंसोसौ त्वमेवाहं विचक्ष्व भोः ॥ 392 ॥

इति वाक्यान्तरेणासौ त्वमेव त्वय्यहं मतिम् ।
कुरु नान्यैरिति ब्रूते स्पष्टं तह्यावयोर्भिदा ॥ 393 ॥

कुतो न दृश्यते सर्वैरिति शङ्कान्तरे सति ।
तस्मादुत्तरवाक्येन तां शङ्कां प्रतिषेधति ॥ 394 ॥

क्षीरान्तर्नीरमिव यदावां मिश्रौ सदा मिथः ।
न नौ पश्यन्ति तच्छिद्रं मध्ये ते नावयोर्भिदा ॥ 395 ॥

न स्पष्टं दृश्यते सा वै दृश्यते च विवेकिभिः ।
इति वाक् गूढतत्वोक्तेर्हृदयं बुध्यतां बुधैः ॥396 ॥

व्याप्तव्यापकभावं च व्यतिरिक्तत्वमात्मनः ।
अन्योन्याश्रिततां नो चेद्बोध्यबोधकतां तथा॥397॥

व्यभिचारेण नष्टां च स्मृतिमव्यभिचारतः ।
अविनाभावपर्यायात् कथं लब्धां च सोऽवदत् ॥398 ॥

स व्यापकतयात्मानं व्यतिरिक्ततयात्मनि ।
विद्वान् स्वप्नइवामृश्य साक्षिणं विरराम ह ॥ 399 ॥

परे ब्रह्मणि चात्मानं परं ब्रह्म तथात्मनि ।
वीक्ष्यमाणोऽविहायेक्षामस्मादुपरराम ह ॥ 400 ॥

एवं स मानसो हंसो हंसेन प्रतिबोधितः ।

स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिम् ॥ 401 ॥

इति तत्रैव तेनोक्तवचनानि विचारय ।

न चारय मतिं नीचस्योच्चभावे कदाचन ॥ 402 ॥

यथोल्मुकाद्विष्फुलिङ्गाद्धूमाद्वापि स्वसम्भवात् ।

अप्यात्मत्वेनाभिमतादाहकोग्निः पृथङ्मतः ॥ 403 ॥

भूतेन्द्रियान्तःकरणात्प्रधानज्जीवसंज्ञित् ।

आत्मा तथा पृथक् द्रष्टा भगवान् ब्रह्मसंज्ञितः ॥ 404 ॥

तृतीयस्कन्धगैषावाग्जडाज्जीवात् पृथक्कृतम् ।

अद्वितीयश्रुतेरर्थं तृतीयं ब्रह्म शंसति ॥ 405 ॥

तस्माद्भेदमभेदोक्तेरर्थं चाहेति मे मतिः ॥ 406 ॥

अप्यात्मत्वेनाभिमतादित्यज्ञान्यभिमानजां ।

अश्रद्धेयामैक्यबुद्धिं गर्हार्थोपिरगर्हयत् ॥ 407 ॥

परपक्षं प्रतिक्षिप्य स्वपक्षस्थापनोद्यता ।

यदियं वाक्ततश्चैषा केषां तोषाय नेष्यते ॥ 408 ॥

भगवत्त्वेन नैर्गुण्यमखण्डार्थं च संज्ञया ।

निराचष्ट ब्रह्मनिष्ठां स्पष्टमाचष्च चान्यताम् ।

अनुवादित्वशङ्काया गर्भस्रावोऽभवत्ततः ॥ 409 ॥

तत्वसङ्ख्यानकार्याय योवतीर्णो महीतले।

सोम्बां प्रत्याह नातत्वं तत्सर्वं परमार्थसत् ॥ 410 ॥

स्पष्टदृष्टान्तदृष्टत्वादम्बां सम्बोधनत्वतः ।

तत्वदृक्कपिलोक्तित्वात्सेयं सैवं नैव पदाच्चलेत् ॥ 411 ॥

अस्पष्टहंसवाक्तस्मादस्मादस्पष्टवाक्यतः ।

अविनाभावमेवाह तत्सर्वमतिमङ्गलम् ॥ 412 ॥

मतिभेदोपि भेदे स्यान्नैकदैकस्य धीर्द्विधा ॥ 413 ॥

युगपन्मतिभेदो वा युगपत् स्थानभिन्नता ।

वैलक्षण्यं च युगपत् भिन्नयोरेव नान्यथा ॥ 414 ॥

तद्वेधश्रुतिसुन्दर्याः स्वार्थः सूत्रायते गले ।

उक्तार्थेषु विनीतापि यद्भेदं नैव मुञ्चति ॥ 415 ॥

सखायौ सयुजौ चेति पददार्ढ्याच्चलेच्च न ॥ 416 ॥

अन्योयमन्य इत्युक्ते द्वाविमाविति चोदिते ।
भिन्नाविमाविति प्रोक्ते किमन्योर्थोऽपि मान्यते ॥ 417 ॥

बद्धत्वापूर्णतात्तृत्वपूर्वैर्जीवप्रकाशकैः ।
नित्यमुक्तत्वपूर्णत्वानत्तृत्वाद्यैः परप्रियैः ॥ 418 ॥

विरुद्धधर्मसद्रत्नैश्चूडारत्नायितैः सदा ।
अलङ्कृताभेदवाक्तु नैव स्वार्थं विमुञ्चति ।
एकास्यो वा दशास्यो वा तां न भीषयितुं क्षमः ॥ 419 ॥

ऐक्यश्रुतिस्तु मत्यैक्ये स्थानैक्ये स्वार्थमुज्झति ।
एकी भूताविमावित्यत्रैक्यं न हि तयोर्द्वयोः ॥ 420 ॥

अतो भेदश्रुतेरग्रे कस्य स्यात् प्रत्यवस्थितिः ।
तस्मात् क्रूरकृपाणी सा रिपुसैन्यभयङ्करी ॥ 421 ॥

नित्यानामपि नित्यो यश्चेतनानां च चेतनः ।
काम्यानर्थानिमान् सर्वाननित्यसुखदान् जडान् ॥ 422 ॥

एको बहूनां जीवानां विदधाति किलाञ्जसा ।
सोन्तर्यामी किलैतेषां सर्वे नित्यसुखार्थिनः ॥ 423 ॥

आत्मस्थमनुपश्यन्ति नाभेदेन तमीश्वरम् ।

केचित् पश्यन्ति केचिच्छ न पश्यन्ति किल प्रभुम् ॥ 424 ॥

शाश्वतं सुखं तेषामुक्तरीत्यैव पश्यताम् ।

नाभेदकृतबुद्धीनां नाज्ञानां च भवेत्किल ॥ 425 ॥

इत्यशेषं श्रुतिर्नित्यो नित्यानामिति शंसति ॥ 426 ॥

चेतनस्यैव जन्मादिकर्तृत्वं यल्लटोदितम् ॥

तटस्थत्वकथा तस्य मठस्थाभूत्कुयोगिनाम् ॥ 427 ॥

ब्रह्मोपादानता वार्ता निर्मूला चाभवत्ततः ।

कर्तृत्वाद्येशधर्माणामध्यासोपि निराकृतः ॥ 428 ॥

महासामर्थ्यमीशस्य प्रभुत्वं च प्रसाधितम् ।

उपादानादिविज्ञानात् सार्वज्ञादिमहागुणाः ।

स्वातन्त्र्यं तस्य जीवानां पारतन्त्र्यं च साधितम् ॥ 429 ॥

निर्धारणे तु या षष्ठी सा निर्धारितवस्तुनि ।

आधिक्यं वक्त्यतश्चेशे सार्वज्ञं नित्यदेहिता ॥ 430 ॥

अभ्यासेन गुणेष्वस्यास्तात्पर्यं गम्यते श्रुतेः ॥ 431 ॥

अनन्तानन्तजीवेषु स्थितस्याप्येकतोक्तितः ।
अनन्तस्वावताराणां स्वस्य चाभेद ईरितः ॥ 432 ॥

भेदकार्यकरः शक्तिविशेषः परमात्मनि ।
पुच्छस्य पुच्चिनैक्यं तत् कैमुत्येन प्रसाधितम् ॥ 433 ॥

स्वाभेदेन गुणादीनां चिन्मयत्वं प्रसाधितम्।
ध्येयतोक्त्येष्टदेवत्वं सौन्दर्यं सुप्रसन्नता ॥ 434 ॥

तदन्तस्थस्य सार्वज्ञशक्तिस्वातन्त्र्यपूर्वकाः ।
स्रष्टृत्वकामदातृत्वमुक्तिदत्वादयो गुणाः ।
सर्वेश्वरत्वपूर्णत्वनित्यत्वाद्याश्च साधिताः ॥ 435 ॥

मोक्षोपयोगिज्ञानत्वं तमित्युक्त्यैषु दर्शितम् ।
ततोपि तद्गुणाम्बोधेः पारमार्थ्यं प्रसिद्ध्यति ॥ 436 ॥

मुक्तानां बहुता मुक्तस्वामित्वं च प्रभोरभूत् ।
आत्मस्थभगवद्दृष्टेर्मुक्त्वावप्यनुवर्तनम् ॥ 437 ॥

पञ्चभेदास्तया सिद्धा मुक्तेर्नित्यसुखात्मता ।
भेदज्ञानैकसाध्यत्वमुक्तसर्वविशेषणैः।
सहैव तच्च विज्ञानं योग्यतामनुसृत्य च ॥ 438 ॥

तारतम्येन तद्दृष्टिर्जीवानां त्रिप्रकारता ।
आत्मस्थद्रष्टृभिन्नत्वं द्वेधाभवति यद्विदाम् ॥ 439 ॥

चेतनानां बहुत्वोक्त्या जीवभेदः परस्परम् ।
दातुः प्रभोरनेकेभ्यो भेदश्चैकस्य सिद्ध्यति ॥ 440 ॥

तेन जीवेशयोर्भेदः साधितः सोपपत्तिकः ।
मोक्षोपयोगिज्ञानत्वाद्भेदस्यात्यन्तसत्यता ॥ 441 ॥

काम्यानां च बहुत्वोक्त्या जडभेदः परस्परम् ।
तेषामीशकृतत्वोक्त्या जडेश्वरभिदा तथा ॥ 442 ॥

सृष्ट्युक्त्या तस्य जगतः सत्यत्वमपि सिद्ध्यति ।
सदैव वर्तमानत्वं लटा विश्वस्य सूचितम् ॥ 443 ॥

जीवसम्बन्धितोक्त्या च जडजीवभिदा स्फुटा ॥ 444 ॥

एकजीवकथा जेवाभेदो जीवेश्वराभिदा ।
चिद्रूपतैव जीवानां चित्यकर्तृत्वमित्यपि ॥ 445 ॥

निष्प्रकारैक्यविज्ञानान्मुक्तिर्जगदसत्यता ।
सकृत्सर्वविमोक्षश्चेत्येतत्सर्वं हि दूषितम् ॥ 446 ॥

एतावन्तमपि ह्यर्थमेकैव श्रुतिराददे ।

सर्वश्रुत्यर्थकुशलौ सूत्रभाष्यकृतौ स्तुमः ॥ 447 ॥

स्यादेकाङ्गवीरोयं वेदव्यासभटाग्रणीः ।

तत्तद्वाक्यैश्च तत्सिद्धौ द्विर्बद्धस्य सुबद्धता ॥ 448 ॥

तद्व्यासकृतविस्तारा श्रुतिः सूत्रानुसारिणी ।

तानि सर्वाणि भेदादेः साधकानीति सुस्थितम् ॥ 449 ॥

किं च सद्युक्तिपरशोरेकीभावो बिभेति ते ।

द्वैधीभावमते सोपि सहायत्वमुपेयिवान् ॥ 450 ॥

घटेन गगनस्येव यदि देहाद्युपाधिना ।

गच्छता तत्रतत्रस्य ब्रह्मभागस्य जीवता ॥ 451 ॥

सम्पद्यते ततोन्ये तु न जीवा इति मन्यसे ।

मतं न मायिनोप्येतच्चर्चार्थं परमुच्यते ॥ 452 ॥

तर्हि देहाद्युपाधीनां गमनं केन हेतुना ।

ब्रह्मणो निष्क्रियत्वोक्तेस्तदन्यस्य जडत्वतः ॥ 453 ॥

परिस्पन्दक्रिया नैव परे ब्रह्मणि ते मते ।

ततस्तत्क्रियया देहक्रिया नेत्यक्रिया भवेत् ॥ 454 ॥

इतः क्षिपति किं कश्चित्ततः कर्षति किं परः ।
अतः स्थिरांशजीवत्वे स्थैर्यं स्यान्न गतागतम् ॥ 455 ॥

शून्यगेहस्थघटवद्देहो देही घटाभ्रवत् ।
अतिदूरस्थितस्वर्गगमनं त्वतिदूरतः ॥ 456 ॥

वातोपि तिर्यक्पवनः को वा तं जडमुन्नयेत् ।
शवभूषणवत्सर्वं जीवजातमभूद्दहो ॥ 457 ॥

किञ्चैकपदविन्यासे प्रागंशे देहनिर्गतेः ।
मृतिः स्यादपरांशे तु जनिः स्याद्देहसङ्गतेः ॥ 458 ॥

देहयोगवियोगौ हि जीवजन्ममृती श्रुते ।
पदेपदेप्रेतकर्मजातकर्म करोति कः ॥ 459 ॥

तदंशाज्ञानमूलस्य मन आदेरपि क्षयात् ।
कल्पान्तलय एवायं कल्पादिमजनिश्च सा ॥ 460 ॥

पूर्वांशे कर्मनष्टं हि नान्यांशोपि क्व देहिता ।
कृतहान्यकृतप्राप्त्या मतमेतद्विगर्हितम् ॥ 461 ॥

अन्तेमृतिश्च का वाच्या देहस्यांशान्तरे स्थितेः ।
इन्द्रियोपरतेः सा चेत्सुप्तिश्च मरणं भवेत् ॥ 462 ॥

चिद्रूपसाक्षिसामर्थ्यात्तद्वत्स्याद्धि प्रबुद्धता ॥ 463 ॥

उपादेयमुपादानगत्यैवान्यत्र गच्छति ।

पूर्वांशाज्ञानजो देहः कथं तस्य ह्यचालने ।

चलेदन्यत्र तन्माता गुर्विणी सर्वदा तव ॥ 464 ॥

उत्पत्तिस्थितिनाशाश्च तत्र तत्रैव देहिनां ।

भवेयुर्निष्क्रियासङ्गाद्देहोपि स्याद्धि निष्क्रियः ॥ 465 ॥

व्याप्तांशस्यैव जीवत्वे गजादौ गजमात्रता ।

अणावणुप्रमाणं चेत्यागतं ह्यतिनिन्दितम् ॥ 466 ॥

योंशो विप्रत्वमापेदे स एवांशः क्षणान्तरे ।

हीनोपि स्यादिति प्राप्ता नानायोनिः पदेपदे ॥ 467 ॥

उत्क्रान्तिगत्यागतीनामित्याह ब्रह्मसूत्रकृत् ।

अतोणुजीवता श्लाघ्या योग्या वाग्मिजनप्रिया ॥ 468 ॥

चलदंशो हि जीवः स्यान्न स्थिरांशः कदाचन ।

चैतन्याचलने कस्य चलनं स्याज्जगत्त्रये ॥ 469 ॥

चलच्चेतनहस्तस्थो घटश्चलति नापरः ॥ 470 ॥

परिस्पन्दक्रियानैव परे ब्रह्मणि ते मते ।

सहस्त्रोपाधिसम्बन्धे प्रक्रियस्य क्रिया न हि ॥ 471 ॥

किं क्रिया निष्क्रिये व्योम्नि स्यात्कारकशतैरपि।

स्थिरांशजीववादोतो न स्थिरः प्राज्ञसंसदि ॥ 472 ॥

अतः श्रौताणुता सिद्धा तवापि च ममापि च ।

देहान्तः करणान्तःस्थः सोधोञ्चत्यूर्ध्वमञ्चति ॥ 473 ॥

एवं चोभयतः पाशारज्जुर्बध्नाति ते तलं ॥ 474 ॥

स्थिरांशस्यैव जीवत्वे भवदैक्यकथा वृथा ।

चलदंशस्य जीवत्वे भवदैक्यकथा वृथा ॥ 475 ॥

तस्मात्त्वदैक्यवादोयं तवैक्यायैव केवलम् ॥ 476 ॥

अणुरेव हि जीवोयं कण्ठेऽक्ष्णि हृदि वा स्थितेः ।

देहाद्देहान्तरगतेरुद्गतेश्चाप्यवाग्गतेः ॥ 477 ॥

प्रवेशाच्च यवव्रीहितिलमाषादिकाङ्कुरे ।

अन्नद्वारा च पितरि पितृद्वारा च मातरि ॥ 478 ॥

अणूनि जीवचैतन्यान्यन्यानि च तनौ तनौ ।

नानाकर्मानुबन्धीनि नानायोनिगतानि च ॥ 479 ॥

अन्यच्च ब्रह्मचैतन्यं सदा सर्वत्र तिष्ठति ।

स्वच्छमच्छेद्यमच्छिद्रं कूटस्थमचलं ध्रुवम् ॥ 480 ॥

तदच्छेद्यं कथं छेद्यं भागेबागे त्वविद्यया ।

अच्छेद्योयमदाह्योयमित्युक्तेः का गतिर्वद ॥ 481 ॥

निश्छिद्रस्य कथं छिद्रमसाध्यं साध्यते तया ।

अविद्याया न विद्यास्ति यया साध्यं च साध्यते ॥ 482 ॥

या स्वांशगततत्खण्डानुन्नयेच्चाप्यधो नयेत् ।

जनयेन्मारयेन्नानाक्लेशौघं भोजयेत्किल ॥ 483 ॥

न हि जीर्णपटो ब्रह्म मायामुषिकवेषधृक् ॥ 484 ॥

निष्क्रियं शक्तिशून्यं च कृष्यमाणमविद्यया ।

ते ब्रह्म तद्व्रणं सर्वं केनोपायेन पूरयेत् ॥ 485 ॥

कारागृहं नयन्तीं तां शक्तं चेत्किं न वारयेत् ॥ 486 ॥

अतस्तत्स्वक्रियां ब्रह्म मत्वा स्वाङ्गस्य विक्रियाम् ।

तद्वक्रव्रणशान्त्यर्थं भेदाख्यारण्यकौषधम् ॥ 487 ॥

चिच्छक्तिरूपकवचमस्पर्शाय पदेपदे ।

स्वयं दृढीकृत्य जीवान् क्षुदितायै समादिशत् ॥ 488 ॥

ब्रह्मखण्डा न जीवास्तद्ब्रह्मणि क्वाप्यखण्डनात् ।

अखण्डितं च तद्ब्रह्म निश्छिद्रत्वाद्विनिश्चितम् ॥ 489 ॥

धर्मखण्डोपि ते नास्ति का कथा धर्मिखण्डने ।

अखण्डवादी किं न त्वं सखण्डत्वं हि मन्मतम् ॥ 490 ॥

चित्रशक्तिविशेषश्च यद्यस्ति परमात्मनि ।

कथं दुःखार्णवे मङ्क्तुमुत्सहेत स बुद्धिमान् ॥ 491 ॥

ईशशक्त्यैव सर्वत्र शक्तिर्नोचेन्न कुत्रचित् ।

नर्ते त्वत्क्रियते किं च नेत्याद्यागर्जति श्रुतिः ॥ 492 ॥

स किलाम्बाङ्कगोपालः कुक्षौ महदिदं जगत् ॥ 493 ॥

विचित्रशक्तियुक्तोसौ सर्वज्ञः सकलेश्वरः।

स्वतन्त्रोऽखिलकर्ता च सदाऽणीयान्महान् किल ॥ 494 ॥

तच्छक्त्या किं न घटते सोपि न स्वात्मघातकः ।

स्वरोमापि क्वचिच्चक्री चक्रेण निचकर्त किं ॥ 495 ॥

सत्यसङ्कल्पतो विष्णुः कुरुते क्वचिदद्भुतम् ।

क्वचिच्च न करोतीशो नासाध्यं तस्य विद्यते ॥ 496 ॥

यदि ब्रूषे जडं शक्तं जितं साङ्ख्यकुमारकैः ।

जडप्रकृतिकर्तृत्ववादस्याप्यनुपद्रवात् ॥ 497 ॥

जडस्य न विवेकोस्ति छिन्द्यात्तर्हि नभोपि तत् ॥ 498 ॥

चित्खण्डने समर्थस्य सुकरं जडखण्डनम् ।

वृक्षच्छेदिकुठारस्य पर्तच्छेदे न किं बलम् ॥ 499 ॥

उक्तश्रुतिप्रमाणाच्च पयोम्बुवदिति स्मृतेः ।

मणिमन्त्रौषधादीनां प्रभावोपि प्रभोर्वशे ॥ 500 ॥

इति व्यासमतं तिक्तो गुडस्ते पित्तदेहिनः ॥ 501 ॥

निर्विशेषं हि ते ब्रह्म न शक्तं कास्य शक्तता ।

यन्नारकासुखाम्भोधावुन्मज्जति निमज्जति ॥ 502 ॥

चिन्मात्रब्रह्मशक्तिस्ते सिद्धान्तं हन्त कृन्तति ।

जडाविद्याशक्तिपक्षः पूर्वपक्षं विविक्षति ॥ 503 ॥

यद्यज्ञानविशिष्टस्य शक्तत्वं तर्हि तत् क्षिपेत् ।

उत्क्षिपेच्च ततो दुःखामयदात्तत्वमात्मनः ॥ 504 ॥

अतः शक्त्या परीहारः प्रहारोभूत्त्रिधापि ते ।

प्रागुक्तानुपपत्तिस्तद्विपत्तिरभवद्ध्रुवम् ॥ 505 ॥

अखण्डिते च यस्मिन् ये सञ्चरन्ति ततस्ततः ।

न ते खण्डाः पृथग्द्रव्यं तद्भागाः सुतरां न हि ॥ 506 ॥

ब्रह्मणो जीवभावोक्तिरतोऽयुक्ततरा विदाम् ।

यतः प्रागक्रियाव्याप्ता चिदेका सक्रियास्त्वमी ॥ 507 ॥

अनादितोपि जीवास्ते सञ्चरन्ति पृथक्क तत् ।

अतो मोक्षेपि नैवैक्यं न हि कन्था परःपुमान् ॥ 508 ॥

जीवाणुत्वं श्रुतिप्रोक्तमावयोर्मतमेव हि ।

परम्ब्रह्म परिस्पन्दक्रियादूरतरं च ते ॥ 509 ॥

किमु व्योमकुठारेण छित्वा तत्खण्डमन्यतः ।

नयेन्मयोवा ग्रामाय त्वन्माया वा कदाचन ॥ 510 ॥

हरेरनेकताणुत्वं महत्त्वं चेति मन्मतम् ।

अतो गतागताद्यं च युक्तं शक्त्या मम प्रभोः ॥ 511 ॥

तव त्वनेकताणुत्वे नैव स्तो महदेव तत् ।

शक्तिश्च नास्ति ते नोक्तं समस्तं कस्तमुत्तरेत् ॥ 512 ॥

मायावच्छिन्नरूपेषु तेष्वेवं सञ्चरत्स्वपि ।

चैतन्यमपरिच्छिन्नं यदन्यद्ब्रह्म तद्धि नः ॥ 513 ॥

यत्तद्ब्रह्म परं व्याप्तं श्रुत्या स्मृत्या च कीर्त्यते ।

स एव भगवान् विष्णुर्वैष्णवा यमुपासते ॥ 514 ॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।

इति श्रुतेर्न चेद्व्याप्तचैतन्यद्वयमापतेत् ॥ 515 ॥

जीवाभेदेपि यस्याशा ब्रह्मकस्माद्भिनत्त्यसौ ।

कल्पनागौरवं यत्स्याद्विद्याया लाघवं च यत् ॥ 516 ॥

जीवान् जग्रास या माया व्याप्ते ब्रह्मणि किं तया ।

कविर्मनीषीपरिभूर्यथार्थान् सोसृजत्किल ॥ 517 ॥

अतः सत्यजगत्सृष्टौ मिथ्याऽज्ञानं तव प्रियम् ।

कुत्रोपयुज्यते तस्मात् स्वजायां न परेप्सय ॥ 518 ॥

अतो घटमठाकाशाद्युपमा विषमोपमा ॥ 519 ॥

घटे घटप्रमाणोसौ मठमात्रो मठेपि च ।

घटे गच्छति नो गच्छेदागच्छति न चाव्रजेत् ॥ 520 ॥

महाकाशस्य खण्डोसौ महाकाशस्वभाववान् ।

तस्य तद्रूपताप्यस्तु मत्स्यादीनां हरित्ववत् ॥ 521 ॥

जीवास्त्वाकाशमध्यस्थत्रसरेणुगणोपमाः।
तस्माद्ब्रह्मैक्यमेतेषां नाभूदस्ति भविष्यति ।
अणूनां गगनेनेव मणीनामिव सूत्रतः ॥ 522 ॥

अनादि ब्रह्म किल ते जीवाः सर्वेप्यनादयः ।
तद्भेदस्याप्यनादित्वेऽभेदोऽभूद्ब्रह्मणः कदा ॥ 523 ॥

अनादित्वं च भेदादेः षडस्माकमनादयः ।
इति त्वद्ग्रन्थ एवोक्तमतो युक्तिविचारणे ।
नाखण्ड ब्रह्मचित् खण्डो जीवराशिरभूदयम् ॥ 524 ॥

इदानीं तु भिदास्त्येव न भविष्यति सा कदा ।
अज्ञाननाशेप्यज्ञानाकार्यानादेरनाशनात् ॥ 525 ॥

तदनुद्धृतखण्डानां तत्रैक्यं च न युक्तिमत् ।
घटाकाशे महाकाशस्यैक्यं स्यान्न घनावलेः ॥ 526 ॥

मुक्तास्तु धौतमणिवत्पङ्कार्द्रमणिवत्सृतौ ॥ 527 ॥

सर्वतोप्यपरिच्छिन्नचैतन्ये ब्रह्मणि स्थिरे ।
इतस्ततश्चरच्छिन्नचैतन्यं ह्यन्यदेव हि ॥ 528 ॥

मुग्धस्त्रीमूर्धमालावदब्धिस्थजलजन्तुवत् ।
व्योमस्थ पक्षिश्रेणीवद्भूमिस्थ जनजालवत् ॥ 529 ॥

अथ सर्वा व्यवस्थेयं दृश्यते केवलं जनैः ।
वस्तुतो नास्ति तत्सर्वं मृषेति यदि मन्यसे ॥ 530 ॥

देहादिकं मृषा तेस्तु नानादेहस्थ चेतनाः ।
मृषाचेद्गमनं न स्याद्रज्जुसर्पो न सर्पति ॥ 531 ॥

अस्ति तत्रापि चैतन्यभ्रमः स्थाणुषु पुम्भ्रमे ।
चरेयुर्भ्रमकाले वा व्यावहारिकतापि ते ॥ 532 ॥

वृथाभूद्बाधतः पूर्वमप्येषां गत्यदर्शनात् ।
सत्येन ब्रह्मणा तेषामैक्यं न स्यान्मृषात्मनाम् ॥ 533 ॥

अथ सन्त्येव चैतन्यभागास्ते सर्वदेहगाः ।
तेषां ब्रह्मविभेदस्तु मृषेति यदि मन्यसे ॥ 534 ॥

सर्वत्र निष्क्रियं ब्रह्म निश्छिद्रं वर्तते किल ॥ 535 ॥

नानादेहगतान्येतान्यनन्तान्यत्यणूनि च ।
चैतन्यान्यादितः सन्ति सञ्चरन्ति पृथक् पृथक् ॥ 536 ॥

अन्यतोऽनुद्भूतांशानामनादिपरिवर्तिनाम् ।

अणूनां सक्रियाणां च बहूनां क्लेषभोगिनाम् ॥ 537 ॥

सदा सर्वत्र पूर्णेन निश्छिद्रस्थिरमूर्तिना ।

एकेन निर्विकारेण क्लेशानां दूरवर्तिना ॥ 538 ॥

भेदो मृषेति यद्वाक्यं यच्छास्त्रं तत्कृते कृतम् ।

बधिरस्तत्र शिष्याः स्युरुन्मत्ता वा न बुद्धिमान् ॥ 539 ॥

मृषाभेदं घटव्योमप्रचलेत्तत्रतत्र किं।

जलेन जलपङ्केन लिप्यते किं दिने दिने ॥ 540 ॥

किन्तु स्वभावभिन्नानां रेणूनां गगनादिना ।

तत्र तत्र क्रिया चास्ति विक्रिया च ततस्ततः ॥ 541 ॥

निष्क्रियब्रह्मभागाश्चेत् सक्रियत्वं न कर्हिचित् ।

निष्क्रियाकाशभागास्ते सक्रिया केन वा कृताः ॥ 542 ॥

तज्जीवेश्वरभेदो वा मूकता वा गतिस्तव।

स्फोटो यन्नाक्रियेणैक्ये ताल्वोष्ठपुटसम्पुटे ॥ 543 ॥

व्यावहारिकतोक्तिस्ते स्पर्धते पदमञ्जरीम् ।

बाधश्चेदस्ति तर्ह्यर्थनास्तितैवेति किं तया ।

बाधश्चेन्नास्ति ते शास्त्रनास्तितैवेति किं तया ॥ 544 ॥

सर्वानुभवसिद्धस्य मर्यादारक्षकस्य च ।

जीवेश्वरादिभेदस्य मृषात्वं केन हेतुना ॥ 545 ॥

यथानुभवमेवार्थः सदा सर्वत्र तिष्ठतु ।

जीवो जीवोस्तु सर्वत्र जडमस्तु जडं सदा ॥ 546 ॥

ईशः सर्वत्र चेशोस्तु यथापूर्वमिति श्रुतिं।

उपेक्ष्य लोकसंहारः क्रियते केन हेतुना ॥ 547 ॥

न ह्यनादिभवेप्यस्य व्यत्ययोर्थस्य कस्यचित् ।

इदानीं न कुतो भाविकाले व्यत्यास इष्यते ॥ 548 ॥

निर्दुःखस्वसुखप्राप्त्या मुक्तिश्चैक्यं विना भवेत् ॥ 549 ॥

वेदस्तु सर्वं ब्रह्मेति सर्वस्याप्येकतां स्फुटम् ।

वक्ति तत्र तु जीवैक्यमात्रे केन भरस्तव ॥ 550 ॥

दृष्टस्तु जडभेदोस्तु मृषा च व्यावहारिकः ॥ 551 ॥

यदि तद्व्यतिरेकेणासत्त्वमर्थो जडे तव।

चेतनेप्यस्तु नित्यत्वान्न चेन्नित्यजडेपि न ॥ 552 ॥

ईशत्वसर्वकर्तृत्वसर्वज्ञत्वादयो गुणाः ।

अलभ्यास्तपसाप्यन्यैः सर्वप्राणिमनोहराः ।

जीवैक्ये खलु सर्वेषामेषां नाशो भविष्यति ॥ 553 ॥

दुर्घटं घटयन्ती ते माया चित्त्वं जडे दिशेत् ।

तेन चित्त्वादिनाशः स्यान्न जडैक्येपि ते मते ।

तच्चेदैक्यं सुखग्राह्यमिदं कस्मान्न गृह्यते ॥ 554 ॥

अनर्घरत्नचोरस्तु रक्ष्यो मृद्भाण्डतस्करः।

शिक्ष्यः किल कृपालुस्तु दीनेषु कुरुते दयाम् ॥ 555 ॥

जडस्यानन्दमयता जडं जन्मादिकारणम् ।

जडादज्ञाननाशस्ते दुर्घटं घटयेज्जडं ॥ 556 ॥

ज्ञानत्वरूपं चित्त्वं च वक्ष्यामनोपदं जडे ।

दुष्करं तस्करत्वं तदस्मिन् ब्रह्मयशस्करे ॥ 557 ॥

मायाशक्त्या जडस्यापि सार्वज्ञादि प्रदानतः ।

ऐक्ये तु न जडात्मैक्यं तस्करः स्याद्धि कस्यचित् ॥ 558 ॥

अथवा जडतामीशे दत्वा माया स्वशक्तितः ।

जडैक्यमेव घटयेदिदं तेऽतिप्रियं मतम् ।

यत्र त्वस्येति वाक्योक्तमुक्तेरत्युपयोगतः ॥ 559 ॥

नात्मानं न परांश्चापि तव मुक्तस्तदेक्षते ।

जडमुक्तस्तु सर्वत्र जडैक्ये नित्यमुक्तता ॥ 560 ॥

फलेत्वतिशयाद्वाक्यं जडैक्यपरमेव तत् ।

सुखात्मता जडेपि स्यान्मानसं हि सुखं नृणाम् ॥ 561 ॥

मोक्षश्च तार्किकाचार्यमोक्षवद्वा भविष्यति ॥ 562 ॥

ज्ञानरूपमनस्तत्वेनैक्ये ज्ञानत्वमप्यलम् ।

स्यादेव यत्समस्तस्य ज्ञानं मानसमावयोः ।

न ते किञ्चिदनिष्टं स्यादस्माकं महती क्षतिः ॥ 563 ॥

तथापि च चित्त्वमात्रस्य त्यागाद्भीतो जडैकताम् ।

श्रुतामपि जहासि त्वं यर्हि तर्हि तवैकताम् ॥ 564 ॥

माहागुणापहर्त्रीं त्वं त्यज भक्त्या भजाच्युतम् ।

न चेत् प्रभुर्महाचोरं त्वामन्धेतपसि क्षिपेत् ॥ 565 ॥

दृश्यमानमिदं सर्वं ब्रह्मेत्यैक्यानुशासनात् ।

जडस्य ब्रह्मणैक्येपि का ते हानिर्निगद्यताम् ॥ 566 ॥

स्वादेद्यत्वं स्वभातत्वं जडैक्ये शोभतेतराम् ।

सार्वज्ञादिगुणानां च मिथ्यात्वं शोभतेतमाम् ॥ 567 ॥

रागादिदोषशून्यत्वमपि युक्ततरं भवेत् ।

सुखत्वमनुभूतित्वं मनोवत् स्यान्निराकुलम् ।

जडोपादानताप्यस्य पञ्चम्योक्ताति शोभते ॥ 568 ॥

सृष्टिस्त्वदृष्टतोस्त्वेषा भाट्टानामिव ते मते ।

मिथ्याभूतं च कर्तृत्वं कस्य न स्यादुदीर्यताम् ॥ 569 ॥

चित्त्वादि धर्मशून्यैस्तु चेतनैर्घटसन्निभैः ।

अप्यैक्यं युक्तमेवास्येत्यस्तु सर्वं समञ्जसम् ॥ 570 ॥

यद्येवमपि तत्रार्थस्तद्विनाऽसत्त्वमेव ते ।

चेतनेप्यस्त्वसावर्थौ द्विधा क्लृप्तिस्तु ते मुधा ॥ 571 ॥

गजो मिथ्या यथा तद्विन्मिथ्या किल पलायनम् ।

बन्धो मिथ्या विमोक्षश्च मिथ्या किल भवन्मते ॥ 572 ॥

अतः किं चेतनैरेतैः कर्तृताभोक्तृतोज्झितैः ।
सर्वत्रैक्यश्रुतीनां स्यादेवं चेदेकवाक्यता ॥ 573 ॥

साम्येपि श्रुतियुक्तीनां हान्यभावेपि केवलम् ।
यदि स्वमतरक्षायै विवक्षेयमपेक्ष्यते ॥ 574 ॥

तर्ह्यस्य मतरक्षायै युक्तिप्रत्यक्षसत्कृतम् ।
सर्वस्य तदधीनत्वमर्थं सा वक्ति न द्विधा ॥ 575 ॥

अतो वाक्यबलादैक्यमाशास्यं न क्वचित्त्वया ॥ 576 ॥

विरुद्धापातलब्धेऽर्थे तवैवायं दुराग्रहः ।
अभिमान्युपदेशेन व्यासस्त्वर्थान्तरं जगौ ॥ 577 ॥

श्रुतिश्चतुर्मुखैक्यं च मन्यते न परमात्मनः ।
जीवैक्यं किमु तेनैव मोचिताऽनेकसङ्कटा ॥ 578 ॥

हरिश्च स्वगुणान् दिव्यान् न मुञ्चति न तान् दिशेत् ।
तपसाराधितोपीषत् कर्तृज्ञातृत्वदोह्यसौ ॥ 579 ॥

तस्मान्नात्मैक्यमन्येषां केषामपि स दित्सति ।
यः पौण्ड्रकवधं चक्रे यश्चेदिपमखण्डयत् ॥ 580 ॥

सोहंभावात्किमन्योस्ति द्रोहः पौण्ड्रकराक्षसे ।
स चेत् शास्त्रस्य तत्वार्थः कुतस्तं शिक्षयेत् प्रभुः ॥ 581 ॥

सत्यं प्रियं वचो वाच्यं वाच्यं नासत्यमप्रियम् ।
यदच्युतोहमित्युच्चैरुच्चरन् पौण्ड्रकश्च्युतः ॥ 582 ॥

यया भियैकवाक्यस्थं जडैक्यं त्यज्यते त्वया ।
तयैव त्यज जीवैक्यं विरम्य व्यापृतिर्न चेत् ॥ 583 ॥

धौतवाससि दत्तोन्नरसो राजकमन्दिरे ।
एकीकर्तुं प्रयत्नेन ताडितोपि पुनः पुनः ॥ 584 ॥

एकीभूत इति प्रोक्तोप्येकतामेति किं पटे ।
वाक्यं तद्बाधिकार्थत्वात्सोपचारं प्रकल्प्यते ॥ 585 ॥

ग्रामस्मिन्नेक एव त्वमित्युक्तेश्चापि किं भवान् ।
अतोन्यस्यान्यवस्तुत्वं वाक्यैर्यन्नशतैरपि ।
कर्तुं न शक्यं किं वाचा काचो नीलमणिर्भवेत् ॥ 586 ॥

भ्रमराद्भ्रमरोन्यः स्याद्दीपाद्दीपान्तरं भवेत् ।
तयोरैक्यं न तत्रापि द्वितायाः स्पष्टमीक्षणात् ॥ 587 ॥

अयोपि स्वर्णतायोग्यं स्वर्णं स्यान्न तु मृत्तिका ।

तत्किं स्वर्णान्तराभिन्नं विक्रियायां क्रयोधिकः ॥ 588 ॥

क्षीरान्तःस्थितनीरस्याप्यन्तर्भेदो अग्निनेक्ष्यते ।

अदनानदनाभ्यां यथा जीवेशयोर्हृदि ॥ 589 ॥

एवं भिन्नस्वभावानां जीवानां ब्रह्मणीश्वरे ।

अपरिच्छिन्नचिद्रूपे परिच्छिनाणुरूपिणाम् ॥ 590 ॥

अनादितोप्यनन्तानामनन्तक्लेशभोगिनाम् ।

ऐक्य वाक्यशतेनापि वक्तुं शक्यं न कुत्रचित् ॥ 591 ॥

मुख्यार्थबाधे वाक्यानामन्योर्थः कथ्यते बुधैः ।

यजमानः प्रस्तरः किमग्निर्माणवकोपि वा ॥ 592 ॥

किं योषिदग्निरादित्यो यूपोन्धोमणिमीक्षते ।

मृदब्रवीत्किमु ग्लावा प्लवते किमपां च वाक् ॥ 593 ॥

एतासां बाधितार्थानां यथान्योर्थो मतस्तव ।

तथापि बाधितार्थैक्यवाक्येप्यन्योर्थ ईर्यताम् ॥ 594 ॥

दृष्टार्थबाधो वाचा स्यात्तस्याः स्वार्थे दृढे सति ।

बाधाभावे दृढोर्थः स्यादित्यन्योन्याश्रयो न चेत् ॥ 595 ॥

गङ्गायां घोष इत्युक्तिः किं बाधं बाधते स्वयं ।
बाधेन बाधितार्थस्यादन्यार्थेति विचार्यताम् ॥ 596 ॥

यद्यापातप्रतीतोर्थो बाधितोपि भवेद्गिराम् ।
तर्ह्याकाशादिशब्देन ब्रह्म मीमांस्यते कुतः ॥ 597 ॥

श्रुतबाधितसन्त्यागे भाष्यं दुर्भाष्यमेव ते ।
श्रुतबाधितसंवादे भाष्यं दुर्भाष्यमेव ते ॥ 598 ॥

यदीश्वरोसमर्थः स्यात्कथं सर्वं जगद्भवेत् ।
यदीश्वरः समर्थ्यः स्यात्कथं सर्वं जगद्भवेत् ॥ 599 ॥

यदीश्वरो महेशः स्यादनीशत्वं कथं भजेत् ।
यदीश्वरोप्यनीशः स्यादनीशत्वं कथं भजेः ॥ 600 ॥

यदि सत्या हरेर्धर्माः कथमैक्यं न बाधितम् ।
यद्यसत्या हरेर्धर्माः कथमैक्यं न बाधितम् ॥ 601 ॥

अभेदान्नैक्यबाधश्चेत्कथं धर्मस्य बाधनम् ।
अभिन्नधर्मभाधश्चेत्कथं धर्मस्य बाधनम् ॥ 602 ॥

अभेदान्न गुणाश्चेत्स्युः कथमैक्यं भवेत्तव ।
अभेदेपि गुणाश्चेत्स्युः कथमैक्यं भवेत्तव ॥ 603 ॥

श्रुत्युक्तं यदि तत्वं स्याद्द्वैतस्य न तत्वता ।

श्रुत्युक्तं यद्यतत्वं स्याद्द्वैतस्य न तत्वता ॥ 604 ॥

यदि ज्ञानं हरेः सत्स्यान्न ज्ञाता ज्ञानवानसौ ।

यदि ज्ञानं हरेर्नस्यान्न ज्ञाता ज्ञानवानसौ ॥ 605 ॥

यदि ज्ञानेपि चाज्ञानं न संसारो हरेरयम् ।

यदि ज्ञानेन चाज्ञानं न संसारो हरेरयम् ॥ 606 ॥

यदीश्वरो जगद्व्यापी कथमैक्यं न बाधितम् ।

यदीश्वरो न तद्व्यापी कथमैक्यं न बाधितम् ॥ 607 ॥

ऋजुमार्गे कतोप्यन्धो घट्टकुट्यां निषीदति ।

वक्रमार्गतोप्यन्धो घटकुट्यां निषीदति ॥ 608 ॥

गतेपि पृष्ठतो गत्वा कपोले ताडयेद्बली ।

पक्षद्वयेप्येकदोषप्रसङ्गनमपीदृशम् ॥ 609 ॥

अल्पोल्पवित्तेप्यात्मानं वित्तेशं किं न मन्यते ।

सर्वज्ञब्रह्मताल्पज्ञेष्वप्येवं हि कुवादिनाम् ॥ 610 ॥

अहङ्कारो हि लोकानां विकारो दुस्त्यजो महान् ।

अधमादधमो जीवो ह्यधिकादधिकः किल ॥ 611 ॥

सत्सु स्वदारेषु खलः परदारानपेक्षते ।
लोकमातृपतित्वे किं नाशा तेषां तमोजुषाम् ॥ 612 ॥

देवे गुरौ च यस्याहम्भावो देवद्विडेव सः ।
रमोमाकान्ततोत्कण्ठा दशकण्ठस्य केवलम् ॥ 613 ॥

अनित्यदेहगेहादौ नित्यताविभ्रमो नृणाम् ।
दुःखिनः स्वस्य निर्दुःखब्रह्मभावभ्रमोपमः ॥ 614 ॥

बिभेति कुमतिः सत्यः शास्तुर्न समयान्तरे ।
राजाहमिति न ब्रूते ब्रूते देवोहमित्यहो ॥ 615 ॥

दुष्टोहङ्कुरुते तुष्टः क्लिष्टः क्लेशहरं भजेत् ।
शिवेहम्भावादीर्भोगे रोगे मृत्युञ्जयार्चकः ॥ 616 ॥

वाचान्यज्जल्पप्ति स्वल्पः कर्मणान्यत्करोति च ।
योऽच्युतोहमिति ब्रूते स्नातुं गङ्गां स गच्छति ॥ 617 ॥

काणस्य चक्षुरेकत्र साम्येप्रन्यत्र नापतेत् ।
यज्वप्रस्तरतोत्त्यध्वा दृष्टो नात्मैक्यवाक् पतः ॥ 618 ॥

सतीरतिक्रम्य कामी पतिः स्यादसती रतिः।
यथैक्यश्रुतिमादत्ते भेदाध्यर्थश्रुतीस्त्यजन् ॥ 619 ॥

शब्दसाम्येपि सार्थैक्यं यत्र चित्रचरित्रता ।
वृत्त्यंशवद्धि जीवोंशो मत्स्याद्यंशास्तु मूलवत् ॥ 620 ॥

स्वरूपांशोस्ति भिन्नांशोप्यस्ति शब्दविशेषणात् ।
एते किल स्वांशकला जीवाः सर्वे कलाः किल ॥ 631 ॥

अल्पोपि महतः स्वांशो नाल्पः सर्वत्र सद्गुणैः ।
लेशोपि यद्धृषीकेशकेशो लोकेशशासनः ॥ 622 ॥

भिन्नांशे तु तदीयत्वं भिन्नाभिन्नेऽर्धसाम्यता ।
अभिन्ने सर्वसाम्यं स्याद्यथा मत्स्यादिषु प्रभोः ॥ 623 ॥

जीवास्तु ब्रह्मभिन्नांशाः सार्वज्ञादेरभावतः ।
मत्स्यादयः स्वरूपांशाः सार्वज्ञादेः प्रभावतः ॥ 624 ॥

भिनाभिन्नाः पटाद्यंशास्ते जडेष्वेव नाजडे ।
एकसत्त्वेऽन्यनाशस्य तद्धेतोः सदसत्त्वतः ॥ 625 ॥

तनुतः पटेनार्धसमो भेदाभेदस्ततस्तयोः ।
अतस्त्रैविध्यमंशेषु दुर्वारमिति मे मतिः ॥ 626 ॥

न चेद्वैचित्र्यमेतेषु निर्निमित्तमिदं भवेत् ।
मत्तोप्यकारणं कार्यं न वदेत् किमु शास्त्रकृत् ॥ 627 ॥

अदः पूर्णमिदं पूर्णं पूर्णात्पूर्णमुदच्यते ।

विष्णूद्रिक्तांशता रामस्योक्ता सा का विचार्यताम् ॥ 628 ॥

उद्रिक्तत्वं स्वरूपत्वमनुद्रेकस्ततो परः ।

अतोंशयोर्द्वितैवोक्ता स्पष्टं नामसहस्रके ॥ 629 ॥

बलज्ञानसुखाद्यैश्च मत्स्याद्यंशा हरेः समाः ।

जीवांशास्त्वतथाभूताः कथं नांशे द्विरूपता ॥ 630 ॥

बलज्ञानसुखोद्रेकादुद्रिक्तांशास्तु ते हरेः ।

अल्पज्ञानबलोजीवस्त्वनुद्रिक्तांश उच्यते ॥ 631 ॥

अतोतिभिन्न एवायं जीवाख्यांशो भेद्ध्रुवम् ।

विरुद्धधर्माक्रान्तत्वे भेदं को न वदेद्बुधः ॥ 632 ॥

ममांशस्यैव जीवस्येत्युक्त्वा भागवते हरिः ।

सखायौ सयुजौ चेति स्पष्टमाह पुनर्बिदाम् ।

तस्माद्भिन्नांशवादोयं कस्य मोदाय नेष्यते ॥ 633 ॥

नचेदंशं कथं नानाव्यपदेशात्ससूत्रकृत् ।

असूत्रयदिमं जीवं तत्सम्बन्धात्तदंशता ।

सर्वे जीवा यतस्तस्य(सर्वस्य जीवजातस्य)यत्पुत्रोप्यंश उच्यते ॥

मत्स्याद्यास्तु स्वरूपांशा बलज्ञानसुखादिभिः ।
यन्मूलरूपसदृशाः सर्वे सर्वत्र सर्वदा ॥ 635 ॥

यद्यन्येपि स्वरूपांशाः किं न स्युर्मत्स्यकूर्मवत् ।
बलज्ञानसुखाद्यैश्च सदा विष्णूपमास्तदा ॥ 636 ॥

निर्विशेषं हि ते ब्रह्मकुतोंशेषु विचित्रता ॥ 637 ॥

अंशवैचित्र्यतः सिद्धा भिदैकत्राभिदापरे ।
न हीन्द्रस्य स्वरूपांशा वालिपार्थादयो समाः ॥ 638 ॥

अतो विष्णुसमज्ञानबलादीनामभवातः ।
न जीवस्तत्स्वरूपांशो यथा जडमिदं जगत् ॥ 639 ॥

अत्यन्ताभेदवादाख्यः शास्त्रस्यांशो गतस्तव ॥ 640॥

यदि मोक्षे भिदा नास्ति गता तेंशांशिता तयोः ।
यदि मोक्षे भिदाप्यस्ति भेदोभूत्परमार्थसन् ॥ 641 ॥

भेदाभेदाविनाभूता सर्वत्रांशांशिता तव ।
निर्विशेषब्रह्मवादे यत्सा तत्सहचारिणी ॥ 642 ॥

वियुक्ततन्तुवद्देहैर्वियुक्तानां पुनर्भवे ।
अंशांशित्वे योग्यता ते तद्यक्तिस्त्वपुनर्भवे ॥ 643 ॥

अतस्त्वद्देहकलहादभूदत्यन्तसङ्कटम् ।
जाया वा कुपिता गच्छेत्त्वं वा प्रव्रजितो भवेः ॥ 644 ॥

तस्मादंशांशिभावेन जीवाभेदप्रसाधनम् ।
अप्रसाधनमेवेत्थं कुर्याद्धेतुरयं मम ॥ 645 ॥

बहुजीवमते जीवा देहे देहे पृथक् पृथक् ।
योनिर्भेदात्कर्मभेदाद्गतिभेदाच्च संसृतौ ॥ 646 ॥

आमोक्षं तद्विभागस्य न व्यत्यासोस्ति ते मते ।
अतो मिथस्तदैक्यस्य नाधुनावसरस्तव ॥ 647 ॥

मुक्तौ तु ब्रह्मणैक्यं स्यान्मिथस्त्वैक्यं कदा वद ।
अंशिनैक्येपि तन्तूनामंशानामेकतास्ति किं ॥ 648 ॥

ब्रह्मैक्ये जीवभावस्यैवाभावात्किं मिथोऽभिदा ॥ 649 ॥

तत्र तत्र हि ते ते अंशाः स्वस्वाज्ञानक्षये सति ।
ब्रह्मत्वं यान्ति सर्वेपि न त्वंशान्तरभूमिषु ॥ 650 ॥

अतोंशानां समस्तानां मिथस्त्वैक्यं कदा वद ।
विचार्यमाणे यन्नासीन्न भवे नापुनर्भवे ॥ 651 ॥

अन्योन्यं सुखदुःखादेर्भोक्तृत्वं योगिनोंशवत् ।
हस्तपादाद्यंशवच्च वाक्यं नो चेद्वृथैव तत् ॥ 652 ॥

यद्यन्योन्यमभिन्नांशा जीवाः सर्वेपि सर्वदा ।
तर्हि स्याज्जातिभेदस्यैवाभावत्सर्वसङ्करः ॥ 653 ॥

स्नुषा च भार्या भार्या च माता गौश्च शुनी बुधः ।
मत्त एवेति तच्छास्त्रं स्यादुन्मत्तस्य जल्पितम् ॥ 654 ॥

गम्यागम्यविभागश्च स्वरूपैक्ये कथं वद ॥ 655 ॥

शास्याशास्यविभागश्च वध्यघातकता तथा ।
स्पृश्यास्पृश्यविभागादि सर्वैक्ये नैव शोभते ॥ 657 ॥

देहन्तःकरणादीनां भेदाभेदो यदीष्यते ।
सुप्तौ सर्वलयात्तर्हि प्रबुद्धोन्यो भवेत्तव ॥ 658 ॥

अतः पूर्वानुसन्धानं तस्य न स्याद्धि किञ्चन ।
स्याच्चेत्सर्वत्र सर्वस्याप्यनुसन्धानमापतेत् ॥ 658 ॥

पूर्वजन्मनि चण्डालोप्यन्यस्मिन् विप्रतामियात् ।
अतो जातिविभेदोपि स्वरूपैक्ये न भेदकृत् ॥ 659 ॥

देहमात्रविभेदोयमकिञ्चित्कर एव हि ।

देहभेदस्य वैफल्ये कर्मभेदेन किं फलम्।

देहो हि कर्मणां मूलं छिन्नमूलतरुर्ह्ययम् ॥ 660 ॥

शिष्यपापं गुरोश्च स्यात्तत्पुण्यं च गुरोर्भवेत् ।

अपि सम्बन्धमात्रेण स्वरूपैक्ये कथं न तत् ॥ 661 ॥

स्वरूपैक्यं हि बलवद्बाह्यभेदोहि दुर्बलः ।

ज्वलज्वलनमध्यस्थतृणतूलविभेदवत् ॥ 662 ॥

न चेदधिष्ठानदृशा जीवो ज्ञानी कथं वद ॥ 663 ॥

तस्मात्पूर्वोक्तमार्गेण जीवचैतन्यमेव तत् ।

भिन्नभिन्नमनन्तं च भोगभेदाय चेष्यते ॥ 664 ॥

भोक्तृ जीवविभेदेन भोगभेदो न चान्यथा ।

न चेद्ग्रहग्रस्तदेहभवो भोगः कथं द्वयोः ॥ 665 ॥

यद्यप्यस्ति पिशाचस्य देहोन्यः स तु निष्फलः ।

तस्मिन् देहे तदक्षेण तच्चित्तेन हि तत्सुखम् ॥ 666 ॥

अन्यदेहेऽन्यकरणैरन्यचित्तस्थितं सुखम् ।

पिशाचो ह्यनुसन्धत्ते साक्षिणा स्वेन नापरः॥ 667 ॥

पिशाचापगमे तज्जं सुखं जीवोत्ति नेतरः ।
तद्द्रष्टृसाक्षिणोर्भेदात्सिद्धभोगविचित्रता ॥ 668 ॥

अतः सर्वशरीरेषु भिद्यन्ते भोगसाक्षिणः ।
साक्षी चैतन्यमेवेति जीवभेदस्तनौ तनौ ॥ 669 ॥

भिन्नभिन्नस्वभावानां वाक्यमात्रेणा नाभिदा ।
किं सिंहो देवदत्तः स्यादग्निर्माणवकोपि वा ॥ 670 ॥

इत्येको हन्यते चान्यो हसत्येकः प्ररोदिति ।
दरिद्राति च निद्राति धनी जागर्ति चापरः ॥ 671 ॥

सर्वं ब्रह्मेति वाक्याद्धि किं स्याद्घटपटाभिदा ॥ 672 ॥

गुरुरेव गुरुर्लोके शिष्यः शिष्यः स किं गुरुः ।
यदि तस्यापि गुरुता सापि शिष्यान्तरं प्रति ॥ 673 ॥

महिषी महिषी किं स्यादजः किं स्यात्सपन्नजः।
बलिर्बलिद्विडिन्द्रः किं स्वर्गतो निर्गतोपि वा ॥ 674 ॥

अस्ति सर्वोपि सम्पत्तौ विपत्तौ तु न कश्चन ।
अन्योन्यैक्यकथा सख्ये दुःख्यन्यो न स्वयं किल ॥ 675 ॥

शिरस्यर्धे जरेत्यद्धा परधन्धनकृद्वदेत् ।
देही देहान्तरे नास्ति देहव्यूही किलास्ति तत् ॥ 676 ॥

खल एव खलो लोके नासुरा वैरवैरिणः ।
एको जीवः स निद्राति तस्य स्वप्नः किलाखिलम् ॥ 677 ॥

अहर्निशेति च प्रायो न विदुर्मोहिदेहिनः ।
कालः किलायं सर्वोपि स्वप्नः सुप्तस्य कस्यचित् ॥ 678 ॥

करस्थदण्डपिण्डाभ्यां शवबुद्धिं जहौ शिवा ।
चरन्तः संसरन्तश्च शवा जीवाः किलाखिलाः ॥ 679 ॥

हसति स्वैरिणीस्वैरमपरां स्वैरिणीमहो ।
किं न निर्जीवदेहात्मवादी चार्वाकहासकृत् ॥ 680 ॥

एकाशाखण्डने लोका दोषमाघोषयन्त्यहो ।
शुकाद्याः किल सर्वेपि न मोक्ष्यन्ते मुमुक्षवः ॥ 681 ॥

यजनाध्ययनादीनि मननश्रवणानि च ।
दानस्नानादिकं सर्वं दशास्वाप्नी किलाफला ॥ 682 ॥

ब्रह्मापि निर्ममे सम्यक्तपसोद्बुद्धशुद्धदृक् ।
अस्राक्षीन्निद्रितस्त्र्यक्षसहस्राक्षादिकान् किल ॥ 683 ॥

आनादिकालतो  यस्य निद्रा स किल कल्पकः ।
अनिद्रा वेदवेदान्तकर्तारः किल कल्पिताः ॥ 684 ॥

हृता यैरार्यमर्यादावृथा तेषां कथापि नः ।
अचेतनो गुरुर्वक्ति निद्रितः श्रुणुते किल ॥ 685 ॥

स्वशिष्याज्ञानजगुरोर्विद्यापि तदविद्यया ।
सभेदज्ञो यमैक्यज्ञो नङ्क्षत्येष स मोक्ष्यते ॥ 686 ॥

योऽचीक्लृपज्जगत्सर्वं शास्त्रस्तुतिसमन्वितम् ।
स जीवः किल शिष्योऽभूत्कल्प्यः कोपि गुरुः किल ॥ 687 ॥

यद्यैक्यमा प्रमा वक्तुस्तर्हि स्वप्नोपि न भ्रमः ।
गौरवादप्रसिद्धादेर्नस्वप्नस्य द्विरूपता ॥ 688 ॥

स्वप्नो न चेन्न जीवैक्यं तत्रैव द्रष्टुरेकता ॥ 689 ॥

जाग्रद्दशैव स्वप्नस्य साम्याद्यदि च तादृशी ।
सर्वसाम्ये स एव स्यात्किञ्चित्साम्ये न किञ्चन ॥ 690 ॥

दशात्वसाम्ये तेनैव स्वप्नोप्येतादृशो भवेत्।
साध्येन साम्यं नासिद्धेर्व्याप्येन समतापि न ॥ 691 ॥

बाह्याक्षोपरमश्चात्र न चेत्किं नानुमीयते ।

जाग्रत्त्वात् स न चेदेक जीवताप्यत एव न ॥ 692 ॥

यदि सोपि तदा श्रोत्राभावान्न श्रोतृतास्य हि ।

श्रोता न चेन्न प्रबोद्धा ततः शास्त्रमनर्थकम् ॥ 693 ॥

किञ्च स्वप्नस्य सर्वस्य न द्रष्टैको गृहे गृहे ।

तद्वत्तद्दृष्टृबाहुल्यस्यैवाप्तेः क्वच ते मतम् ॥ 694 ॥

न सन्ती मे यदि स्वप्ननिदर्शनमदर्शनम् ।

प्राप्नोति तेऽनुमानस्य नादृष्टो दृष्टखण्डने ॥ 695 ॥

यद्येतेषामपि द्रष्टा स एवेति मतं तव ।

न तन्मम मतं तेन स्वदर्शननिदर्शनम् ॥ 696 ॥

सन्ध्ये सृष्टिरिति प्रोक्तेः स्वाप्नव्याघ्रगजादयः ।

सर्वे सत्याश्चेतनाश्च तत्स्वप्नोऽनल्पजीववान् ॥ 697 ॥

अतस्तत्रैकजीवत्वं प्रतिवादी न मन्यते ।

तत्सपक्षो विपक्षोस्य साधनं चाप्यसाधनम् ॥ 698 ॥

तस्यैवायं यदि स्वप्नः कस्य जागरणं वद।

तस्य तस्यैव चेदेते विरुद्धे कथमेकदा ॥ 699 ॥

स्वाप्नजागरितावस्था स्वाप्नस्वप्नविरोधिनी ।
अस्वाप्नौ तौ च नैकत्रेत्यविवादं हि वादिनां ॥ 700 ॥

यदि जाग्रदवस्थादि तस्य नान्यस्य कस्यचित् ।
स्वयमेव स्वोपदेष्टेत्यायादायासभूस्तव ॥ 701 ॥

अतः स्वप्ने न चेज्जीवो नैकजीवमतं तव ।
स्वप्नेषु सन्ति चेज्जीवा नैकजीवमतं तव ॥ 702 ॥

यदि देहेषु जीवाः स्युर्नैकजीवमतं तव ।
यदि देहेषु ते न स्युर्नैकजीवमतं तव ॥ 703 ॥

देहेषु घटवैशेष्ये नैकजीवं मतं तव ।
देहेषु तद्वैशेष्ये किं नाहङ्कुरुते घटः ॥ 704 ॥

देहेन सह सर्वेषु देहेष्वेको न गच्छति ।
देहं विसृज्य गच्छेच्चेन्मृतस्य स्यात्पुनर्भवः ॥ 705 ॥

देहं प्रविश्य भोगश्चेत्प्रागुक्तं दूषणं स्मर ।
अप्रविश्यैव भुङ्क्ते चेदेकदेहेप्यसौ कुतः ॥ 706 ॥

यद्येकस्याखिला भोगाः कलहः किं निबन्धनः ।
यद्यनेकेपि भोक्तारः कलहः किं निबन्धनः ॥ 707 ॥

यद्यशुद्धं च शुद्धं च भुङ्क्ते सर्वत्र सर्वदा ।

प्रायश्चित्तविधिस्तस्य व्यर्थः कुञ्जरशौचवत् ॥ 708 ॥

अतो नात्रानुमा मानमक्षं रूक्षं दिधक्षति ।

सुखदुःखादिकाध्यक्षान् बहून् साक्षाद्यदीक्षते ॥ 709 ॥

यद्येकवचनान्तोक्त्या जीवैक्यं स्याद्भवेत्तदा ।

अनादिमायया सुप्त इत्युक्त्या सुप्त एव सः ॥ 710 ॥

धर्मं चरेति वचनाद्धर्मैक्यं किं न वर्ण्यते ।

अणामजोश्नुतेऽजोन्यो जहातीति वचः स्मर ॥ 711 ॥

अन्तर्बहिस्त्रि लोकीं यः पश्येत्सर्वत्र चक्षुषा ।

तं सर्वसाक्षिणं सुप्तं कथमाह श्रुतिर्बलात् ॥ 712 ॥

जीवैक्ये युगपद्भ्रान्तिप्रमिती कस्य का मृतिः ।

किं जन्म तस्य निद्रायां न स्याज्जगदिदं महत् ॥ 713 ॥

स्वप्ने कथञ्चित् घटते तत्स्वप्नोयं भवेद्ध्रुवम् ।

निद्रा च निद्रैवास्य स्यात् किं न स्याद्दूषणं तदा ॥ 714 ॥

जाग्रद्भङ्गभिया निद्रां सुभद्रां कुर्वतः सदा ।

स्वप्नो जगच्चेत्कस्य स्यान्निषेधविधिशासनम् ॥ 715 ॥

यदा नोपरमश्चक्षुरादेर्न स्वप्नवज्जगत् ।

यदा चोपरमः कस्य करणं कारणं वद ॥ 716 ॥

किं चैकजीवस्वप्नोयं साक्षात् स्वप्नो भवेद्यदि ।

तादा स्वप्नोपदेशेन स्वाप्नब्रह्मापरोक्षधीः ।

स्वाप्नवैकुण्ठयात्रा च स्याद्धि स्वप्ने न किं भवेत् ॥ 717 ॥

प्रबोधे गुरुशास्त्रादेर्निवृत्त्येतः फलान्तरम् ।

कदापि न भवेत्तस्य भवस्तस्माद्ध्रुवो भवेत् ॥ 718 ॥

जाग्रद्दशैव सा स्वप्नकथा यद्युपचारतः ।

देहेदेहे तदा व्याप्तब्रह्मचैतन्यमस्ति ते ॥ 719 ॥

देहोपादानमज्ञानं चास्ति देह्युचितक्रियाः ।

सन्ति निर्जीवता तेषां देहानां केन हेतुना ॥ 720 ॥

यद्यस्य मायासृष्टिः सा द्रष्टा कोऽस्यास्तदा वद ।

स्वयं चेन्नास्य मायाभून्नापरोस्त्येकजीविनः ॥ 721 ॥

रूपमात्रं तदापि स्यात्कथं शास्त्रनिरूपणम् ।

मयाकृत्रिमविप्रेषु वाग्वृत्तिर्न हि मायया ॥ 722 ॥

अथ स्वयं ब्रह्मणोंशः स्वांशाः सर्वेन्यदेहिनः ।
इति चेदेकजीवत्वं किं स योगप्रभाववान् ।
परिच्छिन्नैकदेहस्थः कथं देहान्तरं विशेत् ॥ 723 ॥

देहेदेहे पृथग्भोगान् भुञ्जन्तोऽनादितो यदि ।
सन्त्यनन्ताश्चेतनांशा बहुजीवत्वमेव तत् ॥ 724 ॥

जीवाद्वा ब्रह्मणोवास्तु उक्लिटोः किं विशेषणम् ॥ 725 ॥

गेहे गेहे स्थिता दीपाः दीपान्मूलाग्नितोपि वा ।
भवन्तु बहुदीपत्वे न विशेषोस्ति कश्चन ॥ 726 ॥

निर्जीवदेहसञ्चारे स्वदेहोप्यस्तु तादृशः ।
सर्वभ्रान्तिर्ब्रह्मणोस्तु संसरेन्मुच्यतां च तत् ॥ 727 ॥

अज्ञानकार्यब्रह्मेश सर्वकर्तृत्वहन्तृते ।
युक्ते नेति तयोः कार्यत्वेनेत्यादावुदीरितम् ॥ 728 ॥

पुनरज्ञानकार्यस्य जीवस्यास्य निगद्यते ।
सर्वस्य कर्तृता तेन जीवो जागर्ति चेत्तव ॥ 729 ॥

निद्राति हृद्गुजा शास्त्रं मिथो यद्धि व्यरुध्यत ।
जीवेऽतिव्यापकं चेदं कथं स्याद्ब्रह्मलक्षणम् ॥ 730 ॥

किं चासौ चक्षुराद्यक्षैः कल्पयेन्नतु साक्षिणा ।

अन्तरेव स्वतन्त्रेण सन्निकृष्टानि तानि तु ॥ 731 ॥

ज्ञापकानि ततो भ्रान्तेः पुरा सर्वमभूज्जगत् ।

अण्डस्यान्तर्बहिस्सर्वं जीवोणुः कल्पयेत्कथम् ॥ 732 ॥

बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु ।

नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह ॥ 733 ॥

इति भारतकर्तैव यज्जीवबहुतैकते ।

प्राक् प्रस्ताव्योत्तरार्धेन नैच्छन्तीत्येकजीवताम् ।

प्रत्याक्षिपत्ततोप्येषपक्षो न स हि सूत्रकृत् ॥ 734 ॥

निर्जीवसेनासंहारमुज्जिहासुः किलार्जुनः ।

अक्षोहिणीनां तद्युद्धं मृतानां मरणं किल ।

एकजीवकथा तस्माद्वृथैवेति मतिर्मम ॥ 735 ॥

बहुजीवत्वपक्षेपि निर्मूला तेष्वभिन्नता ॥ 736 ॥

भेदत्वाद्यदि भेदस्य मिथ्यात्वं चन्द्रभेदवत् ।

तर्हि भेदो न मिथ्येति भेदत्वेनैव हेतुना ।

ब्रह्ममोक्षविभेदाख्यदृष्टान्तेनैव साध्यते ॥ 737 ॥

अविद्याया निवृत्तौ हि प्रकारः पञ्चमस्तव ।
अतोऽर्वागेव मिथ्यात्वं तस्मिन् यक्षे बलिः पृथक् ॥ 738 ॥

अतोऽविवादो दृष्टान्तो मिथ्यात्वाभावसाधने ।
श्रुतिः सत्यभिदेत्याद्या कुर्वती शपथं हि नः ॥ 739 ॥

शून्यब्रह्मविभेदो वा दृष्टान्तस्तत्र कथ्यते ।
तद्भेदस्यापि मिथ्यात्वे ब्रह्म शून्यं भवेत्तव ॥ 740 ॥

सत्यो भेदः साध्यवान्न मिथ्याचेद्धेतुमान् न मे ।
रज्जुसर्पो नयत्सर्पस्तद्भेदं भीषयेद्धि कः ॥ 741 ॥

यतः सपक्षपक्षी ते भेदमिथ्यात्वसाधने ।
छिन्नपक्षद्वयोप्यासीत्तन्नोत्सर्पेत्स कुत्रचित् ॥ 742 ॥

चन्द्रभेदोपि कोवासौ यो दृष्टान्तस्त्वयेरितः ।
आरोपितानारोपितयोर्भेदश्चेत्स हि मन्मते ।
सत्य एवेति साध्यस्य वैकल्यं स्यान्निदर्शने ॥ 743 ॥

नायमारोपितश्चन्द्र इति सच्चन्द्रधर्मिकः ।
आरोपितात्तु यो भेदः स सत्यः सर्ववादिनाम् ॥ 744 ॥

सतस्तादात्म्ययोग्यत्वाद्भ्रान्ताभ्रान्तैक्यशङ्कया ।

तन्निषेधस्य चौचित्याद्भेदधीः सा ह्यबाधिता ॥ 745 ॥

स च स्वरूपतोस्त्येव परं नास्तीतरात्मना ।

अतस्तत्र सदान्यस्माद्भेदावसर एव हि ॥ 746 ॥

यद्यारोपितचन्द्राणामेव भेदः परस्परम् ।

तदा साधनवैकल्यं दृष्टान्ते प्रतिवादिनः ॥ 747 ॥

अन्योन्याभावभेदोयं न ह्यसत्येषु मन्मते ॥ 748 ॥

यदा धर्म्यैव नैवास्ति तदा तस्यैव नास्तिता ।

तत्रान्योन्यात्मताऽभावो ह्यप्रसक्तनिषेधनम् ॥ 749 ॥

तदेव नास्ति चेत्कस्य तादात्म्यं तत्र शङ्क्यते ।

शशशृङ्गं स्वतो नास्ति न तु नास्तीतरात्मना ॥ 750 ॥

अतस्तत्रान्यवस्तुभ्यो भेदावसर एव न ।

यतो धर्मिस्वरूपोयमन्योन्याभाव ईर्यते ॥ 751 ॥

घटोयमेव न पटः पटोसौ न घटस्त्विति ।

सामान्याधिकरण्यस्य वस्त्वैक्ये ह्यनुशासनात् ॥ 752 ॥

अतो नासति सो भावो भावाभावबहिष्कृतः ॥ 753 ॥

अबावेषु हि सर्वेषु  यो धर्मी विद्यमानता ।

तस्य सर्वस्य नियता नाभावोऽसति धर्मिणि ॥ 754 ॥

नाभूदत्र घटो नष्टो घटो नायं घटः पटः ।

शशश्रृङ्गं सर्वदेशकालेनेति हि धीर्नृणाम् ॥ 755 ॥

पश्चात्सत्त्वं प्रागभावे नियतं प्रतियोगिनः ।

अतोसौ प्रागभावोभूत् प्रध्वंसप्रतियोगिनः ।

पूर्वं सत्वं च नियतमुत्तराभावतास्य तत् ॥ 756 ॥

सद्ध्यामभाव इति हि ततः  प्राहुर्विपश्चितः ।

नाशेन जन्मना तस्मात् जगत्सत्यत्वमुच्यते ॥ 757 ॥

सतः सदन्तराद्भेदे प्रतियोगिनि सत्यता ।

अविद्यमानाद्भेदे तु प्रतियोगी परं न सन् ॥ 758 ॥

नायमारोपितश्चन्द्रो नेदं रजतमित्यपि ।

यतः प्रतितिर्लोकानां धर्मी तत्रापि सन् भवेत् ॥ 759 ॥

त्रिकालनास्तिता धर्मिकालत्रितयमेव हि ॥ 760 ॥

शशश्रृङ्गस्य नास्तित्वं तद्रूपादिनास्तिता ।

त्रिकालनास्तितैवेति धर्मी कालोऽखिलस्य सन् ॥ 761 ॥

असतः शशश्रृङ्गादेर्धर्मित्वं तूपचारतः ॥ 762 ॥

प्रतियोगित्वपूर्वास्तु धर्मिसत्तानपेक्षिणः ।
भावधर्माः सन्ति तत्रात्यभावस्य गतिस्त्वियम् ॥ 763 ॥

निषेधप्रतियोगित्वमात्रं सर्वस्य चासतः ।
देशः कालश्चाखिलोपि धर्मी तस्य निषेधने ॥ 764 ॥

शशश्रृङ्गं न कुत्रापि न कदापीति हि प्रमा ।
तद्दैर्घ्यं च न कुत्रापि न कदापीति हि प्रमा ॥ 765 ॥

अत्यन्ताभामात्रे तु प्रतियोगिन्यसत्यता ।
नियता कथमत्यन्ताभावः सोपि सतो यदि ।
कालत्रयेप्यभावं हि तच्छब्दार्थं विदुर्बुधाः ॥ 766 ॥

योत्यन्ताभावमेवाह घटस्य स हि सर्वदा ।
जलाहरणयोग्यस्याभावाच्छुष्यद्गलो भवेत् ।
न चेदत्यन्तशब्दोयं शोषयेद्बहुजल्पतः ॥ 767 ॥

प्रागभावादयोप्यत्यन्ताभावाः स्युर्न चेत्तव ।
धर्मी तस्याप्युक्तरीत्या सन्नेवेति विनिश्चितः ॥ 768 ॥

एवं धर्मिणः सत्वं सर्वाभावेषु यद्ध्रुवम् ।

अन्योन्याभावरूपोयं भेदो नारोपितेषु तत् ॥ 769 ॥

वर्तमानः परं धर्मी भावोस्याभाव एव वा ।

स च भावेषु भावात्मा ह्यभावेषु तदात्मकः ॥ 770 ॥

पट एव घटो नेति समानाधिकृतत्वतः ।

यतः प्रतीयते सर्वैः ततो धर्मिण्यभिन्नता ॥ 771 ॥

भावाभावविरोधश्च प्रतियोग्यनुयोगिनोः ।

घटाभावः पटवति घटवत्येव नह्यसौ ॥ 772 ॥

एवं घटस्य भेदोयं पटेस्ति न घटे परम् ।

अतः सिद्धो विरोधोस्मिन् प्रतियोग्यनुयोगिनोः ॥ 773 ॥

उक्तप्रत्यक्षबलतः सोऽभिन्नः स्वस्वधर्मिणा ।

अनवस्थाभियान्ते च धर्म्यैक्यं वाच्यमस्य हि ॥ 774 ॥

उक्तप्रत्यक्षानुसारात्प्रागेव स निगद्यताम् ।

धर्मित्वादीशङ्कृप्तत्वात्तत्तच्छक्तिविशेषतः ॥ 775 ॥

इह नेति प्रतीतस्तु भिन्नोऽभावस्त्रिरूपवान् ।

आधाराधेयभावो हि तेषां धर्मिषु दृश्यते ।

धर्म्यभेदे तु मानं न तद्भिन्नाः स्वस्वधर्मिभिः ॥ 776 ॥

एकाभावे त्वभावोन्यो मृतमारणमेव हि ॥ 777 ॥

अन्योन्याभाव एवैको वर्तमानेषु वस्तुषु ।
न प्रध्वंस प्रागभावो नात्यन्ताभाव एव वा ॥ 778 ॥

इह भूमौ घटो नेति यो निषेधः प्रतीयते ।
स तत्संसर्गनाशो वा तस्य प्राङ्नास्तितैव वा ॥ 779 ॥

संसर्गो यत्र नैव स्यात्तत्रत्वत्यन्तनास्तिता ।
यो घटोस्ति कथं नास्ति स एव व्याहतं (हि) च तत् ॥ 780 ॥

संसर्गो नेत्यभावस्तु तत्सम्बन्धस्य नास्तिता ।
काश्यामयं च संसर्गो नेति चास्य निषेधनम् ॥ 781 ॥

घटसंसर्गवत्संसर्गस्य संसर्गनास्तिता ।
स चाप्रामाणिकस्तस्य ह्यत्यन्ताभाव एव सः ॥ 782 ॥

प्रामाणिकस्य प्रागूर्ध्वं प्रागभावविनाशने ।
वर्तमानत्वसमये त्वन्योन्याभाव एव हि ॥ 783 ॥

अभूते प्रागभावोस्ति तादात्म्यस्याप्यसौ तदा ।
अतस्तदात्मतान्यस्मिन्नभूते नैव शङ्क्यते ॥ 784 ॥

ध्वस्ते तु ध्वंस एवास्ति नान्योऽभावस्तु कश्चन ।

तादात्म्यस्यापि नाशेन लीनान्यैक्यं च तस्य न ॥ 785 ॥

वर्तमाने तु भेदोस्ति ततो नान्योन्यमेकता ।

अत्यन्ताभाव एवास्ति तथात्यन्तासतोपि हि ॥ 786 ॥

तत्तादात्म्यं हि तन्मात्रं तस्याप्यत्यन्तनास्तिता ।

तेष्वन्योन्यं भेदकथा तादात्म्यस्याप्यसत्त्वतः ॥ 787 ॥

तादात्म्याभावधीस्तस्य ह्यत्यन्ताभावतस्तदा ।

अतो भेदव्यवहृतिस्तत्र तत्र तथा तथा ।

सति तद्भेदसद्भावात्तेषु तद्भिन्नता वचः ॥ 788 ॥

यथा कथञ्चिद्वैसादृश्याद्वा तेश्वपि भेदवाक् ।

धर्म्यभावेन तेष्वन्योन्याभावस्यात्यसम्भवात् ॥ 789 ॥

तादात्म्यस्य प्रागभावो नाशोऽत्यन्तनिषेधनम् ।

ऐक्यस्य प्रागभावादिर्न भेदस्त्रितयं च तत् ॥ 790 ॥

घटे सति पटादीनां तादात्म्यं यन्निषिध्यते ।

घटः पटो न भवति पटो न घट इत्यपि ।

स एव भेदनामायामन्योन्याभाव इत्यपि ॥ 791 ॥

नास्ति तादात्म्यमिति तु प्रागभावादिरीर्यते ।
अन्योन्याभावभेदस्तद्वर्तमानेषु केवलम् ॥ 792 ॥

अतोऽभावोतिदुष्टोयं स्वगोत्रकलहप्रियः ।
धर्मिण्येकः सदैकाकी प्रतियोगिनि ते त्रयः ॥ 793 ॥

भावाभावस्वरूपत्वात् नान्योन्याभावता पृथक् ।
इति तत्वविवेकं तत्कुर्वन् गुर्वग्रणीर्मम ॥ 794 ॥

अन्योन्याभावाभिधानं तत्वं न पृथगुक्तवान् ।
भावाभावेषु ताद्रूप्याद्भेदस्यासत्यवर्तनात् ॥ 795 ॥

तस्मात्साधनवैकल्यमस्मिन् पक्षे दृढं विदाम् ॥ 796 ॥

किञ्चारोपितरूप्येषु रूप्यत्वं कस्य सम्मतम् ।
अत आरोपितो भेदो न भेदः सर्ववादिनाम् ॥ 797 ॥

अनारोपितभेदस्तु सत्य एवाखिलस्ततः ।
साध्यसाधनवैकल्यशल्यमुद्ध्रियते कथम् ॥ 798 ॥

अतस्तवैष दृष्टान्तो नाम्ना दृष्टान्त एव हि ।
यतो द्वेधापि दृष्टोन्तः सर्वैरस्य मनीषिभिः ॥ 799 ॥

आत्मत्वात् परमात्मेव यद्यात्मायं मते तव ।

नारीत्त्वात्तर्हि भार्यैव ते माता स्यात्तथैव हि ।

अतस्त्वं मातृगमनीत्युपेक्ष्यः प्रतिवादिनां ॥ 800 ॥

पशुत्वाद्गौः शुनी ते स्याद्वस्तुत्वादन्नमेव हि ।

अशुद्धं स्याद्घटोपि स्यात् पटो द्रव्यत्वतस्तव ॥ 801 ॥

आभासोपमहेतूनां तन्मुख्येयमुदाहृतिः ।

अतोनुमानतोप्यैक्यं न सिद्ध्येत् प्रतिवादिनाम् ॥ 802 ॥

यतोनुमा ततोप्यक्षागमावन्वेव सा भवेत् ॥ 803 ॥

मानानामेव मिथ्यात्वादैक्ये मानं न ते मते ।

ममत्वैदम्पर्यमात्रे मिथ्यात्वात्तानि तत्र न ॥ 804 ॥

विमतौ जीवपरमौ विरुद्धगुणवत्त्वतः ।

अभिन्नौ नैव तुहिनदहनाविव सर्वदा ।

सर्वानुभवसिद्धेयमनुमा भेदसाधिका ॥ 805 ॥

नाहं सर्वज्ञ इत्यादि साक्षिप्रत्यक्षमस्ति हि ।

जीवेशभेदे सर्वेषां वेदस्तूक्तः पदे पदे ॥ 806 ॥

अतस्त्रिमार्गगामित्वाद्भेदो गङ्गेव सेश्वरैः ।
धार्येयं शिरसा सर्वैः पुनाति च जगत्रयम् ॥ 807 ॥

देवानां किल मानुष्यं नाज्ञानेनैव केवलम् ।
किन्तु शापेन तल्मूलपापाद्यैर्वा भवेद्भुवि ॥ 808 ॥

विप्राणामन्त्यजत्वं च महापापफलं किल ।
अन्त्यजानां च विष्ठायां क्रिमिता पापतः किल ॥ 809 ॥

तस्मादुच्चस्य नीचत्वप्राप्तिः पापेन केवलम् ।
अज्ञानमात्रतः सा चेत् स्मृत्यादीनामपार्थतः ॥ 810 ॥

एवं सति श्वचण्डालपशुपक्ष्यादियोनिषु ।
अनादिकालतो भूत्वा सदा सर्वत्र संसरेत् ॥ 811 ॥

ते ब्रह्म बहुदुष्कर्मविण्मयार्णवमज्जितम् ।
परं ब्रह्म तवैव स्यात्तदेव त्वं न संशयः ॥ 812 ॥

अस्मद्ब्रह्महयग्रीवमत्स्यकूर्मादिविग्रहे ।
अपि चित्सुखसम्पूर्णसहस्राकसमप्रभम् ॥ 813 ॥

अनन्तवेदवेदाङ्गपुराणस्मृतिपारगम् ।
चतुर्मुखाद्यैराराध्यं तेषां विद्योपदेष्टृ च ॥814 ॥

यन्मन्त्रोपि च मर्त्यानां विद्यासिद्ध्यै नियुज्यते ।

यद्भक्त्या मुच्यते जन्तुर्यस्य माता पिता न च ॥ 815 ॥

यत्कृपावीक्षणात् सद्यो मुक्तो निष्पापतामियात् ।

अवद्यगन्धविधुरं परक्लेशविमोचनम् ॥ 816 ॥

अनन्तरूपेष्वप्येवं यस्य शक्तिरनन्तधा ।

ततोधिकं परंब्रह्म किं स्याद्वद विवेकिनाम् ॥ 817 ॥

ब्रह्मादयोपि यद्दासा यद्दास्यं च तपःफलम् ।

तद्भक्तिरूपभावः स्यात्तद्भावस्तु न कस्यचित् ॥ 818 ॥

न यत्र मायेति गिरा मायाया भगवत्पदे ।

सामान्यतो निषेधेन मायालेशोपि नेष्यते ॥ 819 ॥

सत्येकस्मिन्नपि घटे घटो नास्तीति धीर्न हि ।

अतः सामान्यतोऽभावे प्रतियोगी न शेषभाक् ॥ 820 ॥

माया नेति निषेधूयं सामान्याभाव एव हि ।

मुख्यस्य बाधने हि स्यादमुख्योर्थो न चान्यथा ।

निर्माय भगवल्लोके मुख्यनिर्मायतोचिता ॥ 821 ॥

न यत्र सत्त्वमित्यादिनोक्तमाया फलात्यये ।

कैमुत्यायोदितो माया भावोयं मुख्य एव हि ॥ 822 ॥

न चेत्तत्कार्यकामादीन् कैमुत्येन कथं क्षिपेत् ।

किमुतापर इत्यत्र यतो हेतोरसिद्धता ॥ 823 ॥

हरेरनुव्रता एव तत्रापि किल चेतनाः ।

सर्वे चतुर्भुजा भिन्ना हरिणा च परस्परम् ॥ 824 ॥

अतो भगवतो लोके भेदाकारादिसम्पदि ।

जीवानां च मिथो भेदे जीवबाहुल्य एव च ।

सिद्धं मायातिदूरत्वं सत्त्वं च परमार्थतः ॥ 825 ॥

तस्मात् परममोक्षत्वं वैकुण्ठादिपुरत्रये ।

अव्यावहारिकं भेदं प्राह भागवते शुकः ॥ 826 ॥

अतो जीवेशभेदाद्यमभेद्यं सर्ववादिनाम् ।

माया यं नास्पृशत्तं तु कोन्यो मायावशः स्पृशेत् ॥ 827 ॥

विमतो जीवपरयोर्भेदोयं परमार्थसन् ।

अविद्यास्तमये सत्त्वाद्यथात्मेत्यनुमानतः ।

सत्यभेदोपि संसिद्ध्येद्धेतोरागमिकत्वतः ॥ 828 ॥

न वै स आत्मात्मवतामितिवाक्यमनुस्मर ।

यो दुःखं नैव भुङ्क्तेऽसौ दुःखी जीवः कथं भवेत् ॥ 829 ॥

ब्रह्मचिज्जीवचिन्नैव दुःखाभोक्तृत्वतः सदा ।

घटवत्पटवद्वेति स्मृतिमूलानुमा भवेत् ॥ 830 ॥

विमतोनादिजीवेश भेदादिः परमार्थसत् ।

अनादित्वाद्यथा ब्रह्मेत्यस्ति शास्त्रानुमा मम ॥ 831 ॥

भेदादिषड्वानादित्वं षडस्माकमनादयः ।

इति सञ्जल्पतैवोक्तं त्वयातो न कुतोपि भीः ॥ 832 ॥

पूर्वं पूर्वं विद्यमाने यत्रेदम्पूर्वता तु न ।

षोढानादिं विभजतामनादिरयमेव हि ॥ 833 ॥

सपक्षपक्षगो हेतुर्यतोयं न विपक्षिगः ।

षण्णामक्षुण्णतद्भावादन्यानादेश्च निह्नुतेः ॥ 834 ॥

अनादिः कल्पितश्चेति व्याहतेः प्रथमं गृहम् ।

अतः कर्कशतर्कोपि धिक्करोति मतं तव ।

तस्मादुक्तं समस्तं च निरवद्यमिति स्थितम् ॥ 835 ॥

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमध्वैतं बुध्यते तदा ॥ 836 ॥

अनादितोपि सुप्तोऽज्ञो जीवो मायावशोऽवशः ।
अप्रबुद्धश्च पूर्वार्धे सुप्रसिद्धोभिधीयते ।
उत्तरार्धे त्वजोऽनिद्रः स्वप्नशून्यश्च कश्चन ॥ 837 ॥

स च जन्मादिदूरत्वात्सदा निद्रोज्झितत्वतः ।
अस्वप्नत्वादमायात्वाद्देवो नारायणो भवेत् ॥ 838 ॥

अनादितोपि बद्धस्य सदा बन्धोज्झितस्य च ।
भवेद्भेदो यतस्तस्मात् सोऽद्वैतो द्वन्द्ववर्जनात् ॥ 839 ॥

यो बोद्धा न स बोध्यो हि कर्तृकर्मविरोधतः ।
अतः पूर्वार्धमध्यस्थो नोत्तरार्धगतोपि ते ।
कर्तृकर्मविरोधाख्यसर्पस्ते ह्यप्रतिक्रियः ॥ 840 ॥

बोध्यब्रह्मैक्यवादास्ते बोद्धृत्वं त्याजयन्ति हि ।
अतोऽद्वैतपदं चैतन्न जीवैक्यपरं तव ॥ 841 ॥

सदा निद्रास्वप्नजन्मशून्यास्तत्पदवाच्यताम् ।
अर्हन्त्यस्वप्ननाम्नोक्तः किं सुप्तेरुत्थितः पशुः ॥ 842 ॥

बोध्यं वस्तु प्रशंसन्ती श्रुतिरेतत्परैव सा ।
नामुख्यार्थे बलान्नेया मुख्यार्थं कः परित्यजेत् ॥ 843 ॥

भेदभावात्स्वरूपेषु सदृशाभावतोपि वा ।
द्वन्द्वाभावाच्च सोद्वैतो बोद्धृत्वैतस्य साधनात् ॥ 844 ॥

याथाऽधनोयमित्युक्तिःस्वधनं प्रतिषेधति ।
न याचितधनं स्वस्मिन् गेहेगेहे धनानि वा ॥ 845 ॥

तथाद्वैतपदं विष्णौ स्वद्वैतं प्रतिषेधति ।
न त्वन्यतो हरेर्द्वैतं नाप्यन्यत्रस्थितं च तत् ॥ 846 ॥

केवलो निर्गुणः सोयं देवः प्रोक्तो वचोन्तरे ।
नित्यमुक्तोमृतस्यैष सेतुश्चोक्तः स्थले स्थले ॥ 847 ॥

जीवस्तु बद्धो दुःखी च जन्ममृत्युजरावशः।
पातकी नारकी चैव श्रुत्यैवोक्तः स्थले सले ॥ 848 ॥

एवं विरुद्धचैतन्यद्वयं भिन्नं ह्यनादितः ।
तयोर्नैक्यं कदापि स्यान्मुक्तः सारूप्यमेत्यसौ ॥ 849 ॥

पुनर्जन्म स्वप्नबन्धदुःखाद्यप्रियवर्जनात् ।
नित्यमुक्तोऽनित्यमुक्त इति तत्रापि चान्तरम् ॥ 850 ॥

बन्धान्मुक्तस्ततो जीवो नित्यमुक्तः कथं ह्यसौ ।

अतो बोद्धृत्वशून्यैव बोध्यब्रह्मैक्यवाक्तव ॥ 851 ॥

यदि ब्रह्मैक्यबोद्धा त्वं कथमैक्यं भवेत्तव ।

यदि ब्रह्मैक्यबोद्धान कथमैक्यकथा तव ॥ 852 ॥

किं चैक्यं यदि मिथ्या स्यात्तर्हि भेदश्रुतिः सती ।

विरुद्धश्रुतिदौर्बल्यात् स्वबोध्यं बोधयेद्बलात् ॥ 853 ॥

सत्यं चेद्ब्रह्मणोभिन्नमभिन्नं वा निगद्यताम् ।

भेदे तेनैव तेऽद्वैतश्रुतेः स्याद्व्याहतिः स्फुटा ॥ 854 ॥

प्रतियोग्यनुयोगिभ्यां निरूप्यस्यानिरूप्यतः ।

अमतस्य मतात् शास्त्रबोध्यस्य तदबोध्यतः ॥ 855 ॥

ऐक्यमैक्यस्य घटते कथं युक्तिविदां मते ।

तत्रापि न विरुद्धैक्यं लक्षणापेक्षिणः क्वचित् ॥ 856 ॥

विरुद्धांशपरित्यागे न सा जीवेश्वरैकता ।

रुणद्धि सैव श्रुत्युक्ता जीवेश्वरभिदा श्रुतिम् ।

सा चेन्नास्ति तदा भेदश्रुतेः किं प्रतिबन्धकम् ॥ 857 ॥

अतो जीवेश्वराभेदो ह्यात्मभिन्नो मृषैव ते ।
यत्किञ्चिदैक्यस्यैक्ये वा सत्वे वा न सरस्य भीः ॥ 858 ॥

स्वरूपैक्ये सति घटे पटादिभ्यो न किं भिदा ।
स्वरूपैक्ये सति परस्वरूपाद्भिन्नतापि न ॥ 859 ॥

ताभ्यां व्यावर्तितैक्यस्याप्यैक्यपक्षो न शोभते ।
तदेव ह्युपलक्ष्यत्वं न चेच्छुष्कैक्यमापतेत् ॥ 860 ॥

एवं च कथमैक्यं स्यादव्यावृत्ते परात्मनि ।
व्यावर्त्याव्यावर्त्यताभ्यामेव यत्तौ विरोधिनौ ॥ 861 ॥

किञ्चैकं ब्रह्मतद्भावो ह्यैक्यं शब्ददविदां मते ।
तयोश्च धर्मधर्मित्वात् कथमैक्यं विरुद्धयोः ॥ 862 ॥

एवं च नैक्यमैक्यस्य तदभावे न तत्वता ।
अतत्वावेदकं शास्त्रममानं तज्जितं परैः ॥ 863 ॥

विरुद्धैक्ये तु सार्वज्ञपूर्वधर्मा जिजृम्भिरे ।
निर्गुणोक्तेस्तदेकत्वगुणेनाताडयन्मुखं।
स्वाभेदसम्बवाद्भिन्नगुणाभावार्थतां ददुः ॥ 864 ॥

जडं जगच्च सत्यं स्यात्तदैक्यं चैकतैक्यवत् ।
मिथ्याश्रुतेस्तु भेदेनासत्त्वमर्थोस्त्वभेदिषु ।

तद्भावे तु नैक्यस्याप्यैक्यमित्यतिसङ्कटम् ॥ 865 ॥

यदि चेतनसम्बन्धाच्चितोरैक्यं च चिद्भवेत् ।
तदा जडं जगच्चित्स्यान्न्यायसाम्यान्नचेन्नच ॥ 866 ॥

विरुद्धैक्यं चान्ततस्तत्स्थानैक्ये पर्यवस्यति ।
सविशेषब्रह्मवादे नायं दोषो भविष्यति ॥ 867 ॥

भेदहीनेपि भेदस्य कार्यं स कुरुते यतः ।
अतः सापेक्षभेदस्याप्यभेदो भेदिता च नः ॥ 868 ॥

भेदस्य भिन्नतावादी तत्सत्यत्वं वदेद्यदा ।
तदा किं दूषणं तस्य सदद्वैतं यतोस्य न ॥ 869 ॥

निर्विशेषब्रह्मवादे सापेक्षनिरपेक्षयोः ।
जीवैक्यब्रह्मणोरैक्ये दोषस्यास्यास्ति नौषधं ॥ 870 ॥

तस्माद्भेदश्रुतेरग्रे नैक्यश्रुतिशतस्य ते ।
स्वार्थस्य साधने शक्तिः किमुतान्यस्य बाधने ॥ 871 ॥

किञ्चैकमेवाद्वितीयं नेहनानेति च श्रुतिः ।
सर्वं ब्रह्मेति वाक् च स्याद्यदि विश्वस्यबाधिका ॥ 872 ॥

तदा भेदपरैवाभून्नाभेदपरता श्रुतेः ।

अबाध्यबाध्ययोर्भेदो यतोवश्यमपेक्षितः ॥ 873 ॥

जीवभेदे त्वभेदाप्त्या बाध्यत्वाशास्तु वा तव।

अभेदो यस्य नैव स्यात्तद्भेदः केन बाध्यते ॥ 874 ॥

विश्वबाधेपि विश्वस्माद्यो भेदो ब्रह्मणि स्थितः ।

धर्म्यभिन्नस्य तस्यालं कथं वा बाध्यते श्रुतिः ॥ 875 ॥

धर्मिनाशेपि भेदोयमविनाशी मते तव ।

तद्बाध्यजगतो भेदोप्यबाध्यः स्यात् सुखेन ते ॥ 876 ॥

अभावद्वैतवादे ते नान्योन्याभावबाधिका ।

श्रुतिरेषा युक्तबाधो यक्तो नायुक्तबाधनम् ॥ 877 ॥

न चेज्जीवोपि बाध्यः स्यादतो भेदो न चाल्यते ।

भेदमिथ्यात्वानुमाने ततोत्र व्यभिचारिणि ॥ 878 ॥

यद्यभेदपरैवेयं श्रुतिः सर्वा मते तव ।

तदा जगदबाध्यं स्यान्मिथ्यात्वाशागता तव ।

अबाध्यभेदमापन्नः कथं बाध्यो भविष्यति ॥ 879 ॥

व्यतिरेकेण चासत्त्वमसत्त्वं चेत् स्मरोदितम् ।
सत्त्वमव्यतिरेकेण यदि तर्हि न बाध्यता ॥ 880 ॥

सर्वैक्यं सर्वबाधं वा सेयं श्रौतपदावली ।
वदेज्जीवैकता वार्ता नैषु वाक्येषु शोभते ॥ 881 ॥

तत्वमस्यादिवाक्ये स्यात् कथा तस्याः कथञ्चन ।
नञा छिन्नपदा सान्यैर्नत्वदर्थे पदं क्षिपेत् ॥ 882 ॥

तन्वहावाक्यराशेस्ते मिथ्यात्वैक्यपरत्वयोः ।
भेदस्य सत्यता विश्वसत्यता वा भवेद्ध्रुवम् ॥ 883 ॥

जीवैक्यमात्रवाक्प्रायः श्रुतौ न श्रूयते क्वचित् ।
सर्वस्यैक्ये मृषात्वे वा नोक्तदोषद्वयौषधम् ॥ 884 ॥

क्वचिज्जीवैक्यवाक् तत्तधर्माणां सत्यतां दिशेत् ।
विशिष्टैक्ये नचेन्मिथ्याभूतधर्मभिदां दिशेत् ॥ 885 ॥

अद्वितीयमिति श्रुत्या द्वितीयाद्भिन्नतैव हि ।
सिद्ध्येदनश्व इत्युक्त्या यथाश्वादन्यता गजे ॥ 886 ॥

अश्वो नेति ह्यनश्वोभूद्गजस्तत्पुरुषाज्ञया ।
बहिरङ्गाद्बहुव्रीहेः समासः प्रबलोह्ययम् ॥ 887 ॥

द्वितीयाद्भिन्नतैव स्याद्वितीयं नेति विग्रहे ।

न घटोयमिति प्रोक्ते घटभेदो यथा पटे ॥ 888 ॥

किञ्चाद्वितीयशब्दोयं लयस्थब्रह्मगोचरः ।

अतो जगत्प्रागभावध्वंसौ नञ् वक्ति नापरम् ॥ 889 ॥

द्वतीयध्वंसवद्वा तत्प्रागभाववदेव वा ।

ब्रह्म स्यान्नहि मिथ्यात्वलब्धिरेतावता तव ॥890 ॥

नञो दुराग्रहो नास्ति विरुद्धस्यैव बोधने ॥ 891 ॥

त्रिकालसत्त्वरूपं ते मिथ्यात्वं हि सतः पुरा ।

लये लीनस्य नैवाभून्नापि पश्चाद्भविष्यतः ॥ 892 ॥

जगच्च सर्वमेतादृगनीदृक् शृङ्गमस्तिते ॥ 893 ॥

यदि तस्यैव मिथ्यात्वमाशास्से पशुता तदा ।

त्वत्तो गतेति जीवैक्यवादो भग्नस्तवैव हि ॥ 894 ॥

अग्रशब्दोक्तकालस्य सत्त्वात्तत्समयेपि च ।

द्वितीयशून्यं तद्ब्रह्म न तदा नान्यदाप्यभूत् ॥ 895 ॥

स्वासिनैव स्वयं छिन्नः कालस्य कुटिला गतिः ।

यत्स्वाभिमतवाक्येन स्वस्यैवाभूत्पराभवः ॥ 896 ॥

नष्टिर्महदवज्ञायामर्थस्य स्यात् पदेपदे ।

पदच्युतस्य नीचैक्यवादैः कुप्येत् पदावली ॥ 897 ॥

नेहनानेति वाक्यं नानाभूतं न किञ्चन ।

ब्रह्माणीत्याह तेनैक्यं सर्वस्य जगतो भवेत् ॥ 898 ॥

अनृतस्य जडस्यास्य सर्वस्यैक्यं तवापि न ।

किञ्चनेति पदस्यार्थश्चिन्मात्रं न कथञ्चन ॥ 899 ॥

अतो नैक्यश्रुतिरियं नापि मिथ्यात्ववादिनी ।

नाना पदेन चेहेति पदेन च विरोधतः ॥ 900॥

अभिन्नसत्त्वमन्यत्र सत्त्वं वा यत्तयोर्मतम् ।

अतः स्वगतधर्मेषु स्वावतारेषु किञ्चन ।

नानाभूतं नेति हरेस्तैरैक्यं वक्ति वागियं ॥ 901 ॥

घटे न जलमित्युक्तिर्यथा तद्गं जलं क्षिपेत् ।

नेहनानेति वाक्तद्वत् स्वगतं भेदमाक्षिपेत् ॥ 902 ॥

अतः काचन नानेह नेत्यर्थो वा भवेच्छ्रुतेः ॥ 903 ॥

अथवा नेहनानेति प्रतिषिध्य भिदां हरौ ।

भेदव्यवहृतेरस्ति किञ्चनालम्बनं त्विति ।

श्रुतिर्विशेषमाचष्ट पदस्वारस्यसम्पदा ॥ 904 ॥

नेहनानेति वाक्याच्च यदि नास्त्येव ते जगत् ।

असत्स्यात् पारमार्थेन नास्तीति तु पदान्तरम् ॥ 905 ॥

कुतो अध्याह्रियते तर्हि भ्रान्त्येति पदमाहर ।

एवं सर्वस्य जगतो रक्षयाभैक्षवान् भव ॥ 906 ॥

यदेवेह तदेवामुत्रेत्याद्यं वाक्यमिशीतुः।

अवतीर्णस्य वैकुण्ठवासिनाश्चाभिदां जगौ ॥ 907 ॥

तद्भेददर्शनस्यानर्थोक्त्या सैव न्यवारयत् ।

भेदाभेदनिवृत्त्यर्थं भिदां तस्य परात्मनः ॥ 908 ॥

तत्रापि कारणं वक्तुं नेहनानेतिवाक् पुनः ।

तद्भेदमाक्षिपच्चेति युक्तं प्रक्रमविक्रमात् ॥ 909 ॥

अतो भेदस्य मिथ्यात्वादेव धर्मेषु भेददृक् ।

विनिन्दिता यतो नास्तीत्यादौ सैव तमच्छिनत् ॥ 910 ॥

ईशानो भूतभव्यस्येत्युपसंहारवाक् च ते ।
अनीशजगदद्वैतं भिनत्तीति मतिर्मम ।
तत्रैव तादृगेवेति यत्फलोक्तिश्च भेदवाक् ॥ 911 ॥

किञ्च नास्तीत्यबावस्य वर्तमानत्वमात्रता ।
कीर्त्यतेऽतस्त्रिकालस्था भाववार्तापि नात्र ते ॥ 912 ॥

मिथ्यात्वपरता तस्मादस्मिन् वाक्ये न शोभते ॥ 913 ॥

यदस्ति तत्कथं नास्ति ततो ब्रह्मणि यच्छ्रुतम् ।
जडं जगदभेदानर्हं च गर्ह्यात्र तत्कथा ॥ 914 ॥

अस्तित्वस्यानृतत्वेन नास्तित्वघटना यदि ।
तर्ह्यन्योन्याश्रयो दोषो हन्यादन्यायवादिनम् ॥ 915 ॥

अस्तित्वस्यानृतत्वे स्यान्नास्तित्वघटना तव ।
नास्तित्वघटनायां स्यादस्तित्वस्यानृतात्मता ॥ 916 ॥

अतः सा रूपभेदस्य धर्मभेदस्य वा हरौ ।
निषेधाय प्रवृत्तेति प्राञ्चोर्थं चोदयन्ति नः ॥ 917 ॥

इहेत्येतत्पदं नो चेन्नेह स्यादिति मे मतिः ।
नानापदं चान्यथा स्यान्नानानर्थप्रदं तव ॥918 ॥

अथापि जगदर्थत्वे यदि तेऽस्ति महान् भरः ।
तर्हि किञ्चन नेहास्ति किन्तु सर्वं च नः प्रभौ ।
सर्वाधारे हरावस्तीत्यर्थोस्त्वतिमनोहरः ॥ 919 ॥

ब्रह्माहमस्मीति वाक्ये कथमैक्यभ्रमस्तव ।
सुपांसुलुगिति सूत्रेण प्रथमा सप्तमी यतः ॥ 920 ॥

अतो ब्रह्मणि वर्तेऽहमित्यर्थे शास्त्रसम्मते ।
सति सर्वविरुद्धैक्ये न क्वचिद्विभ्रमं कुरु ॥ 921 ॥

किञ्च चिन्मात्रयोरैक्ये कार्यं द्विपदशिक्षणम् ।
खञ्जवद्वाचरेत् स्वार्थे वाक्यं तत्रैकरक्षणे ॥ 922 ॥

अतो ब्रह्माभिसम्बन्धाद्ब्रह्मशब्दोस्तु जीवगः ।
अहं ब्रह्मनियम्योस्मीत्यर्थश्च त्वखिलप्रियः ॥ 923 ॥

अङ्गीकृत्येदमुदितं वस्तुतस्त्वनुशासने ।
अनुशिष्टार्थकथनात् स्वार्थत्यागो न मे क्वचित् ॥ 924 ॥

हिरण्यशृङ्गं वरुणं प्रपद्ये स पुनातु मां ।
इत्यर्थनं च तत्रोक्तं गच्छेद्ब्रह्म सलोकताम् ।
इत्युक्तब्रह्मसालोक्यं मुख्यैक्ये न हि शोभते ॥ 925 ॥

अहमेवाहमित्यन्यात्मतामन्ते प्रतिक्षिपन् ।
जीवो ज्योतिः पुराद्रौंहमित्येवोक्त्वा स मज्जति ।
यद्बृहिं जातिजीवादावनुशास्ति स पाणिनिः ॥ 926 ॥

आर्द्रं तीर्थाम्बुनि स्नातं रूपं मे अघविवर्जितम् ।
ज्वलत्यनलवत्तेन ज्योतिरस्मीति वाब्रवीत् ॥ 927 ॥

परम्ब्रह्म परञ्ज्योतिः परार्द्रौ यः कृपार्णवे ।
नासावहमिति प्राह योसौ स्वस्याघमर्षणः ॥ 928 ॥

किञ्चाहमर्थो नात्मा ते ब्रह्माहमिति वाक्ततः ।
जडाहङ्कृत्यैक्यमाह न जीवैक्यं भवन्मते ॥ 929 ॥

मानसाहङ्कृतेरारोपाधिष्टानचितैव हि।
सिद्ध्येल्लक्षणयाप्यैक्यं न तु जीवचिता सह ॥ 930 ॥

मणिं सूत्रनिरूढं च त्यक्त्वा कः काचमाश्रयेत् ।
कथं शक्रस्य पदवीं भिक्षुको रोढुमिच्छति ॥ 931 ॥

यतस्तदात्मानमेवावेदित्यवद्धार वाक् ।
अहं ब्रह्मास्मीति  वाक्यं ब्रह्मवाक्यतया स्फुटम् ॥ 932 ॥

अतः साकेवलं तस्यैकस्यैव ब्रह्मतां वदेत् ।

अन्ययोगव्यवच्छेत्री हन्यादवधृतिर्न चेत् ॥ 933 ॥

विशेष्यसङ्गतस्यैवकारस्य बुधमण्डली ।

अन्ययोगव्यवच्छेदमर्थं यत्प्रत्यपद्यत ॥ 934 ॥

अतो जीवब्रह्मतायां न तां युञ्जीत बुद्धिमान् ।

यत्तेष्वब्रह्मताप्यर्थात् प्राप्ता तद्भेदवागियम् ॥ 935 ॥

ऋषयोनुवदन्त्येतां प्रभोर्वाक्यत्वतः क्वचित् ।

मत्तः परतरं नास्तीत्यादि वाक्यानुवक्तृवत् ॥ 936 ॥

सोहमित्यादि वाक्यस्याप्येवमेव गतिर्भवेत् ।

यो वेत्ति वेदमर्यादां तद्धीत्यैनेदृशं वचः ॥ 937 ॥

सर्वं ब्रह्मेति वाक्याच्च किं जडब्रह्मतापि ते ।

बाधात्ततस्तु सङ्कोचे जीवादप्यस्तु बाधितात् ॥ 938 ॥

इदं पदार्थौ हि जडमनिदं ब्रह्म ते मते ।

अतो जडपरित्यागे पदं तद्धि प्रकुप्यति ॥ 939 ॥

जडस्य चैक्यं मुख्यं न ततोन्यार्थः तवापि हि ॥ 940 ॥

यतः सर्वं समाप्नोषि तत्सर्वोऽसीति भारते ।
गीतोक्तिस्तद्बलात् सर्वव्यापितैवार्थ ईर्यताम् ॥ 941 ॥

ऐन्द्रं व्याकरणं यस्य मूलरूपं न्यरूरुपत् ।
स पार्थः शब्दशक्तिज्ञः शक्तितश्च परात्मनः ॥ 942 ॥

तज्जलानिति शान्तः सन्नुपासीतेति पूर्ववाक् ।
उपास्योपासकत्वं हि प्राह तच्च कथं तव ॥ 943 ॥

जीव इत्येव लक्ष्यत्वे पदयोः सुविरुद्धता ।
चिन्मात्रस्य तु लक्ष्यत्वे व्यर्थं सर्वपदं तव ॥ 944 ॥

यदि सर्वभ्रमाधिष्टानत्वं सर्वपदोदितम् ।
तदा मुख्यार्थसन्त्यागः सर्वाधिष्टानतैव च ॥ 945 ॥

अर्थोऽस्तु लाघवान्मध्ये भ्रमः कस्मान्निवेश्यते ।
पूर्वश्रुतावुक्तसूत्ररीत्या वार्थो भविष्यति ॥ 946 ॥

सप्तसु प्रथमा यस्मात् क्लृप्तावेदेषु वैदिकैः ।
तस्माददृवैतवाक्यानां लक्षादपि न भीर्मम ॥ 947 ॥

यथाश्रुतपदस्यार्थस्यायोगे पूर्वयोगिभिः ।
व्यत्यासशासनान्नातिप्रसङ्गो यत्र कुत्रचित् ॥ 948 ॥

अतस्तवायुधं सर्वं बलान्नीतं परैर्युधि ॥ 949 ॥

यदेकज्ञानतः सर्वविज्ञानं च श्रुतौ श्रुतम् ।
अतोपि न परमात्मैक्यं सिध्येदद्वैतवादिनाम् ॥ 950 ॥

यदि स्याद्ब्रह्मविज्ञाने ज्ञेयं जगदिदं च ते ।
तदा शङ्कावकाशः स्यान्नैवं किल भवन्मतम् ॥ 951 ॥

निष्प्रकारकचिन्मात्रनिर्विकल्पकदृक्तव ।
ब्रह्मदृग्जगतो ज्ञानं तदा कस्यास्ति कथ्यताम् ॥ 952 ॥

अपि चारोपितज्ञानं नाधिष्टानस्य दर्शने ।
अतोपि न जगज्ज्ञानं ब्रह्मज्ञानं भवन्मते ॥ 953 ॥

चरमब्रह्मविज्ञानप्रशंसार्थं खलु श्रुतिः ।
अर्थवादमिमं वक्ति ततश्चरममेव तत् ।
वाच्यं त्वयैकविज्ञानं कथं तत्रान्यदर्शनम् ॥ 954 ॥

अतो भ्रान्तजगज्ज्ञानमधिष्टानात्मदर्शने ।
जातमित्यपि नैकस्य ज्ञानात् सर्वस्य दृक्तव ॥ 955 ॥

तस्माद्भ्रमस्य द्वावंशौ स्त इत्यपि न ते गतिः ।
भ्रमानुकूलसामान्य धीर्विज्ञानं कथं वद ॥ 956 ॥

एवमप्यखिलाभ्रान्तजगदैक्यं भवेत्परम् ।

अप्रशंस्य प्रशंसा स्यात् प्रक्रमस्याप्यतिक्रमः ॥ 957 ॥

एकज्ञानेन सर्वस्य ज्ञानं काण्वश्रुतिः पुरा ।

प्रस्ताव्य पुनराहैतदमृतत्वमिति स्फुटम् ॥ 958 ॥

लाङ्गलं जीवनमिति प्रोक्ते जीवनहेतुना ।

यथायाति तथा मुक्तिहेतुता वागियं किल ॥ 959 ॥

अतः प्रमैव वाच्येयं सा ते चिन्मात्रगोचरा ।

एकज्ञानेन सर्वस्य ज्ञानं तस्मात्कथं वद ॥ 960 ॥

तदनारोपरूपैव वाच्या सा चरमा प्रमा ।

सर्वस्य नास्तिता ज्ञानमपि तत्र न ते मते ॥ 961 ॥

यतो ह्यभावविषयं न प्राहुर्निर्विकल्पकम् ।

सर्वस्याभावधीः सा स्यात्सर्वज्ञानं तु तत्कथम् ॥ 962 ॥

घटस्य नास्तिताज्ञानं घटज्ञानं हि को वदेत् ।

न चेदद्वैतविज्ञानी परः स्यात्वं तु भेददृक् ॥ 963 ॥

तदभावकथां वक्तुं तद्भावं कथयेद्धि कः ।

अर्थाभावज्ञमर्थज्ञं वक्ति को वा पुमान्भुवि ॥ 964 ॥

किं चैवं सर्वविज्ञानमेकज्ञानाद्यदीष्यते ।

तदा मिथ्याभूतसर्वजगदैक्यं भवेत्सतः ॥ 965 ॥

तस्मात्तदेकज्ञानेन सर्वज्ञानं श्रुतीरितम् ।

तव सार्थाय कस्मैचिदनर्थायाभवत्परम् ।

जीवैक्यस्यानुपायत्वाज्जडैक्यस्यैव चागतेः ॥ 966 ॥

अतो जीवैक्यमाशास्यं ज्ञाने ज्ञातमिदं जगत् ।

प्रदृश्यमानमखिलं किल किं केन सङ्गतम् ॥ 967 ॥

विरुद्धो हेतुरुक्तः स्यान्मिथ्यात्वस्य तु साधने ।

चरमब्रह्मविज्ञाने सर्वस्य ज्ञातता यतः ॥968 ॥

ब्रह्मवज्जगदेतच्च करोति परमार्थसत् ।

अतः श्रुत्यर्थकथने तवेष्टं नैव सिद्ध्यति ॥ 969 ॥

अश्रुतार्थपरं त्वां तु श्रौतार्थौ हन्ति धीमताम् ॥ 970 ॥

अतः सत्यत्वचित्त्वाद्यैः सदृशत्वाच्चराचरम् ।

तदङ्गेष्वाश्रितत्वाद्वा तज्ज्ञाने जायते जगत् ॥ 971 ॥

दृष्टैकधूमसादृश्याद्धूममात्रस्य धीर्नकिम् ।

व्याप्तिग्रहाय तच्छब्दवाच्यत्वस्य ग्रहाय वा ॥ 972 ॥

नानालङ्कारगन्धाद्यैरलङ्कृतनिदर्शने ।
तदलङ्कारगन्धादिदर्शनं च न किं नृणाम् ॥ 973 ॥

अत्भुतानीह यावन्ति भूमौ वियति वा जले ।
त्वयि विश्वात्मके तानि किं मेऽदृष्टं विपश्यतः ॥ 974 ॥

इत्यक्रूरवचः पश्य विश्वरूपं च तं स्मर ।
शिशोर्यस्य किलास्ये प्राक् अपश्यद्विश्वमम्बिका ॥ 975 ॥

त्वयि दृष्टेऽखिलादृष्टा इति ग्रामेश्वरं नरम् ।
अन्यदर्शनजन्यस्य फलस्याप्यत्र सम्भवात् ॥ 976 ॥

यथा वदन्ति सर्वेषां हरिं सर्वेश्वरं तथा ।
महाफलप्रदातारं प्रशंसति महाप्रभुम् ॥977 ॥

अमुख्योर्थोपि मुख्यार्थगुणलाभाय कथ्यते ॥ 977 ॥

गङ्गापदेन तीरस्य लक्ष्यत्वे तस्य तत्पदात् ।
पावित्र्यमपि यत्सिध्येद्वाक्यं च लघु जायते ॥ 929 ॥

यदल्पपदवाक्येन बहोर्मुख्यार्थयोगिनः ।
अर्थस्य वक्री तद्वृत्तिरियं लोकमता मता ॥ 980 ॥

किञ्चब्रह्मणि विज्ञाते सति तस्य प्रसादतः ।
सार्वज्ञं जायते नृणामिति सर्वस्य सम्मतम् ॥ 981 ॥

अतः श्रुतिरयं साध्वी ब्रवीत्यखिलसम्मतम् ।
इदमेवार्थमित्यासीत्सर्वं श्रुतिमनोहरम् ॥ 982 ॥

सर्वकर्तृत्वसार्वज्ञसर्वेशत्वादिसद्गुणैः ।
सहितस्य हरेर्ज्ञाने सर्वं च ज्ञायते यतः ॥ 983 ॥

अतोप्येकस्य विज्ञाने सर्वज्ञानं भवेन्मम ।
निर्विकल्पकचिन्मात्रज्ञाने तेज्ञ कुतोन्यदृक् ॥ 984 ॥

बर्हिष्मन्नेतदाख्यानं परोक्षेण प्रकीर्तितम् ।
यत्परोक्षप्रियो देवो भगवान् विश्वभावनः ॥ 985 ॥

इति भागवतोक्त्या च क्वचिद्वाग्वृत्तिरीदृशी ।
श्रुतीनां च स्मृतीनां च तत्वं गूहयितुं महत् ॥ 986 ॥

तथा तत्त्वमसीत्याह श्रुतिर्ब्रह्मसदृक्षताम् ।
गुणैः कतिपयैर्वक्तुं लोकवेदानुसारिणी ॥ 987 ॥

अतिशूरं नरं प्राहुः शार्दूल इति यज्जनाः ।
अग्निर्माणवकश्चेति यस्माद्वाक्यास्ति वैदिकी ॥ 988 ॥

अथवा जीवपरयोर्भेदं वक्तुं सविस्तरम् ।
प्रावर्तत श्रुतिरियं नाभेदमिति मे मतिः ॥ 989 ॥

स्वप्नावसानकालीन सुप्त्यवस्थां प्रबोधयन् ।
स्वप्नान्तं सौम्य जानीहीत्याह शिष्यं गुरुः पुरा ॥ 990 ॥

यत्र स्वपिति नामायं पुरुषो जीवचेतनः ।
सता ब्रह्मचिता साकं सम्पन्नः स्यात्तदाप्ययं ।
न तु तद्भावमाप्नोति सेयं सुप्तिदशा किल ॥ 991 ॥

प्राज्ञेन संपरिष्वक्त इति शाखान्तरे श्रुतिः ।
प्राज्ञेन सम्परिष्वङ्गमेव सुप्तावकीर्तयत् ॥ 992 ॥

सम्यगालिङ्गनं ह्येव सम्परिष्वङ्ग ईर्यते ।
सम्यक्प्राप्तिश्च सम्पत्तिर्भिन्नयोरेव किं न ते ।
यदेकस्य न ते दृष्टे दृष्टे सर्वत्र च द्वयोः ॥ 993 ॥

अन्तर्हितस्य या प्राप्तिः प्रविष्टस्योदरे हरेः ।
सैवापीति शब्दशक्तिशोधने न त्वभिन्नता ॥ 994 ॥

तिन्नन्तोत्र यदिण्धातुर्यत्पिदानार्थकोस्य पिः ।
अतोत्रान्यार्थविन्यासचिन्ता हन्ताफलैव ते ॥ 995 ॥

सुप्त्युत्क्रान्त्योश्च भेदेनेत्याह निर्णयसूत्रकृत् ।

यतः सुप्तौ च मुक्तौ च भिदा शास्त्रविदोदिता ।

अतो द्विर्बद्धभेदोयं सुबद्धोभूच्छ्रुतेर्गले ॥ 995॥

सुप्तिश्चावान्तरामुक्तिर्देहादेरप्ययात्तव ।

सुप्तौ मुक्तौ च यन्नास्ति तदैक्यं स्यात्कदा वद ॥ 997 ॥

सदृष्टान्तमिमामेव वेदः प्राबोधयद्दशाम् ।

यतः शकुनिसूत्राख्यनिदर्शनमदर्शयत् ॥ 998 ॥

दार्ष्टान्तिके तत्र मनो मन्तृत्वाज्जीव एव तत् ।

न चेदुपक्रमोन्यस्य स्याच्चान्यस्योपसंहृतिः ॥ 999 ॥

शकुने शकुनाच्चायं जीवस्तत्रापि जीवति ।

यच्चेतनोपमा प्रायश्चेतनस्यैव शोभते ॥ 1000 ॥

किं चान्तःकरणाख्यं ते मनो लीनं न तदा तव ।

प्राणसंश्रयता तस्य कथं लीनस्य कथ्यते ॥ 1001 ॥

यतश्चोपरि तत्स्थाने प्रजाशब्दं हि जीवगम् ।

सन्मूला एव सौम्येमाः प्रजा इति वदिष्यति ।

अतो मनः प्राणशब्दौ जीवब्रह्मपराविमौ ॥ 1002 ॥

इति भेदं सदृष्टान्तं प्राक् प्रस्ताव्य पुनर्गुरुः ।
तत्त्वमस्यादिवाक्येन कथमैक्यं वदेद्वद ॥ 1003 ॥

यस्त्वारब्धार्थमुत्सृज्य द्विरूपाया गिरोभरात् ।
मध्येन्यार्थमपि व्यर्थमाशास्ते मद्यपाय्यसौ ॥ 1004 ॥

सत्यतत्त्वमसीत्यस्मदर्थे मुख्ये न लक्षणा ।
न ते श्लोक्यं नापि शक्यं शक्यैक्यं तेन शोक्यसि ॥ 1005 ॥

तत्वज्ञानश्रुतौ तस्मातत्त्वज्ञो मत्त एव सः ॥ 1006 ॥

यत्सत्प्रतिष्ठसन्मूलसदायतनतां श्रुतिः ।
प्रजाशब्दोक्तजीवानां वक्ति तत्रैव सादरम् ।
अतस्त्रिधा प्रजानां च सतश्चोक्तैव भिन्नता ॥ 1007 ॥

लवणोदकदृष्टान्ते स्पष्टं भेदो निदर्शितः ।
यन्नैक्यं भिन्नरसयोर्योगेप्यालोडनं परम् ॥ 1008 ॥

यथा तप्तोदके रूपस्पर्शाभ्यामभिभूतयोः ।
अबग्न्योरुभयोर्योगस्तथैव लवणोदके ।
रूपाभिभूतलवणे रसस्याभिभवो जले ॥ 1009 ॥

नदीसमुद्रावप्येवं गङ्गासागरसङ्गमः ।

इति शास्त्रप्रसिद्धेश्च वृद्धानां च प्रसिद्धितः ।

नदीशुद्धोदसंयोगो वार्धेः स्याल्लवणोदके ॥ 1010 ॥

शुद्दे शुद्धोदकं सिक्तं तादृगेव भवेत्परम् ।

एकप्रकारोदकयोरप्यैक्यं न तयोः किल ॥ 1011 ॥

स्वोक्ततादृत्त्वदार्ढ्यार्थमेवेत्यैक्यं व्यवच्छिनत् ।

यतः श्रुतिस्ततस्तत्र तयोरैक्यं न सर्वथा ॥ 1012 ॥

एवं चेत् कथमैक्यं स्यात् शुद्धोदलवणोदयोः ।

वृद्धेः प्रत्यक्षसिद्धत्वादप्यैक्यं नोभयत्र च ॥ 1013 ॥

न हि रासोत्सवस्यान्ते बहुमूर्त्यैकतां गते ।

कृष्णे विशति नन्दस्य गृहद्वारमवर्धत ॥1014॥

नद्यम्बुयोगे वर्षासु वार्धिरप्रभिवर्धते ॥ 1015 ॥

यतश्चोक्तं पुराणेषु सङ्गमे द्विगुणं फलम् ।

अतश्च न तयोरैक्यमैक्ये यत्स्यात्फलैकता ॥ 1016 ॥

समुद्रोदेपि लवणद्रव्यस्य च जलस्य च ।

संयोग एवेशकृतः सहिदब्ध्योस्तु किं पुनः ॥ 1017 ॥

पत्न्यस्तु सरितः सर्वाः पतिस्तु सरितां पतिः ।
तद्भेदो नेक्ष्यते पुम्भिर्गाढालिङ्गनतः परम् ॥ 1018 ॥

न हि प्रधानदिक्पालो वरुणोसौ निजालये ।
पितामुनीनामेकाकी शेते तारापतेः सखा ॥ 1019 ॥

न चेद्वर्षासु वार्ध्यम्बुमध्यान्नद्यम्बुवार्धराः ।
आनयन्ति कथं शुद्धं वर्षन्ति च ततस्ततः ॥ 1020 ॥

श्वेतं गुङ्गोदकं स्वादु तुङ्गाम्बु यमुनाजलम् ।
नीलमित्यादिभेदोस्ति प्रत्यब्दमपि तज्जले ॥ 1021 ॥

सोद्धौ च भिन्नभिन्नाम्बुसद्भावेन विना कथम् ।
न ह्यपूर्वं स वार्वाहः कुर्वीताम्बु स्थलेस्थले ॥ 1022 ॥

सर्वे च सङ्गमं ब्रूयस्त्वं ब्रूषे कथमेकताम् ।
हन्ताज्ञाश्च हसेयुस्त्वां पूर्णप्रज्ञभवास्तुकिम् ॥ 1023 ॥

सितासिते च नद्यौ द्वे प्रयागे सङ्गते किल ।
मिश्रतीर्थं किलैकत्र चित्रतीर्थोदसङ्ग्रहः ॥ 1024 ॥

निवृत्तिसङ्गमः सप्तनदीनां सङ्गमः किल ।
कृष्णा भीमरथी सङ्गं प्राहुरद्यापि सङ्गमम् ॥ 1025 ॥

नानारससमाहारो मधुन्यप्येकता किल ।

वृद्धिश्च रसवैचित्र्यं नो चेत्तत्र कुतो वद ॥ 1026 ॥

सति सम्पद्य न विदुरिति सर्वत्र यच्छ्रुतिः ।

दार्ष्टान्तिकोपसंहारं कुरुतेतो न तत्कथा ॥ 1027 ॥

यस्तात् प्राग्भिन्नयोरैक्यं न स्याद्यत्नशतैरपि ।

तस्मात् सर्वेपि दृष्टान्ता भेदस्यैव प्रसाधकाः ॥ 1028 ॥

सत आगम्य न विदुः सति सम्पद्य चेति सा ।

मुक्तौ सम्पत्तिमेवाह सृष्टौ चागमनं ततः ॥ 1029 ॥

गमकस्य च गम्यार्थादागन्तुश्चागमावधेः ।

अवश्यं भिन्नता वाच्या मध्ये वाच्या कथं न सा ॥ 1030 ॥

अनाद्यनन्तकालीनामेवं जीवेशयोर्भिदाम् ।

न विदुर्ये ते भवन्ति सिंहव्याघ्रादयः किल ॥ 1031 ॥

इति भेदाज्ञानिनिन्दां भूयोभूयः करोति या ।

अभ्यासादर्थवादाच्च सा सम्यग्भेदतत्परा ।

अतदित्येव गतितुं यतते न ततोन्यथा ॥ 1032 ॥

सदायतनसन्मूलसत्प्रतिष्टत्वकीर्तनात् ।
स्थितौ सृष्टौ च मुक्तौ च भेदः स्पष्टं निगद्यते ॥ 1033 ॥

दार्ष्टान्तिकप्रकरणमेवं सर्वं हि शोभते ।
अभूद्भेदप्रकरणं तदैक्यस्य न भूरियम् ॥ 1034 ॥

तावदेव चिरं तस्य यावन्मोक्ष्येत कर्मभिः ।
प्रारब्धैरखिलैः पश्चात् सति सम्पद्यते किल ॥ 1035 ॥

इति प्रारब्धनाशाच्च पश्चाद्भाविनि या श्रुता ।
भिदा परममोक्षे ते गता वा नास्ति सा वद ॥ 1036 ॥

गम्यगन्तृतयान्योन्यं किं न तत्रापि भिन्नता ।
तन्न तामुन्नतावाक्ते निन्हुवीत सतां मताम् ॥ 1037 ॥

अतत्त्ववादिनामेव तच्चित्रं तत्ववादिता ॥ 1038 ॥

ततो वर्णादिना छिन्नं पदं सन्धाय सा श्रुतिः ।
चरेद्भेदार्थलाभाय या ब्राह्मणजनप्रिया ॥ 1039 ॥

किञ्च शब्दो नित्य इति वाक्ये घटनिदर्शने ।
अनित्य इत्येव यदा पदच्छेदं विदो विदुः ॥ 1040 ॥

एवं शकुनिसूत्राख्यस्पष्टदृष्टान्तशक्तितः ।
आत्मातत्त्वमसीत्यत्राप्यतद्ब्रह्मेति गम्यते ॥ 1041 ॥

तस्माज्जीवेशभेदस्य साधिका भेदवागियम् ।
न ह्यतिस्तब्धबुद्धेः स गुरुर्ब्रह्मैक्यमादिशेत् ॥ 1042 ॥

अतः श्रुतिः केरलानां करवालमभूदियम् ।
धारा त्वत्पार्श्वगैवातिक्रूरा किं स्यात्तवानया ॥ 1043 ॥

किञ्च दृष्ट्वैव कं मुच्येतेत्याद्यागमराशिषु ।
ज्ञानमज्ञानमात्रस्य विरोधीति स्वकल्पितात् ।
युक्तिमात्राच्च भीतेन श्रौतोऽर्थो येन धिक्कृतः ॥ 1044 ॥

तस्य प्रत्यक्षसहितविरुद्धगुणवत्त्वतः ।
महायुक्तेर्विरोधेपि मुख्येऽर्थेद्य कुतो भरः ॥ 1045 ॥

अक्षस्य युक्तिश्रुत्यादेरमानत्वं यदीष्यते ।
यक्तिमात्रामानतायां हीनता का तवोच्यताम् ॥ 1046 ॥

यद्यक्षादेरमानत्वं विरुद्धैक्यमपीष्यताम् ।
मानत्वे तु गुणत्यागः प्राणत्यागो भवेत्तव ॥ 1047 ॥

विरुद्धैक्यस्य चायुक्तिर्वाच्या कुत्राप्यदर्शनात् ।
तद्यक्षमानतावश्यं न चेदैक्यं विरुद्धयोः ॥ 1048 ॥

आदित्ये पुरुषो योसौ सोहमस्मीति च श्रुतिः ।
स यश्चायं पुरुषेस्ति यश्चादित्येस्ति सर्वदा ॥ 1049 ॥

स एक इति विस्पष्टसमाख्याश्रुतिसख्यतः ।
अर्थं लक्षणया ब्रूते सुस्थं सूत्रोक्तवर्त्मना ॥ 1050 ॥

एकवाक्येपि चादित्य इत्याधारत्वकीर्तनात् ।
स्वस्याप्याधारतैवोक्ता किमर्केशोर्कपूजकः ॥ 1051 ॥

तत्स्पष्टभेदश्रुत्यक्षबाधे सति सतां मते ।
वृत्तित्रये च सत्यैक्यवाक्यं स्यात् क्व विरुद्धयोः ॥ 1052 ॥

किं चैकजीवब्रह्मैक्यं वाक्येनानेन सेत्स्यति ।
सर्वैक्ये किं प्रमाणं ते श्रुत्यर्थो न किलार्थिकः ॥ 1053 ॥

तत्तत्पदोक्तयोरैक्ये सुप्रसिद्धविरुद्धता ।
पदद्वयस्य लक्ष्यात्वाल्लघ्वेकपदलक्षणा ।
तत्सम्बन्धात्तत्पदेन जीवोक्तौ किं गतं तव ॥ 1054 ॥

पञ्चम्यर्थे यत्तदिति पदं प्राहुर्यतोव्ययम् ।

तदित्यस्यैव तस्मादित्यर्थो वा तेन कथ्यताम् ।

ऋजुष्वनेकमार्गेषु सत्सु किं कुटिलाध्वना ॥ 1055 ॥

किञ्च ब्रह्मेन्द्ररुद्रादिशब्दाः सर्वेपि सर्वदा ।

तत्तद्विशिष्टार्थपरा विशिष्टैक्यं च ते मते ।

न विद्यते चितोरैक्यं यतो लक्षणया तव ॥ 1056 ॥

तद्देववासुदेवैक्यं वाक्यं नाख्याति ते क्वचित् ।

अत्राप्यत्रापि यत्तेन द्विदेवपदनाशनात् ॥ 1057 ॥

किञ्चावान्तरवाक्यं च महावाक्यं च ते मते ।

सर्वं लक्षणया ब्रह्मरूपमात्रपरं किल ।

अतस्तव प्रक्रियायाप्यैक्ये मानं न किञ्चन ॥ 1058 ॥

अखण्डार्थत्वसन्त्यागे नाभूदैक्यं भवन्मते ।

अखण्डार्थपरत्वेपि नाभूदैक्यं भवन्मते ॥ 1059 ॥

विशिष्टार्थपरत्वेपि विशेषणबलान्न तत् ।

अविष्टार्थ निष्ठत्वे साधकाभावतो न तत् ॥ 1060 ॥

ऐक्यस्यान्यस्य वा वाक्याद्वैशिष्ट्यं भासते यदि ।

निष्प्रकारकधीरन्ते शब्दादिति गतं मतम् ।

तस्मादैक्यं न वै शक्यं वाक्यैः साधयितुं त्वया ॥ 1061 ॥

ये स्मरन्त्यात्मनि भिदां निरुपाधिकयोगिनः ।

त्वं तानुपविशेत्याह विस्पष्टं श्रुतिगीतिका ।

स्फुटत्वात् श्रुतिमूलत्वात्फलवत्त्वाद्बलीयसी ॥ 1062 ॥

उपस्थितात्स्मर्तृतया जीवाख्यात्प्रतियोगिनः ।

परमात्मनि भेदोत्र प्रलये प्रतिपाद्यते ॥ 1063 ॥

अपकृष्य शयीतेति प्रस्तावः प्रलयस्य हि ।

यः सर्वस्य लये चास्ति सोस्त्येव परमात्मवत् ॥ 1064 ॥

फलं च स्मर्तृ जीवेषु प्रवेशः किल नैकता ॥ 1065 ॥

तत्ते ब्रह्मैकता नाभूद्विरुद्धे दृग्गिरः परम् ।

सभायामसहायस्य स्यादेकाकितयैकता ॥ 1066 ॥

क्व शोकमोहौ स्नेहो वा भयं वा येऽज्ञसम्भवाः ।

क्व चाखण्डितविज्ञानज्ञानैश्वर्येश्वरो हरिः ॥ 1067 ॥

इति भागवते प्रोक्त्या सदा दोषोपमर्दने ।
सुशक्तमीशचैतन्यं तदशक्तमनीदृशम् ॥ 1068 ॥

जीवचैतन्यमिति तच्चैतन्यद्वयमेव हि ।
मिथो विरुद्धं नीचोच्चचितोरैक्यं कथं वद ॥ 1069 ॥

एवं च ब्रह्मचैतन्यं नैव जीवस्य चित् क्वचित् ।
अभयत्वादमोहत्वादशोकत्वाच्च कुड्यवत् ॥ 1070 ॥

किं न श्रुतं हरिर्ब्रह्मरुद्राद्युत्कृष्टचेतनः ।
इति नामसहस्रस्थं पुण्यनाममाहात्मनः ॥ 1071 ॥

उत्कृष्टचेतनत्वोक्त्या चिन्मात्रमपि मापतेः ।
अत्युच्चं जीवचैतन्यादित्यर्थः किं न सिध्यति ॥ 1072 ॥

मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ।
इति भागवतोक्त्या च समर्था नृहरेर्हि चित् ॥ 1073 ॥

तत्पूर्णापूर्णयोः शक्ताशक्तयोरुच्चनीचयोः ।
जीवब्रह्मचितोरैक्यमपि शक्यं कथं वद ॥ 1074 ॥

वृथामुण्डनमेवेदं तस्मात्तद्धर्ममुण्डनम् ।
न्यासानर्हस्य शूद्रस्य यथा मूर्धजमुण्डनम् ॥ 1075 ॥

यतश्च मुण्डिताव्यक्तिरपि तेऽर्थस्य बाधिका ।
यस्माच्चिन्मात्रमप्यैशं शक्तं शोकादिधूनने ।
जैवं तु तदशक्तं चेत्युक्तं भागवते स्फुटम् ॥ 1076 ॥

अतो न मुख्यतः काचिच्छ्रुतिर्वक्ति जगत्त्रये ।
तवापेक्षितमद्वैतं यत्सा वक्ति न तत्तव ॥ 1077 ॥

पदद्वयेपि लक्ष्यार्थस्वीकारादेकलक्षणा ।
लघीयसी ततः सर्वा श्रुतिः परमतानुगा ॥ 1078 ॥

किञ्च मुख्यार्थपरयोः शब्दयोर्लक्षणा तव ।
सामानाधिकरण्यार्थं मात्रस्यामुख्यता मम ॥ 1079 ॥

अतो गुणवती गौणीवृत्तिरेतादृशस्थले ।
अदर्शार्हा शिरश्छेदात्करच्छेदो यतो लघुः ॥ 1080 ॥

यदन्विताभिधायीनि पदान्यन्वयबोधनम् ।
उपसर्जनतः कुर्युस्तन्मुख्योर्थः पदोदितः ॥ 1081 ॥

अयोग्यस्त्वन्वयोर्थौ न मुख्यार्थौ न तरामसौ ।
तद्युक्तायुक्तविन्याससंन्यासौ च गुणोचितौ ॥ 1082 ॥

योग्यान्वयं समादाय जहती बाधितं च तम् ।
मुख्यार्थाविभिरक्षन्ती वृत्तिः साति (मपी) बलीयसी ॥ 1083 ॥

यस्यां लक्ष्यार्थनिर्दिष्टे नास्ति तद्वाचकं पदम् ।
लक्षकेणैव बोध्योसौ युक्तोन्योप्यन्वयोस्ति न ।
अगत्या जहती मुख्यं वृत्तिः सातिलघीयसी ॥ 1084 ॥

आद्या गौणीति निर्दिष्टा द्वितीया लक्षणा किल ।
विरुद्धाकारसम्पत्ती वृत्ती द्वे नात्र संशयः ॥ 1085 ॥

जहत्स्वार्थाऽजहत्स्वार्थेत्याहुर्यल्लक्षणाद्वयम् ।
तदाद्यायां मुख्ययोगोप्यार्थिको न तु शाब्दिकः ।
वाक्यार्थोप्यन्वयस्तीरघोषयोरेव न त्वयम् ॥ 1086 ॥

लक्ष्यार्थी निर्विकल्पाधीर्यस्य तस्य मते पदम् ।
मुख्यार्थयोगं मुख्यं च न वदेन्नापि लक्षयेत् ॥ 1087 ॥

पौनरुक्त्या सिंहपदं देवदत्तं न लक्षयेत् ।
किन्तु सिंहात्मतां सिंहसादृश्यं वास्य शंसति ॥ 1088 ॥

अक्षस्य पक्षपातस्तु साक्षाद्भेदे प्रदृश्यते ।
कामाच्च नानुमापेक्ष्येत्युक्तेः शुष्कानुमाऽफला ॥ 1089 ॥

तस्मात्त्वदैक्यगाथाया मानं मूलं न दृश्यते ।
कृष्णस्नेहविनाशाय सा निर्मूला लतैव ते ॥ 1090 ॥

पदद्वयोक्तयोरैक्ये विरोधान्नास्ति ते श्रुतिः ।
ऐक्यं न मुख्यतोर्थः स्याल्लक्ष्यत्वे पदयोर्द्वयोः ॥ 1091 ॥

अमुख्यार्थं च मुख्यार्थभेदश्रुतिशतार्दिता ।
कथं वक्ति श्रुतिर्मुख्यामुख्ययोर्मुख्यतः फलम् ॥ 1092 ॥

नामुख्यान्न हि हर्यक्षस्याग्रे हरिणगर्जितम् ।
चिन्मात्रैत्ये न काप्यस्ति श्रुतिरित्यश्रुतं हि तत् ॥ 1093 ॥

प्रवव्राज तदद्वैतं त्वमिवाम्नायमन्दिरात् ।
शिरोमुण्डितमस्माभिर्बाह्येभ्यो भैक्षमाददे ॥ 1094 ॥

स्वशिरःपातिवृक्षस्यच्छेदेनादो मरिष्यति ।
भेदे भिन्नादिकल्पोक्तदोषेण स्वैक्यदोषवत् ॥ 1095 ॥

शिशोर्जातस्य या रक्षां कुरुते जननी हि सा ।
सर्वखण्डनकारस्तु पूतनायाः कुमारकः ॥ 1096 ॥

सर्वं खण्डयतोप्यस्य खण्डनं रक्ष्यमेव हि ।
आत्मा च रक्ष्यस्तत्काले भिक्षापात्रं करे भवेत् ॥ 1097 ॥

परन्यायैः परो दूष्यः स्वार्थः साध्यो मतो यदि ।
याचिता अपि ते न्यायाः सन्याया वा न वा वद ॥ 1098 ॥

सन्न्यायश्चेज्जितं तेन दुर्न्याया अपि चेज्जितम् ।
स्वेष्टापुष्टेः किमु व्योमनीलिम्ना सोमनीलिमा ॥ 1099 ॥

उष्ट्रः कण्टकमेवात्ति तृणं गौर्दर्दुरो मृदम् ।
शिलाकणान् कपोतोत्ति स्वयं शाल्योदनप्रियः ॥ 1100 ॥

गोपुच्छग्रहणेनापि गोष्ठप्राप्तिर्भवेत्तव ।
गोष्ठात्तु स्वगृहप्राप्त्यै स्वयमेव यतेत हि ॥ 1101 ॥

अभेदार्थे बाधिते तु श्रुतेरन्यार्थतां परः ।
ब्रूते परस्य न्यायेस्मिंस्त्वं कस्मान्न प्रवर्तसे ॥ 1102 ॥

विच्छिद्य सिंहपुच्छादि पुरुषस्य करादि च ।
तयोरैक्यं वदन्तः के परे यद्याचको भवान् ॥ 1103 ॥

परन्यायैः परो बोध्य इति वाङ्ग्मात्रमेव ते ।
मिथ्याभूतप्रमाणेन कोर्थसिद्धिं परो वदेत् ॥ 1104 ॥

ऐक्यवेदकवाक्यानां मानत्वं कः परो वदेत् ।

अन्येषां वेदभागानाममानत्वं च को वदेत् ।

शब्दादेवापरोक्षं च कः परो वक्ति भूतले ॥ 1105 ॥

इत्थं न्यायस्यैव भेदान्नान्यस्य न्यायतस्तव ।

अर्थसिद्धिर्भवेन्मन्द स्वन्यायानुसृतौ च ते ।

वाच्या सर्वा व्यवस्थापि तेनास्थापि मतं परैः ॥ 1106 ॥

सोयमित्यादि वाक्येपि न त्यागोस्ति पदार्थयोः ॥ 1107 ॥

प्राग्देशकालयोगस्यातीतत्वं वक्ति तत्पदम् ।

इदं पदं तु वक्त्येतद्देशकालानुबन्धिताम् ॥ 1108 ॥

तद्देशकालयोगस्य ह्यत्ययं तत्पदोदितम् ।

कस्त्यजेदन्यदस्त्येव विशेषणपदोदितम् ॥ 1109 ॥

विशेष्यपदवाच्यस्य त्विषत्त्यागोपि नेष्यते ।

वाक्येस्मिन्नन्यवाक्ये तु मृद्घटः स्वर्णमेव हि ।

कर्णभूषणमित्याद्ये नैकत्यागोपि विद्यते ॥ 1110 ॥

यो दण्डी कुण्डली चासाविति दण्डविशिष्टतः ।

स्यात्कुण्डलविशिष्टैक्यं किमेके दण्डकुण्डले ॥ 1111 ॥

विशेष्योपादानकस्य विशिष्टस्य हि जन्मनि ।
विशेषणं निमित्तं नस्तदैक्येऽस्यैकता कुतः ॥ 1112 ॥

अतौद्धत्याद्विशिष्टैक्यं यदि क्वापि न मन्यसे ।
तर्हि दृष्टान्तशून्यत्वाद्गतमापादनं तव ॥ 1113 ॥

अस्ति रूपविशिष्टैक्ये रूपैक्यमपि यद्यपि ।
भेदाभेदमते तच्च न ते तर्कनिदर्शनम् ॥ 1114 ॥

कार्यकारणभावाद्वा धर्मधर्मित्वतोपि वा ।
ईदृग्विशेषणैक्यस्य प्राप्तिस्तव ममापि च ॥ 1115 ॥

अप्रयोजकमेवाभूद्विशिष्टैक्यमिहावयो ।
औपाधिकसमावेशे व्याप्यव्यापकता न हि ॥ 1116 ॥

अतो निदर्शनम् नेदं यदि भिन्ने विशेषणे ।
विशिष्टैक्यबलादेव स्यादैक्यमपि कुत्रचित् ॥ 1117 ॥

निदर्शनं तदेव स्यात्तच्च नाङ्गीकृतं त्वया ।
तदा निदर्शनं नेति सुरुठूक्तं पूर्वसूरिभिः ॥ 1118 ॥

किं चैवमपि सार्वज्ञपूर्वधर्मविशिष्टतः ।
अज्ञतादिविशिष्टाच्च चिन्मात्रैक्यमिहोच्यताम् ॥ 1119 ॥

यतोस्ति गुणगुण्यैक्यमपि जीवे हरौ च नः ।

उक्तैतद्बाधकाभावाल्लक्षणावसरोत्र न ॥ 1120 ॥

विशेषणद्वयस्यात्र यद्यप्यस्ति विरुद्धता ।

न सा दृष्टान्तवाक्ये मे तदेतौ द्राविडान्ध्रकौ ॥ 1121 ॥

तत्ते दृष्टान्तचर्चेयं न दार्ष्टान्तिकसिद्धये ।

क्रमेलकोयं कदलीपक्वत्वङ्ग्मोचनं च सा ॥ 1122 ॥

यथा धूमविशिष्टस्य वह्निवैशिष्ट वर्णने ।

न विशेषणयोरैक्यं न त्यागो नापि लक्षणा ॥ 1123 ॥

तथा सति कथं व्याप्तिर्धूमवह्न्योः प्रसिध्यति ।

व्याप्तिबोधार्थमेवैतद्वचनं सर्ववादिनां ॥ 1124 ॥

इदं तु तत्पदं पूर्ववाक्योक्तगुणयुक्तताम् ।

ब्रह्मणो वक्ति देशादिव्यापकस्य न चापरम् ॥ 1125 ॥

सत्यत्वात्मत्वैतदात्म्यपूर्वाः पूर्वपदोदिताः ।

गुणाः स्वार्थसमास्तेषां त्यागोर्थत्याग एव ते ॥ 1126 ॥

अतः क्लीबविवाहार्थं चित्रस्त्रीप्रार्थनं तव ॥ 1127 ॥

विशेष्यब्रह्मशब्दार्थसार्वज्ञादिगुणाम्बुधेः ।

निषेधः कुत्र दृष्टस्ते त्वं पदार्थगुणस्य च ॥ 1128 ॥

किञ्चाविनाशी जीवोन्मुच्छित्तिधर्मा श्रुतौ श्रुतः ।

न कर्मणा कनीयान् यो नित्योस्य महिमापि च ॥ 1129 ॥

अतस्तद्गुणसन्त्यागः प्राणत्यागः श्रुतेर्भवेत् ।

परन्यायस्तु नैवास्ति दग्धारण्यमृगोऽभवः ॥ 1130 ॥

यद्यैक्तोक्तिबलादेव गुणानां बाधनं तव ।

उत्पन्नबालमन्त्रेण विरोधिग्रहनिग्रहः ।

निगृहीते च तस्मिन्स्याद्बालस्योत्पादनं तव ॥ 1131 ॥

सामान्यनिर्गुणोक्त्यापि न गुणोक्तेः पराभवः ।

यदग्नीषोमवाक्येनैव हिंसावागपोद्यते ॥ 1132 ॥

यदि तत्त्वं पदाभ्यां ते रूपमात्रनिरूपणम् ।

चिच्चिदित्येव चोक्तं स्यात्कस्यैक्यं तेन साध्यते ॥ 1133 ॥

सोयमित्यत्र चोक्तं स्यात् प्राक्कालाद्यविवक्षणे ।

देवदत्तो देवदत्तो घटो घट इति स्फुटम् ॥ 1134 ॥

एवं च प्रत्यभिज्ञानस्वरूपस्यैव भर्जनात् ।

स्थैर्यासिद्धः पदार्थानां प्राप्ता च पुनरुक्तता ॥ 1135 ॥

पदेनानुदितो धर्मो नैव व्यावर्तको भवेत् ।

न ह्ययं घट इत्युक्ते सिध्येद्रक्तघटान्यता ॥ 1136 ॥

अतः स्वेष्टार्थसिद्ध्यर्थं तत्तदर्थपरिग्रहे ।

अवश्यके रूपमात्रलक्षणा कुत्र कथ्यताम् ॥ 1137 ॥

पूर्वोत्तरत्वं चैकस्य स्यादेवोक्तव्यवस्थया ।

तत्सोयमिति वाक्यार्थ ऐक्यं स्यादविरोधतः ॥ 1138 ॥

सार्वज्ञसर्वशक्तत्वपूर्णानन्दत्वपूर्वकः ।

तत्पदार्थो ब्रह्मगुणो दुःखित्वाज्ञत्वपूर्वकः ॥ 1139 ॥

जैवोगुणस्त्वम्पदार्थो यदि तत्त्वम्पदोदितः ।

कथं पुनस्तयोरैक्यं स्यादत्यन्तविरुद्धयोः ॥ 1140 ॥

असीत्यैक्यस्य धर्माणां लटोक्ता वर्तमानता ।

श्रुत्युक्तधर्मस्याध्यासेत्वैक्याध्यासः कुतो न ते ॥ 1141 ॥

त्यजेदेकं कुलस्यार्थ इति न्यायमनुस्मर ॥ 1142 ॥

अद्याप्यसिद्धेरैक्यस्य धर्माध्यासः कुतो हरेः ।
सत्यः सो अस्य महिमेत्यस्ति हि श्रुतिरञ्जसा ॥ 1143 ॥

अद्यस्तधर्माद्व्यावृत्तौ भवेच्छुक्तिरशुक्तिका ।
इतरस्माद्विरूप्यत्वं व्यावर्तयति धर्मिणम् ॥ 1144 ॥

किञ्च सर्वज्ञताल्पज्ञाद्व्यावर्तयति धर्मिणम् ।
व्यावृत्तिर्नाम भेदोतो व्याहतिश्च धृवा तव ॥ 1145 ॥

किञ्च कल्प्यमकल्प्यं वा सार्वज्ञं ब्रह्मणाश्रितः ।
सार्वज्ञरहितायास्ते शुद्धायाः स्वोपलक्षिताम् ॥ 1146 ॥

चितं व्यावर्तयेन्न्यायसाम्याज्जीवचितो यथा ।
जैवो धर्मोपि तच्छून्यचिन्मात्रात् स्वोपलक्षिताम् ॥ 1147 ॥

चितं व्यावर्तयेदेव तताश्चिन्मात्रयोस्तव ।
कथमैक्यमिदं वाक्यं वक्ति यौक्तिकसंसदि ॥ 1148 ॥

व्यावृत्तेरनपेक्षायां चिच्छिदित्येव तद्वदेत् ।
का नो हानिरतो भेदवादिनां तत्ववादिनाम् ॥ 1149 ॥

अतः प्रत्यक् पराग्भावादल्पसाम्यात्तयोः सदा ।
सादृश्यैक्यपरैवेयं वाग्बिम्बप्रतिबिम्बयोः ॥ 1150 ॥

सादृश्यैक्येपि वाक् सिंहो देवदत्त इति स्फुटा ।

मुखं चन्द्रः पदं पद्ममित्याद्याश्च सहस्रशः ॥ 1151 ॥

एकत्वरूपणेन स्यादुपमानोपमेययोः ।

रूपकाख्योह्यलङ्कारो वाक्यसौन्दर्यपोषकः ॥ 1152 ॥

अतः सार्वजनीनेऽर्थे सति सर्वाविरोधिनि।

स्वतोन्यतो विरुद्धार्थं को नून्मादी वदेद्वद ॥ 1153 ॥

ईशाभेदस्य कथनं स्तब्धस्तब्धत्ववृद्धिदम् ।

प्रकृतासङ्गतं च स्याच्छिष्यकल्पतरोर्गुरोः ॥ 1154 ॥

मानेन स्तब्धचित्तस्य प्रतिबिम्बत्वरूपणे ।

ईशाधीनत्वबोधाख्या वाक्यं स्यादिति सङ्गतम् ॥ 1155 ॥

दृष्टेऽर्थेऽयुक्तशिष्टोक्तेस्तमेवार्थं विमर्शवान् ।

को गृह्णीयाद्विषं भुङ्क्ष्वेत्युक्ते किं विषमत्ति तत् ॥ 1156 ॥

अत एव गुरुः शिष्यस्तब्धबुद्धिं पदे पदे ।

निचारशीलां रचयन् स्पष्टं नाचष्ट कार्यवित् ॥ 1157 ॥

अद्यापि बुद्धिवैशद्यसिद्ध्यर्थं वक्रमुद्रया ।

आलिख्य वर्णशिक्षायांमेधामाधावयन्ति हि ॥ 1158 ॥

बोधो बुद्धौ तथा प्राह मन्तारं मन इत्यपि ।

अब्रमाय प्रजाशब्दं तत्र प्रायुङ्क्त चोपरि ॥ 1159 ॥

अहं ब्रह्मेति योनुक्त्वा त्वं ब्रह्मेत्याह मां गुरुः ।

अतो नास्य प्रतीतार्थं इत्यन्यार्थेऽकरोन्मतिम् ॥ 1160 ॥

कथं स्वशिष्यस्य मम स्वाशिष्यब्रह्मतां वदेत् ।

कथं च दुःखिनोऽज्ञस्य ब्रह्मत्वमपि मेऽधुना ॥ 1161 ॥

प्रजामूलब्रह्मता स्यात्कथं तास्वधमस्य मे ।

प्राणसंस्थस्य जीवस्य प्राणाख्यब्रह्मता च न ।

सुप्तौ च येन सम्पन्नः सो सुप्तौ स्यामहं कथम् ॥ 1162 ॥

करुणापूर्णगुरुणा तन्नात्र ब्रह्मतोच्यते ।

ममेति निर्ममो भूत्वा पुनर्मीमांसकोऽभवत् ॥ 1163 ॥

अस्ति सादृश्यमात्राच्च वस्तुवस्त्वन्तरात्मना ।

कथ्यमानं तत्र तत्र सेयं वात्तावतैव न ॥ 1164 ॥

प्रतीचः स्वनियन्तुश्च कथं सादृश्यमात्रतः ।

पराचीशनियम्ये च मयीयं वाक् प्रवर्तताम् ॥ 1165 ॥

प्रतिबिम्बं दर्पणस्थं मुखमित्येव लौकिकाः ।

वदन्ति तन्नियम्योसौ पराक्क प्रतिदृश्यते ॥ 1166 ॥

अतस्तद्विधतामेव लघूक्त्या मयि बोधयन् ।

मतिं प्रचारयंश्चोचे नो चेदाचार्यता कथम् ॥ 1167 ॥

तस्मात्प्रत्यक्पराग्भावो नियामकनियम्यता ।

अशब्दोच्चारणस्येव सादृश्यं चाल्पमेव मे ।

इति प्रबुध्य दुर्बुद्धिं त्यक्त्वा भक्तोऽभवत्प्रभोः ॥ 1168 ॥

अथापि कृपया शिष्यस्यायोग्यार्थे प्रमादतः ।

गतिं निवारयनत्सूत्रशकुन्यादीन्व्यदर्शयत् ॥ 1169 ॥

तदुक्तस्पष्टदृष्टान्तैः स्वयोग्यां प्रतिबिम्बताम् ।

ज्ञात्वेशाधीनताबोधादस्तब्धोभूदिति स्थितम् ॥ 1170 ॥

किञ्च जीवब्रह्मभावो यदि तस्य विवक्षितः ।

तर्ह्यहं तदिति ब्रूयात् सर्वं तदिति वा वदेत् ।

त्वं तदित्युपदेशस्तु व्यर्थस्तद्भावमानिनि ॥ 1171 ॥

गर्विष्ठगर्वनिर्वाणं कुर्वन् गुर्वग्रणीरसौ ।

अतद्वस्तुत्वमित्याहेत्यस्तिशस्तागतिश्च मे ॥ 1172 ॥

त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः ।

इति प्रस्तोभितो बालैर्मेने स्वात्मानमच्युतम् ॥ 1173 ॥

कदाचित् पौण्ड्रको नाम काशीराजः प्रतापवान् ।

वासुदेवोहमित्यज्ञो दूतं कृष्णाय प्राहिणोत् ॥ 1174 ॥

कत्थनं तदुपाकर्ण्य पौण्ड्रकस्याल्पमेधसः ।

उच्चकैरुग्रसेनाद्याः सभ्याः प्रजहसुस्तदा ॥ 1175 ॥

ये सोहम्भावनामूलास्ते बालाः किल सर्वशः ।

वचनं किल तज्ज्ञानं कत्थनं किल तद्वचः ॥ 1176 ॥

अज्ञोल्पमेधाः स किल यस्तत्र कृतनिश्चयः ।

सभ्यानां न तदभ्यासयोग्यं हास्यं किलाखिलैः ॥ 1177 ॥

मुख्याधिकारी तद्भावे पौण्ड्रकाख्योसुरः किल ।

एवं विनिन्दितं सोहम्भावं कः श्रद्दधीत तत् ॥ 1178 ॥

यदि तत्वं महदिदं कथं निन्द्यं भवेत्सताम् ।

सकृन्निन्दापि निन्दैव किमु निन्दा पदेपदे ॥ 1179 ॥

नन्वसौ दूरमानीय शेते मामिह साधुवत् ।

इति मत्वाच्युतं मूढः स्वपदा तमताडयत् ॥ 1180 ॥

पृथक् स्थिताच्युताज्ञानात्तत्सादृश्ययुते नृपे ।
यवनस्याच्युतमतिश्च्युतिकालेऽभवत्किल ॥ 1181 ॥

एकस्मिन्नपि जीवेस्मिन् मूढस्याच्युतधीः किल ।
अतः सर्वेषु सा धीर्मूढतमस्य हि ।
निनिन्द शुकयोगीन्द्रो यां सभास्थः स्थलेस्थले ॥ 1182 ॥

ईश्वरोहमिति ब्रूयुर्मदिरामत्तवृत्तयः ।
दैत्या इत्याह स मुनिर्व्यक्तं भूगोलवर्णने ॥ 1183 ॥

यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।
क्वासौ यदि स सर्वत्र स्तम्भे कस्मान्न दृश्यते ॥ 1184 ॥

स्वान्येश्वरनिषेधेन स्वस्यैवेश्वरता हृदि ।
हिरण्यकशिपोश्चेति स्पष्टं ह्यत्र प्रतीयते ॥ 1185 ॥

इति भागवते प्रोक्तं तत्र तत्र कथान्तरे ।
अत्राधिकारिणः सर्वे श्रूयन्ते क्रूरराक्षसाः ॥ 1186 ॥

ईश्वरोहमहं भोगी सिद्धोहं बलवान् सुखी ।
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ॥ 1187 ॥

इदं गीतासु कृष्णेन ह्यासुरीं पार्थ मे श्रुणु ।
इत्यारभ्योदितं तस्मान्मतमेतद्धि रक्षसाम् ॥ 1188 ॥

अतोपि जीवभेदोयं बुधैर्मान्यो मुमुक्षुभिः ॥ 1189 ॥

इत्यैक्यनिन्दानाद्ग्रन्थे स्पष्टं ग्रन्थकृतैव हि ।
क्वचिदापाततः प्राप्तं नैक्यं वाक्यार्थ इष्यते ॥ 1190 ॥

अविरुद्धे तु वाक्यार्थे यथाश्रुतपरिग्रहः ।
विरुद्धे सति वाक्यार्थे वृत्तिवृत्त्यन्तरे सताम् ॥ 1191 ॥

एवं च भवदद्वैतभिक्षू राक्षसमन्दिरे ।
भैक्षार्थमागमत्तेषां नाशोचानशनोपतत् ॥ 1192 ॥

सुपर्णौ द्वौ सहयुजौ सखायौ देहपिप्पलम् ।
ब्रह्मजीवाभिधौ नित्यं सस्वजाते परावरौ ॥ 1193 ॥

तयोर्मध्ये ब्रह्मणोन्यो यस्तु जीवाभिदः खगः ।
स पुण्यपापकर्मोत्तं फलमत्ति सुखासुखम् ॥ 1194 ॥

जीवादन्यस्तु यः पक्षे परमात्माभिधो महान् ।
सोऽनश्नन्नभितो नित्यं चाकशीति महाप्रभुः ॥ 1195 ॥

इति श्रुतिस्तयोर्भेदं स्पष्टमाह सयुक्तिकम् ।

अन्यावकाशशून्यासा मान्या तेन न वादिना ॥ 1196 ॥

यस्माज्जीवेशयोर्भेदव्याप्यद्वित्वाख्ययुक्तितः ।

प्राक् प्रसाध्य भिदां पश्चादशनानाशनाख्यया ।

विरुद्धधर्मयुक्त्याच बलीया स्यात्तयोर्भिदाम् ॥ 1197 ॥

पुनः प्रसाध्य पश्चाच्च श्रुतिः स्पष्टं द्विधर्मिणीम् ।

अन्योसावयमन्यश्चेत्याह जीवेशयोर्भिदाम् ॥ 1198 ॥

तस्माद्द्विरूपया युक्त्या श्रुत्या चोभयरूपया ।

साधयन्ती तयोर्भेदं केन मान्या न वादिना ॥ 1199 ॥

अभ्यसश्चोपपत्ती च तात्पर्यद्योतकं त्रयम् ।

लिङ्गं यतोस्ति तत्स्वार्थान्नैव चाल्या कथञ्चन ॥ 1200 ॥

तद्विरुद्धा सावकाशा श्रुतिरैक्यं कथं वदेत् ।

प्रबलाया विरोधेन दुर्बलार्थान्तरं भजेत् ॥ 1201 ॥

द्वौ बुद्धिजीवावित्याहुः सङ्घाः त्वत्पूर्वपक्षिणः ।

त्वं तु जीवपरात्मानौ द्वौ हृदीति प्रसाधयन् ॥ 1202 ॥

तज्जीवपरमात्मानौ खगौ तव ममापि च ।

तद्भेदबोधिका सेयं श्रुतिरित्यपि सम्मतम् ॥ 1203 ॥

सुखदुःखाद्यनुभवो जीवसाक्षी किलावयोः ।

बुद्धिस्तु घटपूर्वार्थबुद्धिर्न सुखदुःखधीः ॥ 1204 ॥

अतोत्ता जीव एवात्र न बुद्धिर्बुद्धिमन्मते ।

यत्पिप्पलं कर्मफलं सुखदुःखे च ते स्मृते ॥ 1205 ॥

अदनं च तयोः साक्षादीक्षणं निजसाक्षिणा ।

अनश्नन् परमात्मैव योभितोपि प्रकाशते ॥ 1206 ॥

सोऽनश्नन् पारमार्थ्येन सोऽत्ति चापरमार्थतः ।

इति शङ्कापिशाचीं तु हन्ति युक्तिनृकेसरि ॥ 1207 ॥

य एवात्ति स एवानश्नंश्चेति श्रूयते यदि ।

तदोत्थानं भवेदस्या नैवमाह श्रुतिः सती ॥ 1208 ॥

अत्त्यन्योयमनश्नंश्च तथान्य इति सा जगौ ।

अतस्तच्छ्रुतमन्यत्र जीवेत्यश्रुतमेव हि ।

अभूदनशनं तेन वदनं मुद्रितं तव ॥ 1209 ॥

यदेतच्छ्रुतमिथ्यात्वमश्रुतस्य च सत्यता ।
वदेत्तद्वैदिकंमन्यस्त्वदन्यः कः सभान्तरे ॥ 1210 ॥

न चेच्छङ्कापिशाचीयं व्याहतिप्रमदाकुलम् ।
हन्यादन्यायवाक् सा च त्वन्न्यायेन न किं शुभा ॥ 1211 ॥

किं चानश्नन्निति पदमशनाभाववाचकम् ।
अश्नन्नित्यशनं वक्ति कथमेकत्र ते वद ॥ 1212 ॥

भावाभावविरोधस्य न चेच्छान्तिर्भविष्यति ।
ततश्च भावरूपं ते नैवाज्ञानं प्रसिध्यति ॥ 1213 ॥

अभावाज्ञानवादो हि भावाभावविरोधतः ।
निवार्यते त्वया तस्याभावेसौ केन वार्यते ॥ 1214 ॥

जगच्च ब्रह्मणि सदा सदेव स्यादखण्डितम् ।
तदभावाख्यबाधोपि स्यात्तयोरविरोधतः ॥ 1215 ॥

भावाभावविरोधोतो वाच्यः सर्वात्मना त्वया ।
अभावेन सह स्थित्या मिथ्यात्वाशाप्यतो गता ॥ 1216 ॥

विरोधेप्यविरोधेपि ततः सा घटते न ते ॥ 1217 ॥

भावाभावविरोधे हि स्वोक्तमिथ्यात्ववाग्गता ।

स्वाभावेन सह स्थित्या यतो मिथ्यात्वमुच्येते ॥ 1218 ॥

अविरोधे जगत्सत्स्याद्भावाज्ञानं च भर्जितम् ॥ 1219 ॥

तथापि लोकतो भीत्या भावाज्ञानरिरिक्षया ।

विरोध एव श्लाघ्यस्ते यो योग्यो बुधसंसदि ॥ 1220 ॥

अतो धर्मद्वयस्यास्य भिद्येते धर्मिणावपि ॥ 1221 ॥

यथास्थितपदस्यार्थायोगेध्याहार इष्यते ।

जीवेशयोर्द्वयोः सत्वादर्थोयुक्ततरोभवत् ।

अतोध्याहारएवैष दोषाध्याहार एव ते ॥ 1222 ॥

यद्येवमपि ते प्रीतिरध्याहारे महीयसी ।

तदाध्याहरभावार्थपदमेकं हि लाघवात् ॥ 1223 ॥

ततश्च पारमार्थ्येन तौ धर्मौ धर्मिणोर्द्वयोः ।

धर्मभूतौ तयोर्भेदं स्थिरीकुरुत एव हि ॥ 1224 ॥

मुक्तोपि ब्रह्मणा साकं सर्वान् कामान् किलाश्नुते ।

पारमार्थं तदशने युक्तं नापरमार्थता ॥ 1225 ॥

अतो जीवेशयोर्भेदः श्रुत्यर्थः सुतरामभूत् ।
श्रुतेः प्रच्यावनं तस्माच्छ्रुतप्रच्यावनं तव ॥ 1226 ॥

अतो यथाश्रुतश्रुत्या तवानर्थः स्थिरोभवत् ।
अध्याहरे तु सोनर्थो ह्यनिवर्त्यो भवेत्तव ॥ 1227 ॥

कथं द्वितैकदैकत्र वृथैवमपि कल्पने ।
किमेकस्मिन्नपि घटे धर्मद्वित्वाद्धितोच्यते ॥ 1228 ॥

किन्तु रूपरसादीनां बहुत्वे द्वित्व एव च ।
रसवान् रूपवांश्चैको घट इत्येव कीर्त्यते ॥ 1229 ॥

नचेत् सौन्दर्यधैर्याभ्यां भार्ये द्वे भवतस्तव ।
अतः पुनर्विवाहार्थमपुत्रस्य वृथा श्रमः ॥ 1230 ॥

विद्यामयो नित्यमुक्तो वेदात्मनं किल प्रभुः ।
पिप्पलादं स्वतोन्यं स वेदाविद्यान्धचक्षुषम् ॥ 1231 ॥

इति भागवतोक्तिः सा यतो वक्ति ततोनुमा ।
किमतो जीवपरयोर्भेदोयं परमार्थसत् ॥ 1232 ॥

संसारोन्मुक्तचैतन्योल्लेख्यत्वान्मौक्तसौख्यवत् ।
इति जीवब्रह्मभेदं साधयत्यागमानुगा ॥ 1233 ॥

तर्कं च कर्कशं सा वाग्वैलक्षण्यमलक्षयत् ।
यत्रत्वस्येति वाक्यस्याप्यापातार्थमपाकरोत् ॥ 1234 ॥

तस्माद्द्वित्वाख्ययुक्तेश्च भोगाभोगाख्ययुक्तितः ।
अन्यत्वश्रुतितश्चाभूदन्योन्याभाववागियम् ॥ 1235 ॥

न केवलं स्थानबुद्धिभेदमात्रेण भिन्नता ।
किन्तु स्वरूपभेदोयमिति साधयितुं श्रुतिः ।
सखायौ सयुजौ चेति पदद्वयमुदाहरत् ॥ 1236 ॥

तौ चेतनौ स्थिरीकर्तुं सुपर्णावित्यरूरुपत् ।
स्वतोभिकाशनोत्त्यात तत्रैकमकरोत्प्रभुम् ॥ 1237 ॥

यदिमौ द्वौच संयोगात्सयुजाविति शब्दितौ ।
अतोन्ते यद्धि सायुज्यं तच्चयोगात्मकं जगौ ॥ 1238 ॥

अतः शङ्कापिशाचीः सा श्रुतिरेव न्यवारयत् ॥ 1239 ॥

एकं भावि भवच्चैकमित्याशां हन्ति लड् द्वयम् ।
मुक्तस्याप्यत्तृतोक्तेश्च नैराश्यं परमं सुखम् ॥ 1240 ॥

स्याद्रक्तिमेति श्यामत्वदशायामपि किं घटः ।
रक्त इत्युच्यते सद्भिस्ततोप्येतदपार्थकम् ॥ 1241 ॥

किञ्चैक्यवाक्यप्राबल्ये वृथैवं क्लिष्टकल्पना ।

श्रौतस्यैवात्मभेदस्य तद्बलाद्बाधसम्भवात् ॥ 1242 ॥

दौर्बल्ये चैक्यवाक्यस्य वृथैवं क्लिष्टकल्पना ।

ऋजोर्यथाश्रुतार्थस्य त्यागे हेतोरभावतः ॥ 1243 ॥

व्यावहारिकभेदं ते का वा वक्ति श्रुतिस्तयोः ।

वाक्यस्यास्य कुसृष्ट्यैवमन्यथाकरणे वद ॥ 1244 ॥

सिद्धभेदानुवादश्च कस्मिन् वाक्ये प्रकथ्यते ।

भेदोपास्तेश्च किं मूलमतश्चायं वृथाश्रमः ॥ 1245 ॥

परप्रयोजनार्थं हि परमात्मा प्रवर्तते ।

सुरां सुधां च दुःसाध्यां किं संसाध्य स्वयं पपौ ।

असुरांश्च सुरांश्चैव यथायोग्यमपाययत् ॥ 1246 ॥

स हि सर्वं जगदिदं व्याप्य नारायणः स्थितः ।

तत्रैव देवदैत्यादिष्वावेशस्य प्रकीर्तनात् ॥ 1247 ॥

सोनश्नन् देहिनां देहेष्वश्नंश्चान्यस्तथैव हि ।

प्रेरकप्रेर्यरूपौ तौ कथं न द्वौ तनौ तनौ ॥ 1248 ॥

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ 1249 ॥

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति गीतासु हरिणा गीतां गाथामनुस्मर ॥ 1250 ॥

अन्ते संहृत्य योनेकान् विप्रर्षिविबुधादिकान् ।
न लिप्यते पापकेन कनीयान्न स कर्मणा ॥ 1251 ॥

योऽसक्तः सन् विविक्तश्च साक्षी किल नृणां हृदि ।
स पापमूलदुःखानि नैव भुङ्क्ष इति स्मृतेः ॥ 1252 ॥

श्रुतेश्च युक्तितश्चेशः सिद्धो विद्वज्जनप्रियः ।
यश्च स्वकृतपापौघैर्नरकाननुगच्छति ॥ 1253 ॥

आधिना व्याधिना देहेप्यनीशः क्लेशभाक् सदा ।
उभावश्नदनश्नन्तौ कथं नेमौ तनौ तनौ ॥ 1254 ॥

उद्गते सति जीवाख्यचैतन्यांशे कलेवरात् ।
देहव्यापि तदाप्यन्यचैतन्यं किल ते मते ॥ 1255 ॥

न चेदनारोपितोसौ देहः स्यात्पतितो भुवि ।
नाधिष्ठानं विनाध्यासो न चैतन्यं विना च तत् ॥ 1256 ॥

एवं चाश्नदनश्नन्तौ चिदंशौ द्वौ यतो बलात् ।

तच्छ्रुतिस्तत्परैवास्तु किमर्थाक्लिष्टकल्पना ॥ 1257 ॥

श्रावयन्ती भिदां तस्या व्यावहारिकतादिकम् ।

कपोलक्लृप्त मश्रौतं धिक्कृत्यैव श्रुतिर्द्वयोः ॥ 1258 ॥

सायुज्यसख्यसादृश्यस्वातन्त्र्यादिविशेषणैः ।

उपसर्गेण च व्याप्तिं प्रबोध्यैक्यगिरां गतिम् ॥ 1259 ॥

सगुणत्वं च संसाध्य लिटा मिथ्याश्रुतेर्गतिम् ।

लटा तद्बाधकं चोक्त्वा माध्वराद्धान्तमुद्दधे ॥ 1260 ॥

व्यावहारिकभेदस्य साधिका भेदवाग्यदि ।

तवैक्यवाक्यं किं न स्यात्तादृगर्थपरं तदा ॥ 1261 ॥

न चेत् प्रत्यक्षसाहित्यबाधाभ्यां किं विधीयताम् ।

मृतस्य प्रेतकर्म स्याज्जीवतस्तु कथं वद ॥ 1262 ॥

यदि ब्रह्मप्रमामात्रबाध्यो भेदस्ततः पुरा ।

व्यवहारपदं प्राप्तो व्यावहरिक इष्यते ॥ 1263 ॥

तर्हि नाहं सर्ववेत्ता न सर्वेशोहमित्यपि ।

प्रत्यक्षबाधादधुना स्यादैक्यं प्रातिभासिकम् ॥ 1264 ॥

ब्रह्मप्रमान्यबाध्यं यत्तद्धिते प्रातिभासिकम् ।

न चेत् रज्जुभुजङ्गाद्यं कथं स्यात् प्रातिभासिकम् ॥ 1265 ॥

रज्जुप्रत्यक्षवद्भेदप्रत्यक्षं किं न बाधकम् ॥ 1266 ॥

अतो वृश्चिकतो भीत्या पलायनपरस्य ते ।

महोरगबिले स्थूले पातो जातो विचारय ।

यद्भेदसाम्यतो भीतस्यासीदैक्येतिनीचता ॥ 1267 ॥

व्यावहारिकमानं हि प्रातिभासिकमानतः ।

बलवत्ते मते तस्मादैक्यं स्याद्धि बहिष्कृतम् ॥ 1268 ॥

व्यावहारिकतायां च बाधाभावो यदीष्यते ।

सिद्धं समीहितं तर्हि न चेदतिविगर्हितम् ॥ 1269 ॥

अतत्वावेदकत्वाप्त्या यच्छ्रुतेर्मानता गता ।

इदं बौद्धराद्धान्तवार्दिमध्यप्रवेशनम् ॥ 1270 ॥

उभयोर्मानतासिद्ध्यै यो यतेत स वैदिकः ।

अतो मुख्यामुख्यवृत्त्या वयं गुप्त्यै यतेमहि ।

न चेद्भेदघ्न एवासौ गवोरेकघ्नगोघ्नवत् ॥ 1271 ॥

यद्यमानत्वमेकस्या वक्तुं युक्तं श्रुतावपि ।
तर्हि मीमांसकाचार्याः पुर्याः कार्यस्त्वया बहिः ॥1272 ॥

पौरुषेयेषु पुरुषविप्रलिप्सादिकारणात् ।
युक्ता द्विविधता बुद्धाद्युक्ताविव न सा श्रुतौ ॥ 1273 ॥

विप्रलिप्सा प्रमादश्च भ्रमश्च स्याद्धि पुंसु यत् ।
अपौरुषेयवचने मुख्यामुख्यार्थतैव तत् ॥ 1274 ॥

किञ्च त्वच्छ्रुतिबाधात्सा व्यावहारिकवाग्भवेत् ।
व्यावहारिकवाक् चेत् सा त्वच्छ्रुतिः स्यात्तव श्रुतिः ॥ 1275 ॥

व्यावहारिकता चेयं न युक्ता या त्वयोदिता ॥ 1276 ॥

ब्रह्मज्ञानेतरज्ञानाबाध्यत्वे सति तद्धिया ।
यद्बाध्यं तस्य भावो हि व्यावहारिकता तव ॥ 1277 ॥

यतो सत्वास्थिरत्वादि ब्रह्मणः प्रमयैव हि ।
ब्रह्मण्यारोपितं बाध्यं तच्च ते प्रातिभासिकम् ॥ 1278 ॥

प्रमापदप्रवेशोपि नोक्तदोषप्रतिक्रिया ।
प्रमा यथार्थधीरेवं नोचेद्व्यर्थं विशेषणम् ॥ 1279 ॥

देहात्मैक्यं नभोनैल्यं प्रातिभासिकमेव ते ।

ब्रह्मप्रमान्याबाध्यं च बाध्यं चरमतद्धिया ॥ 1280 ॥

नियमेनेतरज्ञानबाध्ये तद्बाधयोग्यता ।

कथं स्यान्न हि तत्तस्य योग्यं यन्न कदाचन ॥ 1281 ॥

ब्रह्म प्रमान्याबाध्ये सति तज्ज्ञानबाध्यता ।

कथमुक्तेष्वतिव्याप्ता व्यावहारिकता वद ॥ 1282 ॥

किञ्च ब्रह्मप्रमान्याबाध्यत्वमात्रं न सोचिता ।

ब्रह्मणो बाध्यतापत्तेस्तत्प्रमाबाध्यतापि च ॥ 1283 ॥

बाध्यश्च नाप्तिताबोधो नाप्रतीतिस्तु केवला ।

असतो बाध्यतापत्तेरपिसिद्धान्ततो च ॥ 1284 ॥

सर्वप्रकारशून्यैव निर्विकल्पकधीस्तव ।

ब्रह्मप्रमा तया कस्य साधनं बाधनं वद ॥ 1285 ॥

अतो भेदाख्यरत्नस्य जगत्कल्पद्रुमस्य च ।

पारमर्थिकतापन्ना बाधाभावाद्धि सर्वदा ।

त्वद्रीत्यैव न मद्रीत्या चित्रा ते शास्त्रकर्तृता ॥ 1286 ॥

निष्प्रकारकधीर्या ते भेदाभेदप्रमा न सा ।

तत्वं किल तथाप्येकमतत्वमपरं किल ॥ 1287 ॥

यदि बाधस्तेन नाशस्तदा दण्डादि नाश्यता ।

दृष्टा घटादौ यत्तस्मान्नस्युस्ते व्यावहारिकाः ॥ 1288 ॥

उपादानाज्ञाननाशद्वारा ज्ञानं हि नाशकम् ।

अनादेरस्य भेदस्य तन्नस्याज्ज्ञाननाश्यता ॥ 1289 ॥

अज्ञानोपादानके ते रूप्यादौ प्रातिभासिके ।

अस्त्येव ज्ञाननाश्यत्वमतोप्येतदलक्षणम् ॥ 1290 ॥

शुक्त्यवच्छिन्नचिज्ज्ञानं ब्रह्मज्ञानं च तत्तव ॥ 1291 ॥

ज्ञानान्नाशेपि मिथ्यात्वे हेतरुज्ञानकार्यता ।

सा चास्ति शुक्तिरूप्यादौ नास्ति भेदाद्यनादिषु ॥ 1292 ॥

ब्रह्मज्ञानेतरज्ञाननाश्यत्वस्य प्रवेशने ।

घटादिवृत्तिनाश्येषु तूलाज्ञानेषु लक्षणम् ।

अव्यापकं स्यात्तद्योगे मूलस्यापसृतौ भवेत् ॥ 1293 ॥

किञ्च ब्रह्मज्ञाननाश्यं ब्रह्मज्ञानं तवापि न ।

आत्माश्रयादतस्तत्रैवाव्याप्तिरभवद्ध्रुवा ॥ 1294 ॥

बाध्यत्वे निर्विकल्पाधीनं जगद्धीषयेन्मम ।
नाश्यत्वे स्वविनाश्याधीनं जगद्धीषयेन्मम ॥ 1295 ॥

किञ्च प्रारब्धकर्माणि ब्रह्मज्ञानादनन्तरम् ।
स्थायीनि भोगक्षय्याणि तेष्वव्याप्तिर्द्विधाप्यभूत् ॥ 1296 ॥

अर्थक्रियाकारितैव व्यावहारिकता यदि ।
शशश्रृङ्गमभूत्तत्वं परमार्थतरं तदा ॥ 1297 ॥

उपादानं निमित्तं वा भ्रमाधिष्ठानमेव वा ।
ब्रह्मत्वपरमार्थत्वादुपेक्ष्यमभवत्तव ॥ 1298 ॥

मुक्तेश्च साधको मुक्तो मुक्तिदं चाभवन्मृषा ॥ 1299 ॥

भयकम्पादिहेतुत्वं रज्जुसर्पस्य ते मते ।
स्वप्नस्य चास्ति ते नेदं व्यावहारिकता कथम् ॥ 1300 ॥

प्रातिभासिक एवार्थो ज्ञानं च प्रातिभासिकम् ।
इति यो वक्ति किं नास्य प्रातिभासिकमर्थकृत् ॥ 1301 ॥

अतत्वमभवत्तेऽन्नं तृणं तत्वमभूदहो ॥ 1302 ॥

समर्थायां प्रवृत्तौ तु प्रामाण्यं हीयते किल ।
असमर्थप्रवृत्तौ तु प्रमाण्यमुपचीयते ॥ 1303 ॥

इदं हि शास्त्रमर्यादा न वार्यादायवेदिभिः ।
यत्सार्थक्यं परस्याह वैयर्थ्यं स्वस्य स स्वयम् ॥ 1304 ॥

सत्यं अर्थक्रियाकृत्त्वं तेन च क्षणिकं जगत् ।
यो वक्ति तेन ते सख्यं महदासीद्भवान्तरे ।
अर्थक्रियाकारि सर्वं यस्त्वं मिथ्येति कत्थसे ॥ 1305 ॥

एतादृशं च मिथ्यात्वं भेदस्यास्तु सदा मम ।
मुक्तिं च सद्यः सन्दध्याद्य एवं व्यावहारिकः ॥ 1306 ॥

महातत्वं तवैक्यं च न भेदस्य विरोधकृत् ।
ऑअतोयमप्रतिद्वन्द्वो द्वन्द्वं सर्वत्र साधयेत् ॥ 1307 ॥

नाप्यविद्याकार्यता ते व्यावहारिकतोचिता ।
अविद्यायामभावेन भेदेऽनादावभावतः ।
सत्त्वाच्च रज्जुसर्पादिप्रातिभासिकराशिषु ॥ 1308 ॥

न हि हानमुपादान मभिलापोपि वा तव ।
व्यवहारो मतस्तस्मात्तदर्हत्वं च सा न ते ॥ 1309 ॥

या ब्रह्मण्यभिलापार्हे सदादेये मुमुक्षुभिः ।
हेये च शुक्तिरूप्यादौ जगतीव प्रदृश्यते ॥ 1310 ॥

उभयत्र ह्यतिव्याप्ता कथं मध्यस्य सा दशा ॥ 1311 ॥

व्यावहारिकतोक्तिस्तद्व्यवहारज्ञसंसदि ।

न भाति प्राङ्कणकथा न हि भाति रणाङ्कणे ॥ 1312 ॥

प्रत्यक्षश्रुतियुक्तीनां विरोधादैक्यमेव ते ।

स्याद्व्यावहारिकं सिंहदेवदत्तादिकैक्यवत् ॥ 1313 ॥

सादृश्यैक्यपरत्वे स्यादेव वा व्यावहारिकम् ।

न चेत्पूर्वोक्तमार्गेण स्यात्तद्धि प्रातिभासिकम् ॥ 1314 ॥

भेदस्तु श्रुतियुक्तिभ्यां प्रत्यक्षेण च साधितः।

ब्रह्मवत्पारमार्थ्यार्हः कथं स्याद्व्यावहारिकः ॥ 1315 ॥

भेदस्तन्मतिभेदादेर्विरोध्यैक्यस्य चोद्धतेः ।

त्रिधापि परमार्थोभूद्योऽत्युच्चब्रह्मधार्मिकः ॥ 1316 ॥

एवमाविद्यकं भेदमथवौपाधिकं वदन् ।

प्रष्टव्यो यद्यविद्याद्यैः कृतत्वं तस्य कीर्त्यते ॥ 1317 ॥

तदा तवापसिद्धान्तः षडस्माकमनादयः ।

इत्याहुः किल ते पूर्वे तस्माज्जीवेशयोर्भिदा ।

अनादिस्ते ततस्तस्याः कृतत्वोक्तिरविद्यया ॥ 1318 ॥

यदि तज्ज्ञापितत्वाच्च भेदे दोषः प्रभाष्यते ।

तदैक्यमपि दोषि स्यात्तच्च मानसवेदने ।

अज्ञानाज्ज्ञापितं किं न किं वा देहाद्युपादिभिः ॥ 1319 ॥

अविद्याकार्यमखिलं कार्यं किल भवन्मते ।

एवं सत्यैक्यधीरन्ते किं ते हन्तैतदन्तरा ॥ 1320 ॥

अविद्यमानं भातीति वादोऽनादौ कथं वद ।

भन्धेप्याविद्यकत्वं तदन्ध ते निर्निबन्धनम् ॥ 1321 ॥

अतस्तत्सम्बन्धमात्राद्यद्यवद्यं निगद्यते ।

तद्ऐक्यस्याप्यवद्यं स्यात्तदज्ञानावृतं हि ते ॥ 1322 ॥

यतो ब्रह्मचितोप्यस्ति तत्संस्सर्गोपवर्गतः ।

पुरा ततः सापि भेदसमैवासीन्मते तव ॥ 1323 ॥

अज्ञाननाशाद्भेदस्य नाशे ब्रह्मापि नश्यतु ॥ 1324 ॥

यद्यज्ञानानुपादानं ब्रह्म तन्नाशनाशि न ।

तर्ह्यनादिविभेदोयं कुतस्तन्नाशनाशवान् ॥ 1325 ॥

तद्ब्रह्मसमसामर्थ्यौ भेदोभेद्यो न केनचित् ॥ 1326 ॥

किं च मायानिवृत्तौ च स्मर्यते श्रूयते च या ।

सा भिदा न परैर्भेद्या भिनत्ति निखिलं जगत् ॥ 1327 ॥

यद्ब्रह्मणा सहेत्युक्तं मुक्तौ तन्नासती भिदा ।

व्रणादप्यधिको बाधः सहोक्त्याऽद्वैतवादिनः ॥ 1328 ॥

अपि स्वरूपनिष्पत्तौ समीपप्राप्तिरुच्यते ।

परञ्ज्योतिरिति श्रुत्या तत्त्यागार्हा कथं भिदा ॥ 1329 ॥

पूर्वोक्तब्रह्मसूत्राणि भेदमाघोषयन्ति हि ।

अभेदोक्तिस्तिरस्कृत्य कुतस्तस्य ह्यसत्यता ।

अतो भेदश्रुतेरग्रे कस्य स्यात्प्रत्यवस्थितिः ॥ 1330 ॥

अनादिवेदवाक्येषु परापरकथा वृथा ।

निषेधविधिवार्ताद्धा दग्धाग्नीषोमपावके ॥ 1331 ॥

परस्मात्पूर्वबाधश्चेत् स्मृत्यास्याच्छ्रुतिबाधनम् ।

परस्माज्जगतः पूर्वब्रह्मबाधश्च ते भवेत् ॥ 1332 ॥

निषेधाद्विधिबाधश्चेत् बौद्दोक्त्या धर्मबाधनम् ।

तथा शून्यत्वकथया ब्रह्मबाध्यं भवेत्तव ॥ 1333 ॥

परया भार्यया कार्यनिषेधपरया तव ।

पतिस्त्वं गृहकृत्यानां विधाता हन्त बाध्यसे ॥ 1334 ॥

किञ्च पूर्वं निषेध्यं च तदात्म्यमभवत्तव ।

भेदः परो निषेधो मे योन्योन्याभावरूपकः ॥ 1335 ॥

अतस्त्वन्न्याय एवायं चित्रं मत्कार्यसाधकः ।

यद्बलादैक्यवाक्यानां बाधिका भेदवागभूत् ॥ 1336 ॥

अतो निरवकाशं यत्तदेव बलवत्तरम् ।

दुर्बलं सावकाशं स्यादिति सर्वं मनोरमम् ॥ 1337 ॥

यद्यन्यतः सिद्धभेदस्यानुवादेन मे श्रुतिः ।

न भेदसाधिका तर्हि स्वप्रकाशत्वशक्तितः ॥ 1338 ॥

सिद्धस्य ब्रह्मसत्त्वस्याप्यनुवादपरा श्रुतिः ।

अस्ति ब्रह्मेत्यादि रूपा न तत्सत्त्वं प्रसाधयेत् ॥ 1339 ॥

असिद्धबोधकं शून्यवाक्यं स्यादैक्यवाक्यवत् ।

अतोपि ब्रह्मभेदोयं ब्रह्मसम्मित एव हि ॥ 1340 ॥

यदि प्रत्यक्षसिद्धस्य सा भेदस्यानुवादिनी ।
तर्हीशधर्मिको भेदो भीमसेनगदाभवत् ।
यतोन्यपदयुग्मेन भेदौ द्वावप्युदीरितौ ॥ 1341 ॥

अथ प्रत्यक्षसिद्धस्य जीवभेदस्य च श्रुतिः ।
कुतोनुवादं कुरुते तूष्णीं वा दूषणाय वा ॥ 1342 ॥

अद्ये द्विर्बद्धभेदौसौ सुबद्धोभून्न संशयः ।
न चेत् स्वोक्तार्थनिर्णीत्यै शासनानुसृतिर्वृथा ॥ 1343 ॥

मानस्य मानसंवादे प्रामाण्यावधृतिः किल ।
चित्रसत्वौषधेनाभूत्काचच्छेदेक्षिणतीक्ष्णता ।
अतोतिबलवद्वैरात्स्यादैक्यस्य पलायनम् ॥ 1344 ॥

द्वितीये दूषणं किं तदैक्यवाक्यं यदीष्यते ।
तदान्योन्याश्रयो दोषो वैर्याश्लेषोपमस्तव ॥ 1345 ॥

दूषणार्थानुवादित्वे सिद्धभेदपरश्रुतेः ।
निरङ्कुशैक्यवागैक्यमुक्त्वा तां दूषयेत्स्वयम् ॥ 1346 ॥

सिद्धेऽस्या दूषकत्वे च दूषणार्थानुवादिनी ।
सा स्यादिति न कस्य स्यादन्योन्याश्रयदूषणम् ॥ 1347 ॥

श्वानं गृहाण भिक्षा मे मास्त्वित्याभाणकं स्मर ।

यदन्योन्याश्रयशुना दंष्ट्वा परशुनार्दिते ।

दूरेभूद्दूषणार्थानुवादित्वान्नस्य भोजनम् ॥ 1348 ॥

दृढप्रत्यक्षवैरेपि श्रुतिरैक्यं कथं वदेत् ।

अबाधितो हि वाक्यार्थो योग्यतावश्यकी न किम् ॥ 1349 ॥

यदा प्रत्यक्षबाधायाप्यैक्यवाक्यं व्रजेत्तव ।

तदा बलवती भेदश्रुतिर्हन्याद्धि पृष्ठतः ॥ 1350 ॥

अभेदश्रुतिं रोद्धुं यदा निववृते ततः ।

तदा तां पृष्टतो हन्यात् स साक्षी बलवत्तरः ॥ 1351 ॥

तस्मादुभाभ्यां युद्धेन क्लिश्येदैक्यश्रुतिस्तव ।

अतस्तां क्लेशनाशाय शीघ्रमर्थान्तरे नयेत् ॥ 1352 ॥

किञ्च प्रत्यक्षबाधाय नालं वाक्यशतान्यपि ।

अन्योन्याश्रयदोषेण तथा दोषान्तरेण च ॥ 1353 ॥

प्रत्यक्षबाधे वाक्यं तदैक्यं वक्ति ह्यबाधितम् ।

वाक्येनैवाक्षबाधे च कथं नान्योन्यसंश्रयः ॥ 1354 ॥

वाक्येनैव यदाक्षस्य दृढस्यापि प्रबाधनं ।

गङ्गायां घोष इति वाक्कुर्यार्द्घोषवतीं नदीम् ।

साक्षाद्बाधेन तत्त्यागे गतमैक्यं भवत्करात् ॥ 1355 ॥

त्यज बाल लक्षणा वृत्तिं भज वा तत्वविन्मत ।

व्रज वान्यत्र वाणीमुत्सृज वा बुधसंसदि ॥ 1356 ॥

दृढभेदश्रुतेर्वैराद्दृढप्रत्यक्षवैरतः ।

नाभेदमागमो वक्ति जीवस्य परमस्य च ॥ 1357 ॥

अतः प्रत्यक्षयोग्यार्थे प्रत्यक्षं बलवत्सदा ।

अतीन्द्रियार्थमात्रे तु प्रबला वागितिस्थितम् ॥ 1358 ॥

अक्षसिद्धानुवादेपि का हानिरिति चिन्त्यते ।

यथार्थ्यमेव मानत्वं तस्य हानिर्न काचन ।

न चेत् स्मृतिरमानं स्यात् स्मृतिकर्तृव्यपेक्षया ॥ 1359 ॥

एकस्यामानमन्यस्य कथं मानं भवेद्वद ।

प्रमात्वमप्रमात्वं च न ह्येकत्रैव धर्मिणि ॥ 1360 ॥

अनपेक्षितमेकस्य परस्यान्नत्वमानता ।

परबोधनकाले तु तस्यापि तदपेक्षितम् ॥ 1361 ॥

प्रत्यक्षसिद्धभेदस्याप्यपलापे कृतोद्यमम् ।

परं बोधयितुं भेदवादी वादोप्यपेक्षते ।

अक्षसिद्धानुवादात्तन्न दोषः कोपि दृश्यते ॥ 1362 ॥

दूषणार्थानुवादे तु दूषणेनैव दूष्यता ।

अक्षसिद्ध्या न दोषोभूत्किं शून्यत्वं न दूष्यते ॥ 1363 ॥

दूषणं नैव भेदस्ति भेदं तत्साधयेच्छ्रुतिः ।

अक्षासिना छिन्नपदा यद्वद्ग्राभूत्परश्रुतिः ॥ 1364 ॥

अपि चामानतः सिद्धिर्दूषणेनाप्यपेक्ष्यते ।

दृढमानेन सिद्धिस्तु भवेद्दूषणदूषणम् ॥ 1365 ॥

दूषणेनैव मानस्यामानत्वेऽन्योन्यसंश्रयः ।

अतोक्षसिद्ध्या दोषोक्तिरदोषज्ञत्वसाधिका ॥ 1366 ॥

विरज्येतोत्तमश्लोकगुणानामनुवादतः ।

क इत्यादि व्यासवाक्यान्यनुवादं स्तुवन्ति हि ॥ 1367 ॥

निवृत्ततर्षप्रेयस्त्वं भवस्यौषधता तथा ।

मनःश्रोत्रप्रियत्वं च मिथ्याज्ञान्यतिदूरता ॥ 1368 ॥

महामानत्व एवैते युज्येरन् धर्मराशयः ।

अमानत्वे तु भज्येरन्निति मन्यामहे वयम् ॥ 1369 ॥

अतः प्रमाणसंवावादनुवादो महत्तरम् ।

मानमित्येव जानीहि न लुनीहि सतां मतम् ॥ 1370 ॥

स्यादेकैकमते शङ्का सर्वस्याभिमते तु न ।

अन्नं हि कस्य वा नान्नं प्रत्यक्षं मानमेव तत् ॥ 1371 ॥

अतो नादिमतप्राप्ततदैक्यस्यानुवादनं ।

तद्धैक आहुरसदेवेदमग्र इति श्रुतौ ।

ब्रह्मासत्त्वानुवादाभं दोषार्हमिति शोभते ॥ 1372 ॥

दोषानर्हाक्षसिद्धस्य त्वनुवादोपि वादवत् ।

न चेद्बहुमहावाक्याशास्यमैक्यं परस्परम् ।

अनुवक्ति भिदाश्रुत्या भेत्तुं सुन्दोपसुन्दवत् ॥ 1373 ॥

इत्यैक्यमपि शोच्यं स्यात्तन्मानान्तरसिद्धता ।

दार्ढ्यायैवेति वक्तव्यं सर्वैरपि विवेकिभिः ॥ 1374 ॥

सर्वार्थान् स्वत एवाह प्रलयेपि सती श्रुतिः ।

सृष्टौ तदुदितानर्थान् सर्वे वेदानुसारतः ॥ 1375 ॥

अनुमिन्वन्ति पश्यन्ति वदन्ति च ततस्ततः ।
अतोन्यदनुवादिस्याच्छ्रुतिस्त्वन्यानपेक्षिणी ॥ 1376 ॥

किञ्चानुवक्ति यन्नित्यं नानित्यमनुवर्तते ॥ 1377 ॥

एकेन्य इति वा सान्यप्रोक्ततामपि यत् स्फुटम् ।
दूष्यानुवादे वदति तत् स्वोक्तं न निषेधति ॥ 1378 ॥

इति मन्यामहे दूष्यं दूषणं चैकवाक्यगम् ।
करोति शाखान्तरगा तच्छाकान्तरवर्तिनाम् ।
न दूषणाय यतते वाक्यानामिति मे मतिः ॥ 1379 ॥

तस्माहृक्संहितावाक्ये सयुक्तिकमुदीरितम् ।
कुतः सा दूषयेत् स्वार्थं सूक्तेस्मिन्नास्ति दूषणम् ॥ 1380 ॥

सूक्तं चेदं तदैव स्यात्तत्वमेव वदेद्यदि ।
अतत्वकथकं सूक्तमिति च व्याहतं वचः ॥ 1381 ॥

उदितेऽनुदिते होमविधात्र्यपि न दूष्यते ।
अविरुद्धा त्वियं वाणी कुतो वा दूष्यतां व्रजेत् ॥ 1382 ॥

अतो भेदश्रुतेरग्रे क एकः प्रतितिष्ठति ।
विरुद्धधर्मौ नीचोच्चौ जीवेशौ द्वाविमौ विना ॥ 1383 ॥

अनुवादादि रूपोयमित्याकारास्ति न श्रुतिः ।

त्वद्वाक्ये न ममाश्वासः कल्पनाबीजमुच्यताम् ॥ 1384 ॥

ऐक्योक्तेरन्यथायोगात्परं कल्प्यमिदं त्वया ।

सा त्वद्यापि रणोद्योगादव्यावृत्तपदद्वया ॥ 1385 ॥

वृत्त्यन्तरे क्षिप्तपदा मानत्रयभयार्दिता ।

मुख्यार्थे नाकरोच्छ्रद्धामभ्यासेचनवागिव ॥ 1386 ॥

अतो यथाश्रुतो वाक्यस्यार्थौ वाच्यो मनीषिभिः ।

अविरुद्धः स्वपरतः तथा मानान्तरादपि ॥ 1387 ॥

अविद्यमानो भेदोयं यद्युपास्त्यर्थमुच्यते ।

तर्हि त्र्यक्षः सहस्राक्षः सहस्राक्षस्त्रिलोचनः ॥ 1388 ॥

कुतो न कीर्त्यते ध्यातुं तस्माद्यद्वस्तु यादृशं ।

तत्तथैव वदेद्भेदो ध्यातुं वा द्रष्टुमेव वा ॥ 1389 ॥

सत्यं वदेति योन्यस्याप्यसत्योक्तिं निवारयेत् ।

स वेदः सर्वमर्यादारक्षको नानृतं वदेत् ॥ 1390 ॥

यो यो देवो यया कृत्या येन लिङ्गेन यैर्गुणैः ।

वर्तते श्रुतिरप्येषा तं तं ब्रूते तथा तथा ।

न व्यत्यासात् क्वचिद्वक्ति ततः सत्यव्रतैव सा ॥ 1391 ॥

किं चोपास्त्यैभिदोक्तिश्चेदैक्योक्तिश्च कथं न ते ।

उपासीतेति तु पदं नोभयत्रापि दृश्यते ॥ 1392 ॥

कल्पना चेत् क्व सा न स्याद्वस्तुतस्त्वैक्यमेव ते ।

सर्वप्रत्यक्षतो बाधादुपास्यं स्यादसिद्धितत् ॥ 1393 ॥

अनृतात्पातकं वक्ति यो वेदो न स कुत्रचित् ।

वदेदनृतमन्यार्थमिति मन्यामहे वयम् ॥ 1394 ॥

न चेन्मोहार्थमनृतं वेदो वक्तीति वादिनः ।

बौद्धाद्याः केन दूष्यन्ते भूष्यन्ते वा श्रुतेर्गुणाः ॥ 1395 ॥

श्रुतेरनृततां क्वापि वदतीति वचस्तु यत् ।

श्रुतिप्रामाण्यरक्षायै तदन्यार्थं वदेद्बुधः ॥ 1396 ॥

अतो नेदं यदिदमित्यादि वाक्यं न बाधकम् ।

वाच्योन्योर्थः श्रुतेर्गुप्त्यै त्वयापि च मयापि च ॥ 1397 ॥

उपासनार्थं धनवान् किमनुश्रियते त्वया ।

अधनो वा नरः कश्चित्स्वानुभूतिं विचारय ॥ 1398 ॥

विषनिर्हरणे शक्तो ध्यातव्यो गरुडस्त्वया ।

सर्पदष्टेन किमुत काकोलूकादि पक्षिणः ॥ 1399 ॥

विघ्नध्वंसाय विघ्नेषो विद्याप्त्यै शारदा त्वया ।

मृत्युञ्जयो मृत्युजित्यै कुतः संसेव्यते वद ॥ 1400 ॥

अविद्यमानः सविता सन्ध्योपास्त्यै किमीर्यते ।

स्वामानतां स्वयं कर्तुं किमुन्मत्तवचः श्रुतिः ॥ 1401 ॥

सत्यं वदेति या वाणी वक्ति धर्मानुशासनम् ।

असत्यं किल सा वक्ति ध्यातुं सर्वत्र सर्वदा ॥ 1402 ॥

यन्न प्रतीके न हि सः इत्थं सूत्रकृतैव हि ।

अविद्यमानस्योपास्तिर्न काप्यस्तीति साधितम् ॥ 1403 ॥

यतः प्रतीकं नैवात्मा तत आत्मत्वभावना ।

न तत्रेति हि सूत्रार्थस्तवापि ममापि च ॥ 1404 ॥

तस्मादविद्यमानस्य भेदस्योत्कीर्तनं श्रुतौ ।

उपासनार्थमिति यन्मतं तच्च विगर्हितम् ॥ 1405 ॥

स्थूलोपास्तावरुन्धत्यास्ताराप्यारात्स्थि तेक्ष्यताम् ।
भेदोपास्त्यात्वभेदस्य विरुद्धस्य कथं दृशिः ॥ 1406 ॥

सोपासनैव तां स्थूलां किमण्वीकृत्य दर्शयेत् ।
किं वा भिन्नकटाहस्याप्यभेदो भेदचिन्तया ॥ 1407 ॥

उत्कर्षश्चेदुपास्यः स्यान्मिथ्यार्थोऽपि मते तव ।
नीचजीवोच्चताहेतुस्तादृगैक्यं न नो बिधा ॥ 1408 ॥

अविद्यमानभेदस्य नोपासा तेन शोभते ।
अविद्यमानमेवैक्यमुपास्यं स्यात्सुखेन ते ॥ 1409 ॥

यदि ध्यानाय मिथ्यार्थं प्रथयेत् प्रथिता श्रुतिः ।
तदा दृष्ट्यै तवैक्यं च मिथ्यार्थं न कुतो वदेत् ॥ 1410 ॥

घटवृत्त्येव तद्वृत्त्याप्यविद्यानाश इष्यताम् ।
मित्यार्थदृष्ट्याप्यानन्दः किं न तात्कालिको नृणाम् ।
अतस्तयापि मुक्तिः स्याद्यथा प्रागुक्तया दृशिः ॥ 1411 ॥

द्वयोरेकस्य सत्यत्वे निर्वैरस्यास्तु लाघवात् ।
अभेदस्ते जगद्धन्ति भेदः सर्वं च रक्षति ॥ 1412 ॥

सर्वमस्मीत्युपासीतेत्यैक्योपास्तिस्तव श्रुता ।
भेदश्च नस्तथा नाह त्वन्नयस्त्वां निहन्त्यहो ॥ 1413 ॥

किञ्चोपास्या यदि भिदा तदासिद्धं समीहितम् ।
तं यथोपासते देवं तथैव भवतीति हि ॥ 1414 ॥

श्रुत्या मुक्तावुपास्यस्य यत्सत्त्वमवधार्यते ।
तस्मादुपास्यो भेदोयं मुक्तौ चासीन्निराकुलः ।
अत एव मृषोपास्तिर्न चकास्ति श्रुतेर्मते ॥ 1415 ॥

ततोनुपास्यं नैर्गुण्यं न कदापि भवेन्नृणाम् ।
सगुणं तु सदोपास्यः स्वयं च सगुणो भवेत् ॥ 1416 ॥

मुक्तौ च स्वस्य नैर्दोष्यं यदवश्यमपेक्षितम् ।
अतोऽज्ञानक्लेशनाशजन्माद्यं न स्मरेद्धरौ ।
इति सिद्धं ततोऽवद्यशून्योप्यासीद्रमापतिः ॥ 1417 ॥

अनुपास्यमतत्वं च कुतो वक्ति श्रुतिः क्वचित् ।
तस्मादापाततो दोषश्रुतिवद्भाति या श्रुतिः ।
साप्युपास्यगुणार्थैव न दोषार्थेति चागतम् ॥ 1418 ॥

उपास्त्यनर्हमैक्यं ते न मोक्षे नापि संसृतौ ।
उपास्त्यभावान्मुक्तौ न नेदानीमावृतत्वतः ॥ 1419 ॥

तस्मादुपास्यं सगुणं ब्रह्मैवासीद्धि निर्मलम् ।
मुक्तिदत्वाद्विमुक्तिश्च तस्य सादृश्यमित्यपि ॥ 1420 ॥

तथैवेति वदन्ती सा श्रुतिराह ततोपि मे ।
बिधैव सुस्था ब्रह्मैक्यं पदाहतमभूत्तव ॥ 1421 ॥

उपास्योपसाकत्वस्य मुक्तावप्यनुवर्तनम् ।
तथैवेति हि सर्वस्याप्यवदृत्या श्रुतिर्जगौ ॥ 1422 ॥

यतः सारूप्यमोक्षोयं सर्वोपास्तिकृतां श्रुतः ।
अतः सालोक्यसामीप्यसायुज्येषु च स ध्रुवः ॥ 1423 ॥

श्रुतिरेषा बलवती सर्वश्रुत्युक्तसम्पदम् ।
स्वज्ञातिरक्षणोद्युक्ता नापहर्तुं विमुञ्चति ॥ 1424 ॥

उपासते हि यदिदं नेदं ब्रह्मेति तु श्रुतिः ।
उपास्यमानप्रतिमा नैव ब्रह्मेति शंसति ॥ 1425 ॥

ब्रह्मणः सन्निधानाच्च तदुपास्तिर्दिदृक्षताम् ।
राजद्वारोपास्तितोपि राज्ञः स्याद्धि प्रसन्नता ॥ 1426 ॥

उपासते सदा भोगैर्नरा यदुदरम्भराः ।
जीवरूपमिदं ब्रह्म नेत्यर्थं चाह सा श्रुतिः ॥ 1427 ॥

तवत्विति विरुद्धस्योपास्त्यैव स्यात्कथं फलम् ।
महाविरुद्धमग्न्यार्थी किमम्बुमथनं चरेत् ।
किं वा शुक्तेरुपास्त्यैव रूप्यप्राप्त्या धनी भवान् ॥ 1428 ॥

किञ्च शाखाग्रचन्द्रैक्यं ध्यातव्यं किल ते मते ।
स्थूलैवारुन्धतीत्वेन ध्येया सूक्ष्मत्वसिद्धये ।
एवं चैक्यमुपास्यं वा भेदो वाभूद्विचारय ॥ 1429 ॥

स्थूलभास्वरताराया ध्याने सूक्ष्माल्पभास्वरा ।
तारैव दृश्यते व्योम नीरूपं न हि दृश्यते ॥ 1430 ॥

एवं च सगुणोपास्त्यानिर्गुणेक्षोपमा न सा ।
यद्ध्येयः सगुणोत्रापि प्राप्योपि सगुणो यतः ॥ 1431 ॥

अस्माकं तु मनोरूपप्रतिमा स्थूलभास्वरा ।
उपास्यमाना स्वान्तःस्थां ज्ञानानन्दमयप्रभाम् ॥ 1432 ॥

अतिसूक्ष्मां हरेर्मूर्तिं दर्शयेदिति वादिनाम् ।
तवोपमैवानुपमा बलमासीद्विवेचने ॥ 1433 ॥

अरणीस्थानलप्राप्तिररण्योर्मथने यथा ।
तथानुकूलान्यसेवाप्यन्यप्राप्त्यै भवेन्मम ।
तुहीनानुसृतिः किं स्याद्दहनप्राप्तये वद ॥ 1434 ॥

गूरोश्चरणकैङ्कर्यं गुरुकैङ्कर्यमेव यत् ।

अतस्तत्प्रतिमाध्यानमपि तद्ध्यानमेव नः ॥ 1435 ॥

एवं चात्मैव सेव्योभूद्ध्यातव्योभूत्स एव हि ।

श्रुतयः स्मृतयस्तस्मादुपास्यं प्राहुरीश्वरम् ॥ 1436 ॥

अधिष्ठानतया तत्र ह्युपास्यं यदमुख्यतः ।

न तद्ब्रह्मेति च प्राहुर्मुख्योपास्यं च तं जगुः ॥ 1437 ॥

वस्तुतः सूक्ष्मताराया: समीपस्थेति लौकिकाः ।

स्थूलान्तरां दर्शयन्ति तद्भावं तत्र को वदेत् ॥ 1438 ॥

शाखाग्रदेशेनेन्दोश्च स्यादादेशो विवेकिनाम् ।

शाखाग्रैक्यं तु को वक्ति मिथ्योपास्तिः क तेस्ति तत् ॥ 1439 ॥

किं चैवमप्युपास्येस्मिन् भेदे स्याद्ब्रह्मणोन्यता ।

मिथ्यात्वं तु कुतो हेतोरघटो नास्ति किं पटः ॥ 1440 ॥

उपासते तु यदिदं नेदं ब्रह्मेति तु श्रुतिः ।

यदुपास्यं न तद्ब्रह्मेत्याह तन्नास्तिता कुतः ॥ 1441 ॥

न चेत्तद्विदितादन्यदेवेति श्रुत्युपक्रमात् ।

ज्ञेयं च  ब्रह्मनेति स्तां ज्ञानोपास्ती मृषार्थयोः ॥ 1442 ॥

सामस्त्याज्ञानमात्रेण ज्ञेयादन्यद्यदीष्यते ।

तद्ध्युपास्यादन्यदस्तुसमस्तोपास्त्य शक्तितः ॥ 1443 ॥

आत्मावेत्येक वाक्योक्तेर्ज्ञानोपास्ती कथं द्वयोः ।

अनन्तोपास्तिविधयो बाध्यं तेनोक्तिमात्रतः ॥ 1444 ॥

अतः श्रुतिस्मृतिशतैर्विहितोपास्तिगौरवात् ।

अन्यार्थमनकूलं वा भजेदर्थमियं श्रुतिः ॥ 1445 ॥

साक्षिसिद्धमिदं जीव ते रूपं ब्रह्म नोप ते ।

यदा स तत्परं ब्रह्मेत्याह सेयं श्रुतिः किल ॥ 1446 ॥

तस्माज्जीवेशभेदस्य साधिकेयमभूच्छ्रुतिः ।

उपास्यस्य तु मिथ्यात्वं निर्निमित्तमभूत्तव ॥ 1447 ॥

तृणं दग्धुं न शक्तोग्निर्मरुच्चालयितुं किल ।

गतागतोक्तिप्रत्युक्तिव्यापरैश्चेतनौ हि तौ ।

अशक्तमेवं चैतन्यं देवानामस्ति तद्धृदि ॥ 1448 ॥

विलक्षणतमं ह्येतच्चैतन्यद्वितयं यदा ।

सुराणामपि हृद्यस्ति नराणां हृदि का कथा ॥ 1449 ॥

विरुद्धार्थक्रियाकारि वैलक्षण्यमिदं तयोः ।
कथं ह्युपास्त्या मिथ्या स्यात्किमुपास्तिर्विषाङ्कुरः ॥ 1450 ॥

यथायथा ज्ञानिनस्तमधीश्वरमुपासते ।
वस्तुस्थित्या तथैवासौ भवतीशो न चान्यथा ॥ 1451 ॥

इत्येकवचनान्तस्य भवतीत्यस्य सत्त्वतः ।
अर्थोयमपि च श्रौतो मिथ्योपास्तिस्ततोपि न ॥ 1452 ॥

प्राग्विभक्तेर्विपरिणत्यार्थोत्र तु यथाश्रुतः ।
त्रयोर्थाः सर्ववेदेष्वित्यस्ति यद्यासशासनं ॥ 1453 ॥

अहो न च रमन्त्येते तथैवात्महनश्च ते ।
उपासते येत्वसत्यमित्याह श्रुतिगीतिका ॥ 1454 ॥

अतो विनिन्दितामेतां कथं वक्ति श्रुतिः सती ।
तोनोपास्यं समस्तं च सत्यमित्यागतं बलात् ॥ 1455 ॥

ध्यानाय मननं तस्मैश्रवणं दर्शनाय तत् ।
इति तेपि मतं तस्माद्दृष्टिध्यानेन भिन्नयोः ॥ 1456 ॥

न चेत्तवाश्रुतध्यानमश्रुतेक्षणमेव वा ।
आपतेत द्वयं चापि न युक्तं नापि ते मतम् ॥ 1457 ॥

श्रवणं करणं तत्वसाक्षात्कारश्च तत्फलम् ।

श्रवणादेव च ध्यानं तत्रान्योऽर्थः कुतोपतत् ॥ 1458 ॥

किं चासम्भावनोच्छित्यै मननं किल ते मते ।

ध्यानं च विपरीतार्थभावनोच्छित्तये किल ॥ 1459 ॥

तद्ध्यानं विपरीतार्थविषयं चेत्कथं ततः ।

विपरीतार्थविषयभावानोच्छिद्यते वद् ॥ 1460 ॥

न जेदुन्मत्तवार्ता स्याच्छास्त्रवार्ता तवाखिला ॥ 1461 ॥

तन्निर्गुणार्थश्रवणे ध्यानं निर्गुणगोचरम् ।

त्वयापि सर्वथा वाच्यं न चेदङ्गाङ्गितैव न ॥ 1462 ॥

यतः फलक्ये सति सा बोध्यैक्ये च फलैकता ।

सत्यार्थश्रवणे तस्मात्सत्यार्थस्यैव भावना ॥ 1463 ॥

मित्यार्थश्रवणे तु स्यान्मिथ्यार्थस्यापि भावना ।

तस्मादुपास्यो भेदोस्तु सत्योप्यस्तु श्रुतीरितः ॥ 1464 ॥

उपास्तेरेव बलतो मिथ्यात्वं तु तवापि न ।

अतः पूर्वोक्तवेदर्चोप्यापातार्थो न यौक्तिकः ॥ 1465 ॥

योग्यार्थौ तां निनीषोस्ते गुरुरासीज्जगद्गुरुः ।
अतो भेदश्रुतेरर्थं न भेत्तुं कोपि शक्नुयात् ॥ 1466 ॥

पदद्वयाविरुद्धोयं श्रुत्यर्थः केन चाल्यते ।
तत्पदाभ्यां विरुद्धं तु तदैक्यं चलनोचितम् ॥ 1467 ॥

पश्येज्जीवो यदा रुग्मवर्णं कर्तारमीश्वरं ।
पुरुषं ब्रह्मपितरं तदा त्यक्त्वा तमोञ्जनम् ।
विधूय सकलं कर्म परंसाम्यमुपैति च ॥1468 ॥

इति जीवेशभेदस्य साक्षात्कारेण हि श्रुतिः ।
परमं मोक्षमाचष्ट मुक्तस्यापि च भिन्नताम् ॥ 1469 ॥

न ह्यञ्जनाख्यतमसः कर्मणोः पुण्यपापयोः ।
क्षयः परमसाम्यं च महामोक्षमृते भवेत् ॥ 1470 ॥

साकारस्य सवर्णस्य कर्तुः सर्वेश्वरस्य च ।
साक्षात्कारोस्य भेदादेः किं न साक्षात्कृतिर्वद ॥ 1471 ॥

यदा तदेति शब्दाभ्यां पारम्पर्यनिषेधनात् ।
साक्षान्मोक्षोपयोगित्वं ज्ञानस्यास्य निगद्यते ॥ 1472 ॥

अतः साकारता वर्णः कर्तृत्वेशत्वपूर्वकः ।

महिमा ब्रह्मपितृता भिदा चाबाध्यतामगात् ॥ 1473 ॥

यतः साम्यं द्वयोरेव ततो मोक्षेपि भिन्नता ॥ 1474 ॥

एवं च तत्ववाद्युक्त तत्वसर्वस्यमेव हि ।

तत्वमासीदतत्त्वस्य दर्शनान्नहि मुक्तता ।

अतोपि शङ्कापङ्कस्य नावकाशोत्र कश्चन ॥ 1475 ॥

भिन्नाभिन्नादिकल्पोक्तदूषणैर्भेदूषणम् ।

जात्युत्तरं हि तत्सर्वं यत्खण्डनकृता कृतम् ।

व्यावहारिक भेदस्याप्यपलापप्रसङ्गतः ॥ 1476 ॥

भेदभेदेऽनवस्थानमभेदे चैकशेषता ।

भेदाभेदे विरोधश्चेत्येतद्धि तव दूषणं ॥ 1477 ॥

आत्माश्रयानवस्थाद्यैर्दोषैर्भेदस्य दूषणे ।

व्यावहारिकताप्यस्य कथं स्याद्या मता तव ॥ 1478 ॥

किं घटः पटहेतुस्ते पटो वा घटहेतुकः ।

किं स्वयं स्वोपरिघटः किं स्याद्घटपरम्परा ॥ 1479 ॥

तद्व्यावहारीकेप्यर्थे दोषा न स्युरिमे कथम् ॥ 1490 ॥

अतस्ते व्यवहाराय समाधानं हि यद्भवेत् ।

तदेव पारमार्थ्येऽपि समाधानं भविष्यति ॥ 1481 ॥

किञ्च ते परमार्थैक्ये विकल्पो दूषणानि च ।
भवन्त्येतानि सर्वाणि ततस्तच्च महिष्यति ॥ 1482 ॥

मृतसञ्जीवनं तत्र  यत्स्याद्भेदेऽपि तद्भवेत् ।
अतो यत्किञ्चिदेवैतदिति सर्वं मनोरमम् ॥ 1483 ॥

या श्रुतिर्नेति नेत्यात्मागृह्य इत्यादिरूपिणी ।
साप्यात्मानं जडाज्जीवाद्भिन्नं वर्णयति स्फुटम् ॥ 1484 ॥

जडं नात्मा जीवचिच्च नात्मेत्यर्थो भवेन्मम ।
तव द्विधा निषेधस्याभावे न द्वौ नञौ वृथा ॥ 1485 ॥

यथा घटो नेति पटो गृह्य इत्युदिते सति ।
घटादत्यन्तभिन्नोसौ पटः सिद्ध्येन्न चापरम् ॥ 1486 ॥

तथा जडजगन्नेति गृह्यो जीवजगच्च न ।
इत्यात्मागृह्य इत्युक्ते कथमत्यन्तभिन्नता ।
जडजीवाख्यजगतो न सिद्ध्येत्परमात्मनः ॥ 1487 ॥

द्विर्निषेधबलाज्जीव जडयोश्च ग्रहो ध्रुवः ।
मिथ्यात्वाशानुपूर्वोक्तनिदर्शनपराहता ॥ 1488 ॥

अन्यमीशमितिप्राह जीवादन्यमधीश्वरम् ।

श्रुतिः प्राग्द्वासुपर्णीति प्रोक्तवाक्यसमाख्यया ॥ 1489 ॥

घटकुड्यवदन्यत्वे साम्यं स्यात्तेन तं श्रुतिः ।

ईशमाह गुणाख्यं च महिमानं पुनर्जगौ ॥ 1490 ॥

त्रितयज्ञानतो जीवो वीतशोको भवेत्किल ।

इति शब्देन तज्ज्ञानं सप्रकारकमाह च ॥ 1491 ॥

साक्षान्मोक्षप्रदत्वोक्त्या तत्वमासीदिदं त्रयम् ।

तस्मादभेदः साम्यं च नैर्गुण्यं च निराकृतम् ॥ 1492 ॥

वीतशोक इति प्राह यतः स ज्ञानिनः फलम् ।

ततो जीवेशभेदेस्यास्तात्पर्यं चावगम्यते ॥ 1493 ।

एष सर्वेश्वर इति काचिद्वक्ति तमीश्वरम्।

स सर्वस्य वशी सर्वस्येशान इति चापरा ।

अतः सयुक्तिकः स्वामिभृत्यभेदः श्रुतौ श्रुतः ॥ 1494 ॥

य आत्मनि सदा तिष्ठन्नात्मनोन्तर इत्यपि ।

तेन्तर्याम्येष इत्याद्याः श्रुतयः सूत्रसूचिताः ।

जगुर्जीवेशयोर्भेदं शतशोथ सहस्रशः ॥ 1495 ॥

उत्तमः  पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।

यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।

इति गीतासु भेदोयं सयुक्तिकमुदाहृतः ॥ 1496 ॥

विद्यात्मनि बिदा बोध इति भागवते हरिः ।

विद्या केति पुरुषपृष्टो भिदा बोधं किलोक्तवान् ॥ 1497 ॥

चेतनेष्वात्मसु भिदा जात्येकवचनादियं ।

अबोध इति च च्छेदेबोधच्छेदो भविष्यति ।

बोधाभावं हि को बोद्धा विद्यां बुद्धिमते वदेत् ॥ 1498 ॥

राजा तत्पुरुषो मेने नान्यस्य पदसेवनम् ।

बहुव्रीहेस्तु चोरस्य स्याच्चास्यान्यानुयायिता ॥ 1499 ॥

श्रेष्ठपदं समारूढः  कथं नीचो बुभूषति ।

शङ्कास्कन्दितमूर्तिः सा विद्या नोर्ध्वं यियासति ॥ 1500 ॥

स्तानान्तरेष्वदृष्टोस्या न स्थानद्वयसङ्गमः ।

स्त्रीपुंसयोश्च योगोयं सूते दोषकुमारकम्॥ 1501 ॥

अध्याहरो बहुव्रीहिवृद्ध्यै किं स्याद्विचारय ॥ 1502 ॥

तर्हि सत्सदसच्चासन्न च कालजवोपि न ।

यदा शास्त्रं समाकृष्य शयीत सलिले हरिः ॥ 1503 ॥

आरुहन् देहिदेवेषु वायुस्तस्य प्रसादतः ॥ 1504 ॥

तदा प्रागसतो जन्म सतो मृतिमथात्मनि ।

भिदां च येपणमृते स्मरन्तीश सृतेर्गताः ॥ 1505 ॥

तेषामुपविशाम्नाय ध्वनिं वैकुण्ठवासिनाम् ।

इत्याह श्रुतिगीतायां भगवान् बादरायणः ॥ 1506 ॥

मूर्तामूर्ताख्यभूतानां लयो ब्रह्मलयः किल।

कालस्य रूपमात्रं तु तदाप्यस्ति जवोस्य न ।

जरामरणयोग्यस्य जवार्हजगतः क्षयात् ॥ 1507 ॥

नित्यवेदात्मकं शास्त्रमपकृष्य स्वहृद्गुहाम् ।

प्रवेश्य शेते किल स वटपत्रपुटे प्रभुः ॥ 1508 ॥

एवं च ब्रह्मकल्पान्ते सन्ति सन्तः स्मरन्ति च ।

जगतां जन्ममरणे परमात्मनि सर्वतः ॥ 1509 ॥

भिदां चेत्यागतं स्पष्टं शयानस्य तु देहिता ।

स्मर्तृणां बहुता चार्थात् प्राप्ता शब्दार्थनिन्मते ॥ 1510 ॥

यतो जडद्वयं मुक्तौ मुक्ताश्च बहवो भवन् ।

तेनाद्वितीयता मुक्तौ शुक्तौ रूप्यमभूत्तव ॥ 1511 ॥

जीवन्मुक्तिर्हि देहादौ सति मुक्तिरियं परा ।

परान्तकालादपरो मुक्तेः कालो न यौक्तिकः ॥ 1512 ॥

तदापि भेदस्तद्बोधश्चास्ति श्रौतस्मृतेर्बलात् ॥ 1513 ॥

आत्मनीति हि सप्तम्या यद्भेदाधारतोदिता ।

अतस्तत्परमन्तत्वं विद्या तद्बोध एव हि ॥ 1514 ॥

भेददृष्ट्याभिमानेन निःसङ्गेनापि कर्मणा ।

इत्याह स प्रभुर्व्यासो मोक्षसाधनबोधने ॥ 1515 ॥

भगवत्यभिमानो हि भक्तिर्निःसङ्गकर्म च ।

निवृत्तिः सैव विद्वद्भिर्विरक्तिरिति चोच्यते ॥ 1516 ॥

भेददृष्टिं च तत्पङ्क्तौ ज्ञानाख्यां यां पुरा जगौ ।

अकाराख्यकुठारेण किं तां हन्ति सुरान्तकः ॥ 1517 ॥

तदबोधस्तवैवासीद्भेदोयमकुतोभयः ॥ 1518 ॥

द्विरूपाप्येकरूपा या रथिसारथितां व्यधात् ।

सेयं वाक्पार्थकल्पा मे त्वं चापार्थो भवोध्रुवम् ॥ 1519 ॥

अतो मम गृहान्नीता भवतोप्युत्तराकृतीः ।

गा गृह्णामि न सन्देहस्त्वं तु दुर्योधनो भवः ॥ 1520 ॥

यथैषा पुरुषे छाया एतस्मिन्नेतदाततम् ।
इति श्रुत्या यतो बिम्बप्रतिबिम्बत्वमुच्यते ॥ 1521 ॥

श्रुत्या सर्वोपसंहारि दृष्टान्तोयमुदीरितः ।
उपमा शास्त्रतत्वज्ञा मुख्यां तामुपमां विदुः ॥ 1522 ॥

छाया हि पुरुषाकारा  पुरुषाधीनचेष्टिता ।
भिन्ना च जीवे तादृत्त्वं सिद्धं दृश्टान्तशोधने ॥ 1523 ॥

छायाख्यतमसः पुंसो भिन्नता सर्वसम्मता ।
पुनराधेयतोक्त्या सा सतात्पर्यमुदीर्यते ॥ 1524 ॥

जीवस्य भृत्यता चायाच्छायशब्दप्रयोगतः ।
अनुकूलं प्रियं भृत्यं छायेत्याहुः प्रियंवदाः  ॥ 1525 ॥

प्रतिबिम्बत्वमप्यस्य तच्छब्दादेव सिद्ध्यति ।
प्रतिबिम्बं प्रतिच्छायेत्याहुर्यदनुशासने ॥ 1526 ॥

साम्यं यत्किञ्चिदेवेति दृष्टं दृष्टान्त एव हि ।
न हि ज्ञानबलादेश्च च्छाया पुरुषसम्मिता ॥ 1527 ॥

आधारता स्वामिता च तथा साकारता हरेः ।
सिद्धा पुरुषदृष्टान्तात्तच्छब्दात्पूर्णतापि च ॥ 1528 ॥

यद्विशेष्यपदं दार्ष्टान्तिकेप्यावर्त्यमेव तत् ॥ 1529 ॥

यथातथ्येत्युक्तसाम्यं शब्दसाम्येति शोभते ।
छायाख्योपमया जीवमेवैतदितिवाग्जगौ ॥ 1530 ॥

साकारस्य सदृक्षो यत्साकारः स्यान्न चापरः ।
न चेद्यथातथाशब्दौ वितथाविति मे मति ॥ 1531 ॥

बाधितं तु विना सर्वं साम्यं तौ नैव मुञ्चतः ।
किं न सर्पोपमा रज्जौ सर्पाकारेण केवलम् ॥ 1532 ॥

रूपं रूपं प्रतीन्द्याख्यहरेर्जीवस्तनौ तनौ ।
प्रतिरूपो बभूवेति स्पष्टं तद्रूपरूपिता ॥ 1533 ॥

उक्ता श्रुतौ ततोप्येतौ साकारौ तत्कृतोपमौ ।
इति सिद्धं तथा तत्र बिम्बस्येन्द्रत्वमीरितम् ॥ 1534 ॥

परमैश्वर्यरूपं तज्जीवाः सर्वेप्यतादृशाः ।
अतो विसदृशत्वं च तयैव प्रोक्तमेतयोः ॥ 1535 ॥

एवं च प्रतिरूपोयं रूपाद्विसदृशत्वतः ।
भिन्नश्छायावदित्यच्छा रत्नच्छायापि हृत्तमः ।
तिरस्करोति तेनोक्ताप्युपमाऽसकलोपमा ॥ 1536 ॥

विष्णोश्च बिम्बता तस्माद्भिन्नस्यैवात्र वर्ण्यते ॥ 1537 ॥

किञ्चित्साम्यादधीनत्वाज्जीवस्य प्रतिबिम्बता ।

विष्णोश्च बिम्बता किं न भिन्नयोरेव वर्ण्यते ॥ 1538 ॥

बिम्बस्य प्रतिबिम्बैक्यं न स्मरोक्तं न विस्मर ॥ 1539 ॥

छायापुरुषदृष्टान्ताद्बिम्बस्य परमात्मनः ।

प्रतिबिम्बात्मकाज्जीवाद्भेदस्योक्तश्रुतौ श्रुतेः ॥ 1540 ॥

प्रत्यक् पराग्भावतो हि विषयो विषयी न ते ।

मूलभाष्ये कथं तर्हि पराक् प्रत्यगभिन्नता ॥ 1541 ॥

अतः प्रत्यक् पराग्भावात् प्रतिबिम्बस्तु बिम्पतः ।

भिन्नो विसदृशत्वाच्च ज्ञाने ज्ञेयवदेव हि ॥ 1542 ॥

सत्यश्चायमबाध्यत्वात् ब्रह्मवत्प्रतिबिम्बकः ।

न हि सादृश्यमप्यस्य कार्त्स्न्येनैक्ये तु का कथा ॥ 1543 ॥

किं विमर्दो मृगमदे दर्पणप्रतिबिम्बिते ॥ 1544 ॥

परिमाणस्पर्शगन्धगुरुत्वैकत्वतोन्यता ।

व्योमाग्निपुष्पगिर्यर्कैश्चस्त्येव प्रतिरूपतः ॥ 1545 ॥

रूपमात्रेण सादृश्यं वैसादृश्यं त्वनेकधा ।

किं ते वार्यन्तरस्थाब्धस्तनितैर्वनिता हताः ॥ 1546 ॥

किञ्चिद्वैसादृश्यतो हि न गौर्गवयतामियात् ।

वैसादृश्येत्वनेकस्मिन् दृश्ये पश्यैकता कुतः ॥ 1547 ॥

वृत्तिवैचित्र्यतः शब्दमात्रेणैक्यं विरुद्धयोः ।

किं गङ्गापदसङ्गेपि तीरस्य स्यात् प्रवाहिता ॥ 1548 ॥

द्वाविमाविति विस्पष्टदृष्टेरपि तयोर्भिदा ।

द्वाविमाविति पार्श्वस्थो यतः पश्यति तौ सदा ।

अतः प्रत्यक्षतोप्यत्र भेदः सिद्धो विवेकिनाम् ॥ 1549 ॥

न द्वाविमावेक एवेत्यैक्यधीरस्ति किं क्वचित् ।

तस्मादबाधितं भेदप्रत्यक्षमभवद्धि तत् ॥ 1550 ॥

तदेवेदं मुखमिति व्यवहारस्तु साम्यतः ।

स एवायं राम इति यथा चित्रस्थिताकृतौ ॥ 1551 ॥

चित्रसिंहो यथा सिंहो मुखं प्रतिमुखं यथा ॥ 1552 ॥

कथं न दह्यते वक्त्रं तप्तवार्यन्तराविशत् ।

कथं च न व्रणं वक्रे कांस्यादर्शप्रवेशिनि ॥ 1553 ॥

करस्थे दर्पणे हस्ती यद्यस्वैर्श्वर्यतो विशेत् ।

कथं शिशुस्तं बिभृयाद्गजशालोद्यमो वृथा ॥ 1554 ॥

अष्टाशीतिसहस्राणि विस्तीर्णो योजनस्य यः ।

दर्पणेऽल्पप्रमाणेसौ कथं विशति चन्द्रमाः ॥ 1555 ॥

यदि तप्तोदकेत्युष्णे वक्रमेव विशेन्नृणाम् ।

तदा दाहो भवेत्तस्य कवोष्णादपि यस्य भीः ॥ 1556 ॥

यद्यम्बुनिचरं नृणां वक्रमेव विशेत्तदा ।

शिक्षास्यात्तस्करस्येव यद्बिबेत्यघमर्षणात् ॥ 1557 ॥

नैमित्तिकं हि तत्कार्यं निमित्ते सति जायते ।

तदपाये नाशवच्च सूर्यात्पद्मविकासवत् ॥ 1558 ॥

त्रपुसीसस्वर्णसर्पिश्चन्द्रकान्तद्रवत्ववत् ।

जलौष्ण्यवद्ग्रहग्रस्तमर्त्यसत्त्वविशेषवत् ॥ 1559 ॥

औपाधिकं प्रतिमुखं मुखे सत्येव दृश्यते ।

मुखस्यापगमे चास्य न दृष्टत्वाष्टता च न ॥ 1560 ॥

निमित्तं बिम्बसान्निध्यं कर्ता नारायणः प्रभुः ।

उपादानउपाधिश्चेत्कार्यं वार्यमिदं कथम् ॥ 1561 ॥

कार्यात्मना विवरणाद्विकारो दर्पणस्य च ।
तन्तोरिवानुमन्तव्यो हन्तव्योर्थः कथं वद ॥ 1562 ॥

बहिर्विकारशून्यस्य जठरस्य यथान्तरे ।
गुल्मग्रन्थिविकारः स्यात्तथायं च भविष्यति ॥ 1563 ॥

घटात्मना विकरणं मनसो योऽनुमन्यते ।
प्रतिबिम्बात्मनोपाधेर्विकारोयं कुतोस्य न ॥ 1564 ॥

द्वारं विना यत्प्रवेष्टुं नालं मृण्मयभित्तिषु ।
कथं कांस्यं दृढद्रव्यं तद्विशेन्मृदुलं मुखम् ॥ 1565 ॥

यदि वक्त्रं जलस्यान्तः प्रविष्टं सत् प्रदृश्यते ।
पराग्भावस्तर्हि कुतो न हि मज्जन्मुखेस्त्यसौ ॥ 1566 ॥

जलस्थं चेद्बहिर्न स्याद्बहिस्थं च जले कुतः ।
मज्जन्मुखमिवैकत्वादेकत्रैव भवेद्धि तत् ॥ 1567 ॥

यद्यादर्शे मुखं सत्ते दोषोयं दुस्तरस्तदा ।
न चेत्तदाधारताधीर्भ्रमत्वान्नैव साधिका ॥ 1568 ॥

या च दर्पणसम्बन्धाच्चक्षुषः पृष्ठतो गतिः ।
मुखस्यैवेक्षणं चोक्तं तच्चित्रमिति मे मतिः ॥ 1569 ॥

न यच्छैलान्निववृते न क्रूरादनलादपि ।

तच्चक्षुः पश्यतः स्वास्यं जलात्किलि निवर्तते ॥ 1570 ॥

यतः शिलाया योगेपि दारुप्रोतमुखः शरः ।

यथागतं तथायाति पृष्ठं पृष्ठं मुखं मुखम् ॥ 1571 ॥

ततश्चक्षुः परावृत्तिरपि स्यादीदृशी परम् ।

पुंवत्किं वक्तु मुचिता निवृत्तिः स्वेच्छया जडे ॥ 1572 ॥

एवं चेत्कुड्यकुम्भादि दृष्ट्वा दृष्ट्वा निवृत्तिमत् ।

किं चक्षुरीक्षते स्वास्यं तस्येह न तपोधिकम् ॥ 1573 ॥

किं चैवं सति तद्बुद्धेराकारः स्यादिदं मुखम् ।

इत्येव दर्पणादीनां सत्येवं दर्शनं च न ।

दर्पणे मुखमित्येवमाकारस्त्वष्टमो रसः ॥ 1574 ॥

अथार्धार्धाभिसम्बन्धाद्द्विधाभूतस्य चक्षुषः ।

धीद्वयं  यदि जायेत हीयेत तव धीस्तदा ॥ 1575 ॥

विरुद्ध दिग्द्वयस्यार्थसम्बन्धस्त्वेकचक्षुषः ।

यतो न दृश्यते नृणां ततोप्येतदसङ्गतम् ॥ 1576 ॥

किञ्चैवमपि धीर्द्वन्द्वं कथं स्यान्मनसाणुना ।

समूहालम्बनाधीश्चेत्समूहालम्बनो वदन् ॥ 1577 ॥

किञ्चावाङ्मुखपुंसोक्षि परावृत्येक्षतां मुखम् ।
तद्रुद्धबहूदूरस्थमित्रमैत्री कुतो वद ॥ 1578 ॥

किञ्चैवं सति भूषास्थरत्नलक्षेषु बिम्बितम् ।
मुखं स्वमीक्षमाणस्य धीः स्यादेकं मुखं त्विति ॥ 1579 ॥

कपोलः कल्पकस्तत्वे दोष्णो योग्यो न चक्षुषः ॥ 1580 ॥

अतःस्तत्तादृशं वस्तु लघुभूतं हि जन्यते ।
बिम्बोपाध्योः सन्निधानात् कथं स्याद्धि तदेव तत्॥ 1581 ॥

प्रतिबिम्बस्य मिथ्यात्वे सत्यबिम्बाद्भवेद्भिदा ।
प्रतिबिम्बस्य सत्यत्वे द्विस्वभावत्वतो भिदा ॥ 1582 ॥

कथं च प्रतिबिम्बस्य मिथ्यात्वं यौक्तिकं विदाम् ।
न ह्यस्ति बाधिका नायं प्रतिबिम्ब इति प्रमा ॥ 1583 ॥

दृष्टा बाधितकार्यस्याप्यन्यथानुपपत्तितः ।
कल्प्यं स्यात्कारणं सर्वं यथेशः कलमाङ्कुरात् ॥ 1584 ॥

अस्तूपाधिविकारोसौ तद्रूपरसादिवत् ।
निमित्तमात्रजन्यो वा भावोप्येकोस्त्वभाववत् ॥ 1585 ॥

उपादानस्य चादृष्ट्या कार्यदृष्ट्या च तादृशी ।
अवस्था कल्प्यतेऽभावे भावे किं न तथा विधे ॥ 1586 ॥

सर्वथा दृष्टकार्यस्य ह्यपलापो न युज्यते ।
न जेदीशप्लुतं त्याज्यं नारिकेलफले जलम् ॥ 1587 ॥

अतः स्वाप्नपदार्थस्य प्राहुः संस्कारजन्यताम् ।
न स्वप्न इति बाधस्याभावदर्थक्रियाकृतेः ॥ 1588 ॥

मुखशब्दः प्रतिमुखे सोपचारः कथं न ते ।
मुखं प्रतिस्थितं यत्स्यात्तद्धि प्रतिमुखाभिदं ॥ 1589 ॥

कथं तदेव च मुखं तस्मात्प्रत्यक्पराक् स्थितेः ।
संज्ञाभेदात् कर्मभेदात् बिम्बोन्यः प्रतिबिम्बतः ॥ 1590 ॥

वादिराजाख्ययतिना साधिता युक्तिमल्लिका ।
भेदसौरभसर्वस्वमथ विष्णोर्न्यवेदयत् ॥ 1591 ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रिमद्वादिराजतीर्थ श्रीमत्पूज्यचरणविरचितायां युक्तिमल्लिकायां भेदसौरभम् सम्पूर्णम् ॥

# विश्वसौरभं

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ 1 ॥

विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ 2 ॥

इयं श्रुतिः पञ्चभेदनित्यतासत्यते स्फुटम् ।
सयुक्तिकं साधयितुं प्रावर्तत किल क्रमात् ॥ 3 ॥

यदाह पञ्चद्दशतौ वर्गे वेति स पाणिनिः ।
तेन वर्गे निपातौ द्वौ वाशब्देन तथापरम् ॥ 4 ॥

अनुशास्ति न चेत्तत्स्यादव्ययं सव्ययं किल ।
स च प्रयोगबलतः पञ्च इत्येव गम्यते ॥ 5 ॥

तत्पञ्चानां समूहोपि पञ्चोभूदनुशासनात् ।
ते च पञ्च प्रसिद्धत्वाद्भेदा वेदान्तवेदिषु ॥ 6 ॥

उपसर्गोपसर्गार्थज्ञानत्वाद्विशिनष्टि तम् ।
अतः पञ्चविधो भेदः प्रपञ्चोभूद्विचारणे ॥ 7 ॥

तं भेदवर्गं सैषा वागाजुहाव तयाख्यया ।
तत्पञ्चभेदवर्गोभूत् प्रपञ्चोयं श्रुतौ श्रुतः ॥ 8 ॥

किञ्च प्रपञ्चरूपं च तं पञ्चं सुप्रपञ्चयन् ।
श्लोकः प्रपञ्चमाहेति प्राञ्चः सञ्चोदयन्ति नः ॥ 9 ॥

किञ्चेदं द्वैतमित्यत्रैवोत्तरार्धे स्वयं श्रुतिः ।
परामृशति यद्भेदं तेनादावपि भेदवाक् ॥ 10 ॥

प्राग्भेदाप्रस्तुतौ द्वैतपदेनेह पुनः श्रुतिः ।
कथं तमेवानुवदेदनुक्तमनुवक्ति कः ॥ 11 ॥

वादानुवादवेकस्येत्याहुः प्राहुणिका अपि ।
इदमित्युदितार्थस्य परामर्शो तु किं पुनः ॥ 12॥

अतः प्रपञ्चभेदोऽभूच्छ्रुतेर्हृदयशोधने ।ऑ
व्याख्यां तत्व्यापयेद्भिक्षु भेर्याचार्यशिरोमणेः ॥ 13 ॥

त्वं च द्वैतं भिदां ब्रूषे तथाऽद्वैतं तथाऽभिदा ।
अर्थात् प्रपञ्चोपि भेदः किं शब्दं तु प्रमुञ्चसि ॥ 14 ॥

वागीश एव वागर्थावेकीकुर्यान्न चापरः ।

न चेत् विकल्पशब्देन भेदमेव कथं बुधाः ।

प्रावक्ष्यनुत्तरश्लोकेनावक्ष्यन्यदिदं पुरा ॥ 15 ॥

समाख्या हि महाव्याख्या प्रायपाठे तु किं पुनः ।

अर्थान्तरायुक्तितश्च भेदार्था वाङ्गसंशयः ॥ 16 ॥

यदि प्रपञ्चो विद्येत विवर्तेत तदा किल ।

इयमर्थं महानर्थकरं कः पण्डितो वदेत् ।

ब्रह्मैवोन्मूलयेद्यस्मात्तर्कोयमति कर्कशः ॥ 17 ॥

बाधो निवृत्तिशब्दार्थौ विद्यमानत्वमद्भुतम् ।

व्याप्नोति बाध्यतां नात्र संशयः किल धीमताम् ॥ 18 ॥

एवं च ब्रह्मणो हर्त्री किं न व्याप्तिरियं तव ।

विपर्ययो महानासीत्तर्कस्यास्य विपर्यये ॥ 19 ॥

अबाध्यत्वेन नास्तित्वं यन्नास्तिकमतेपि न ।

अतः सर्वैश्चधात्वर्थौ वाच्योन्योत्र मयैव न ॥ 20॥

उत्पत्तिनाशौ यद्याप्तौ निवृत्तिश्च विनाशनम् ।

अतो व्यापकशक्त्यैव व्याप्तोत्पत्तिरिहागता ॥ 21 ॥

यतः प्रागसतः सत्यैवोत्पत्तिर्धातुतोपि तत् ।

यथा सत्तार्थधात्वर्थौ भूतिर्जन्म विदां मते ।

तथेह सत्तार्थधातोरर्थोप्युत्पत्तिरेव हि ॥ 23 ॥

तस्मादुत्पत्तिरत्रार्थो यद्धात्वर्थोप्यनेकधा ॥ 24 ॥

एवं च नित्य जडगो जीवगो ब्रह्मगश्च यः ।

भेदवर्गः प्रपञ्चाख्यो यद्युत्पद्येत तर्ह्यसौ ॥ 25 ॥

विनश्येन्न च नाशोस्ति तस्मान्नोत्पद्यते च सः ।

इति तन्नित्यतामाह श्रुतिर्नास्त्यत्र संशयः ॥ 26 ॥

इत्यर्धे नित्यतामुक्त्वा वक्त्यर्धे सत्यतां च सा ॥ 27 ॥

मात्रालेशास्तद्विहीनः स्यादमात्रो विवेकिनाम् ।

मायालेशोज्झितं वस्तु मायामात्रं ततोभवत् ॥ 28 ॥

उक्तद्वैतं च मायाया लेशतोप्युज्झितं किल ।

अतस्तद्ब्रह्मवद्वैतं सच्चाभूत्परमार्थतः ॥ 29 ॥

माया हि कल्पनामूलं तस्या लेशोपि यस्य न ।

तद्द्वैतं परमं तत्वं किं न स्याच्छब्दशोधने ॥ 30 ॥

मिथ्यात्वार्थं तु पूर्वोक्तं नित्यत्वं सह ते न ते ।

उत्तरश्लोकतर्कोपि न्यक्करोत्यतिकर्कशः ॥ 31 ॥

एवं सा द्वैतसत्यत्वं साधयित्वा सहेतुकम् ।

अद्वैतः सर्वभावानामित्याद्युक्तिं स्वरोधिनीम् ।

अर्थान्तरे नेतुकामा पुनराह श्रुतिः किल ॥ 32 ॥

यदद्वैतं तत्र तत्र श्रूयते स्मर्यतेपि वा ।

सर्वोत्तमत्वात्परममर्थं हरिमपेक्ष्य तत् ॥ 33 ॥

यतो ल्यब्लोपतः प्राप्ता पञ्चम्यस्ति स्थले स्थले ।

अतः सार्थान्तरं ब्रूयादित्युक्त्वा विरराम च ॥ 34 ॥

पुनः कुवादिनां प्रोक्तकुतर्कच्छेदनाय सा ।

तर्कमुद्रामुपाश्रित्य प्रतिब्रूते परान् किल ॥ 35 ॥

विकल्पनामा भेदोयं वस्तुवैचित्र्यकल्पनात् ।

संवृत्या मायया वाऽज्ञानेन वा येनकेनचित् ॥ 36 ॥

यदि कल्पित एव स्याद्बाधाख्यविनिवृत्तिमान् ।

तदास्यादुपसर्गोसौ यतो बाधमसाधयत् ॥ 37 ॥

यत्प्राचीनोपसर्गोत्र नञअर्थोऽभाववाचकः ।
विशेषेण निवृत्तिर्या सोत्यन्ताभाव एव हि ॥ 38 ॥

न च बाधोस्य नित्यस्य तेनासौ कल्पितोपि न ।
इति सा भेदसत्यत्वद्रोहिणां प्राहिणोद्भयम् ॥ 39 ॥

अथवा भेदतत्वेस्मिन् भिन्नाभिन्नादिरूपकः ।
विकल्पो यदि केनापि कल्पितः स्यात्कुबुद्धिना ॥ 40 ॥

अद्वैते तस्य दुस्तत्वे विनिवर्तेत तर्हि सः ।
विनिवृत्तिर्यतः प्राहुः परावृत्त्यागतिं बुधाः ॥ 41 ॥

इति वार्थमभिप्रेत्य दुस्तर्कं धिक्कार सा ।
अतः खण्डनकारस्य खण्डयामास खण्डनम् ॥ 42 ॥

बोधोयं तर्हि सर्वस्य कुतो नासीदितीरिते ।
तत्र हेतुमुपादातुं पुनः प्रावर्तत श्रुतिः ॥ 43 ॥

गुरूपदेशाज्ज्ञातेर्थे सोयं वादः सतां हृदि ।
स्थिरीभवति तच्चित्ते नाद्वैतं विद्यते किल ॥ 44 ॥

गुरूपदेशात्तत्वार्थे त्वज्ञाते स्वस्वबुद्धिभिः ।
यस्मिन् कस्मिंश्चिदर्थे च ज्ञाते सति दुरात्मनाम् ॥ 45 ॥

तेषां हृदि तमो दातुं सोयं वादस्तु तिष्ठति ।

यः पूर्वं खण्डने प्रोक्तो न द्वैतं विद्यते किल ॥ 46 ॥

इत्यर्थद्वयमप्युत्तरार्धेसौ वाग्जगौ किल ।

भेदसौरभसर्वस्वं नित्यं सत्यमतोऽभवत् ॥ 47 ॥

धर्मस्य धर्मिमूलत्वाज्जीवनित्यजडात्मकम् ।

विश्वसौरभसर्वस्वमपि तादृगभूद्बलात् ॥ 48 ॥

एवं च प्रकृतेर्नित्यसत्यभावे समर्थिते ।

तदुपादानकं सर्वं सत्यमासीदिदं जगत् ॥ 49 ॥

अतः श्रुतिरियं रम्या देहलीदीपवद्बभौ ।

यतः स्थानद्वयस्यार्थमुदमीमिलदुच्चकैः ॥ 50 ॥

श्रीमध्वमुनिचन्द्रस्य ज्योत्स्ना कृत्स्ना जगत्त्रये ।

मद्धृद्व्योम्नस्य सद्धाम्नि व्याप्तेयमपि चन्द्रिका ॥ 51 ॥

दयाशीलेन कोलेन पालेनातिबलीयसा ।

मह्यैद्रुह्यन्मदान्मह्यंस्तस्करः प्रतिचस्करे ॥ 52 ॥

तिरो (धान) भावकृतो हन्ता सोत्यन्ताभावकारिणम् ।

रक्षो रूक्षेभहर्यक्षो न रक्षेदिति मे मतिः ॥ 53 ॥

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।

अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥ 54 ॥

एतां दृष्टिमवष्टभ्य नष्टात्मनोल्पबुद्धयः ।

प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ 55 ॥

इति गीतासु हरिणा जगन्मिथ्यात्ववादिनाम् ।

जगतः क्षयकृत्ता च जगतोऽहितता तथा ॥ 56 ॥

उक्ता सोपि जगत्कर्ता हर्ता चोत्पथवर्तिनाम् ।

अतोतिभीतो यातोहं मतं सत्यत्ववेदिनाम् ।

वेदानुमोदिनां वैरिभेदिनां तत्ववादिनाम् ॥ 57 ॥

भवतीति हि भूरेषा तदभावः कथं वद ॥ 58 ॥

देहाभावे कथं वाक्ते तस्य सत्त्वेपि सा कथम् ।

निमित्तं कालकर्मादिकर्ता नारायणः प्रभुः ॥ 59 ॥

उपादानं तु सैवैका प्रकृतिस्त्रिगुणात्मिका ।

इति श्रुतिपुराणाद्यैर्जगत्सृष्टिरितीर्यते ॥ 60 ॥

मायाख्या प्रकृतेरस्ति तेन मायामया भिदा ।

प्राकृताख्या च जगतः प्रोच्यते तत्र तत्र हि ॥ 61 ॥

ब्रह्मज्ञाननिवर्त्यत्वमेषां न श्रूयते क्वचित् ।

अतो मिथ्यात्ववप्येषामाग्रहादेव केवलम् ॥ 62 ॥

मयाध्यक्ष्येण प्रकृतिः सूयते सचराचरम् ।

इति प्रकृतिकार्यत्वं गीतोक्तमनुसंस्मर ॥ 63 ॥

अज्ञानोपादानकत्वाभावात्तन्न मृषा जगत् ।

अनाद्यनन्तकालेषु नैवास्योपरमः किल ।

कथं मिथ्यात्वमस्य स्याद्भ्रान्तिसिद्धत्वमेव वा ॥ 64 ॥

एवमेतदनाद्यन्तं भूतसङ्घातकारकम् ।

अनादिनिधनं लोके चक्रं सम्परिवर्तते ॥ 65 ॥

इति भारतवाक्येन ह्यनाद्यन्तत्वमुच्यते ।

अनन्तत्वादबाध्यं च जगद्ब्रह्मवदेव हि ॥ 66 ॥

अतोवसानं तन्नित्ये न ब्रह्मणि जगत्यपि ।

एकं स्वरूपते नित्यं अन्यन्नित्यं प्रवाहतः ॥ 67 ॥

स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ॥ 68 ॥

मिथ्यासृष्टिकथा येयं सान्येषां कल्पना किल ।

इत्यन्यमतमाक्षिप्य श्रुतिः स्वमतमाह च ॥ 69 ॥

इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः ।
स्वेच्छयैव प्रभुः सर्वं सृजतीशो न मायया ॥ 70 ॥

विशिष्ट निश्चितं सृष्टौ येषां तेषां त्विदं हृदि ।
इति स्तुत्योत्तरार्धोक्तमेव स्वमतमाह सा ॥ 71 ॥

सृष्टौ निश्चयवन्तो ये पक्षमेनं वदन्ति ते ।
सन्दिग्धमनसस्त्वन्यान् प्रश्नानाचक्षते किल ॥ 72 ॥

यतः पक्षान्तरे सर्वत्रान्य इत्याह सा श्रुतिः ।
कालचिन्तकपक्षत्वमेकपक्षे जगाद च ॥ 73 ॥

अतो विपक्षास्ते सर्वे स्वपक्षानेति शंसति ।
अत्र कर्तुः प्रभुत्वोक्त्याप्यभिप्रैति स्वपक्षताम् ॥ 74 ॥

यतः फलविकल्पेपि सर्वान् पक्षानुपेक्ष्य सा ।
देवस्यैष स्वभावोयमाप्तकामस्य का स्पृहा ॥ 75 ॥

इत्येकमेव स्वमतं निर्णिनाय ततोपि तत् ॥ 76 ॥

का स्पृहेति यतः क्रीडाभोगपक्षौ सहेतुकम् ।
अचिक्षेप स्वभावेन कर्तुः पूर्णास्य च प्रभोः ॥ 77 ॥

का फलस्य स्पृहा तेन पूर्वौ द्वौ पूर्वपक्षिणाम् ।
प्रभुत्वदूषकौ विष्णोर्न मत्पक्षावुभावपि ।
तृतीय एव पक्षो मे प्रभुता पोषकः प्रभोः ॥ 78 ॥

मामानयत्तमोजिद्यः पुत्रायोपदिदेश च ।
परार्थकर्ता कृत्यज्ञः स्वार्थकृत्यसदोज्झितः ॥ 79 ॥

कोन्वर्थस्तस्य तेनाभूत् पूर्णः स्वफलवान्न तत् ।
अन्वभावि मयैवेदं तेनानुभवबाधितौ ॥ 80 ॥

तौ पूर्वौ नैव पक्षौ मे किन्तु गन्तुस्तमांसि तौ ।
इत्यर्थः प्रबलाक्षेपलभ्यो ह्यत्रोपलभ्यते ॥ 81 ॥

अतः फलपरीक्षायामेकस्यैव स्वपक्षताम् ।
साभिप्रैति तथा पूर्वत्राप्येकस्य स्वपक्षताम् ॥ 82 ॥

देवस्य प्याप्तकामस्य प्रागुक्ता प्रभुतोचिता ।
अतः समाख्यया पक्षौ तावेवाभिमतौ जगौ ॥ 83 ॥

स्वभावतोक्तितश्चान्ते मायासृष्टिं निषेधति ।
अत्रोक्तं निस्पृहत्वं च तथेशस्याप्तकामता ॥ 84 ॥

सृष्टेरिच्छामात्रतोक्त्या यत्तत्रापि निरुच्यते ।

अतोपि पक्षौ द्वावेतौ श्रुतेः स्वमततां गतौ ॥ 85 ॥

नानाजीवादिभावेन क्रीडाभोगादि लब्धये ।

यतः सृष्टिपरीक्षायामपि पक्षद्वयं प्रभोः ॥ 86 ॥

सृष्टिमाह ततस्तच्च पक्षद्वयमियं श्रुतिः ।

फलस्याक्षेपिकान्यायसाम्यादाक्षिपदेव हि ॥ 87 ॥

का स्पृहेति श्रुतिस्तस्मात् स्थानद्वितयगौ च तौ ।

द्वौ द्वौ पक्षौ फलापेक्षापक्षपर्यवसायिनौ ।

धिक्कृत्य तत्र चात्रापि तृतीयं पक्षमाददे ॥ 88 ॥

चतुर्मुखस्य वाणीव वाणीयं शोभतेतराम् ।

एकाकारापि या पक्षचतुष्कं शुष्कमातानोत् ॥ 89 ॥

इच्छामात्रमितीशस्य सृष्टीच्छैवास्ति केवलम् ।

न फलेच्छेत्याह तत्तान् पक्षानेषाप्यदूषयत् ॥ 90 ॥

अतः स्थानद्वयगतावप्येकार्थपरायणौ ।

शब्दौ विधिप्राणसमौ सत्यं लोकमरक्षताम् ॥ 91 ॥

किञ्चाविकाररूपस्य ब्रह्मणो जगदात्मना ।

विकारापादकं विश्वोपादानत्वमतं पुरा ।

अन्य इत्यन्यपक्षत्वं वदन्ती नान्वमंस्त सा ॥ 92 ॥

विभूतिं प्रसवं त्वन्य इति यच्छ्रूयते श्रुतौ ।
विविधाकारभवनं विभूतिर्हि विदां मते ॥ 93 ॥

सर्वमिथ्यात्ववादं च मध्ये साति विगर्हितम् ।
सोपहासं दूषयितुं पुनराहेति मे मतिः ॥ 94 ॥

अन्यैरित्यन्यमततां यदत्राप्याह सा स्फुटम् ।
विकल्पितत्ववाचा च सर्वे सन्दिहते परम् ॥ 95 ॥

नैव निर्णयवन्तस्त इति तानाह सा श्रुतिः ।
विरुद्धकल्पनारूपो विकल्पः संशयो यतः ॥ 96 ॥

यतः स्वप्नवदित्येको वक्ति मायावदित्यपि ।
अन्यो रज्जुभुजङ्गीवदिति वक्ति तथा परः ॥ 97 ॥

एवं दृष्टान्तविभ्रान्त स्वान्तास्ते सर्वखण्डने ।
दृष्टान्तं क्वाप्यपश्यन्तः सदा संशेरते किल ॥ 98 ॥

अन्ये तु वादिनो विश्वसत्यत्वद्रोहिणो न हि ।
इति तांस्तानुपेक्ष्यन्ते श्रुतिः स्वमतमाददे ॥ 99॥

यतोन्यमतताशंसिपदं नात्र प्रदृश्यते ।

अतः स्वमतमेवैतदिति मन्यामहे वयम् ।

विनिश्चितत्वस्तुत्या च तथान्ते कथनादपि ॥ 100 ॥

कालचिन्तकपक्षं तु स्वानुकूलत्वतः श्रुतिः ।

पुनर्जगाद सिद्धान्तः स एवेति मतिर्मम ॥ 101 ॥

यतः स्वप्नादिवैधर्म्यं जगतः सूत्रकृत् स्वयम् ।

स्पष्टमाह ततोप्येष पक्षो न श्रुतिसूत्रयोः ।

मतस्तत्पूर्वपक्षोसावासीन्नास्त्यत्र संशयः ॥ 102 ॥

तस्मात् स्वप्नादिसारूप्यान्मायासृष्टिं वदन्नयम् ।

मायावादि श्रुतेर्हार्दवेदी नैवाभवत्कुधीः ॥ 103 ॥

अतः सर्वस्य सत्यत्वसिद्धान्तो भूच्छ्रुतेर्बलात् ।

मिथ्यात्वं पूर्वपक्षत्वादुपेक्ष्यमिति च स्थितम् ॥ 104 ॥

इच्छामात्रे तु सा सृष्टिर्यस्मादव्यवधानतः ।

स्यादेव तत् क्षणे तस्मात्तां तत्त्वेन श्रुतिर्जगौ ॥ 105 ॥

यथा सत्या हरेरिच्छा तथा सृष्टिश्च सा सती ।

इति प्रबोधनायापि तां तत्वेन जगौ श्रुतिः ॥ 106 ॥

प्रभोः सकाशाद्यासृष्टिस्तस्यां सृष्टावियं स्थितिः ।

प्रभोः सकाशाद्या सृष्टिर्मत्स्यकूर्मादिरूपिणी ॥ 107 ॥

सा त्विच्छामात्रमेवेति भावाद्वा प्राह तां तथा ।

द्वयोरप्यनुकूलाय मन्ये सामान्यकीर्तनम् ॥ 108 ॥

इच्छाधीनं यतः सर्वमुपादानादिकारणम् ।

अत तस्याः प्रधानत्वात् सैव सृष्टिरितीरितम् ॥ 109 ॥

स्वाज्ञानतो जगत्सृष्टिं तस्याः स्वानिष्टरूपताम् ।

न्यवारयत् प्रभुपदमिच्छामात्रपदं च तत् ॥ 110 ॥

स्वाज्ञानं च प्रभुत्वं च यतो नैकत्र युज्यते ।

यतो नेच्छति सर्वोपि स्वानिष्टं किमुत प्रभुः ।

तस्मात् प्रकृतितः सृष्टिर्जीवानां सुखदुःखदा ॥ 111 ॥

यतश्च का स्पृहेत्यन्ते स्वफलं च निषेधति ।

ततः स्वविफलाप्त्यैतां सृष्टिं कः कोविदो वदेत् ॥ 112 ॥

आप्तकामत्वमपि च कथं सङ्गच्छते तदा ।

अतः श्रुतिपदार्थज्ञो न तद्व्याख्यातुमर्हति ॥ 113 ॥

सत्यपीताम्बरालाभे मायापीताम्बरं सृजेत् ।

लब्धे तु सत्यवसने मायासृष्टौ यतेत कः ॥ 114 ॥

मायासृष्टिं निराचष्चे प्रभुत्वोक्तिरतः प्रभोः ।

स्वप्नमायासरोपेति ततोपि स्वमतं न तत् ॥ 115 ॥

यतश्च सूत्रे वैधर्म्याच्च न स्वप्नादिवत्त्विति ।

स्वप्नवैधर्म्यमुदितं तस्मादपि न तन्मतम् ॥ 116 ॥

यतश्च पदशक्त्या तन्मतं श्रुतिरगर्हयत् ।

ततोप्यन्यमतं मन्ये नान्यत्वोक्त्यैव केवलम् ॥ 117 ॥

यतः स्वभावतैवोक्ता कर्तृत्वादेः परात्मनि ।

स्वभावस्यानपायादियुक्त्या तन्नित्यतोदिता ।

अज्ञानोपाधिकत्वं च तद्धर्माणां निवारितम् ॥ 118 ॥

तेन लक्षणताटस्थ्यं नानुमेने परात्मनि ।

देवसम्बन्धितोक्त्या च नान्वमंस्त तदन्यगं ॥ 119 ॥

यच्च सृष्ट्यादिकरणक्रियैवोक्ता स्वभावतः ।

तत्क्रियानित्यता चोक्ता शक्तिव्यक्त्यात्मता हरौ ॥ 120 ॥

यतः क्रियानित्यतोक्त्या कार्यस्यापि प्रवाहतः ।

नित्यत्वमुदितं सर्वलयं तेन न्यवारयत् ॥ 121 ॥

भाविबाधकशङ्कां च तत एव निराकरोत् ।

पारमार्थिकसत्यत्वं जगतस्तेन सा जगौ ॥ 122 ॥

तस्मात् सृष्टेः स्वभावत्वकीर्तनात् सृज्यवस्तुतः ।
स्वभावतैव प्राप्नोति तद्भावो न कर्हिचित् ॥ 123 ॥

स्वेच्छयैव च सृष्ट्युक्तेः कर्तृतां घटकर्तृवत् ।
अहोपादानतां तेन प्रत्याह परमात्मनः ॥ 124 ॥

तदपि प्रभुतामाह यतश्च परमात्मनः ।
सर्वतोत्यन्तभेदं च सर्वेशत्वं च वक्ति तत् ॥ 125 ॥

स्वप्नमायासरूपेति सृष्टिं वाचा वदन्ति ते ।
अर्थतस्तद्विरोधात्तैः कल्पिता जगतो जनिः ॥ 126 ॥

स्वप्नेपि द्रष्टृ देहोस्ति शय्याभूवसनादिकम् ।
अन्ये च जाग्रतः सन्ति स्वाप्नं तन्नास्ति किञ्चन ॥ 127 ॥

मायायां च स्वदेहोस्ति चक्षुरादीन्द्रियाणि च ।
भूर्द्रष्टारश्च ते सर्वे मायिकं नास्ति किञ्चन ॥ 128 ॥

किञ्च मायास्वरूपत्वं कथमस्ति विचार्यताम् ।
मायया कल्पितं वस्तु मायाकालेपि नास्ति हि ॥ 129 ॥

भ्रान्त्या प्रतीयतेऽस्तित्वं तत्कार्यस्यापि विभ्रमः ।

जलं च मिथ्या परितः स्यन्दनं पानमेव च ॥ 130 ॥

मिथ्यैव दृश्यते पानजनितं तु सुखं तदा ।

साक्षिणा वीक्ष्यते नैव बाधात्पूर्वं च किञ्चन ॥ 131 ॥

जगतस्तत्सरूपत्वे ब्रह्माज्ञानात्पुरा जलम् ।

जलकार्यं च पानान्तं मृषास्तु जलपानतः ।

तन्निवृत्तिः सुखं चात्र साक्षिणा वीक्ष्यते कथम् ॥ 132 ॥

बाधदूरत्व सामीप्यान्न विशेषोस्ति कश्चन ।

बाधात् प्राक् भ्रान्तिकाले स्यामित्थ्यात्वे समतोभयोः ॥ 133 ॥

सत्यज्ञानोद्भवं सौख्यं मायायामपि दृश्यते ।

मिथ्यार्थजनितं सौख्यं नैव तत्रास्ति किञ्चन ॥ 134 ॥

अतो मायाविरूपत्वाज्जगत्सत्यमभूद्बलात् ॥ 135 ॥

सत्यस्य सुखहेतुत्वं मिथ्याभूतस्य नेति च ।

अन्वयव्यतिरेकाभ्यां यतः सिद्धमतोपि च ॥ 136 ॥

इत्थं सत्यस्य जगतः सृष्टेर्मिथ्यात्वमाग्रहात् ।

विरुद्धं कल्पितं यस्मात्तस्मात्सृष्टिर्विकल्पिता ॥ 137 ॥

अतः स्वोक्तविरुद्धोक्त्या न मत्पक्षो भवेदयम् ।

अन्येषामेव पक्षोसौ नाहं व्याहतभाषिणी ॥ 138 ॥

तस्मान्निदर्शनाभावत्सर्वमिथ्यात्ववादिनः ।

दुरदृष्टानुसारास्ते नैव दृष्टानुसारिणः ।

पदानां शोधनेनैवं श्रुतेर्भावोवसीयते ॥ 139 ॥

अतः सर्वं जगदिदं सत्यसङ्कल्पतः प्रभोः ।

जायमानं सदा सत्यमित्याहोत्तरवागियम् ॥ 140 ॥

स्वप्नमायासरूपत्वेत्वीषन्मिथ्या जगद्भवेत् ।

सर्वमिथ्यात्ववादोयं न श्रौतो नापि यौक्तिकः ।

इत्याह पूर्वावाक्ये सा शब्दशब्दार्थवेदिनाम् ॥ 141 ॥

वागीशयोग्या वागेषा यदनेकैर्मुखैः स्वकैः ।

प्रतिवक्ति परान् सर्वान् वक्ति विष्णोर्गुणानपि ॥ 142 ॥

एवं च सर्वमिथ्यात्ववादस्ते नैव शोभते ।

विश्वसत्यत्ववादो नः श्रुत्युक्तः शोभतेतराम् ॥ 143 ॥

स्वप्नमायादिदृष्टान्तैर्जगन्मिथ्यात्वसाधनम् ।

उक्तश्रुत्या बाधितत्वान्नैव शक्यं परस्य तत् ॥ 144 ॥

शश्वद्यथार्थतोर्थान् व्यदधात्परिभूः कविः ।

इत्यर्थानां यथार्थत्वं श्रुतिरन्या जगाद ह ॥ 145 ॥

अतो यथार्थसृष्ट्युक्तेर्भ्रमजत्वकथा गता ।

शाश्वतत्वोक्तितश्चास्य बाधोभूद्बाधितस्तव ॥ 146 ॥

विश्वं सत्यमिति श्रुत्या सत्यत्वं स्पष्टमुच्यते ।

प्रमाणसिद्धतां चास्य प्रमिनन्तीति सा जगौ ॥ 147 ॥

अतः प्रमाणसिद्धत्वाद्ब्रह्मवत्परमार्थसत् ।

जगदेतदभूच्छ्रौतयुक्त्या स्पष्टश्रुतेरपि ॥ 148 ॥

सोपपत्तिकवाक्यत्वाद्विश्वसत्यत्ववागियं ।

स्वार्थे तात्पर्ययुक्तैव चाल्पा नोक्तिशतैरपि ॥ 149 ॥

व्यावहारिकतावाणीं वाणीयं धिक्करोति ते ।

कपोलकल्पिता यत्सा स्वयं सर्वैरकल्पिता ॥ 150 ॥

द्विसम्बन्धित्वकथनादेकाज्ञानेन कल्पनाम् ।

निवारयति मिथ्यात्वमपि तेन न्यवारयत् ॥ 151 ॥

भ्रान्तोर्थो न बहोरेको दृश्यो भवति तन्मते ।

मुक्तेरमुक्तितापत्त्या यद्बहोः सत्तदात्मवत् ॥ 152 ॥

यतश्च तन्मते सुप्तौ लीनं देहादिकं तदा ।

द्रष्टुर्द्रष्टुर्दृष्टितोन्यः कल्प्यः कल्प्यः क्षणे क्षणे ॥ 153 ॥

सदा यद्यस्य तत्तस्य व्रतमित्युच्यते बुधैः ।
एवं च सत्यजगतः कर्तृता नियताभवत् ॥ 154 ॥

अतो यावद्ब्रह्मभावित्वाच्च तत्सुखवज्जगत् ।
परमार्थसदेवासेत्सर्वं चानुमयामुया ॥ 155 ॥

आप इत्युक्तितो लोकपावनीभूतदेवताः ।
अदुष्टकरणोपेता न भ्राम्यन्तीत्यसूचयत् ॥ 156 ॥

तस्माददुष्टकरणजन्यत्वात्तद्दृशिः प्रमा ।
अन्त्यप्रमावदित्युक्तं साधकं चाप्यशोधयत् ॥ 157 ॥

प्रमिनंतीत्युक्तिरेव व्यावहारिकताप्रथाम् ।
न्यवारयद्यतो बाधशून्यार्थानुभवः प्रमा ॥ 158 ॥

एवं च बाधशून्यत्वाज्जगच्च ब्रह्मवत् सदा ।

अव्यावहारिकं चासीदार्थिक्यानुमयामुया ॥ 159 ॥

यथा घटपटद्वित्वं नैवं ब्रह्मस्वरूपयोः ।
द्वितेत्यपि युवोरित्याद्युक्तिव्यत्यासतो जगौ ॥ 160 ॥

चनेति वैदिकपदान्नान्यथात्वं कथञ्चन ।
इत्यवधारयत् स्वार्थमनेकार्थं यदव्ययं ॥ 161 ॥

सार्वज्ञशास्तचित्तत्वपराभावनशक्तिभिः ।
स्वातन्त्र्येण च पूर्वावाक्तत्रेज्ञानं चकर्तिहि ॥ 162 ॥

तेनाज्ञानमूलवस्तुत्वाच्चार्था ब्रह्मवत्सदा ।
परमार्था इति स्वोक्ते युक्तिं च प्रत्यपीपदत् ॥ 163 ॥

किञ्चादिष्ठानयाथात्म्यद्रष्टृदृश्यत्वतश्च सत् ।
जगद्ब्रह्मवदेवेति युक्तिं वक्ति कवेर्गुणः ॥ 164 ॥

अनीदृग्जतो ब्रह्मभेदं सर्वेशतां गुणान् ।
दोषोद्धूननशक्तिं च वक्ति सर्वपदावली ॥ 165 ॥

अल्पज्ञत्वविहीनत्वात्सावद्यधिषणोज्झितेः ।
अपूर्णयत्नशून्यत्वादन्याधीनेच्छता च्युतेः ॥ 166 ॥

जीवाभिन्नो निर्गुणश्च भावाज्ञानसमावृतः ।
अल्पेश्वरश्च घटवद्यस्मान्नासीन्महाप्रभुः ॥ 167 ॥

तस्मच्छ्रुतिद्वयं युक्तिव्रातमण्डनमण्डितम् ।
अलङ्करोति वाङ्नारीवदनं बुधसंसदि ॥ 168 ॥

यच्चिकेतेति वाक् चाह सत्यमेतज्जगत्त्रयम् ॥ 169 ॥

अमोघत्वोक्तितश्चार्थक्रियाकारित्वयुक्तितः ।

ब्रह्मवत्सत्यता सर्वस्यापि साध्येत्यसूचयत् ॥ 170 ॥

स्पृहाविशेष्यतोक्त्या च सत्यत्वं प्रत्यबोधयत् ।

स्पृहणीयं यतो मोक्षसुखं सत्यं परस्य च ॥ 171 ॥

विशिष्टकर्तृतायां च कर्तृत्वं चित एव हि ।

किं कुम्भकारो मृद्दण्डौ यद्विशिष्टः करोत्यसौ ।

अतो निरुपमा ब्रह्मोपमा सत्यत्ववादिनाम् ॥ 172 ॥

जेता दाता चिकेतेति ब्रह्मणोर्थक्रियाकृतिः ।

त्रिधापि बोधिता यस्मात्तस्माद्ब्रह्मोपमा मम ॥ 173 ॥

मोघत्वोक्तेरयुक्तेश्च जगत्यर्थक्रियाकृतिः ।

अनुक्तेच्छाखिलैर्मोघपदमेव नञःपदम् ॥ 174 ॥

सुशोभिपदविन्यासव्यत्यासं श्रुतिसुन्दरी ।

कदध्वनि सहेतापि न सहेत सदध्वनि ॥ 175 ॥

न चेत् स्पार्हत्ववाक्कुप्येदप्येति च मतं तव ।

स्तुतिश्रुतिरियं कुप्येत्तृप्येद्भुक्त्या कथं भवान् ॥ 176 ॥

प्रागुक्तश्रुतियुग्मार्थतिग्मभानू च कुप्यतः ।
अतो नञोपकर्षे स्यादपकर्षो महांस्तव ॥ 177 ॥

एकस्यामुपपत्तौ च वाक्यं तात्पर्यवत्किल ।
बहूपपत्तियुक्तेषु महातात्पर्यमेषु तत् ॥ 178 ॥

अतः श्रुतिमहातात्पर्यस्य गोचरभावतः ।
ब्रह्मवज्जगदेतच्च परमार्थसदेव हि ॥ 179 ॥

युक्तीः पश्य श्रुतीः पश्य मिथ्यादृष्टिं परित्यज ।
सत्यं वद जगत्सर्वं भुक्तिं मुक्तिं यदीच्छसि ॥ 180 ॥

सद्युक्तिहस्तिरथ्यश्वपत्यात्पत्त्योत्तरोत्तरा ।
इयं वाणी मृडानी क्व कानीतानीकिनी तव ॥ 181 ॥

आदिसृष्टौ ततः कुर्यात् कल्पे कल्पे महाप्रभुः ।
सत्यं प्रकृत्युपादानं सर्वं जगदिदं स्थितम् ॥ 182 ॥

एवं मृदाद्युपादानैर्निमित्त्यैर्दण्डपूर्वकैः ।
कुम्भकारकुविन्दाद्याः कुर्युर्घटपटादिकम् ॥ 183 ॥

यद्यज्ज्ञानमुपादानं मृदानयनयत्नवत् ।
तदर्थमपि किं कोपि यत्नं कुर्यान्न कुत्रचित् ॥ 184 ॥

अन्वयव्यतिरेकाभ्यां कार्यकारणते यते ।
अन्यथा रासभस्यापि कारणत्वं कथं न ते ॥ 185 ॥

अज्ञानोपादानकत्वं तदसिद्धं घटादिषु ।
कथं मिथ्यात्वसिद्ध्यैस्यान्नह्यसिद्धस्य हेतुता ॥ 186 ॥

अधिकार्याद्यभावस्य परिहाराय सूत्रितम् ।
यत्सूत्रं तत्र सर्वस्याभावेभावः  कथं वद ॥ 187 ॥

अथ बन्धनिवृत्तिर्हि प्रयोजनमिहोदितम् ।
बन्धस्य ज्ञानतो नाशः श्रुत्या सूत्रेण चोच्यते ॥ 188 ॥

तच्चासम्भवि यज्ज्ञानमज्ञानस्यैव नाशकम् ।
इति व्याप्तिस्तदज्ञानोपादानत्वमपीष्यते ॥ 189 ॥

इदमेव च मिथ्यात्वमतस्तच्छ्रुतिसूत्रयोः ।
यद्यार्थिकमिति ब्रूषे तर्हि दोषेषु मज्जसि ॥ 190 ॥

अनादिः किल संसारः तवापि च ममापि च ।
यदनादि न तत्कार्यमिति व्याप्तिर्बलीयसी ॥ 191 ॥

तवार्थिकार्थमत्यर्थमनर्थी कुरुते न किं ।
इदं तु भाष्यकारस्य महदासीदकौशलम् ॥ 192 ॥

अनादृत्य श्रुतिं व्याप्तिमसतीमनुसृत्य च ।
मनोरथसुतः स्वस्य यतो गर्भस्रुतोपतत् ॥ 193 ॥

आज्ञानोपदानकत्वं मिथ्यात्वं भवबन्धने ।
आनेतुं किल तद्यत्नः सोनादिः सहते न तत् ।
तद्रित्यैव न मद्रीत्या चित्राभाष्यस्य सङ्गतिः ॥ 194 ॥

युक्तिः श्रुतिं जयति चेद्विरुद्धैक्यमतं गतम् ।
युक्तिं श्रुतिर्जयति चेद्बन्धं छिन्द्याद्दृशिः स्वयम् ॥ 195 ॥

यदि श्रुतिरपेक्ष्या ते भवोनादिर्विनश्यतु ।
यदि श्रुतिरुपेक्ष्याते भावोनादिर्न नश्यति ॥ 196 ॥

उपादानमुपादेयसमानाश्रयमेव यत् ।
अनादिबन्धस्याधारो जीव एव ततस्तव ।
अज्ञानाधारतां प्राप्त इत्यप्यासीद्धि सङ्कटम् ॥ 197 ॥

कुम्भकारस्य शालैव कपालस्य घटस्य च ।
आधारो दृश्यते स्थानभेदो न ह्यनयोः क्वचित् ॥ 198 ॥

यस्मादनादि तेऽज्ञानं स्वोपादाने न तिष्ठति ।
तस्माच्छालावदुभयोरप्याधारः स एव हि ॥ 199 ॥

अनादिभावरूपं ते यदज्ञानमभीप्सितम् ।

अनादिभावरूपं च वस्तु नैव निवर्तते ॥ 200 ॥

इति व्याप्तिश्च तज्ज्ञानमज्ञानं नाशयेत् कथम् ।

उपसर्पसि सर्पस्य बिलं वृश्चिकभीतितः ॥ 201 ॥

अनादेरपि बन्धस्य नाशः स्याद्धि श्रुतेर्बलात् ॥ 202 ॥

अयं सुयौक्तितो नाशः प्रतियुक्तिहतो यतः ।

अतोव्याप्तिद्वयबलादभावाज्ञानमस्तु तत् ॥ 203 ॥

अनादिभावो ब्रह्मैव नैव नाश्यो यतो ध्रुवम् ।

अतो विनश्यदज्ञानमभावाज्ञानमेव हि ॥ 204 ॥

उपादानं तु नाभावस्ततस्तन्नाशनेपि ते ।

संसारनाशो नैवेति व्यर्थार्थापत्तिरापतेत् ॥ 205 ॥

यद्याग्रहस्ते भावत्वे नाशस्याशां तदा त्यज ।

अनष्टाज्ञानतोपि स्यान्मोक्षः पाशात्पशोरिव ॥ 206 ॥

एवं च ज्ञाननाश्यत्वं गतं त्रिजगतो मम ।

यतो जगदुपादानमज्ञानं च न नश्यति ॥ 207 ॥

बन्धनाशस्तु विज्ञानादज्ञानापसृतेः परम् ।

वाच्यस्त्वया यतोनादिर्भावार्थौ न निवर्तते ॥ 208 ॥

किञ्चाज्ञानापसरणं तत्संयोगविनाशनम् ।

बन्धश्चाज्ञानसंयोग इति वाच्यं खलु त्वया ।

स चानादिस्ततोप्यासीत् प्रक्रिया विक्रियैव ते ॥ 209 ॥

पक्षद्वयेप्यनिष्टं ते रूक्षमासीद्विचारय ।

विचार्यमाणेनादित्वं बावत्वं च द्वयोश्च यत् ॥ 210 ॥

व्याप्त्येयकशरणोसि त्वं व्याप्तिश्चात्र बलीयसी ।

श्रुतेः पादानुसरणे हता ते व्याप्तिसुन्दरी ॥ 211 ॥

ममत्वनादेर्बन्धस्यापि स्यान्नाशः श्रुतेर्बलात् ।

ततो नात्रैव सा व्याप्तिरिति सिध्येन्मनोरथः ॥ 212 ॥

ये तु श्रुतिमनादृत्य व्याप्तेः पृष्ठमुपासते ।

तेभ्यो मदुक्तयुक्तीनां पृष्ठं कस्मान्न रोचते ॥ 213 ॥

अनादिभावनाशोयं यद्यदृष्टस्त्वयेष्यते ।

ज्ञानाद्बन्धस्यैव नाशस्तर्ह्यदृष्टः कतो न ते ॥ 214 ॥

तपोतप्यत किं किञ्चिद्भवतोऽदृष्टकल्पना ।

सौमङ्गल्यमियं धत्ते श्रुतिसूत्रार्थपोषणात् ॥ 215 ॥

तत्रैव चेयं सूत्रार्थो नाभूच्चादृष्टकल्पना ।

भवतः कल्पना मूलं न चाक्षं नागमोनुमा ॥ 216 ॥

ज्ञानाभावस्य तु ज्ञानं नाशकं नाश एव वा ।

भावरूपं तवाज्ञानं ज्ञानान्नश्यत् क्व दृश्यते ॥ 217 ॥

शब्दसाम्येन तु व्याप्तिः स्वर्गश्टङ्गित्वसाधिका ।

शब्दसाम्यं च नास्त्यत्र यत्ते ज्ञानं परस्य न ॥ 218 ॥

यतः साधकमानाख्यपतिर्व्याप्तेर्मृतोभवत् ।

अतस्ते विधवासङ्गान्महान् दोषो भविष्यति ॥ 219 ॥

व्याप्तिभङ्गाज्जगद्भङ्गं दोषं मन्ये महत्तरम् ॥ 220 ॥

नित्यं स्वरूपविज्ञानं स्वकार्यैः सह वर्तते ।

इति तेभिमतं तस्मात्तत्रावरणवाग्वृथा ॥ 221 ॥

अवृणीते मनोवृत्तिज्ञानमित्येव तत्त्वया ।

वाच्यमावरणं तस्मात्कथं नान्योन्यसंश्रयः ॥ 222 ॥

यदावरणनाशे स्यादपरोक्षप्रमा तव ।

तयैव तस्य नाशे च कथं नान्योन्यसंश्रयः ॥ 223 ॥

सत्येवावरणेदृष्टिरपूर्वेति मतिर्मम ।

यतः कुड्यावृतघटे न कस्याप्यपरोक्षधीः ।

अन्येनावरणच्छेदे पश्चादेव हि तस्य दृक् ॥ 224 ॥

अदृष्टकल्पना चेत् स्याद्गता व्याप्तिर्दिगन्तरम् ।

अकल्पितं जगद्भूत् सूत्रमासीन्निराकुलम् ॥ 225 ॥

ब्रह्मण्यखण्डे तच्छब्दैस्तेस्त्यथाप्यपरोक्षधीः ।

अज्ञानस्य निवृत्तिर्न कथं तत्तस्य नाशकम् ॥ 226 ॥

गुरूपसत्तिवेदान्तश्रवणाद्यैरुपस्कृतम् ।

नाशकं चेत्तर्हि घटे कथं वृत्त्यैव तत् क्षयः ॥ 227 ॥

श्रुतेर्बलादिहैवं चेत्तर्ह्यध्वनिसमागतम् ॥ 228 ॥

दृष्ट्वैव मुच्यत इति श्रुतिर्बलवती हि नः ।

अतो ज्ञानादेव बन्धनाशोप्यस्तु श्रुतेर्बलात् ॥ 229 ॥

विलक्षणादिसामग्री कार्यं कुर्याद्विलक्षणम् ।

तस्माद्विलक्षणार्थत्वाद्बन्धो ज्ञानेन नश्यतु ॥ 230 ॥

दृष्टानुसरणत्यागो यथा तत्र तथात्र च ।

गुण एवास्तु दोषस्ते मिथ्यात्वस्यैव कल्पनम् ॥ 231 ॥

यस्मादसङ्गतं ह्येतदयुक्तं चोक्तवर्त्मना ।
अनादिभेदमिथ्यात्वाप्राप्त्या व्यर्थं च तेन्ततः ॥ 232 ॥

ऐक्यस्य सिद्धये भेदमिथ्यात्वे ते महान् भरः ।
तस्यैतेनाप्यसिद्धिश्चेज्जगन्मिथ्यात्वतोपि किम् ॥ 233 ॥

अतः सूत्रार्थकथनान्निवर्तस्व सुखी भव ।
यद्वा सूत्रार्थकुशलानुपास्व नृहरेर्भवान् ॥ 234 ॥

किञ्च ज्ञानेन दुष्कर्मनाशः साक्षाच्छ्रुतौ श्रुतः ।
तदा विद्वान् पुण्यपापे विधूयेति न किं श्रुतिः ॥ 235 ॥

इयं विधूयेति पूर्वकर्मनाशमुदीर्य हि ।
पश्चान्निरञ्जन इति वक्त्यज्ञानस्य नाशनम् ॥ 236 ॥

अतः साक्षाज्ज्ञाननाश्यं कर्म नासीत्कथं वद ।
सूत्रकृच्चोत्तराघस्य ज्ञानेनाश्लेषमञ्जसा ॥ 237 ॥

पूर्वाघस्य विनाशं च स्वयमेव वदिष्यति ।
अतोर्थोयमनर्थस्ते श्रुतिसूत्रविरोधतः ॥ 238 ॥

व्याप्तिः कन्यैव यज्जाता कर्मणा खण्डितव्रता ।
तदुद्वाहप्रयत्नस्ते कथं दोषाय नेष्यते ॥ 239 ॥

यज्ज्ञानं तदनित्यं च यत्सुखं तद्विनाशवत् ।
न चेदेतादृशव्याप्त्या नित्ये ज्ञानसुखे त्यज ॥ 240 ॥

यदि व्याप्तिविरोधेपि श्रुतत्वात्तदपेक्षितम् ।
तदा ज्ञानाद्बन्धनाशः श्रुतः कस्मादुपेक्ष्यते ॥ 241 ॥

त्रिक्षणस्थायि यत्कर्म तस्य कालान्तरे भवन् ।
स्वर्गस्तदैव साध्यः स्यान्मध्येन्यद्यदि न विद्यते ॥ 242 ॥

असतः कारणत्वं तु श्रुतेः सूत्रकृतोपि न ।
असतः सत्कथं जायेतेति वेदोदितं स्मर ।
अन्तरानुपपत्त्यैव ततस्तत्रान्यकल्पना ॥ 243 ॥

अतस्तवैष दृष्टान्तो दृष्टान्तस्त्वदकौशले ।
यद्बाह्यव्याप्तिवैरेण श्रुत्युक्तत्वं जिहाससि ॥ 244 ॥

येयं बाह्या च सन्दिग्धास्खलद्व्याप्तिसहोदरी ।
श्रुतिसूत्रामतां तां तु जहद्वाराङ्गनां त्यजा ॥ 245 ॥

ज्ञानाद्द्वयोश्च नाशोस्तु व्याघ्राद्गोमृगयोरिव ॥ 246 ॥

अभावाज्ज्ञाननाशात्मन ज्ञानं तस्य नाशकम् ।
किं घटप्रागभावस्य घट एव विनाशकः ॥ 247 ॥

मन्यते नान्यदज्ञानं प्रतिवादी ततस्तव ।
अज्ञाननाशकत्वं च ज्ञाने क्वापि न दृश्यते ॥ 248 ॥

तस्यैव नाशकत्वं तु कुत्र वा दृश्यते वद ।
अस्याः प्रसाधनं तस्मादयः चणकचर्वणम् ॥ 249 ॥

अभावस्य विनाशस्तु प्रतियोगीति यन्मतं ।
तत्तवापि मतं सर्ववादिनामपि सम्मतम् ॥ 250 ॥

तन्निदर्शनशून्यत्वादन्योन्याश्रयतश्च ते ।
व्याप्तिः प्रसाध्याङ्गिकापि नाभूद्गर्भस्रुताभवत् ॥ 251 ॥

किञ्च सर्वस्य कार्यस्य जन्मस्थितिविनष्ठिषु ।
निमित्तमीश्वरज्ञानमस्तीत्यखिलसम्मतम् ॥ 252 ॥

दैनन्दिने च प्रलये नाज्ञानस्य विनाशनम् ।
तस्मात् साक्षादेव जगन्नाशकं जगदीशितुः ॥ 253 ॥

ज्ञानमासीदतो ज्ञानमज्ञानस्यैव नाशकम् ।
इति व्याप्तिर्महालोकमध्येभूद्व्यभिचारिणी ॥ 254 ॥

किञ्च साक्षाज्ज्ञाननाश्यं भवत्वज्ञानमेव ते ।
पारम्पर्येण तन्नाश्यं ततोन्यच्च भवेत्किल ॥ 255 ॥

न चेज्ज्ञानविनाश्यत्वं कथ्यते जगतः कथम् ।

परम्परानाशकं च द्विविधं भुवि दृश्यते ॥ 256 ॥

किञ्चिद्विनाश्यैव किञ्चित्ततोन्यस्य विनाशकम् ।

किञ्चिच्च किञ्चित् कृत्वैव पश्चादन्यस्य नाशकम् ॥ 257 ॥

योयं तन्तुविभागेन तत्संयोगस्य नाशने ।

पटस्य नाशो भवति तदाद्यस्य निदर्शनम् ॥ 258 ॥

यत्तु पर्णतृणारण्याद्युत्पाद्याग्निशिखां पुरा ।

तया तमो नाशयति तद्द्वितीयनिदर्शनम् ॥ 259 ॥

एवं च ब्रह्मणो ज्ञानं विनाश्यैव विनाशकम् ।

यदि स्यात्तर्हि ते व्याप्तिः प्रतिरोधं करोतु वा ॥ 260 ॥

यदितद्भगवद्भक्तिमुत्पाद्य दृढया तया ।

बन्धं विनाशयेत्तर्हि व्याप्तेः क्वावसरो वद ॥ 261 ॥

ज्ञानन्नाश्ये तु नियमस्तज्जन्ये तु तवापि न ।

यत्प्रवृत्तिनिवृत्त्यर्थालापार्तिप्रीतिकृद्धि तत् ॥ 262 ॥

भक्तिश्च भगवत्स्नेहः सा च तद्दर्शनाद्भवेत् ।

यतो रागस्य जनकं प्राहुर्विषयदर्शनम् ॥ 263 ॥

भक्त्या च बन्धविच्छेदः श्रूयते यौक्तिकश्च सः ।

यतः प्रियस्य निगडबन्धं छिन्दन्ति मानवाः ॥ 264 ॥

न सा ज्ञानं सैव बन्धं छिन्द्याच्चेत् किं गतं तव ।

तत्सर्वविप्लवायोक्ता प्रक्रिया विक्रियैव ते ।

अतोप्यसङ्गतैवाभून्मिथ्यात्वप्रस्तुतिस्तव ॥ 265 ॥

अथ ज्ञानेन सत्यस्य नाशे ब्रह्मापि नङ्क्षति ।

तेन नाश्यत्वघटकं मिथ्यात्वं यदि कथ्यते ॥ 266 ॥

तर्हि मिथ्यार्थनाशेस्याच्छशश्रृङ्गस्य नाशनम् ।

तेन नाश्यत्वघटिकां ब्रूमो बन्धस्य सत्यताम् ॥ 267 ॥

त्रैकालिकनिषेधाख्यबाधायोग्यस्य सत्यता ।

तद्योग्यस्य च मिथ्यात्वमिति सर्वस्य सम्मतम् ॥ 268 ॥

पारिभाषिकमिथ्यात्वं शशश्रृङ्गे न चेत्तव ।

जडत्वे सत्यबाध्यत्वं सत्यत्वं ब्रह्मणो न मे ॥ 269 ॥

अतो नातिप्रसङ्गोस्ति तवापि च ममापि च ।

तस्मादनाशे नाशे च सत्यत्वादेर्न सङ्गतिः ॥ 270 ॥

कार्यताकार्यते एव नाशानाशप्रयोजिके ।

क्वचिन्नाशकसामग्री नाश्यतायाः प्रयोजिका ॥ 271 ॥

इति वाच्यं यतोनादिर्बन्धोज्ञानाद्विनाशवान् ।

तत्सत्यबन्धनाशोपि ब्रह्मनाशः कुतो वद ॥ 272 ॥

यच्च दृष्टबलाज्ज्ञानं सत्यबन्धनिवर्तकम् ।

इत्युक्ते नीलविज्ञानान्नैल्यादेर्न निवर्तनम् ॥ 273 ॥

दृष्टं ततो दृष्टबलं कथं स्यादिति चोदितम् ।

तच्च जात्योत्तरं मन्ये नैव जातिमदुत्तरम् ॥ 274 ॥

यतो दृष्टबलादेकभावे भावान्तरानुमा ।

न स्यात् स्वाभिमता रासबाधौ वह्न्याद्यदर्शनात् ॥ 275 ॥

अथ व्याप्यस्य सद्भावे व्यापकान्तरसङ्गतेः ।

दृष्टिर्दृष्टबलं नैव यस्य कस्यापि दर्शनम् ।

इति तत्र समाधाने समाधानं समं मम ॥ 276 ॥

भूयोभूयः साहचर्याद्यद्धि यस्य विनाशकम् ।

दृष्टं तादृक्पदार्थो यः स सत्यस्यापि नाशकः ।

इति सर्वैश्च वक्तव्यं शैत्ये सत्यनलार्थिभिः ॥ 277 ॥

ज्ञानं चेद्दृग्दृश्यते चेत्तच्च सत्यं विनाशयेत् ।

यतः स्वसुहृदां दृष्ट्वा मनोदुःखं निवर्तते ।

महच्चरणदृष्ट्या च पापं सर्वं निवर्तते ॥ 278 ॥

यथैव नृपतेर्दृष्ट्या भूयोभूयो निवृत्तिमान् ।

बन्धो दृष्टो भटाद्येषु तथा भगवदीक्षणम् ।

बन्धस्य शिक्षकं दृष्टं भूयोभूयः शुकादिषु ॥ 279 ॥

अतो व्याप्तिमतो ब्रह्मज्ञानात्सत्यभवच्युतौ ।

साधितायां व्याप्तिशून्यनीलनीलधियोरपि ॥ 280 ॥

नाश्यनाशकता चोद्यं कथं हृद्यं भवेत्सताम् ।

तस्मान्मिथ्यात्वकथनं न कथञ्चन सङ्गतम् ॥ 281 ॥

किञ्च दृष्टबलात् स्वार्थं यः सिषाधयिषत्यसौ ।

ज्ञानात्सत्यस्यापि नाशं यत्र यत्राभिपश्यति ॥ 282 ॥

तदेव दृष्टं दृष्टं च स्वबलं वक्ष्यभीष्टदम् ।

पूर्वोक्तवर्त्मना तच्च स्थानस्थानेषु वर्तते ॥ 283 ॥

एवं दृष्टबलस्यास्य का नष्टिः काप्यदृष्टितः ।

तेनासङ्गतसम्बन्धि सर्वमासीदसङ्गतम् ॥ 284 ॥

श्रेष्ठेष्टदृष्ट्यानिष्टस्य नष्टेर्दृष्टबलस्य मे ।

अस्ति त्वदुक्तदुर्व्याप्त्युच्चित्त्या मानबलं च मे ॥ 285 ॥

तत्ते विकल्पोप्याकल्पकल्पः पश्य ममाभवत् ।

मनः सङ्कल्पमाकल्पमप्यल्पीकुरुते तव ॥ 286 ॥

अज्ञानोपादानकस्य मिथ्यार्थस्य विनाशनम् ।

ज्ञानेन जायमानं यन्नदृष्टं नापि च श्रुतम् ॥ 287 ॥

सत्यं सर्वं स्वस्वदृष्ट्या नश्यत्येवेति वक्तरि ।

चित्रावयविनो वार्ता प्रस्तावस्तु प्रशास्तिकृत् ॥ 288 ॥

दृष्ट्या सत्यस्यापि नाशो दृष्टोस्तीति तु वक्ति यः ।

नैल्यानाशकथा स्वस्य नैल्यानाशाय तं प्रति ॥ 289 ॥

ज्ञानात् स्वविषयस्तस्य धर्मो वा तद्विरोधि वा ।

निवर्तते स्वाश्रयस्थमुभयस्थमथापि वा ॥ 290 ॥

इति पृष्ट्वा परो यत्तु दूषयामास दूषणैः ।

अनुक्तोपालम्भनेन तत्स्वात्मानं हि दोषयेत् ॥ 291 ॥

किं ब्रह्मज्ञानतो ब्रह्म तद्धर्मस्तद्विषोसुराः ।

जीवत्वं वा ब्रह्मजीवभेदोवा द्वित्वमेतयोः ।

निवर्त्यत इति ब्रूते त्वदग्रे कोपि मानुषः ॥ 292 ॥

किन्तु ज्ञानविनाश्यत्वं यस्य मानेन मीयते ।

तदज्ञानातिरिक्तं च नश्यज्ज्ञानेन दृश्यते ॥ 293 ॥

उत्तरज्ञानतः पूर्वज्ञानस्य विनिवर्तनात् ।
प्रमया भ्रमनाशाच्च सूर्यादीनां च दर्शनात् ॥ 294 ॥

दुरितध्वंसदृष्टेश्च सुहृद्दर्शनतो नृणाम् ।
चिन्ताज्वरादिनाशस्य दृष्टत्वात्तत्र तत्र च ।
इति ब्रूते परस्तत्र कुचोद्यावसरः क्व ते ॥ 295 ॥

त्वदुक्त दूषणानां च व्रणं विवरणव्रणे ।
द्रष्टव्यं विस्तरभयान्नेह तच्च वितन्वते ॥ 296 ॥

किञ्चैवमपि ते बन्धमात्रस्याज्ञानकार्यता ।
अस्तु सर्वस्य जगतो मिथ्यात्वं तु कुतो वद ।
न हि सर्वस्य ज्ञानान्नाशः सूत्रेण सूत्रितः ॥ 297 ॥

अधिकार्यादिसद्भावाद्गुरुशिष्यादि सम्भवात् ।
वक्तृश्रोतृमनोदेहगेहादेरनुपद्रवात् ॥ 298 ॥

स्वयोग्यदेशकालान्न सद्भावात्फलसम्भवात् ।
मीमांस्य वेदसद्भावान्मीमांसाशास्त्रसम्भवात् ॥ 299 ॥

कार्यैव ब्रह्ममीमांसासदेत्यादावसूत्रयत् ।

यः सूत्रकारः स जगन्मिथ्यात्वं नैव मन्यते ॥ 300 ॥

जगज्जन्मादिहेतुत्वं यः प्रदीपमदीपयत् ।

स्वदत्तदीपतैलस्याभावं स मनुते कथम् ॥ 301 ॥

अन्त्यावयविनो नाशः पूर्वं घटविनाशने ।

कपालं तदुपादानं किं नश्यति तदा वद ॥ 302 ॥

कार्यात्मना विनष्टोसौ घटः कारणरूपतः ।

अस्त्येवेति मतं सर्वै पूर्वैङ्गीकुर्वते तव ॥ 303 ॥

कपालस्य तु नाशे तु घटस्यात्यन्तनाशनम् ।

रूपद्वयेनापि नाशात्पुनः कारणरूपतः ।

कपालानामेव सत्ता घटवार्ता गता तदा ॥ 304 ॥

एवं प्रकृतिपर्यन्तं नाशोदोऽधः क्रमात्किल ।

भूभूधरादेरप्येवमेव नाशं विदुर्बुधाः ॥ 305 ॥

इमां प्रलयमर्यादां वदन्त्यखिलवादिनः ।

एवं चोपादाननाशात्कार्यनाशः कदा वद ॥ 306 ॥

तस्मादनादितोनन्तब्रह्माण्डानां लये लये ।
अज्ञानच्छेदतश्चेदो न द्वेधापीति धीर्मम ।
अद्याप्यज्ञानविशिष्टेर्नष्टैश्चोक्तविधत्वतः ॥ 307 ॥

यस्ते सर्वलयो मुक्त्यै तत्राप्येष लयक्रमः ।
पृथिव्यप्सु विलीना स्यात्तास्तेजस्यनिले च तत् ॥ 308 ॥

स व्योम्नि तदहङ्कारे महत्तत्त्वे स लीयते ।
तन्मायायां सा च मायाज्ञाने लीना भवेत्तव ॥ 309 ॥

मम तु प्रलये सर्वा विकृतिः प्रकृतिं विशेत् ।
सा च प्रकृतिरेवास्या लयो नेति परं मतं ।
एवं चाज्ञाननाशेन नाशो देशान्तरं गतः ॥ 310 ॥

भूयश्चान्ते विश्वमायानिवृत्तिरिति हि श्रुतिः ।
अतो न लौकिकीनापि वैदिकीयं स्थितिस्तव ॥ 311 ॥

त्वत्प्रक्रियालयव्याप्ता यस्मात्सर्वे महालयाः ।
तत्सूत्रसूत्रितार्थाख्यरत्नमालापकर्षणम् ।
यः करोति नराकारो वानरः स न संशयः ॥ 312 ॥

विपर्ययेण तु लयं यः सूत्रे सूत्रयिष्यति ।
सोधुनोपादाननाशात्कार्यनाशं न बोधयेत् ॥ 313 ॥

अर्थस्यास्यानर्थदस्य तस्मात्सूत्रं न सूचकम् ।

त्रिलोकीसूचको यस्ते गुरुरास्ते स सूचकः ॥ 314 ॥

अज्ञानकार्यता चास्य समस्तस्य न युज्यते ।

यद्यज्ञानमुपादानं वृत्त्याऽज्ञाननिवर्तने ।

तदुपादेयकार्यस्य ह्यनिवृत्तिः कथं वद ॥ 315 ॥

घटवृत्त्या घटाज्ञाननाशे न हि घटक्षयः ।

तवाप्यस्ति मते तस्मात्तदुपादेयतापि न ॥ 316 ॥

उपादानस्य सम्बन्धनाशेनापि विनश्यतः ।

उपादानस्यैव नाशे कथं नाशो न जायते ।

अतोऽज्ञानमुपादानमिति रिक्तं वचस्तव ॥ 317 ॥

तदज्ञानानुपादानवस्तुत्वाद्ब्रह्मवज्जगत् ।

सदा सत्स्यान्नचेन्न स्यात्प्रतिकर्मव्यवस्थितिः ॥ 318 ॥

शुक्तेरावरणेऽज्ञाने नष्टे बाधप्रमा पुनः ।

इयं शुक्तिर्नरजतमित्याकारा हि जायते ॥ 319 ॥

आवृतेऽर्थे कथं साक्षात्काररूपप्रमा वद ।

तस्मात् ज्ञानविनाश्यत्वं शुक्त्यज्ञाने न युज्यते ॥ 320 ॥

ज्ञानाभावस्य तु ज्ञानं निवृत्तिर्न निवर्तकम् ।

अतो ज्ञानेनैव नाशो नाज्ञाने दृश्यते क्वचित् ॥ 321 ॥

अपसार्यैव हृन्मायां दर्शनं दिशति प्रभुः ।
न चेत्तयावृतं चित्तं कथं द्रष्टुं क्षमं भवेत् ॥ 322 ॥

दृष्ट्या प्रसन्नः पश्चात्तां मुक्तावेव निवर्तयेत् ।
तदैव सर्वथा नाशे जीवन्मुक्तिदशा कथम् ॥ 323 ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।
इति श्रुत्युक्तहृद्ग्रन्थिविनाशोप्ययमेव हि ॥ 324 ॥

अज्ञानहृद्विभागो यः स चेश्वरपराक्रमात् ॥ 325 ॥

तदेको दृष्टतो नष्टो दृष्ट्या नष्टास्ततोपरे ।
न चेद्यत्नशतेनापि कथमावृतदर्शनम् ॥ 326 ॥

संशयभ्रमयोरप्रारब्धयोः पुण्यपापयोः ।
तदैव नाशः श्रुत्युक्तरीत्या ज्ञानेन सम्भवेत् ॥ 327 ॥

सुहृद्दर्शनतः सद्यः क्लेशनाशो हि जायते ।
सूर्यावलोकनात्पापनाशः सर्वस्य सम्मतः ।
दोषस्य दर्शनाद्रागनाशो दुर्विषये सताम् ॥ 328 ॥

एवं चाज्ञानतोन्यस्य ज्ञानान्नाशः प्रदृश्यते ।

अज्ञानस्य तु न ज्ञाननाश्यता दृश्यते क्वचित् ॥ 329 ॥

व्याप्त्यैव दृष्टबाधस्ते व्याप्तेर्मूलं न दृश्यते ।

अव्याप्तिरथवा व्याप्तिर्व्याप्तेर्मूलं हि केवलम् ॥ 330 ॥

प्रबलत्वाद्विपक्षस्य सपक्षस्य त्वदर्शनात् ।

व्याप्तिश्च पक्षयुगलच्छेदे पक्षीव ते मृता ॥ 331 ॥

तस्माज्ज्ञानेन बन्धस्य नाशे नानुपपन्नता ।

भवद्ग्रन्थस्य निर्बन्धनाशे त्वनुपपन्नता ॥ 332 ॥

अतो ज्ञानविनाश्यत्वस्यान्यथानुपपत्तितः ।

अज्ञानोपादानकत्वं केनोपायेन साध्यते ॥ 333 ॥

साक्षाज्ज्ञानविनाश्यत्वात् प्रभुनाश्यत्वतोपि वा ।

अनाद्यज्ञानवत् सोयं बन्धो नाज्ञानकल्पितः ॥ 334 ॥

परन्यायेन दृष्टान्तः पूर्वहेतौ भवेद्दि तत् ।

प्रामाणिकत्वादन्यस्मिन् हेतौ च स्यान्निदर्शनम् ॥ 335 ॥

विवादपदमज्ञानं बन्धोपादानमेव न ।

साक्षाज्ज्ञाननिवर्त्यत्वाद्यथा घटपटादिकम् ॥ 336 ॥

बन्धे ज्ञानविनाश्यत्वस्यान्यथानुपपत्तितः ।
अज्ञानोपादानकत्वं सिषाधयिषितं तव ॥ 337 ॥

अनादिरेव बन्धोयं तवापि च ममापि च ।
अतो बाधित एवायमर्थः साध्यः कथं वद ।
अर्थापत्तिस्ततस्तेभूदनर्थापत्तिरेव हि ॥ 338 ॥

अनादित्वाच्च बन्धोयं न स्यादज्ञानकल्पितः ।
आत्मवत्तेन शास्त्रस्य प्रक्रिया विक्रियैव ते ॥ 339 ॥

किञ्च बाधप्रमानाश्यं नैव किञ्चित् प्रदृश्यते ।
प्राङ्नष्टरजतज्ञाने भ्रमत्वं बोधयेद्धि सा ॥ 340 ॥

पुनर्भ्रमस्यानुत्पादमथवा तत्र साधयेत् ।
रजतस्य तु नाशो न प्राक् सतो हि विनाशनम् ॥ 341 ॥

नाशश्चेत्तर्ह्युपादाननाशान्नष्टं पुरैव हि ।
अतो बाधप्रमानाश्यं जगत्यपि न किञ्चन ॥ 342 ॥

भवेद्दृष्टानुसारश्चेदन्यथाऽदृष्टकल्पना ।
अर्थाप्ततेस्ततो मूलमर्थस्यापत्तिरेव ते ॥ 343 ॥

तस्माज्ज्ञानेनाविनाश्यवस्तुत्वात् ब्रह्मवत् जगत् ।

परमार्थसदेवाभूत् नाभूत्तव समीहितम् ॥ 344 ॥

किञ्च बाधप्रमा येयं सापि बाध्या भवन्मते ।

ममापि बाध्या तेनास्या बाधस्तूभयसम्मतः ॥ 345 ॥

तस्मादुभयसम्मत्या बाध्यबाधत्वतः सदा ।

परमार्थसदेवाभूज्जगद्ब्रह्मवदेव मे ॥ 346 ॥

अस्तु वा तदुपादानं मिथ्यात्वाशा तदापि न ।

अनादेर्जीवभेदस्य कालस्य गगनस्य च ॥ 347 ॥

अज्ञानस्य च मिथ्यात्वं केनोपायेन ते वद ।

अतः सर्वस्य मिथ्यात्वे नाभूदेतत्प्रयोजकम् ॥ 348 ॥

अथ बाधेनैव तेषां मिथ्यात्वे न ह्यनश्यताम् ।

मिथ्यात्वं ब्रह्मवत्तस्मात्तेषां नाशः कथं वद ॥ 349 ॥

अथ बाधेनैव साक्षात्तेषां नाशे गतं मतम् ।

ब्रह्मप्रमा हि बाधस्ते तया साक्षाज्जगत् क्षये ।

नाशकं ज्ञानमज्ञानस्यैवेति हि यतो गतम् ॥ 350 ॥

बाधेनैव जगन्नाशे गतमासीन्मतं तव ।

अन्यद्वारापि तन्नाशे गतमासीन्मतं तव ।

अनादिग्गगनादीनामनाद्यत्वप्रसक्तितः ॥ 351 ॥

एवं चानाश्य वस्तुत्वाद्ब्रह्मवत् परमार्थसत् ।
अबाध्यं चाभवज्जीवभेदकालाम्बरादिकम् ।
अतो बाधो न वै तेषां मिथ्यात्वाशापि ते गता ॥ 352 ॥

न च बाधोपि तेषां स्यादनादित्वात्परात्मवत् ।
तस्माज्जीवविभेदादेर्मिथ्यात्वे कारणं न ते ॥ 353 ॥

सर्वं नेति च वाक्येन कथमर्थस्य बाधनम् ।
सर्वस्यापि च बाधे तु मिथ्यात्वमपि तद्बलात् ।
एवं सर्वस्य यत्स्यात्तद्यर्था तज्ज्ञानकार्यता ॥ 354 ॥

अथ तेनैव सर्वस्य मिथ्यात्वाशापि मास्तु ते ।
अनादित्वादनाशित्वाज्ज्ञानानाश्यत्वतस्तथा ॥ 355 ॥

अज्ञानाकार्यवस्तुत्वाद्ब्रह्मवत्सकलं जगत् ।
अम्बराद्यं घटाद्यं च यदबाध्यमसाध्यत ॥ 356 ॥

न चेत् ब्रह्मापि बाध्यं स्यादकस्मादिति वाक्यतः ।
तस्य चान्यार्थतायां स्यादस्याप्यन्यार्थतैव हि ॥ 357 ॥

जगच्च जगतीनाथो द्वावेतौ नियतौ सदा ।

अभटो यन्नृपो नष्टो नष्टं राष्ट्रमराजकम् ॥ 358 ॥

किञ्चाज्ञानं ज्ञाननाश्यं विरोधादेव केवलम् ।

न हि दीपस्तमोनाशे तन्मिथ्यात्वमपेक्षते ॥ 359 ॥

अतोऽज्ञानमिदं ज्ञाननाश्यं सत्यं च सम्भवेत् ।

सत्याज्ञानभवं विश्वं सत्यमेव भविष्यति ॥ 360 ॥

तस्मादज्ञानकार्यत्वमस्तु वा जगतस्तव ।

मिथ्यात्वाशा तु तस्मिन्या सा कपोणिगुडायते ॥ 361 ॥

अस्त्वज्ञानभवं विश्वमज्ञाने ज्ञाननाश्यता ।

न दोग्धि ते प्रियं दुग्धं शिलाधेनुस्तनो ह्ययम् ॥ 362 ॥

विरोधेनैव विज्ञानं स्यादज्ञानस्य नाशकम् ।

तन्मिथ्यात्वकथा व्यर्था मृतमारणयत्नवत् ॥ 363 ॥

दृश्यत्वादेव मिथ्यात्वं नानित्यत्वाच्च ते मते ।

न चेत्तेनैव बन्धस्य साक्षान्मिथ्यात्वसिद्धितः ।

बकबन्धप्रकारोयं विकाराय भवेत्तव ॥ 364 ॥

अथ तेनैव तत्सिद्धावाशाक्लेशाय केवलम् ।

दृष्टान्ते शुक्तिरजते मम हेतोरसम्मतेः ॥ 364 ॥

कृतकत्वं च तद्बीजं न दुर्बीजमिदं तव ॥ 366 ॥

अतोन्धकारमालोक इव विज्ञानमेव ते ।

परस्परविरोधेन तदज्ञानं हि नाशयेत् ।

मिथ्यात्वकारणाभावात्तत्सत्यमभवद्ध्रुवम् ॥ 367 ॥

या दुर्घटं च घटयेत्सा किमन्यदपेक्षते ।

वाक्यादीनामनुस्मृतौ युक्तिरेषा वृथा गता ॥ 368 ॥

जगत्सत्यत्वमपि किं वाक्येनैव न साध्यते ।

अतो युक्तेः पुरस्कर्तुर्नैव मिथ्यात्वसाधकम् ॥ 369 ॥

कारणस्य हि सत्यत्वे कार्यं मिथ्या कथं भवेत् ।

अतोऽज्ञानस्यानुसृतिरज्ञानादेव केवलम् ॥ 370 ॥

यद्यज्ञानक्षयादन्यज्ज्ञानकार्यं न ते मते ।

व्यर्था बाधप्रमा तर्हि साह्यज्ञानक्षयोत्तरा ।

न ह्यज्ञाने सति ज्ञानमविरोधप्रसङ्गतः ॥ 371 ॥

अतोऽज्ञानं विलोप्यैव बाधज्ञानोदयो  भवेत् ।

तस्य ज्ञानस्य किं साध्यं न हि दग्धं पुनर्दहेत् ॥ 372 ॥

यदि नश्येत्ततो विश्वं शास्त्रं व्यर्थीकरोति ते ।

अज्ञानस्यैव यज्ज्ञानं नाशकं न परस्य हि ॥ 373 ॥

न चेन्नश्येत्ततो विश्वं स्वयं व्यर्थीभविष्यति ।
नाश्यत्वबोधिका सा चेन्नास्तित्वं का प्रबोधयेत् ॥ 374 ॥

नाश्यत्वादेव नास्तित्वे हेतुः स्यादप्रयोजकः ।
भावत्वे सति नाश्यं यत् प्रायः कृतकमेव तत् ॥ 375 ॥

अत नास्तित्ववक्री सा नास्तित्वेनैव नाश्यता ।
इति पक्षो यदि भवेद्गताऽज्ञानप्रनाडिका ॥ 376 ॥

निर्विकल्पकरूपा सा नोभयं च प्रबोधयेत् ॥ 377 ॥

दीपेनेव तया नाशे साक्षान्नाशे गतं मतम् ।
अज्ञानद्वारतो नाशे स्यादन्योन्याश्रयादिकम् ॥ 378 ॥

न ह्यज्ञाने सति ज्ञानं मनोवृत्त्यात्मकं तव ।
साक्षिज्ञानवदेवास्याप्यविरोधप्रसङ्गतः ॥ 379 ॥

ज्ञानेनैव च तन्नाशे स्यादन्योन्याश्रयो ध्रुवम् ।
परस्परालिङ्गिताभ्यां क्लीबाभ्यां किं फलं भवेत् ॥ 380 ॥

अर्थानपेक्षजन्मा हि दीपोन्यत्रापि जायते ।
सकर्मकक्रियाज्ञानं नार्थस्पर्शं विना भवेत् ॥ 381 ॥

आवृतेऽर्थेपि चेज्ज्ञानं नाविवित्तिस्तद्विरोधिनी ।

अविरोधि न तन्नाश्यं न चेद्बन्धोपि नश्यतु ॥ 382 ॥

त्रिक्षणस्थायिविज्ञाने विरम्य व्यापृतिश्च न ॥ 383 ॥

यद्युत्पत्तौ विरोधोन नाश्यत्वे नैव केवलम् ।

विरोध्यज्ञानमुच्येत बन्ध एवास्तु तादृशः ॥ 384 ॥

बन्धेपि ज्ञाननाश्यत्वरूपा स्याद्धि विरुद्धता ।

ज्ञाननाश्यत्वमात्रेणाज्ञानत्वं चास्य सम्भवेत् ॥ 385 ॥

एवं च भवतो व्याप्तिरप्यासीत् किङ्करी मम ।

अतो नाश्यत्वतोवश्यं वाच्यान्यैव विरुद्धता ॥ 386 ॥

न चेदर्थकृतो रोधः शब्दरोधेन किं फलम् ।

न ह्यश्वानश्वशब्दानां विरोधोस्ति गवाश्वयोः ॥ 387 ॥

नञो विरोधार्थतैव निर्णेया भावयोः कथम् ।

नाश्यत्वमुभयो श्रौतं तद्गनाश्यत्वकर्षकः ॥ 388 ॥

अन्यः कोस्ति विरोधस्ते यद्युत्पत्तिं रुणद्धि न ।

प्रमाणपक्षपातस्तु बन्ध एव प्रदृश्यते ॥ 389 ॥

तमसो दीपनाश्यत्वं दीपोत्पत्त्यविरोधिनः ।

प्रमाणस्य बलेनैव निर्णेयं नान्यतः क्वचित् ॥ 390 ॥

प्रमाणमन्यथाकर्तुं यत्नोयं हि महांस्तव ।

श्रुत्युक्त बन्धगज्ञाननाश्यत्वस्यापकृष्टये ।

नाश्यत्वादपरः कोपि विरोधो वाच्य एव ते ॥ 391 ॥

तस्मादन्योन्याश्रयाख्यदोषाभावाध्यथाश्रुतम् ।

बन्धस्यैवोचितं ज्ञाननाश्यत्वमिति मे मतिः ॥ 392 ॥

न चेज्ज्ञानविनाश्यत्वघटकः सोन्य एव यत् ।

वाच्यो विरोधस्तेऽज्ञाने नोचेद्बन्धो न मुञ्चति ॥ 393 ॥

ज्ञानोत्पत्तिविरोधित्वमेव स स्यान्नचापरः ।

ज्ञानेनैव च तन्नाशे स्यादन्योन्याश्रयो ध्रुवम् ॥ 394 ॥

वृत्युत्पत्तिविरोधित्वमज्ञानस्यास्ति तन्मते ।

न चेद्विरोधवार्ताया दद्यात्सोपि जलाञ्जलिम् ॥ 395 ॥

अविरोधि किलाज्ञानं स्वरूपज्ञानसम्पदः ।

अज्ञाने सत्यपि ज्ञानमतश्चिद्रूपमेव हि ॥ 396 ॥

मनोवृत्तिस्तु नाज्ञाने सति स्यात्तद्विरोधिनी ।

तटस्थशङ्कोच्छेदाय चर्चा चेयं कृता मया ॥ 397 ॥

किञ्च ज्ञानेन नाश्यत्वमन्यत्राशास्यतां त्वया ।

यज्ज्ञानेन ज्ञाननाशमाशास्से हास्यमेव तत् ॥ 398 ॥

वेणुं दन्दहते वह्निर्न स्वयं तेन दह्यते ।

काष्ठाभावेन नष्टोसौ कां काष्ठा कष्ट ते दिशेत् ॥ 399 ॥

रजोपि कातकं पङ्कमदःकुर्यान्न घातकम् ।

स्वयं चान्ते रजोरूपमधोगच्छेद्दधोस्य न ॥ 400 ॥

अन्यद्धि नाशयेज्ज्ञानं त्रिक्षणं स्वस्थितिक्षणे ।

नाशक्षणे स्वयं नश्यत्स्वं वान्यं वा ना नाशयेत् ।

स्वेनैव स्वस्य नाशस्तु नास्ति लोकत्रयेपि ते ॥ 401 ॥

वष्ध्यदृष्टं यदि स्पष्टमोष्टकुष्ठं भवेत्तव ।

साक्षादेव स्वयं ज्ञानं स्वात्मानं नाशयेत्किल ॥ 402 ॥

ज्ञाननाषे तवाज्ञाने ज्ञानोपादानतैव न ।

तमोसो दीपनाश्यस्य दीपोपादानतास्ति किं ॥ 403 ॥

दशानिमित्तो दीपस्तु तां दशां नाशयेदपि ।

दशाखण्डात्मिका कन्था किं तां हन्ति विचारय ॥ 404 ॥

उपादानमुपादेयभिन्नमित्यवयोर्मतम् ।
कथं विरुद्धयोरैक्यमैक्ये च क्व विरुद्धता ॥ 405 ॥

न चेद्विशिष्टयोरैक्यं स्यादत्यन्तविरुद्धयोः ।
अतः केनाप्युपायेन न ज्ञानं ज्ञाननाशकम् ॥ 406 ॥

ज्ञानस्थितिक्षणोवश्यमज्ञानस्य स्थितिक्षणः ।
उपादेयस्थितिर्या सा सोपादानस्य च स्थितिः ॥ 407 ॥

न हि तन्तुस्थित्यभावदशायां च पटस्थितिः ।
ततस्तदैव न तयोर्वध्यघातकतोचिता ॥ 408 ॥

स्थितिर्भावो वधोध्वंसस्तावुभावेकदा कथम्।
क्षणान्तरे स्वयं नश्यत्कस्य वा स्याद्विनाशकम् ॥ 409 ॥

अन्योन्यमसहिष्णुत्वरूपवैराभिदे पुरा ।
विरोधे सति सिंहोपि गजं हन्ति न चान्यथा ।
न हि स्वस्वशिशून् हन्ति नापि हन्ति सहोदरान् ॥ 410 ॥

समयोस्तु विरोधोयं नीचस्योच्चैः सहास्थितिः ।
हन्तुर्बलादेव परं नोचेन्नीचः पलायते ॥ 411 ॥

जलाग्न्योर्दीपतमसोस्तद्वद्रागदयोरपि ।

मध्ये वध्यस्य न सह स्थानं तत्तत्स्वभावतः ॥ 412 ॥

विरुद्धगुणवत्त्वेन वध्यघातकता क्वचित् ॥ 413 ॥

विचार्यमाणे सर्वत्राप्येकैकस्मात् प्रयोजकात् ।

वध्यघातकता दृष्टा तव ज्ञाने न कश्चन ॥ 414 ॥

उपादानमुपादेयविरोधि स्यात्कथं वद ।

अतो द्वेधापि न ज्ञानं स्वयमेव स्वघातकम् ।

ज्ञानाविनाश्यं तज्ज्ञानं केनोपायेन ते मृषा ॥ 415 ॥

किञ्च नश्यज्ज्ञनं पश्य बोधोच्छेदः पुरैव हि ॥ 416 ॥

शुना परशुना वान्यपशुना वा तनुक्षयः ।

ज्ञानाविनाश्यो देहोयं केनोपायेन ते मृषा ॥ 417 ॥

अथ स्वरूपज्ञानं च स्वकार्यैः सह वर्तते ।

अखण्डार्थपदश्रुत्या मानसीचापरोक्षधीः ॥ 418 ॥

क्षणे क्षणे भवत्येव रण्डागीतश्रुतावपि ।

अविद्यावरणं चास्ति दुर्घटं घटयत्यसौ ॥ 419 ॥

इत्यावृतिश्च स्यादेवेत्यौद्धत्याद्वक्ति कश्चन ।

तर्ह्यावरणता गोष्ठीवार्ता मात्रमभूदियम् ॥ 420 ॥

ज्ञानद्वयमरुन्धत्या स्थितया गतया च किम्।

कुड्यावरणवद्दुष्टः किं व्योमावरणाद्भयम् ॥ 421 ॥

दुर्घटं घटयन्ती चेत् स्वस्थितौ मुक्ततामपि ।

घटयेदेव सा साध्वी किं तया हतया तव ॥ 422 ॥

यस्मिन् सत्येव यज्जन्म यस्मिन् सत्येव यस्थितिः ।

न मृतिर्नापसरणं नापकारोपि कश्चन ॥ 423 ॥

कार्यकारणभावेन ये चाभिन्ने परस्परम्।

अवध्यघातिनी साकं स्थिते कस्माद्विरोधिनी ॥ 424 ॥

यां सपक्षप्रसूरेव सुखं न सुषुवे पुरा ।

सा व्याप्तिकन्या त्वन्न्यायात्पक्षं पत्युर्गृहं जहौ ॥ 425 ॥

अतः श्रुतिगृहावाप्तभिक्षान्नेन जिजीविषेत् ।

वृथाद्य मा कृथा मातुः शयनीये पदोद्यमम्॥ 426 ॥

किञ्चाज्ञ भवदाचार्यचातुर्यं त्वं विचारय।

योऽविद्यास्तमयो मोक्षः सा संसार उदाहृतः ॥ 427

इत्याह सोधुना श्रुत्या प्रोक्तार्थं चोत्सिसृक्षति ।
स्वयं किं वक्ति सा वाणी किं वक्तीति विचार्यताम्॥ 428 ॥

सा चाज्ञानस्य बन्धस्य च्छेतृज्ञानमचीकथत् ।
एवं सति किमाक्ष्येपं किं वा क्षेपकमुच्यताम् ॥ 429 ॥

का वात्रायुक्तता नाम कस्योपादानमज्ञता ।
व्याप्तिः कस्यापकाराय चित्रं शास्त्रप्रवर्तनम् ॥ 430 ॥

पूर्वोत्तरापरिज्ञानोपादानं शास्त्रमेव तत् ॥ 431 ॥

अपि चान्यां कथां मोक्षपथारोहे श्रतां श्रुणु ॥ 432 ॥

यदा स्यात् परमो मोक्षो लिङ्गभङ्गस्तदा किल ।
महाऽविद्यानिवृत्तिश्च तदैव स्यान्मुमुक्षताम् ।
अनल्पकल्पपर्यन्तं संसारयति या बुधान् ॥ 433 ॥

नश्यन्नश्यन्नयं देहो न तथा बन्धनं नृणाम् ।
यथानादिर्लिङ्गदेहो यो ज्ञानघनमग्रसीत् ॥ 434 ॥

सैवाविद्यातिमहती या न ज्ञानेप्यनश्यत ।
नानाभोगस्य देहस्य जीवन्मुक्तौ च साधिका ॥ 435 ॥

ज्ञानोदयादाविमोक्षं जीवन्मुक्तिदशा किल ॥ 436 ॥

एवं च लिङ्गदेहास्ते साऽविद्या तन्निमित्तिकाः ।
पुत्रमित्रकलत्राद्या देहगेहधनादयः ॥ 437 ॥

अनन्ता मुक्तिपर्यन्ता हेतूपोद्बलितादपि ।
पूर्वज्ञानादप्रनष्टा न ज्ञानस्य विरोधिनः ॥ 438 ॥

पुनर्ज्ञानशतेनापि निवर्त्या नेति मे मतिः ।
दावाग्निना यो न दग्धः किं तद्दाहो गृहाग्निना ॥ 439 ॥

बहुकालव्यवहितं स्वभावादनिवर्तकम् ।
श्रुत्युक्तं साधनं ज्ञानं द्वारमन्यदपेक्षते ॥ 440 ॥

अनष्टाज्ञाननाशाख्यद्वारं पूरितमेव ते ।
अतो द्वारवतीनाथं द्वारसिद्ध्यै भज प्रभुम् ॥ 441 ॥

मयि भक्तिर्हि लोकानाममृतत्वाय कल्पते ।
इति भागवते योसौ मुक्तेर्द्वारमबूबुधत् ॥ 442 ॥

अज्ञानानुसृतिस्तस्मादज्ञानादेव केवलम् ।
नोपादानमनादेर्यन्नापि ज्ञानान्यलीयत ॥ 443 ॥

किं चाधिष्ठानचैतन्यस्याज्ञानावरणे सति ।
अर्थानुल्लेखिताख्यं स्याद्वैकल्यं भवतो मते ॥ 444 ॥

अनाद्येवतदज्ञानं नान्तरागन्तुकं किल ।
न चेदज्ञाततार्थस्य कथं स्याज्जडवस्तुनः ॥ 445 ॥

चिद्वैकल्यादेव तेषामज्ञातत्वं मते तव ।
न हि प्रातीतिकः सर्वो घटादिरपि ते मते ॥ 446 ॥

अतो प्रतीतता तेषामधिष्ठानावृतेः परम् ।
भ्रमानुकूलं पूर्वं चेत्तं रुणद्धि पुनः कथम् ॥ 447 ॥

पश्चात्तु तन्निरोधाय किमज्ञानं तपोतपत् ।
मध्येऽज्ञानान्तरोत्पत्तावनादित्वकथा गता ॥ 448 ॥

मुक्तावपि तदुत्पत्या स्यान्मुक्तस्य पुनर्भवः ।
तस्मादावृतचैतन्यं नार्थज्ञानं भवेत्तव ॥ 449 ॥

अतदाकारविकृतिरधिष्ठानावृतिस्तथा ।
द्वे शक्ती किल तेऽज्ञाने वैकल्यस्यैव कर्तृ तत् ॥ 450 ॥

अतोऽज्ञानोद्भवं विश्वं तदा ब्रह्म न वीक्षते ।
उत्पत्तिसमये सर्वमनारोपितमेव तत् ॥ 451 ॥

वृत्त्याऽज्ञाननिवृत्तौ हि ब्रह्म तत्तद्भ्रमस्तव ।
अपरोक्षा तु या वृत्तिः सैवाज्ञाननिवर्तिका ॥ 452 ॥

सा चार्थेन्द्रियसंयोगे सत्येव स्यान्न चान्यथा ।

सन्निकर्शश्च सम्बन्धिद्वयसत्त्वे परं भवेत् ॥ 453 ॥

अतो भ्रमात् पूर्वमेव सर्वमेतच्चराचरम् ।

जगतस्तीति किं वा ते भवेदारोपितं वद ॥ 454 ॥

तस्मादभ्रमसिद्धत्वाद्ब्रह्मवत् परमार्थसत् ।

परप्रक्रिययैवाभूच्चराचरमिदं जगत् ॥ 455 ॥

ब्रह्मचिन्नघटारोपो यदज्ञाननिवर्तनम् ।

सापेक्षते तच्च साक्षात्कारिवृत्तिमसौ पुरा ॥ 456 ॥

अवश्यमर्थसम्बन्धं स चार्थानामवस्थितिं ।

एवं च प्राक् सतोर्थस्य कथं स्यादन्त्यजाज्जनिः ॥ 457 ॥

मत्यापरोक्षवृत्तिश्च तत्तेभून्न जगद्भ्रमः ।

यतोर्थसन्निकर्षोत्था सा सर्वत्र विचारणे ॥ 458 ॥

मायामयस्य चारोपो द्रष्टॄणां दुष्टचक्षुषा ।

अमायिके नैव भवेद्रजतस्येव स भ्रमः ।

दोशशक्त्यैव सर्वत्र नाक्षयोगमपेक्षते ॥ 459 ॥

सर्वं मायामयं यस्य तस्य देहेन्द्रियादिकम् ।

कस्य वा मायया सृष्टं नहि मायाविनिभ्रमः ॥ 460 ॥

मायाविनो महेशस्य यदि भ्रान्तिर्निगद्यते ।

तर्हि माया न सा तस्याप्यासीदज्ञानमेव तत् ॥ 461 ॥

एवं चाज्ञानाप्तिवैकल्याख्यशल्योद्धृतेः पुरा ।

नोल्लिखेदैश्वरी वा चिद्ब्राह्मी चिद्वा जगत्रयम् ।

जिन्मात्रेप्यस्ति वैकल्यं न चेज्जीवचितोपि न ॥ 462 ॥

दृग्दृश्ययोगायोगेन वृत्तिश्च न जगद्भ्रमः ।

यत्साऽर्थयोगवत्साभा तस्माच्च न जगद्भ्रमः ।

तस्मान्नारोपयेदैशीब्राह्मीवाचिज्जगन्मम ॥ 463 ॥

मायाविनो न चेद्भ्रान्तिर्विश्वमासीदनाकुलम् ।

मायाविनोयदि भ्रान्तिर्विश्वं नारोपितं मम ॥ 464 ॥

किञ्च मायाविनः स्थूलदेहेन्द्रियगुणादिकम् ।

ब्रह्मगाज्ञानपरिणामात्मकं तेन चेष्यते ॥ 465 ॥

एवं चेज्जगदेतच्च ब्रह्म स्वाविद्यया सृजेत् ।

अतदाकारपरिणामाख्यविक्षेपशक्तया ॥ 466 ॥

अज्ञानापगमे चाधिष्ठानदृक् चास्तु तस्य दृक् ।

बकबन्धाय निर्बन्धो निर्निबन्धन एव ते ॥ 467 ॥

तस्मादज्ञानकलिलं ब्रह्म वा माययावृतः ।

महेश्वरो वा सर्वार्थांस्तया पूर्वं द्विरूपया ॥ 468 ॥

अतदाकारपरिणामाख्यविक्षेपशक्तया ।

करोत्येव ततःपश्चात् सन्निकृष्टेन्द्रियैः शुभैः ।

पश्यन्ति सर्वे सर्वत्रेत्येव वाच्यं त्वयापि हि ॥ 469 ॥

मायारूप्यं शुक्तिरूप्यं दोषशक्तैव केवलम् ।

दृष्टं स्यात् सन्निकृष्टत्वं तत्र नेष्टं द्वयोरपि ।

अतस्तदारोपितं स्याद्दोषयुक्तेन चक्षुषा ॥ 470 ॥

व्यावहारिकविश्वं तु सन्निकर्षेऽक्षगोचरः ।

नोचेन्नेति मतं यस्मात्तवापि च ममापि च ।

तस्मादनारोपितत्वं तत्वमासीज्जगत्रयम् ॥ 471 ॥

अतस्त्वप्रक्रियाम्बैव सूत्रे नारोपितं जगत् ।

या जलाञ्जलिना स्वेनैवारोपाग्निमशीशमत् ॥ 472 ॥

अतो मूलस्य शोधे तु मिथ्यात्वे नास्ति कारणम् ।

सत्यत्वसाधकान्येव सन्दृश्यन्ते सहस्रशः ॥ 473 ॥

तदधिष्ठानचैतन्यं प्राग्विश्वाकारविक्रियम् ।

तत्कल्पकभ्रमत्वं तु तस्य न स्यात्कदाचन ॥ 474 ॥

वृत्तिश्च सन्निकृष्टार्थभवा सिद्धस्य वेदनम् ।

तत्कल्पकभ्रमत्वं च तस्या अपि न कर्हिचित् ॥ 475 ॥

तस्मादभ्रमसिद्धत्वं सत्यतासाधकं दृढम् ॥ 476 ॥

तत्र तत्र स्थितं ब्रह्म स्वाज्ञानकलिलं किल ।

घटोहमित्यादिरूपैर्भ्रान्तं सर्वत्र सर्वदा ।

इत्यन्तभ्रान्तिमात्रस्य विवर्तोयं भवः किल ॥ 477 ॥

यदि स्वाज्ञानतो ब्रह्म घटं कल्पयति भ्रमात् ।

कुलालमृत्तिकादण्डचक्राद्यैः किं प्रयोजनम् ॥ 478 ॥

किं कारुदार्वपेक्षास्ति गन्धर्वपुरसर्जने ।

किं वा सर्पस्य मिथुनाद्रज्जुसर्पजनिस्तव ॥ 479 ॥

मुद्गरस्य प्रहारेण भ्रमं मुञ्चति नान्यथा ।

अहो दुर्जनसङ्गत्या दौर्जन्यं ब्रह्मणोप्यभूत् ॥ 480॥

विपरीतप्रमाबाध्यो भ्रमः सर्वत्र दृश्यते ।

मुद्गरेण भ्रमोच्छेदस्त्वद्भ्रमस्यानुमापकः ॥ 481 ॥

अज्ञाने ज्ञाननाश्यत्वभ्रमं च तव मुद्गरः ।

मोचयामास तद्वादी मुद्गरस्तत्ववादिनाम् ॥ 482 ॥

नष्टस्यापि पुनर्ज्ञानेनापि नाशो यदीष्यते ।

तदा नाशस्य नाशेन जगदुन्मज्जनं भवेत् ॥ 483 ॥

दग्धे पटे कारणेन सह कार्यं विनश्यति ।

एवं निश्येषनष्टस्य पुनर्नाशोष्टमो रसः ॥ 484 ॥

अतो ज्ञानाविनाश्यत्वात् सत्या घटपटादयः ।

सत्यत्वादेव नारोप्याः सर्वे ब्रह्मवदेव हि ॥ 485 ॥

या चक्षुः प्रभवा वृत्ती रूपवद्घटगोचरा ।

नीरूपब्रह्मगाज्ञानं सा निवर्तयते कथम् ॥ 486 ॥

तप्तवारिस्थितस्याग्नेरज्ञानं किं तया गतम् ।

घटस्थरसगन्धादेरज्ञानं वा ततो गतम् ॥ 487 ॥

योग्यावच्छेदक बलादयोग्यस्यापि दर्शनम् ।

इति पक्षोपि नैव स्याद्रसादौ तददर्शनात् ॥ 488 ॥

चक्षुर्योग्यघटस्थोपि किं रसश्चक्षुषेक्ष्यते ।

अतः स्वविषयाज्ञानं कथं वृत्त्या निवर्त्यताम् ॥ 489 ॥

एकस्य भ्रमनाशः स्यादेकाज्ञानविनाशने ।

तत्रैव पुनरन्येषां स्वस्वाज्ञानैः भ्रमः किल ॥ 490 ॥

एवं च तत्तद्भ्रान्त्यर्थं बह्वज्ञानप्रकल्पने ।

अतिस्थिरतरे वस्तुन्यनन्ताज्ञानकल्पना ॥ 491 ॥

भावरूपं च तेऽज्ञानं तेन स्यादणुरद्रिवत् ॥ 492 ॥

बहिष्ठं तद्धि चैतन्यं जीवस्त्वन्तःस्थितः सदा ।

ज्ञात्रन्यद्व्यवहर्तान्यस्तस्मात् किं केन सङ्गतम् ॥ 493 ॥

ऐक्यात्तेनैव दृष्टेर्थे यद्यस्य व्यवहर्तृता ।

यज्ञदत्तेन दृष्टार्थव्यवहारं तथैव हि ॥ 494 ॥

देवदत्तोपि तद्गात्रमात्रदर्शी करोत्वयम् ।

व्यावहारिकभेदादैक्यस्य च समत्वतः ॥ 495 ॥

अवच्छेदकभेदश्च तत्रात्रापि च यत्समः ।

वृत्तिद्वाराबहिर्यात्रा तेनैक्यं चापि यत्समम्॥ 496 ॥

घटोपस्थापिका वृत्तिर्ब्रह्मोपस्थापिकैव न ।

तदुल्लेखप्रकारस्य न तरां स्थापिका हि सा ॥ 497 ॥

यद्यधिष्ठानचैतन्यं तस्य तस्य भ्रमस्तव ।

घटोहमिति वा तस्याकारोयं घट इत्युत ॥ 498 ॥

आद्ये किं तेन देहस्थव्यवहर्तुः प्रयोजनम् ॥ 499 ॥

वृत्तिद्वारा बहिर्गत्वा तेनैकभावमेत्ययम् ।

अतस्तज्ज्ञानमेवास्य ज्ञानं व्यवहृतिर्यदि ।

देहान्तस्तर्हि जीवस्याभावान्निर्जीवता तनोः ॥ 500 ॥

अणुर्निरंशो जीवोयं कथमन्तर्बहिश्चरेत् ।

दूरस्थसूर्यचन्द्राप्तिर्मरणादतिरिच्यते ॥ 501 ॥

किञ्चैवं सति देहान्तः पुनरागत्य देहिनः ।

घटोहमित्येव तेन जन्याव्यवहृतिर्भवेत् ॥ 502 ॥

कुतो घटोहमित्येवमाकारा सा प्रजायते ।

जलस्यानयनार्थं च स्वोदरे पूरयेज्जलम् ॥ 503 ॥

अनुभूत्यनुसारेण व्यवहारादि जायते ।

न चैवं व्यवहारोस्ति तस्मादनुभवोपि न ।

अतो नैतादृशारोप इत्यनारोपितं जगत् ॥ 504 ॥

द्वितीये त्विदमंशेस्मिन्नाधिष्ठानप्रतीतिता ।

स्वात्मानमहमित्येव ह्युल्लिखेत् साक्षिचित् सदा ।

अयमित्युल्लिखन्नंशं तं पृथक्कुरुते स्वतः ॥ 505 ॥

स्वयमेव ह्यधिष्ठानं नासावंशोपि यः पृथक् ।

अधिष्ठान्नोल्लेखशून्यं घटज्ञानं न तद्भ्रमः ।

निरधिष्ठानकभ्रान्तिर्बाह्यानामेव नावयोः ॥ 506 ॥

अथ वृत्तिरियं तर्हि घटारोपकथा गता ।

घटापरोक्षवृत्तिः स्याद्घटस्येन्द्रिययोगतः ।

घटस्येन्द्रिययोगश्च घटसत्येव नान्यथा ॥ 507 ॥

अतो वृत्तेः पुरा सन्निकर्षस्य घटको घटः ।

अस्त्येवेति कथं तस्य वृत्त्या स्यात्कल्पना वद ॥ 508 ॥

वृत्तेर्भ्रमत्वे दृश्यस्य तत्रारोपो न ते मते ।

यद्दृशोन्यत्र नारोप इत्यनारोपितं जगत् ॥ 509 ॥

दृग्दृश्ययोगायोगेन मिथ्यात्वाशापि ते गता ॥ 510 ॥

न चेयं वृत्तिरेवास्मिन् घटे तद्ब्रह्मताभ्रमः ।

चक्षुर्वृत्तावरूपस्य चैतन्यस्याप्रकाशनात् ॥ 511 ॥

न हीदमिति वा गन्धरसाद्यं भासते दृशि ।

अतोधिष्ठानविज्ञानशून्योयं स्याद्भ्रमः कथम् ॥ 512॥

घटाक्षसन्निकर्षोत्था या वृत्तिस्तं घटं हि सा ।

प्रागेव सन्तमन्यत्र स्वस्मिन् वा कल्पयेत् कथम् ॥ 513 ॥

वृत्त्याज्ञाने विनष्टे हि स्यादधिष्ठानदृग्भ्रमः ।

वृत्तिश्चोक्तप्रकारेण घटे सत्येव नान्यथा ।

भ्रमात्पूर्वं च सन्नर्थो ब्रह्मवन्नभ्रमोद्भवः ॥ 514 ॥

किञ्चाहं घट इत्येव चैतन्यं चेद्घटभ्रमः ।

गौरोहमितिवत्तर्हि भ्रान्तिः सा प्रातिभासिकी ॥ 515 ॥

न चेतनो घट इति बाधस्याद्यैव दर्शनात् ।

व्यावहारिक तस्माद्घटादेर्जगतो गता ॥ 516 ॥

इदमित्यन्यदुल्लिख्य तदभेदं घटे यदि ।

उल्लिखेत् ब्रह्मचैतन्यं साभ्रान्तिरपि पूर्ववत् ।

नासावयमिति स्पष्टं बाधस्यैवाद्यदर्शनात् ॥ 517 ॥

स्वस्मिन् वा देशकाले वा घटोस्तीत्युल्लिखेद्यदि ।

नायं तर्हि घटारोपः प्राक् सिद्धस्य विशिष्टधीः ॥ 518 ॥

अधिष्ठानोल्लेखशून्यत्वाच्च नायं भ्रमस्तव ।
न हि देशाद्यधिष्ठानं नाप्यत्रायमिति भ्रमः ॥ 519 ॥

अतस्मिन् तदिति ज्ञानं भ्रमः किल भवन्मते ।
इदं रजतमित्येव भ्रमः सर्वत्र दृश्यते ॥ 520 ॥

अथेयं मानसीवृत्तिरधिष्ठानचितं हि ताम् ।
इदमित्युल्लिखन्त्यस्या घटाभेदं च पश्यति ।
अयमेव घटारोप इति पक्षो न शोभते ॥ 521 ॥

अधिष्ठानदृगेवाध्यस्तस्यारोपो हि ते मते ।
अतीन्द्रियं रूपशून्यं कथं चाक्षुषधीः स्पृशेत् ॥ 522 ॥

यदि स्पृशेत्तदाऽज्ञानं विनश्य स्पष्टमेव तत् ।
उल्लिखन्ती जडाभेदं चेतने कथमुल्लिखेत् ॥ 523 ॥

इदानीमेव बाधेन स्यात्तदा प्रातिभासिकी ।
एवं च घटकुड्यार्देर्व्यावहारिकता गता ।
भिक्षा जिघृक्षया यान्तं श्वा जग्राह पदे किल ॥ 524 ॥

अतो देशे च काले च घटोस्तीत्येव सोल्लिखेत् ।
अयं च न घटारोपः प्राक्सिद्धस्य विशिष्टधीः ॥ 525 ॥

यद्यज्ञानान्न वैकल्यं ब्रह्मणस्तर्हि न भ्रमः ।
यद्यज्ञानेन वैकल्यं ब्रह्मणस्तर्हि न भ्रमः ।
प्रमाणस्य ह्यवैकल्ये दोषाभावाद्ग्रहः प्रमा ।
प्रमाणस्य हि वैकल्यात् घटस्याग्रहणं तव ॥ 526 ॥

यद्यारोपं विनापि स्याद्घटादीनामवस्थितिः ।
तरह्यनारोपितं सर्वं जगद्ब्रह्मवदेव हि ॥ 527 ॥

यद्यारोपं विना न स्यात्सर्वं प्रातीतिकं भवेत् ।
प्रमाणस्य हि वैकल्यात् कस्याग्रहणमुच्यते ।
अज्ञानाद्येव कस्मात्ते प्रातीतिकमभून्मते ॥ 528 ॥

आरोपं कुण्ठनं चेत् स्यात्तदा घटनिवर्तने ।
निर्घटं जगदेतत्स्यात् सन्निकर्षाद्यसम्भवात् ॥ 529 ॥

चक्षुर्वृत्तेरयोगेन कुण्डने नास्ति कुण्डनम् ।
अतः पुनर्भ्रमायोगादघटं भूतलं भवेत् ॥ 530 ॥

आरोपकुण्ठने चेत् स्यात्तर्ह्यनारोपितो घटः ।
नारोपितो हि सोश्वः स्याद्योश्वाभावेपि तिष्ठति ॥531॥

घटो ज्ञानेन जन्यश्चेत्तर्हीदंपूर्वता कुतः ।
अज्ञानस्य ब्रह्मणश्च सदा सर्वत्र वर्तनात् ॥ 532 ॥

मृदाद्यभावान्नभूच्चेत्तत्किमज्ञानजं न ते ।
यदि तत्सर्वमन्यस्माद्धटस्तस्माद्भविष्यति ॥ 533 ॥

यद्यज्ञानेन ते ब्रह्म घटं भ्रान्त्यैव कल्पयेत् ।
मठान्तर्घटसन्तानैः कुतो नापूर्यते स्थली ॥ 534 ॥

किं कुलालस्य शालैव ब्रह्मणः क्षीरसागरः ।
किं दीर्घादीर्घबाधाभ्यां विशेषो बाध्यवस्तुनोः॥ 535॥

अव्ययव्यतिरेकाभ्यां दृष्टं कारणचक्रतः ।
तत्तत्कार्यस्य जन्मास्तु तेऽज्ञानं तव तिष्ठतु ॥ 536 ॥

यदीदमंशो ब्रह्मस्यादनिदंरूपता कथम् ।
स्थैर्यासिद्धिः पदार्थानां देशकालाविचक्षणे ॥ 537 ॥

घटं ताडयता दण्डैः प्रायो ब्रह्मापि ताडितम् ।
यदौपनिषदत्वे स्वे छलं त्यक्त्वैव दृश्यते ॥ 538 ॥

किं लोकानुभवः सूत्रं येन भाष्यमपेक्षते ।
देशकालस्थमेवेदं तदित्याहुर्हि लौकिकाः ॥ 539 ॥

घटोयमिति धीर्भ्रान्तिः किल लोकस्य सम्मता ।
यद्ब्रह्मघटतादात्म्यधीत्वं तस्याः परो भवेत् ॥ 540॥

घटे नायं घट इति या भ्रान्तिः सा प्रमा किल ।

यद्घटो ब्रह्मनेत्यर्थस्तस्याः परमते भवेत् ॥ 541 ॥

यस्य ह्यभ्रमकालेपि सिद्धिः स्वमतसम्मता ।

अनारोपितमेवेदं ब्रह्मवद्धि घटादिकम् ॥ 542 ॥

अनानुभविकं स्वस्य सर्वानुभवबाधितम् ।

मिथ्यात्वे बहुकल्प्यं स्यात्ततः सत्यमिदं जगत् ॥ 543 ॥

प्रधानसदृशाकारवर्णाधिष्ठानदर्शने ।

तथा तथा भ्रमोपि स्यान्नान्यथा यत्र कुत्रचित् ॥ 544 ॥

पृथुबुध्नोदराकारगटवर्णशिवादिके ।

घटभ्रमस्तथैवोर्ध्वे स्थाण्वादौ पुरुषभ्रमः ।

रजताकारसदृशवर्णे तु रजतभ्रमः ॥ 545 ॥

विचित्राकारवर्णानामनन्तानन्तधर्मिणाम् ।

शुद्धब्रह्मण्यधिष्ठाने विश्वविभ्रमसिद्धये ।

स्वभावसिद्धा सिद्धाभूज्जगदाकारवर्णता ॥ 546 ॥

अधिष्ठानमनारोप्यं तवैवावश्यकं मते ।

ब्रह्मणः पारमार्थ्यं हि न सिध्येदन्यथा तव ॥ 547 ॥

निरधिष्ठानकभ्रान्तिवादिना च भवेद्ध्रुवम् ।
अधिष्ठानं हि शुद्धं ते व्यावहारिकविभ्रमे ॥ 548 ॥

सोपाधिकभ्रमेपि स्यादुपाधेस्तादृगात्मता ।
पीतः पीतेन पित्तेन तिक्तस्तिक्तेन तेन हि ॥ 549 ॥

तवोपाधिरविद्यैव तत्राकारादि कल्पितम् ।
उपाध्यन्तरशून्यत्वान्निरुपाधिकमेव तत् ॥ 550 ॥

तन्निष्ठनियताकारभ्रान्त्यै ब्रह्मभवेत्तथा ।
अतो जगद्भ्रमायाभूद्ब्रह्मैव जगदन्तरम् ॥ 551 ॥

ममास्तु तज्जगत्सत्यं मनोरथरथोपमम् ।
इदं जगत्तवैवास्तु मिथ्या मिथ्यात्ववादिनः ॥ 552 ॥

पटस्थले घटभ्रान्तिर्घटदेशे पटभ्रमः ।
न क्वापि विद्यते वस्तुव्यत्यासो विभ्रमस्य हि ॥ 553 ॥

तत्तदा स्याद्यदि ब्रह्म तत्र तत्रैव तादृशम् ।
स्वयमस्ति न चान्यत्र ततो भ्रान्तिश्च तादृशी ॥ 554 ॥

अधिष्ठानानुसारेण तत्र तत्रैव जायते ।
इति वा स्वस्वहेतूत्थाः पदार्थास्तत्र तत्र हि ॥ 555 ॥

सन्ति स्वभावतस्तस्मात्तत्र तत्रैव तादृशी ।

मतिर्व्यत्यासतो नेति व्यवस्थाश्रयणेन वा ।

इतस्तृतीयः पन्थास्तु न मुरारेश्च विद्यते ॥ 556 ॥

पक्षद्वयेपि नास्माकं हानिरुक्तप्रकारतः ।

शुद्धं जगत्पूर्वपक्षे जडं पक्षान्तरे जगत् ॥ 557 ॥

मिथ्याचेत्तद्भवेत् प्रातिभासिकं क्षणिकत्ववत् ।

इदानीमेव बाधेन तत्रारोपोपि बाधितः ।

तदा सत्यं जगदिदं भवेन्मम निराकुलम् ॥ 558 ॥

अधिष्ठानान्तराभावात्कथं ब्रह्मणि कल्पितम् ।

भवेत्तन्न ह्यधिष्ठानपारम्पर्यं च ते मते ॥ 559 ॥

मायासृष्टिर्न नियता मन्त्रशक्त्येव सा यतः ।

फणीकुर्यान्मणीकुर्यात्तृणीकुर्याच्च तत्पुनः ॥ 560 ॥

अयं तु नियतारोपो रूप्यसर्पभ्रमादिवत् ।

उक्ता व्यवस्था तत्प्राथ्र्या सुस्थोनर्थस्ततस्तव ॥ 561 ॥

अधिष्ठानं प्रधानं च समसत्ताकमेव हि ।

दृश्यते रजतारोपे सर्पारोपादिकेषु च ॥ 562 ॥

सदृशं च तदन्योन्यं नियतभ्रमसिद्धये ।

अत एव प्रधानं तदारोप्यादधिकं यतः ॥ 563 ॥

तद्बाधेपि न तद्बाधो दोषः काचादिरेव च ।

तथाविधो यतो दृष्टस्त्रितयं तद्भ्रमेपि सत् ॥ 564 ॥

इयं विभ्रममर्यादा स्वीकार्यालोकसम्मता ।

दृष्टस्यास्य परित्यागे स्याददृष्टस्य कल्पना ॥ 565 ॥

तद्विश्वभ्रमसिद्ध्यर्थं प्रधानं जगदन्तरम् ।

अधिष्ठानब्रह्मसमसत्ताकं स्यादनिच्छतः ।

दोषोपि तादृक्कल्प्यःस्यादुक्तो दोषो न चेद्भवेत्॥ 566॥

व्यावहार्यं प्रधानं चेदधिष्ठानं च तादृशम् ।

बलात् स्यात्सदृशे ते हि कुतो विशदृशे वद ॥ 567 ॥

अधिष्ठानान्तरं वाच्यमधिष्ठानभ्रमे यदि ।

तदा प्रधानभ्रान्तौ च स्यात् प्रधानान्तरं तव ॥ 568 ॥

पूर्वं पूर्वं प्रधानं चेत्कार्ये कार्ये ममापि हि।

उपादानमधिष्ठानं तद्भागस्तस्य तस्य च ॥ 569 ॥

इदमेव ह्यधिष्ठानं प्रतीतेरनुसारतः ।

न ब्रह्म नेह नानेति तत्र विश्वाप्रतीतितः ॥ 570 ॥

ब्रह्म वा व्यावहार्यं स्यादधिष्ठानं तदंशकः ।

तस्य स्युस्तत्तदंशाश्च तस्य तस्य प्रधानवत् ॥ 571 ॥

निरधिष्ठानता तु स्यात् सर्वथा तस्य वर्जने ।

अन्यथा निरधिष्ठानो भ्रमः स्याद्रजतभ्रमः ॥ 572 ॥

अथवा जडमात्रस्य ब्रह्माधिष्ठानमस्तु ते ।

ब्रह्मणो जीव एवास्तु यत्सोहमिति ते भ्रमः ॥ 573 ॥

मिथो जीवैक्यवादे च जीवो जीवान्तरस्य भूः ।

एवं चानन्तजीवास्ते भूयासुर्भ्रमभूमयः ॥ 574 ॥

यदि भीर्ब्रह्महत्याया भीतो भव जगत्क्षयात् ।

अब्रह्मवादितापीष्टा तव भाट्टानुसारिणः ॥ 575 ॥

ब्रह्मवादा जगद्वादैः सह यान्तु वनान्तरम् ।

प्रकारद्वयतो लघ्वी सर्वत्रैकप्रकारता ॥ 576 ॥

लोके सत्तासाम्यदृष्टेरधिष्ठानप्रधानयोः ।

कल्प्यमेतत्समस्तं च विपरीते विपर्ययः ॥ 577 ॥

आरोप्यमाणादधिकसत्ताकत्वं यतस्त्रिषु ।

लोकसिद्धं भ्रमे व्याप्तं तदभावे तु न भ्रमः ।

व्यापकस्य निवृत्तौ च किं स्याद्व्याप्यस्य वर्तनम् ॥ 578 ॥

किञ्च दोषोपि कोत्र स्यादिति चिन्त्यं विवेकिभिः ॥ 579 ॥

अविद्यमानमेवार्थं भ्रमकाले तु यः स्थिरः ।

प्रदर्शयति लोकस्य स दोष इति गीयते ।

कारणेषु यथा काचो यथार्थेष्वतिदूरता ॥ 580 ॥

उपादानं तवाज्ञानं तन्तुवत्कार्यकारकम् ।

भ्रमकालेतु यन्नश्येत् कः पश्येत्तस्य दोषताम्॥ 581 ॥

यत्प्रवृत्तौ भ्रमस्यापि प्रवृत्तिः स्यात्पदेपदे ।

यन्निवृत्तौ निवृत्तिश्च भ्रमस्य स हि पण्डितैः ॥ 582 ॥

दोष इत्युच्यतेऽनीदृग्गज्ञानं ते जगत्त्रये ।

कथं दोषो भवेत्पश्य प्रतिकर्मव्यवस्थितिम् ।

नचेत्तन्तुः पटे दोषो मृद्दोषो मृण्मये भवेत् ॥ 583 ॥

किञ्च कुड्येण वस्त्रेण तमसा वाऽऽवृते घटे ।

ज्ञानमात्रनिरोधेन न प्रमा नापि चाप्रमा ॥ 584 ॥

तस्मादावरणाज्ञानं स्याज्ज्ञानप्रतिबन्धकम् ।

भ्रमहेतुः कथं दोषो भावाज्ञानमिदं वद ॥ 585 ॥

तद्दोषस्य दोषत्वभ्रमो यस्तव चेतसि ।

तत्र दोषो भवेच्छब्द्भावाज्ञानं परं तव ॥ 586 ॥

तस्माद्योग्यप्रधानादेरभावान्न जगन्मृषा ॥ 587 ॥

अतीतकल्पेऽतीतं यत् प्रधानं तज्जगत्तव ।

तत्संस्कारेण चेदानीमारोप्यं ते घटादयः ।

इति वाच्यं नष्टदृष्टेरदृष्टत्वाद्भ्रमान्तरे ॥ 588 ॥

यतोनुभूयमानस्यवारोपोयमभून्न ते ।

भ्रमोन्योयं  प्रधानस्य संस्कारोद्बोधजो ध्रुवम्॥ 589 ॥

भ्रमहेतुः स संस्कारो यदि जीवेषु जृम्भते ।

जातिस्मरत्वसिद्ध्यर्थं तपांस्यासंस्तदा वृथा ॥ 590 ॥

संस्काराधारमनसोऽसत्त्वाच्च न स वर्तते ।

घटावच्छिन्नचैतन्ये तत्संस्कारात्कथं भ्रमः ॥ 591 ॥

ज्ञानोपादानमनसः संस्काराधारतोचिता ।

अन्यत्रानुभवोन्यत्र संस्कार इति को वदेत् ॥ 592 ॥

तत्संस्काराद्यभोगेन संस्कारस्य तिरस्कृतेः ।
दोषस्य दूषणाच्चैव सत्यमासीज्जगत्रयम् ॥ 593 ॥

विमतोयं प्रपञ्चस्तदनारोपित एव हि ।
आरोपहेतुशून्यत्वाद्यथा ब्रह्मेति साध्यते ॥ 594 ॥

दृष्टानुसारवैरूप्ये नष्टारोपकथा वृथा ।
इत्यारोपलतामूलं सिक्तमुष्णेन वारिणा ॥ 595 ॥

आरोपयोग्याधिष्ठानशून्यत्वात् परमार्थसत् ।
ब्रह्मवज्जगदेतत्स्यादिति सर्वं समञ्जसम् ॥ 596 ॥

दृष्टानुसारवैरूप्ये सत्यं जगदभून्मम।
दृष्टानुसारसूरूप्ये सत्यं जगदभून्मम ॥ 597 ॥

घटोहमिति न भ्रान्तिरनानुभविकत्वतः ।
घटोयमिति चेद्भ्रान्तिः स्वस्मिन्नासौ घटभ्रमः ॥ 598 ॥

स्वस्याहन्त्वेन भास्यत्वनियमादावयोर्मते ।
अन्यत्र नैक्यभ्रान्तिः सा तद्भेदस्य स्पुटत्वतः॥ 599 ॥

अन्यत्र सत्त्वमर्थश्चेन्नभ्रान्तिः सा प्रमैव हि ।
अभ्रान्तिसिद्धा सत्ता स्यात् स्वस्मिन्नेव घटस्य हि ॥ 600 ॥

अहमर्थे ह्यधिष्टाने यतो नायमिति भ्रमः ।

अयं घट इति भ्रान्तिः कथं तामुल्लिखेत्ततः।

अतोऽधिष्ठानदृग्रूपभ्रान्तिर्वक्तुं न शक्यते ॥ 601 ॥

घटोयमिति वृत्तिश्चेद्दृश्याध्यासो गतो दृशि ।

नीरूपब्रह्मणश्चक्षुर्वृत्तौ भानविरोधतः ॥ 602 ॥

अधिष्ठानब्रह्मघटभ्रमरूपा न साप्यभूत् ।

घटावच्छिन्नमप्यभ्रं चक्षुषा न हि दृश्यते ॥ 603 ॥

वृत्त्याऽज्ञानविनाशे हि ब्रह्मणः स्फुरणं तव ।

वृत्तिः प्रथमसम्भूता कालाद्येवावलम्बते ॥ 604 ॥

इत्यारोपकुठाराग्रे क्रूरा धारैव दुर्घटा ।

स्वच्छविश्वद्रुमच्छेदः कर्तुं तत्केन शक्यते ॥ 605 ॥

घटोयमिति धीर्दृक् चेन्नाधिष्ठानभ्रमस्तव ।

घटोयमिति वृत्तिश्चेत् नाधिष्ठानभ्रमस्तव ॥ 606 ॥

अनारोपितवस्तुत्वाद्विश्वं स्यात्परमार्थसत् ।

ब्रह्मवद्बाधकोक्तीनामन्यार्थत्वं च तद्बलात् ॥ 607 ॥

चक्षुरादीन्द्रियैबाह्यैर्बहिष्ठोर्थो यदीक्ष्यते ।

घटोयमित्यादि रूपं तदाज्ञानं विदुर्बुधाः ॥ 608 ॥

इदमंशो नानुमितौ न शाब्द्यामपि विद्यते ।

अपरोक्षे परं सस्याद्वाह्याक्षैर्बाह्यवस्तुनः ॥ 609 ॥

स्वाङ्गस्थभूषणादीनां चक्षुषा विक्षणेपि हि ।

ममेदमिति वा ज्ञानं मयीदमिति वा भवेत् ॥ 610 ॥

साक्षाच्च साक्षिणा वेद्ये साक्ष्याधारे च वस्तुनि ।

अहं सुखी मम सुखमहं जनाम्यहं यते ॥ 611 ॥

अहमिच्छामीति वा धीः सर्वानुभवशोधने ।

गौरोहिमित्यादिरूपो भ्रमोपि किल ते मते ॥ 612 ॥

सुखवानहमित्येव सुप्तावपि मतिः किल ।

अज्ञोहमिति भ्रान्तिरज्ञानस्यापि ते मते ॥ 613 ॥

तस्मात्प्रमायां भ्रान्तौ वा जाग्रत् स्वप्नसुषुप्तिषु ।

अहमित्युल्लिखेत् साक्षी स्वात्मानं नान्यथा क्वचित् ॥ 614 ॥

अतोयं घट इत्याद्या वृत्तिः प्रात्यक्षिकी ध्रुवम् ।

दृग्दृश्ययोगायोगाद्यैः सा भ्रान्तिर्नाभवत्तव ॥ 615 ॥

अधिष्ठानचिदात्मैव भ्रमो वाच्यो भवन्मते ।

स चाहं घट इत्याद्याकारवांस्यान्न चान्यथा ॥ 616 ॥

अनानुभविकत्वाद्यैर्भ्रमोप्येष न शोभते ।

अनारोपितमेवातो जगदासीन्न संशयः ॥ 617 ॥

घटोहमिति या भ्रान्तिः सा पशोश्च न दृश्यते ।

नाहं घट इति ज्ञानं मूढस्याप्यस्ति चेतसि ।

किं ब्रह्म मूढतो मूढं घटोहमिति यस्य धीः ॥ 618 ॥

पशोरप्यहमित्यस्ति सदा ज्ञानमनाकुलम् ।

घटब्रह्मसदाऽज्ञानकलङ्काद्विकलं किल ॥ 619 ॥

पशुश्च स्वगृहं वेत्ति वत्सं वनतृणादिकं ।

घटब्रह्म घटं वेत्ति न पटं वेत्ति कर्हिचित् ।

पटब्रह्म पटं वेत्ति नान्यत्किल कदाचन ॥ 620 ॥

तत्र तत्र स्थितं ब्रह्म तं तमर्थं किलोल्लिखेत् ।

नैवान्यमुल्लिखेत् स्वार्थोल्लेखनं च न सर्वदा ॥ 621 ॥

स्वयोग्य बहुवेत्तृत्वं बालानां च सदैव हि ।

किं ब्रह्म सर्वतः श्रेष्ठं बालादपि च बालिशं ॥ 622 ॥

तुच्छानां पशुपक्ष्यादिजीवानां कृपया किल ।

तस्याज्ञानं विनाश्यं स्यात्तदोन्मिषति नान्यदा ॥ 623 ॥

जडैव मानसीवृत्तिर्जडार्थविषया सती ।

तदज्ञानं तिरस्कुर्यात् स्वच्छा न ब्रह्मचित् किल ॥ 624 ॥

शुकादयो यं प्रपन्नाः स प्रपन्नो जडं किल ।

अहो जडस्य विज्ञानादजडाज्ञानभीर्भवेत् ।

अजडं तु दृढज्ञानं नाज्ञानं भीषयेत्किल ॥ 625 ॥

वेदा एव ज्ञापयन्ति नेन्द्रियाणीति यं श्रुतिः ।

स्तौति ब्रह्मादिदेवाश्च नेक्षन्ते यं स्वचक्षुषा ।

स मूढैः पशुपक्ष्याद्यैश्चक्षुषा दृश्यते किल ॥ 626 ॥

श्रुतिस्मृति विरुद्धेयं सर्वानुभवबाधिता ।

प्रक्रिया विक्रिया कस्मादुररीक्रियते त्वया ॥ 627 ॥

किं ब्रह्मणापराद्धं ते नीचादपि च नीचताम् ।

यत्तस्यसर्वदा ब्रूषे दोषे भीतिः कथं न ते ॥ 628 ॥

**नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने**

**न यत्र श्रूयते माया लोकदृष्टिविकल्पना ॥ 629 ॥**

त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः ।
मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ 630 ॥

इति भागवते प्रोक्ता माया भ्रमकरीश्वरे ।
यस्मान्निषिद्धातेनेदं कथं मायामयं जगत् ॥ 631 ॥

न श्रूयते इति प्राह यत्स्वयं स्मृतिरूपिणी
स्वशक्त्या तन्मृतां मायां श्रुतिशक्त्याप्यमीमरत् ॥ 632 ॥

यद्वा चिच्छक्तिनिर्दग्धमायाशङ्कास्थिभस्मनोः ।
उद्धाराय प्रभोस्तस्य दास्यौ मन्ये श्रुतिस्मृती ॥ 633 ॥

ब्रह्माण्डान्तर्बहिर्भ्रान्तं किं महान्तो महेश्वरम् ।
सम्मानयन्ति ध्यायन्ति शृण्वते मन्वते सदा ॥ 634 ॥

एकैकार्थभ्रान्तिमन्तमपि सन्तः सभान्तरात् ।
निष्कासयन्ति निन्दन्ति किं ते स्वान्ते स्मरन्ति तम् ॥ 635 ॥

सर्वार्थान्  विपरीतांश्च बुद्धिः सा पार्थ तामसी ।
इति गीतासु यः प्राह किं भ्रान्त्यै स्पृहयत्यसौ ॥ 636 ॥

क्वापि योगोर्थसंयोगो योगिनां सर्वदर्शने ।
सोप्यर्थसत्तासापेक्षः किं तेषां नर शृङ्गदृक् ॥ 637 ॥

तत्वज्ञानाय धर्मोस्तु युक्तिः शक्तिश्च वर्तताम् ।
मिथ्यादृष्टिर्न तपसा किं कौर्मे रोम्णि दृङ्मुनेः ॥ 638 ॥

सत्यार्थ एव सन्मान्यो मिथ्यार्थो न महत्प्रियः ।
किं रज्जुसर्पालङ्कारः शुक्तिरूप्याचले शिवः ॥ 639 ॥

अयं घट इति ज्ञानं सर्वेषामस्तु मानसं ।
देशकालस्थतेदन्तातत्र त्वखिलसम्मता ॥ 640 ॥

इयं धीश्च प्रमैवास्तु ब्रह्म श्रुत्युक्तसाधनैः ।
अन्ते निरीक्ष्यमेवास्तु किमप्रामाणिकोक्तिभिः ॥ 641 ॥

अथ दृग्दृश्यसम्बन्धायोगात्केवलमीदृशी ।
कुसृष्टिर्हि त्वया वाच्या सापि शोच्या महात्मनाम् ॥ 642 ॥

एवं सति च दृश्यस्य दृक्सम्बन्धोपि को वद ।
अध्यासाध्यस्तभावश्चेत् सोपि सम्यक् विविच्यताम् ॥ 643 ॥

आरोपरूपज्ञानत्वमध्यासत्वं हि केवलम् ।
अध्यस्तत्वं च तज्ज्ञानज्ञेयत्वं स ततोपरम् ॥ 644 ॥

अतस्त्वयोक्तः सम्बन्धो ज्ञानज्ञेयत्वमेव हि ।
न संयोगस्तयोरासीत्समवायोपि न ह्यभूत् ॥ 645 ॥

अयं तु वृत्तिघटयोरप्यस्त्येव स्वभावतः ।

वृत्तिर्ज्ञानं घटो ज्ञेय इति को नाम नाब्रवीत् ॥ 646 ॥

ज्ञानज्ञेयत्वमनयोः केनेति यदि शङ्क्यते ।

आरोप्यारोपभावो हि तयोः केनेति कीर्तय।

संयोगसमवायौ तु नोभयोरपि सम्मतौ ॥ 647 ॥

यदि ब्रह्मणि सत्त्वं च घटस्य पृथगुच्यते ।

तर्ह्यध्यस्तत्वकथनं कण्ठशोषणमेव ते ॥ 648 ॥

संयुक्तसमवायाख्यः सम्बन्धस्तत्र ते भवेत् ।

घटेन युक्तं तद्ब्रह्म समवेता च तत्र चित् ॥ 649 ॥

एवं चेद्ब्रह्मसंयुक्तघटाभ्रज्ञानतापि ते ।

घटज्ञाने कुतो नाभूत्सम्बन्धस्य समत्वतः ॥ 650 ॥

किं ज्ञाने ज्ञानतास्तीति घटज्ञानेपि भासते ।

तस्माज्ज्ञाने स्थितत्वं तज्ज्ञानत्वे न प्रयोजकम् ॥ 651 ॥

विषयत्वं विषयिता काचिद्वाच्याऽपरैव तत् ।

स एव वृत्तिघटयोरस्त्वध्यासं श्रमायते ॥ 652 ॥

सम्बन्धाभावमात्रेण वस्तुमिथ्येति को वदेत् ।

सिद्धे वस्तुनि सम्बन्धस्तादृत्कल्प्यो हि कश्चन ॥ 653 ॥

घटाभावश्च भूमिश्च योगाभावेन किं मृषा ।

तादृक् स्वरूपतामन्ते तयोर्योगं हि मन्वते ॥ 654 ॥

न चेत्परोक्षवृत्तीनां विषयाः स्युः कथं वद् ।

न हि वृत्तौ पदार्थानामध्यासस्तत्र विद्यते ॥ 655 ॥

ज्ञानज्ञेयत्वमर्यादा तत्र येनोच्यते त्वया ।

तेनैव दृश्यतादृत्त्वमपरोक्षेपि कथ्यतां ॥ 656 ॥

अन्यथा पटवृत्तिश्च घटवृत्तिः कुतो न ते ॥ 657 ॥

तत्तद्वृत्तित्वमेव स्याद्येनोपायेन ते मते ।

तेनोपायेन सा वृत्तिस्तत्तज्ज्ञानं भवेन्मम ॥ 658 ॥

तस्मात्कीलस्य लाभाय न देवालय नाशनम् ।

कुरु स्वीकुरु विश्वस्य सत्यतां भृत्यतां भज ॥ 659 ॥

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।

अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥ 660 ॥

एतां दृष्टिमवष्टभ्य नष्टात्मानोल्पबुद्धयः ।

प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ 661 ॥

इति गीतास्थकृष्णोक्त्या मिथ्यात्वाशां परित्यज ॥ 662 ॥

घटावच्छिन्न चैतन्ये घटाध्यासो न युज्यते ।

आत्माश्रयप्रसङ्गेन तादृग्भ्रान्तेरसम्भवात् ॥ 663 ॥

अतो घटादेरध्यासः शुद्धचित्वेव ते मते ।

निरंशं शुद्धचैतन्यमेकमेव हि तत्तदा ॥ 664 ॥

अध्यासात् प्रागवच्छेदभेदाद्भेदोपि तत्र न ।

एवं च सर्वं तत्रासीदध्यस्तं न तु किञ्चन ॥ 665 ॥

तस्मात्सर्वस्य चाध्यासात् सा सर्वस्य च दृग्भवेत् ।

नचेत्कस्यापि दृङ्गस्यादध्यासत्त्वफलो भवेत् ॥ 666 ॥

अतोध्यासान्न दृग्दृश्यभावो ब्रह्मघटादिषु ।

किन्त्वध्यासेन हीनोर्थः सोयं स्वदृशि दृश्यते ॥ 667 ॥

किञ्च शुक्त्यादिचैतन्येष्वध्यस्तं प्रातिभासिकम् ।

त्वन्मते करणद्वारा साक्षी किल निरीक्षते ॥ 668 ॥

तदाध्यासाध्यस्तभावसम्बन्धो न तयोरभूत् ।
अतस्ततोन्यः सम्बन्धस्तत्रावश्यं भवेत्तव ॥ 669 ॥

तेनैव वृत्तिर्दृश्यानां दृगस्त्वखिलसम्मता ।
अनानुभविकी ब्रह्मचितो दृत्त्वकथा वृथा ॥ 670 ॥

अज्ञानं किल सर्वत्र ब्रह्म सर्वगतं किल ।
घटभ्रमस्तथाप्यस्य कुम्भकारगृहे किल ॥ 671 ॥

मृदादिकारणाभावे तत्रापि न भवेत्किल ।
जात्येप्यनलसंयोगास्याधिक्ये बाध्यते किल ॥ 672 ॥

तत्र तत्र घटे नीते भ्रमद्ब्रह्मानुगं किल ।
मुद्गरेण घटे ध्वस्ते भ्रमनाशो भवेत्किल ॥ 673 ॥

एवं ब्रह्मभ्रमाः सर्वे क्लृप्तास्तत्तत्स्थले किल ।
विचित्रकार्यकर्तॄणां यथाकाङ्क्षा तथा किल ॥ 674 ॥

इदं विवेककौशल्यं ब्रह्मणो वा भ्रमस्य वा ।
उताज्ञानस्य किं वा तच्छास्त्रकर्तुर्न वेद्म्यहं ॥675 ॥

भ्रमकारणसम्पत्तौ भ्रमः सर्वत्र सम्भवेत् ।
प्रयोजनानुसारेण स नियोक्तुं न शक्यते ॥ 676 ॥

भ्रमजत्वकथा तस्माद्भ्रान्तश्रोत्राय रोचते ।

स्वस्वहेतूद्भवं सर्वं कार्यमित्यतिनिर्मलम् ॥ 677 ॥

किञ्चाध्यस्तं समस्तं च स्वाधिष्ठानैः सहेक्ष्यते ।

तदध्यस्तघटादीनां वृत्तिश्च ब्रह्मगोचरा ।

अध्यस्तसाक्षाद्धीत्वेन वाच्यावश्यं त्वयैव हि ॥ 678 ॥

न चेद्ब्रह्मगताज्ञानं कथं सा विनिवर्तयेत् ।

न ह्यन्यज्ञानतोन्यत्र स्यादज्ञानपरिक्षयः ॥ 679 ॥

एवं च ब्रह्मवृत्तिः सा येन योगेन ते मते ।

तेनैव दृग्दृश्यभावोस्त्वध्यासेन न किं फलम् ॥ 680 ॥

कथं च वृत्तिरूपोयं भ्रमो ब्रह्मोल्लिखेत्तव ।

अतीन्द्रियं परम्ब्रह्म कथं चक्षुरपेक्षते ॥ 681 ॥

दृष्टं चेद्ब्रह्म मुक्तिः स्याद्दृष्ट्यैव किल मुच्यते ।

किं न्यूनमस्य ज्ञानस्य मुक्तिदान्निर्विकल्पकात् ॥ 682 ॥

अखण्डब्रह्मचिद्भागे तन्मात्रस्यावगाहिनी ।

वृत्तिश्चानुकरोत्येषा तदंशे चरमप्रमाम् ॥ 683 ॥

न चेदधिष्ठानिष्ठाज्ञानहन्त्र्यपि सा कथम् ।

याऽविद्यास्तमये शक्ता मुक्तौ शक्ता कथं न सा ॥ 684 ॥

अहिमूषिकयोः पात्री यथा भागान्तरस्थितम् ।

अखुं हन्यात्तथेयं च हन्याद्द्रष्टरि बन्धनम् ।

तृणैश्छन्नोपि किं वह्निर्नदहेत्सतृणं वनम् ॥ 685 ॥

घटवृत्तिर्यतोऽज्ञाननाशिनीति मतं तव ।

ज्ञानार्थं श्रवणाद्यर्थं सिद्धेऽन्ने किं नु तण्डुलैः ॥ 686 ॥

नचेच्छ्रवणशक्त्यैव स्याद्बन्धस्य निवर्तनम् ।

ज्ञानस्वभावतो मुक्तिरिति रिक्तं वचस्तव ॥ 687 ॥

अयमित्यत्रे लोको हि देशकालस्थतां वदेत् ।

ब्रह्मांशस्य प्रवेशं तु साक्षी सर्वस्य बाधते ॥ 688 ॥

अतोनुभवबाधे तु स्यादारोपकथा तव ।

आरोपितत्वसिध्यैव लोकानुभवबाधनम् ॥ 689 ॥

सर्वानुभवबाध्यार्थं वेदोपि न हि बोधयेत् ॥ 690 ॥

तं भान्तमनुभातीति सौरलोकस्य दर्शने ।

हेतुतामाह भासेति स्पष्टोक्तेः स हि भास्करः ॥ 691 ॥

भास्वन्तमनुसृत्योत्था ज्ञानाख्या भा ममास्ति तत् ।

तं भान्तमनुभातीति युक्तं ते तु न भाद्वयम् ॥ 692 ॥

अधिष्ठानात्मकं ज्ञानं घटज्ञानं हि ते मते ।

तज्ज्ञानमनुसृत्योत्थमन्यज्ञानं क्व ते वद ॥ 693 ॥

तं भान्तमनुभातीति वाक्यार्थौ दुर्घटस्तव ।

अतोस्मदुक्त एवार्थो वाक्यस्वारस्यसम्पदा ॥ 694 ॥

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।

यच्छन्द्रमसि यच्छाग्नौ तत्तेजो विद्धि मामकम् ।

इति स्मृत्या सूर्यभासो जगद्भासकतोचिता ॥ 695 ॥

कश्चिच्छ चक्षुषा नैनं पश्यतीति हि वेदवाक् ।

स्वाद्वन्नलाभेपि कुतः कण्टकान्ने रुचिस्तव ॥ 696 ॥

भासमानमिदं सर्वं रत्नार्केन्द्वनलादिकम् ।

तं भान्तमनुभान्तीति तस्य भासा विभाति च ॥ 697 ॥

निरवद्यः श्रुतेरर्थः सोयं स्मृतिसमाख्यया ।

भादीप्ताविति धात्वर्थं दीप्तिमाहुर्यतो बुधाः ॥ 698 ॥

यद्यद्विभूतिमत्सर्वं श्रीमदूर्जितमेव वा ।

तत्तदेवागच्छ त्वं मम तेजोंशसम्भवम् ॥ 699 ॥

इति गीतोदिता वाणी श्रीमतः केशवांशतः ।

श्रीमतां यद्भवं प्राह श्रुतिश्चाह तमेव तत् ॥ 700 ॥

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।

दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ 701 ॥

श्रुत्यर्थधाना क्षोणीयं वाणी गुप्त्यै वृतिश्च नः ।

चक्षुषैवेक्षणक्षेपाद्यच्छ्रुत्येकार्थता स्मृतेः ।

अदिव्यचक्षुर्वृत्तौ यद्ब्रह्मानुल्लेखवाक्क सा ॥ 702 ॥

अथवा स्वस्वरूपेण ज्ञानेन परमेश्वरम् ।

स्वशक्त्यैव सदा भान्तमनुसृत्यान्यदेहिनाम् ॥ 703 ॥

प्रत्यक्षेणानुमानेन शब्दाख्यकरणेन वा ।

भातीदं सकलं विश्वमित्यर्थोस्त्वतिनिर्मलः ॥ 704 ॥

एवं सति ब्रह्मणो वा विशेष्यस्य विशेषणे ।

तज्ज्ञाने वा नृणां जन्यज्ञानमात्रे निमित्तता ।

सर्वोत्पत्तौ निमित्तस्य प्राप्त्यैव स्यान्नते कथा ॥ 705 ॥

एव शब्दोनुशब्दश्च स्यादेवं सति सार्थकः ।
भासेत्यत्र तृतीयाया हेतुत्त्वार्थोपि शोभते ॥ 706 ॥

तव त्वतीन्द्रियं वस्तु नैतद्वाक्यस्य गोचरः ॥ 707 ॥

परोक्षवृत्तावज्ञानानाशाद्दृक्क यदावृता ।
अतः सर्वपदार्थोपि स्यादनर्थकरस्तव॥ 708 ॥

यद्वा भान्तं तमन्वेतद्भातीति प्रतिभां हरेः ।
स्वगोचरां सर्वजगद्गोचरां च श्रुतिर्जगौ ॥ 709 ॥

अन्यत्वमुख्यतोज्ञेयमनुशब्दोपि शंसति ।
अस्मज्ज्ञानं तदेवेति कोपस्मार्यत्र वर्णयेत् ॥ 710 ॥

अथवा विश्वरूपाख्यरूपेण ज्ञानिनां दृशि ।
भान्तं तमनुसर्वं च भातीत्यर्थः श्रुतेर्भवेत् ॥ 711 ॥

मलमूत्रादिदृष्टिं सा ब्रह्मदृष्टिं कथं वदेत् ।
या तदाहऔपनिषदमवाङ्ग्मानसगोचरम् ॥ 712 ॥

यद्धि वाङ्ग्मनसातीतं तद्धीथीवृषभः कथम् ।
श्लेष्ममूत्रमलादीनामपि दृग्ब्रह्मदृक्किल ।
तवातिसुलभं ब्रह्म यदौपनिषदं सताम् ॥ 713 ॥

ब्रह्मज्ञाने सति नृणां मुक्तिः पश्चाद्भवेत्किल ।

मलैः सह विमुक्तिः प्राक् पश्चाद्ब्रह्मदृशिस्तु ते ॥ 714 ॥

पुण्यनाशस्तदैव स्यात्पातकैर्लिप्यते किल ।

ब्रह्मदृष्ट्यात्वशुद्धस्य हन्त शुद्ध्यैस्पृहा किल ॥ 715 ॥

अतोऽधिष्ठानदृक् शून्यदृष्टित्वाद्धटदर्शनम् ।

ब्रह्मधीरिव नारोप इति स्यादनुमापि नः ॥ 716 ॥

स्वावेद्याधिष्ठानदृक्क नाधिष्ठानस्य धीस्तव ।

ततोऽधिष्ठानदृक्छून्या घटदृष्टिर्द्विधाप्यभूत् ॥ 717 ॥

तस्मादारोपबलतो न मिथ्याभूदिदं जगत् ।

बाधस्य शोदनेपि स्यान्न मिथ्येति मतिर्मम ॥ 718 ॥

अस्ति चेन्नास्तितताबोधो बाधः सर्वस्य नाभवत् ।

नास्ति चेन्नास्तितताबोधो बाधः सर्वस्य नाभवत् ॥ 719 ॥

यद्यन्ते निष्प्रकाराधीर्ब्रह्मान्यस्य न  बाधनम् ।

यद्यन्ते सप्रकाराधीर्ब्रह्मान्यस्य न भादनम् ॥ 720 ॥

अतो बोधाद्धि सर्वस्य बाधं युक्तिरपाकरोत् ।

अबोधादेव बाधोक्तिरिति वक्ति ततः सुधीः ॥ 721 ॥

ज्ञानेनाज्ञानस्य नाशे तदुपादानकं जगत् ।

नश्येच्चेन्न ह्ययं बाधो नाशोयं घटनाशवत् ।

अनित्यतैव ते न स्यान्मिथ्यात्वं निर्निबन्धनम् ॥ 722 ॥

नाशानन्तरनास्तित्वबोधो घटपटादिके ।

नष्टे तन्नास्तिताभोदसमो मिथ्या ततो पि न ॥ 723 ॥

प्रध्वंसाभावबोधोसौ न मिथ्यात्वस्य वेदनम् ।

प्राङ्नास्तिताया बोधस्तु न तवापिममापि न ॥ 724 ॥

सत एव विनाशेन प्राक्सत्त्वैव जगत्यभूत् ।

अतो विषं महेशस्य कण्ठाभरणतामगात् ॥ 725 ॥

त्रिकालनास्तिताबोधो बाधोप्येतेन खण्डितः ।

प्राक्सत्तानियमो यस्मान्नाशस्याखिलसम्मता ॥ 726 ॥

कालत्रयेपि सत्ताया निषेधः कुत्र विद्यते ॥ 727 ॥

न विद्यते द्वितीयं चेदद्वितीयाभिदं हि तत् ।

वर्तमाननिषेधोयं लटस्तत्रैव शासनात् ॥ 728 ॥

अघटा भूमिरित्युक्ते किं भाव्यपि घटोत्र न ।

अत ईदृक्पदस्थो न ञ्नात्यन्ताभावबोधकः ॥ 729 ॥

सोपि यस्येति शब्दस्य वाच्यार्थे केवलं भवेत् ।

स्वस्वोपादानगानर्थान् समर्थान् किं निषेधति ॥ 730 ॥

एकदेशनिषेधश्च न मिथ्यात्वप्रयोजकः ।

सन्नप्यर्थौ न सर्वत्र क्वचिन्नास्त्यस्ति क्वचित् ॥ 731 ॥

नेह नानेति वाक्यं च नानात्वं ब्रह्मणि क्षिपेत् ।

जगत्त्रिकालसत्तां तन्न क्षिपेत् स्वस्वभूमिषु ॥ 732 ॥

असङ्गिनि च सद्विश्वं नास्तीत्यपि निगद्यते ॥ 733 ॥

मया ततमिदं विश्वं जगदव्यक्तमूर्तिना ।

मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ 734 ॥

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।

योगैश्वर्यबलादेतन्न तु मिथ्यात्वतः किल ॥ 735 ॥

इति कृष्णस्य वचनान्न तन्मिथ्या च कारणम् ॥ 736 ॥

अतस्तद्बाधपरशोरयो लोकत्रयेपि न ।

सिद्धं तु शाखाछेद्येव मूलच्छेदः कथं वद ॥ 737 ॥

तत्त्रिकालेपि नास्तित्वं न श्रौतं नोपयोगि च ।

नाशस्यास्य च बाधस्य परस्परविरोधतः ॥ 738 ॥

व्यावहारिकसत्वं तु नास्तित्वपरनाम हि ॥ 739 ॥

सत्तानिषेधे सत्येव या सा भ्रान्तौ प्रतीयते ।
तदास्तित्वकथा शुक्तिरूप्यास्तित्वकथोपमा ॥ 740 ॥

नाशो न चेदयं बाधो जगत्प्रत्येव सम्भवेत् ।
अज्ञानस्यैव विज्ञानं विरोधीति गतं तदा ॥ 741 ॥

सोपि त्रिकालसत्ताया निषेधः स्यान्न चापरः ।
स तु न श्रूयते क्वापीत्युक्तं तत्कुत्र बाध्यता ॥ 742 ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥ 743 ॥

इत्यादि वाक्यैर्बन्धस्य पुण्यपापादिकर्मणाम् ।
अज्ञानस्य च विज्ञानाच्छ्रुतो नाशो न चापरः ।
अतः सर्वजगन्नाशो ज्ञानेनेत्यतिसाहसम् ॥ 744 ॥

इदानीं नष्टनानार्थनाशोन्ते ज्ञानतः कथम् ।
प्रागेव नास्तिता तस्य यतः सर्वस्य सम्मता ॥ 745 ॥

अतो नास्तित्वबोधोन्ते कथमस्येति चिन्त्यते ।
अनुवादितया वाक्यममानं स्याद्धि तेषु ते ॥ 746 ॥

किन्तु प्रलयकालीनवह्न्यर्काद्यैर्जगत् क्षयः ।
मुद्गरादिकुठाराद्यैर्मध्ये मध्येर्थनास्तिता ॥ 747 ॥

तच्छिन्नमूलशाखाग्रो मिथ्यावादाख्यपादपः ।
न फलाय न पत्राय न च्छायायै भवेत्तव ॥ 748 ॥

इदीनीं बाध्यरजताधिकसत्ताश्रयत्वतः ।
भेदो ब्रह्मगुणा विश्वं ब्रह्मवत्परमार्थसत् ॥ 749 ॥

देहात्मनोरेकता च नभोनैल्यं च ते मते ।
यत्प्राभासिकं सर्वं तद्धेतुर्न विपक्षगः ॥ 750 ॥

बाध्यं यच्छुक्तिरूप्यादि तदद्यैव हि बाध्यते ।
नभोनैल्यं च तत्रत्यैर्न नीलमिति बाध्यते ॥ 751 ॥

आकाशे नीलिमोदेतीत्यादिवेदोक्ति तस्तु तत् ।
अबाध्यमेव वा नैल्यं नोभयत्रापि न क्षतिः ॥ 752 ॥

देहोहमिति विज्ञानं न हि कस्यापि देहिनः ।
नाहं देह इति ज्ञानं सर्वेषामपि सर्वदा ॥ 753 ॥

मम देह इति प्राहुः सर्वेपि कथमन्यथा ।
देहात्मैक्यभ्रमस्येत्थमवकाशो न विद्यते ॥ 754 ॥

गौरोहमित्यादिवाक्क गौराद्यङ्गेभिमानतः ।
अहंताया व्यवहृतिरुपचारेण केवलम् ।
न हि सिंहात्मकं मर्त्यं वक्ति वागौपचारिकी ॥ 755 ॥

यतोस्ति पुत्रे मित्रादौ वित्तेवातिप्रिये नृणाम् ।
नष्टे नष्टोहमिति वाक्तुष्टेतुष्टोहमित्यपि ॥ 756 ॥

अतो बाध्यस्य सर्वस्य बाधोद्यापि हि विद्यते ॥ 757 ॥

अनादिकालतः सर्वं दृश्यते जगदीदृशम् ।
बाधो न लभ्यते सर्वमस्तीत्यद्यापि वीक्ष्यते ॥ 758 ॥

यो नास्त्यत्रास्ति नोन्यत्र गृहे नास्त्यस्त्यसौ बहिः ।
सर्वत्र सर्वदेदं तु नास्त्येवेति क्व धीर्वद ॥ 759 ॥

अनादितोनुवृत्तेन सत्त्वेन सहितं जगत् ।
न भाविबाधबाध्यं स्याग्ब्रह्मवत् परमार्थसत् ॥ 760 ॥

अनुवृत्तिरनुच्छेदः सत्ता चास्तीति वेद्यता ।
तदा तदास्तीति बुद्धिर्ङ्यन्नष्टेष्वपि विद्यते ॥ 761 ॥

शब्दमात्रेण दृष्टोर्थो नान्यथीक्रियते बुधैः ।
प्रवाहयन्ति किं तीरं मञ्चं सञ्चारयन्ति किं ॥ 762 ॥

एकाभावेऽपरां वृत्तिमाश्रित्य तमबाधिते ।
अर्थे प्रवर्तयन्ति स्म दृष्टं मार्ष्टुं हि कः क्षमः ॥ 763 ॥

अतोऽबाधितमेवास्तु विश्वं सर्वसुखप्रदम् ।
वाक्यं च प्रतिवाद्युक्तरीत्यार्थंप्राप्य जीवतु ॥ 764 ॥

लोकमर्यादया रुद्धा न स्युश्चेद्वाक्यमूषिकाः ।
एको देवालयं गच्छेदन्यो देवस्य मस्तकम् ।
असदेवेदमग्रेभूदिति वाङ्नास्ति किं श्रुतौ ॥ 765 ॥

घटो नेति निषेधे तु बाधस्ते नैव सिध्यति ।
प्रध्वंसप्रागभावाभ्यामपि नेत्युक्तिसम्भवात् ॥ 766 ॥

सत्यो नेति निषेधे तु बाधोयं स्यान्न चान्यथा ।
तादृङ्निषेधो नैवास्ति वेदे वा वैदिकेषु वा ॥ 767 ॥

किं त्वद्वितीयं नेहास्तीत्याकारः परमस्त्यसौ ।
तस्मान्न वर्तमानस्ते बाधोयं श्रूयते क्वचित् ॥ 768 ॥

भाविबाधकशङ्कायाः किं कारणमुदीरय ॥ 769 ॥

बाधशङ्का तु मिथ्यात्वशङ्कां कुर्यान्न निश्चयम् ।
न चेत्तयैव सच्च स्याद्यत्साकोट्यविरोधिनी ॥ 770 ॥

त्रैकालिकनिषेधोपि न स्वरूपेण ते मते ।

नृश्टङ्गवदसत्त्वाप्त्या ततः सत्त्वनिषेधनम् ।

बाधोवश्यं त्वया वाच्यः स तु न श्रूयते क्वचित् ॥ 771 ॥

किञ्च त्रिकालनास्तित्वं बाधः किल भवन्मते ।

नास्त्यद्वितीयमित्यादौ वर्तमानार्थकोस्ति लट् ।

न विद्यते द्वितीयं च यस्य तद्यद्वितीयकम् ॥ 772 ॥

अतो द्वेधापि बाधस्ते श्रुतेर्हृदयशोधने ।

नास्ति तद्बाध एवायं नाभूदस्ति भविष्यति ॥ 773 ॥

न हीदानीं वर्तमानवेदादन्योपि कश्चन ।

भविष्यन्नास्ति ते वेदो बाधोयं यत्र गीयते ॥ 774 ॥

निर्विकल्पकरूपैव चरमापि प्रमा तव ।

न तत्र नास्तिता बोधो बाधोतः क्व भविष्यति ॥ 775 ॥

विमता जगती सेयं सत्यैव परमार्थतः ।

अबाध्यत्वाद्यथा ब्रह्मेत्यनुमा तन्न बाध्यते ।

त्रेधापि बाधायोगेन बाधायोग्यं यतो जगत् ॥ 776 ॥

विश्वं सत्यमिति स्पष्टं सत्यत्वं गर्जति श्रुतिः ।

विश्वं मिथ्येति विस्पष्टं मिथ्यात्वं कुत्र कथ्यते ॥ 777 ॥

तिलानुन्मथ्य कस्तैलं घृते सत्यपि साधयेत् ।
किं श्रौतसत्यतां त्यक्त्वा मिथ्यात्वायोक्तिपीडनैः ॥ 778 ॥

श्रौतोर्थो मे तवाथार्थश्रुत्यै वृत्त्यन्तरं दिशेत् ।
यत्पृथ्यौरसपुत्रस्य दत्तपुत्रस्तु दत्तभुक् ॥ 779 ॥

किञ्चेदं ते तिलाकारशिलानामेव पेषणम् ।
यतो यत्नेपि महति मिथ्यात्वं न श्रुतिर्जगौ ॥ 780 ॥

असन्नासीदिति व्यर्थं यद्यसत्सर्वथाप्यसत् ।
स्वरूपकीर्तनेनैव तदसत्त्वस्य सिद्धितः ।
सत्त्वप्रसक्त्यभावाच्च व्यर्थं तस्य निषेधनम् ॥ 781 ॥

यदीदानीं न तत्तुच्छं तदानीं किं निषिध्यते ।
तदानीं नेति वचनमिदानीं सत एव हि ॥ 782 ॥

अनुवादकवाक्यं ते स्वार्थस्यासाधकं किल ।
सर्वसिद्धानुवादोयं कमर्थं साधयेत्तव ।
यत्प्रसिद्धा वायुरन्तरिक्षं चासदिति श्रुतिः ॥ 783 ॥

अतः श्रौतमतज्ञत्वं युक्तिज्ञत्वं च बालिशे ।
यदसत्तत्तवाप्यद्धा नासीदित्याह सा श्रुतिः ॥ 784 ॥

सन्नासीदिति वाक्याह सत्त्तेनेदं वचस्त्विति ॥ 785 ॥

सच्छब्दार्थो जगच्चेत्स्यात् स्वान्यत्वं तर्हि सिध्यति ।
इष्टासिद्धिरबाध्यत्वरूपसत्त्वानिषेधनात् ॥ 786 ॥

सद्ब्रह्मैव भवेत्तस्माद्यद्वैलक्षण्यमीप्सितम् ।

नासीत्तदा तच्च किल यद्ब्रह्म परमार्थसत् ॥ 787 ॥

हन्त मिथ्याबवद्ब्रह्म सत्यं जगदभूदिदम् ।

यदावयोर्मते नास्ति निरधिष्ठानकभ्रमः ॥ 788 ॥

अर्थान्नार्थान्तरं सिद्धमनर्थोयं महानभूत् ॥ 789 ॥

नो सदासीदिदं वाक्यं परस्यानर्थकारकम् ।

इत्येवाह श्रुतेरंशो द्वितीयोप्येव पूर्ववत् ॥ 790 ॥

अन्तरिक्षाच्च वायोश्च यदन्यत्तत्सदित्यपि ।

यच्छ्रुतिः स्वयमेवाह ततोप्येतदसङ्गतम् ॥ 791 ॥

अहो बत महानेष प्रमादो धीमतामपि ।

यत्स्वोक्तवचनस्यार्थः स्वेष्टब्रह्मविनष्टता ।

तमः सत्वविनष्टस्य तदानीमवशिष्टता ॥ 792 ॥

अतः श्रुत्यर्थकुशलो भारतीपतिरेव नः ।
अन्यस्तद्भृत्यभृत्यश्चेन्मान्यो भवति कश्चन ॥ 793 ॥

यदद्वैतपरं वाक्यं मिथ्यात्वमपि तेन ते ।
गौर्गोवत्सप्रसूरेव महिषाश्वप्रसूश्च किं ॥ 794 ॥

दृष्टादृष्टविरोधे तु वाक्यस्यान्यार्थतैव हि ।
आगोपालविपालं च यद्दृष्टं दृष्टमेव तत् ॥ 795 ॥

यत्र मिथ्याप्रपञ्चस्य वाक्यैर्वेदान्तगोचरैः ।
दृश्यमानमिदं सर्वमनित्यमिति चोच्यते ॥ 796 ॥

इति पाद्मे महेशेन त्रिंशाध्याये किलोदितम् ।
अतो मिथ्येति वाग्विश्वस्यानित्यत्वं वदेत्परम् ॥ 797 ॥

यदि रूप्यस्य मिथ्यात्वे मिथ्या दृश्यत्वतो जगत् ।
मेयत्वाद्घटवत्तर्हि पटोपि स्याद्घटस्तव ॥ 798 ॥

अत्तृत्वात्पशुवन्मन्द शृङ्गं स्यात्तव मस्तके ।
पुरुषत्वान्मूकवत्ते मूकता स्याज्जितं परैः ॥ 799 ॥

बाधा बाधानुसरणे शिष्यस्त्वं प्रतिवादिनः ।
बाधशङ्काख्यपङ्केन किं किं न स्याद्धि पङ्किलम् ॥ 800 ॥

क्षीरं पिबसि तृप्तस्य सुखं साक्षी प्रपश्यति ।
स्वप्रसूः किल माता न कथं पिबसि निन्दसि ॥ 801 ॥

असत्त्वमेव मिथ्यात्वं मम सर्वस्य सम्मतम् ।
अपसिद्धान्तदोषेण न तत्साध्यं भवेत्तव ॥ 802 ॥

अन्यत्सदसतोरन्यदित्याद्यं सर्वमेव हि ।
ममाप्रसिद्धं तद्धेतुरप्रसिद्धविशेषणः ।
दृष्टान्तः साध्यविकलः किं हेतुशतकेन ते ॥ 803 ॥

परोक्षज्ञानमसति शब्दादस्तीति ते मतं ।
तच्च खण्डपदं शक्ति ग्रहे सत्येव बोधयेत् ।
शक्यसम्बद्धमथवा नासम्बदार्थबोधकम् ॥ 804 ॥

पदद्वयात्मकं वाक्यं समस्तं वा पदं भवेत् ।
योग्यतावश्यकी तत्र सापि शक्यार्थसङ्गतिः ॥ 805 ॥

असम्बद्धार्थबोधस्तु न शब्दादपि जायते ।
असतः सर्वशून्यस्य कथं शब्दोपि बोधकः ॥ 806 ॥

यदि दोषवशाच्छब्दो बोधयेत्तदसङ्गि च ।
असन्निकृष्टमेवास्तु शुक्तौ रजतमप्यसत् ।
दोषोपोद्बलितं चक्षुर्गृह्णीयादविशेषतः ॥ 807 ॥

अपरोक्षप्रतीत्या तन्नासत्त्वं तस्य गच्छति ।
क्वचिद्भवति शास्त्रार्थः क्वचिन्नेति कथं वद ॥ 808 ॥

भूतले घटनास्तित्वं चक्षुषा दृश्यते यदा ।
प्रतियोगी कथं तत्रासन्निकृष्टोपि दृश्यते ॥ 809 ॥

सन्निकृष्टसता साकं तत्सत्त्वेनास्तितैव न ।
अनन्यगत्या तन्मात्रे नियमस्त्यज्यते यदि ॥ 810 ॥

न शुक्तिरूप्यसत्त्वे स्याद्भ्रमता लोकसम्मता ।
अनन्यगत्या तद्भ्रान्तौ सन्निकर्षोपि नेष्यताम् ॥ 811 ॥

अतिप्रसङ्गदोषं तु दोष एवापनेष्यति ।
प्रतिमल्लं यथा मल्लस्तदसत्त्वेपि का क्षतिः ॥ 812 ॥

असद्रजतमेवेति ह्यनुभूतिर्बलीयसी ।
न चेत्तव मते साक्षी तत्साक्षात्कुरुते कथम् ॥ 813 ॥

असन्निकृष्टतज्ज्ञाने चक्षुषोप्यस्तु सा गतिः ।
सन्निकर्षेत्वर्थसत्त्वात्तज्ज्ञानं न भ्रमो भवेत् ॥ 814 ॥

सन्निकर्षेण चक्षुश्च कुतस्तन्न प्रकाशयेत् ।
तमो हि चक्षुषा दृश्यं केवलाविद्यकं च ते ॥ 815 ॥

शशस्य श्रृङ्गिताऽभावं यो न जानाति दूरतः ।

स तु कर्णद्वयं दृष्ट्या शशश्रृङ्गं च चक्षुषा ।

किं न प्रत्येत्यसत्तस्मादापरोक्षिकमेव हि ॥ 816 ॥

प्रातिभासिकनामापि यदि तस्य प्रदीयते ।

प्राग्जातस्य कुमारस्य तन्नामकरणान्तरम् ॥ 817 ॥

असतः शशश्रृङ्गस्य प्रत्यक्षेण भ्रमे सति ।

प्रातिभासिकता स्याच्चेत्प्राग्धीरसत एव सा ॥ 818 ॥

अर्थाभावकृतासत्त्वं कस्तदा तस्य मोचयेत् ।

मिथ्यात्वसाधिका दृष्टिः किं तेऽर्थाभावबाधिका ॥ 819 ॥

सत्त्वप्रतीतिर्भ्रान्तिश्चेदसत्त्वे सति शोभते ।

प्रमारूपा च सा नास्ति किं यस्यासत्त्वमोचकम् ॥ 820 ॥

असन्निकृष्टदृष्टिस्तु समा पक्षद्वयेपि ते ।

परिणामात्परीहारे त्रिकाल्यां बाध्यता गता ॥ 821 ॥

पूर्वं च नासच्छ्रृङ्गं स्यादनुत्पन्नघटादिवत् ।

विद्युद्बुद्बुदधीकल्पा धीश्च तस्य प्रमा भवेत् ॥ 822 ॥

तस्मात्तदसदेवासीदतस्तेन गतं मतम् ॥ 823 ॥

अयोग्यार्थकवाक्यं हि शक्त्यभावान्न शक्यवत् ।
शक्यसम्बन्धसादृश्याधीना वृत्तिस्ततोस्य न ॥ 824 ॥

करणस्तायोग्यताख्यदोषेण नयनादिवत् ।
असन्निकृष्टस्यात्यन्ता सत एव हि धीरभूत् ॥ 825 ॥

इति सर्वैः समाधेयं ततः प्रत्यक्षदर्शने ।
दोषादसन्निकृष्टस्य भानं को दोषयेद्बुधः ॥ 826 ॥

शब्दादसन्निकृष्टस्य शशश्रृङ्गस्य धीर्यथा ।
अक्षादसन्निकृष्टस्य शुक्तिरूपस्य धीस्तथा ॥ 827 ॥

परोक्षधीः परीणामं यथा नापेक्षते तव ।
अपरोक्षापि धीस्तद्वत्तं व्यर्थं किमपेक्षते ॥ 828 ॥

ज्ञानस्य सन्निकर्षत्वकथाप्यत्र वृथैव तत् ।
दोषे सति तु किं तेन दोषाभावेपि किं ततः ॥ 829 ॥

शुक्तौ सर्पभ्रमादृष्टे रज्जौ रूप्यभ्रमोज्झितेः ।
सादृश्यस्य प्रतीत्यर्थं रजतत्वप्रकारिका ।
धीर्वाच्या गौरवात्साधीस्तस्यैवेति न कल्प्यते ॥ 830 ॥

विशेषणज्ञानजन्या विशिष्टस्य प्रमापि न ।
अभावत्वप्रकारत्वपूर्वापूर्वार्थदर्शनात् ॥ 831 ॥

अविद्यमानार्थबोधहेतौ दोषे सति भ्रमे ।
अप्रतीतार्थबोधाय कुतोन्यानुसृतिर्वद ॥ 832 ॥

अत्र प्रतीतरजते कुतो देशान्तरस्थता ।
इदन्तामुल्लिखन्ती सा प्रतीतिः सहते न ताम् ॥ 833 ॥

घटोयमिति दृष्टोपि घटो नो चेत् स्थलान्तरम् ।
गमिष्यति तथा द्रष्टा त्वं चैनमनुयास्यसि ॥ 834 ॥

विशेषणज्ञानजन्या विशिष्टार्थस्य धीरिति ।
किमपूर्वघटव्यक्तौ घटत्वाकारधीर्न ते ॥ 835 ॥

यथैकस्यां घटव्यक्तौ घटत्वाकारधीबलात् ।
पूर्वादृष्टघटव्यक्तिशतकेपि विशिष्टधीः ।
प्राग्दृष्टघटभूनिष्ठास्ते सर्वे किं घटास्तव ॥ 836 ॥

यदि सामान्यतो ज्ञाता सर्वाव्यक्तिस्तदासव ।
विशेष्यज्ञानजन्यत्वमपितद्योगतं बलात् ॥ 837 ॥

एवं च शुक्तिव्यक्तिश्च स्यादापणगता तव ।
रजतत्वप्रकारैव तेन धीः प्रागपेक्षिता ॥ 838 ॥

प्राग्दृष्टघटसादृश्यादेवान्यत्र विशिष्टधीः ।
तत्तद्व्यक्तिस्थता धीस्तु घटादावपि नेष्यते ॥ 839 ॥

एवंच रूपसादृश्याच्छुक्तौ रूप्यत्वदीर्भवेत् ।
अपूर्वज्ञाततद्व्यक्तेः कुतः स्यादापणस्थता ॥ 840 ॥

अन्यत्राप्यतिसादृश्ये रूप्यधीः सा प्रमा भवेत् ।
अल्पसादृश्यतो धीश्येद्यमयोरिव स भ्रमः ॥ 841 ॥

प्रत्यभिज्ञाप्यन्यकाले वक्ति देशान्तरे स्थितिम् ।
तदैव तस्यातिदूरदेशस्थत्वं कुतोऽपतत् ॥ 842 ॥

विशेषणस्य च ज्ञानं यदि स्यात्सविकल्पकम् ।
अनवस्था तदा सुस्था यदि तन्निर्विकल्पकम् ॥ 843 ॥

नारिकेलद्वीपवासी तर्हि सामान्यतोग्निदृक् ।
द्वितीयक्षण एवाग्निवैशिष्ट्यमपि पश्यति ॥ 844 ॥

सविकल्पकधीपक्षे व्यञ्जकानुसृस्तिर्भवेत् ।
अनवस्थाभिया व्यञ्जके तु न व्यञ्जकान्तरम् ।
विशेषणज्ञानजत्वनियमस्तद्वृथा तव ॥ 845 ॥

घटे पटत्वमिति धीर्घटत्वज्ञानजा न चेत् ।
घटोयमिति धीः कस्माद्धटत्वज्ञानजा वद ।
तज्जीवति ज्ञानसाम्ये त्वच्छ्राद्धनियमं त्यज ॥ 846 ॥

घटत्वनिर्विकल्पोत्था न घटत्वविशिष्टधीः ।
घटत्वसविकल्पत्वाद्धटत्वेह प्रतीतिवत् ॥ 847 ॥

असन्निकर्षभङ्गाय यदि तज्ज्ञानमिष्यते ।
तत्रैव तर्हि तज्ज्ञानं वाच्यं नान्यत्र कुत्रचित् ॥ 848 ॥

चन्दने सौरभज्ञानं तत्र तस्य प्रमातरि ।
उपनायकतामेति धीः सा तत्सन्निकर्षजा ॥ 849 ॥

चन्दनत्ववति व्यक्त्यन्तरे सौरभसंयुते ।
तज्ज्ञानमेव योगो न चक्षुषात्रापि तद्धियः ।
अदर्शनात्तेन योगस्तत्त्वैव स परत्र न ॥ 850 ॥

शुक्तिव्यक्तावेव तस्माद्रजतत्वस्य धीर्यदि।
सैवोपस्थापिका भूयाच्चक्षुषो मनसोपि वा ।
दोषादसन्निकृष्टस्य धीरेवात्रोचिता ततः॥ 851 ॥

असतो यदि न ज्ञानं कथं तत्रासतोपि तत् ।
दोषाच्चेद्दोष एवास्तु तर्हि सर्वधुरन्धरः ॥ 852 ॥

विशेषणज्ञानजत्वसिद्धौतस्यापणस्थता ।
यदि स्यादक्षसंयोगजत्त्वात्तर्ह्यस्तु तत्र तत् ।
बाधादिदं न चेत्तर्हि बाधादेव भवेन्न सा ॥ 853 ॥

रजतं दृष्टमित्युक्ते किमापणगतं त्विति ।
पृष्टस्तन्नैतदन्यच्चेत्याह किं नाखिलो जनः ।
सर्वानुभवबाधाय नालं त्वत्प्रक्रिया तदित् ॥ 854 ॥

शशश्रृङ्गं यथा नास्ति नासीन्नापि भविष्यति ।
शुक्त्यात्मकं तथा रूप्यं नासीदस्ति भवष्यति ।
एवं द्वयोश्च साम्येपि कस्मादस्मिंस्ततोन्यता ॥ 855 ॥

पूर्वाकारविकारश्च कथं स्याद्दृष्टिमात्रतः ।
ने चेदैक्यं च भेदः स्याच्चरमे दर्शने तव ।
असत्पुरा कथं नोचेद्दृष्टेः स्यादसतोपरम् ॥ 856 ॥

विमतं शुक्तिरजतं नासतो व्यतिरिच्यते ।
त्रिकाल्यां च निषेध्यत्वान्मायिमस्तकशृङ्गवत् ॥ 857 ॥

अनानुभविकं तस्मान्मतमेतद्दुरात्मनाम् ।
नृशृङ्गवच्छुक्तिरूप्यमसदेवेति निर्मलम् ॥ 858 ॥

असतः शशशृङ्गस्य प्रत्यक्षेण भ्रमे सति ।
प्रातिभासिकता स्याच्चेत् प्राग्धीरसतः एव सा ॥ 859 ॥

सन् घटः सन् पटः स्तम्भः सन्नित्यादीनि देहिनाम् ।
सत्त्वापरोक्षज्ञानानि वर्तन्ते तत्र तत्र हि ॥ 860 ॥

कालत्रयाबाध्यता च साक्ष्युपस्कृतचक्षुषा ।
कुतो न गृह्यते नोचेच्चक्षुषेदं त्वधीः कथम् ।
वर्तमानोपि कालोयं साक्षिवेद्यो न चाक्षुषः ॥ 861 ॥

किञ्च त्रिकालबाध्यत्वमेककालेप्यबाधने ।
नस्यादतश्चक्षुषैव त्रिकालाबाध्यतेयते ॥ 862 ॥

किञ्चब्रह्मगतं सत्त्वं सन् घटस्त्विति दृश्यते ।
इति तेपि मतं तच्च त्रिकालाबाध्यता न किं ॥ 863 ॥

त्रिकालबाध्यता तस्माच्चक्षुषैव निरीक्ष्यते ।

तत्तद्गता मेन्यगा ते शक्तिस्तूभयसम्मता ॥ 864 ॥

अन्वयव्यतिरेकाख्यसाचिव्ये सति चक्षुषा ।

यथा कारणता दण्डे गृह्यते सर्वलौकिकैः ॥ 865 ॥

दोषाभावस्थलीयत्वयुक्त्युपोद्बलितं तथा ।

त्रिकालाबाध्यतां स्वार्थे गृह्णीयाच्चक्षुरेव हि ॥ 866 ॥

यथादिष्ठानगं सत्त्वं भासते घटगं न तत् ।

नीलो घट इति ज्ञाने नैल्यं ब्रह्मगतं भवेत् ।

असद्रजतमित्यत्रासत्त्वं ब्रह्मगतं भवेत् ॥ 867 ॥

त्वया प्रतीतमप्येतदसदित्येव चोदिते ।

स वेदेदमिति प्राहुः सत्त्वं तत्कथमन्यगम् ।

आम्रान् पृष्टः कोविदारानाचक्षाणोस्ति कः पुमान् ॥ 868 ॥

लोकानुभवबाधाय नालं त्वत्प्रक्रियातटित् ॥ 869 ॥

अचाक्षुषब्रह्मसत्ता चक्षुषा कथमीक्ष्यते ।

ब्रह्मणो चाक्षुषत्वं च सिद्धमुक्तप्रकारतः ॥ 870 ॥

न हि कोपि पिशाचस्य सत्त्वं पश्यन् प्रदृश्यते ।

वेदैकगम्यादृश्यार्थसत्तां सर्वः किलेक्षते ॥ 871 ॥

घटः सन्भूतले व्योम्नि न सन्नूपं च सद्घटे ।

न व्योम्नीति च विज्ञानते के ते सदसती वद ॥ 872 ॥

न ह्यधिष्ठानमाधेयं सच्च तत्सदसन्न हि ॥ 873 ॥

यदध्यस्तं घटे सत्त्वं भाति तद्बं हि तद्भवेत् ।

न त्वन्यगामि न ह्यावामन्यथाख्यातिवादिनौ ।

सत्वप्रत्यक्षमेतस्मादभाधितमभूदिदम् ॥ 874 ॥

किञ्चाधिष्ठानगा सत्ता घटाद्यनुगतेति सा ।

घटेपि दृश्यते किंवा तन्निष्ठारोप्यते घटे ॥ 875 ॥

उत तत्रैव सा दृष्टा घटो घटतयेक्ष्यते ।

किंवा घटे पृथक्सत्वं तत्स्थमेव निरीक्ष्यते ॥ 876 ॥

आद्ये चैतन्यवत्सत्ता सिद्धेः सिद्धिं समीहितम् ।

द्वितीये तु चितैक्यस्यारूपे स स्यान्न चान्यथा ॥ 877 ॥

उक्तरीत्या चिदैक्यस्यारोपः स्यात् प्रातिभासिकः ।

न चेतनो घट इति बाधस्याद्यैव दर्शनात् ॥ 878 ॥

प्रातिभासिकसत्ताभूद्घटसत्तापि ते मते ।

अर्थक्रियाया घटकं सत्त्वं नेत्यफलो घटः ॥ 879 ॥

घटेचेदुल्लिखेत्सा धीः पारमार्थिकसत्यताम् ।

क्षिपेदसत्यतां तस्य भाविबाधश्च बाध्यते ॥ 880 ॥

आरोपितत्ववार्ता तु बाधादृष्टेर्न शोभते ॥ 881 ॥

चिद्भिन्नत्वेनैव दृष्टघटादौ जडवस्तुनि ।

यत्सत्त्वं दृश्यते तच्च तद्गं स्यान्नतु चिद्गतम् ॥ 882 ॥

चिदसाधारणो धर्मः सत्ता किल भवन्मते ।

चिदन्यत्वग्राहिणी चित्किं तां तत्र ना बाधते ॥ 883 ॥

न चेत्स्वगतचित्वं च कुतो नारोपयेद्घटे ।

जातिक्षयो वा गर्भस्य स्रावो वा तद्भवेद्ध्रुवम् ॥ 884 ॥

घटस्थां कुरु तत्सत्तामन्यथाख्यातिरन्यथा ॥ 885 ॥

सन्निकर्षाय तत्सत्तां चितिः साक्षात्कृतिश्चते ।

प्राक् सतीमेव गर्भे स्वे कथमारोपयेद्वद ।

अतश्चतुर्थपक्षोपि प्रथमं पक्षमन्वगात् ॥ 886 ॥

तृतीये तु घटाद्यर्थे सत्त्वस्यादर्शने जनः ।

तमादत्ते शुक्तिरूप्यं नादत्ते केन हेतुना ।

अप्रसक्तनिषेधश्च कथमन्ते भवेत्तव ॥ 887 ॥

चतुर्थे न तृतीयं तत्सत्त्वं नापि द्वितीयकम् ।

बाधस्य बोधे यल्लोको निश्यङ्कं न प्रवर्तते ॥ 888 ॥

कथं च तन्निषेधोन्ते बाध्यसत्त्वोररीकृतेः ॥ 889 ॥

बाध्यसत्त्वनिषेधश्चाबाध्यसत्त्वसमर्थकः ।

तादृक्सत्त्वनिषेधेपि न सत्किं ब्रह्म ते मते ॥ 890 ॥

अतैन्द्रियाभियोगार्थमारोपद्वितये मते ।

या सत्ताऽऽवश्यकी पूर्वं सा सर्वा पारमार्थिकी ॥ 891 ॥

सदित्येव प्रतीतेश्च व्यावहारिकता कुतः ।

बाधाद्बोध्यो हि तद्भावो बाधश्चाक्षेण बाधितः ॥ 892 ॥

प्रत्यक्षबाधे वाक्यस्यैवान्यार्थः सर्वसम्मतः ।

आगमादक्षबाधेस्याल्लक्षणाया बहिष्कृतिः ।

अक्षादागमबाधे तु मिथ्यात्वोक्तिर्वनं गता ॥ 893 ॥

परेण बाध्यं पूर्वं चेत् स्मृत्या बाध्या श्रुतिर्भवेत् ।
विधिर्निषेधबाध्यश्चेदहिंसोक्त्या हतः क्रतुः ।
वैयाकरणशास्त्रादौ मर्यादा तत्कृता तथा ॥ 894 ॥

अतः प्राबल्यदौर्बल्ये बाध्यताबाध्यतार्पके ।
सर्वोपजीव्यं प्रत्यक्षं सर्वतः प्रबलं महत् ।
तद्बाधादनुमा बाध्या शब्दोप्यन्यार्थतां व्रजेत् ॥ 895 ॥

किञ्च श्रुतिरनादित्वात्पूर्वाक्षं तु परं नृणाम् ।
अतस्त्वन्यायतोप्यक्षमागमस्यैव बाधकम् ॥ 896 ॥

तत्त्वमस्यादिवाक्यं च विधिरूपं कथं महत् ।
सत्त्वप्रत्यक्षतः सत्त्वं यन्निषेधनिषेधनम् ॥ 897 ॥

निषेधप्रतियोगित्वं यतः सत्त्वं विदो विदुः ।
तत्सत्त्वश्रुतितो मिथ्याश्रुतिरासीद्धि दुर्बला ॥ 898 ॥

त्रैकालिकनिषेधो हि मिथ्यात्वमिति ते मतम् ।
तदभावाश्च सत्यत्वं प्राबल्यं कस्य कथ्यताम् ॥ 899 ॥

निषेधत्वं परत्वं च द्वयं सत्यत्व एव हि ।
प्रतियोगिप्रसक्तौ प्राक् यतः पश्चान्निषेधनम् ।
तस्मात्त्वत्प्रक्रियाव्याघ्री स्वतन्तूनेव कृन्तति ॥ 900 ॥

अतः प्राबल्यमेवैकं बाधकत्वे प्रयोजकम् ।
तच्चोक्तरीत्या प्रत्यक्षे जितं सत्यत्ववादिभिः ॥ 901 ॥

अतो घटादिरर्तोयं प्रत्यक्षेण प्रदृश्यते ।
तद्दृष्टं पारमार्थ्यं च तत्स्थमेवेति सुस्थितम् ॥ 902 ॥

जडे नाज्ञानदोषोस्ति न च काचादिदृश्यते ।
अज्ञानोन्मूलनं सत्त्वप्रत्यक्षं प्रबलं हि तत् ॥ 903 ॥

अप्रामाण्यस्वतस्त्वं तु तवापि न ममापि न ।
दोषाभावे प्रमाणस्य प्रामाण्यं सुस्थमेव तत् ॥ 904 ॥

अज्ञानेनावृतब्रह्मगोचरात्स्वैरिणीसुतात् ।
तेन्त्यप्रत्यक्षतो विश्वप्रत्यक्षं प्रबलं हि नः ॥ 905 ॥

अज्ञाननाशिनी साक्षात्कारवृत्तिस्तथैव हि ।
सैव प्रमा मम मते दोषोस्यास्तेन तच्च न ।
न ह्यन्धकारो दोषः स्यात् क्रूरभास्करतेजसः ॥ 906 ॥

त्वयाप्यज्ञाननाशे हि दृशो भ्रान्तित्वमुच्यते ।
तस्मादज्ञानतो दोषो न वृत्तौ नापि ते दृशी ॥ 907 ॥

काचादिर्नाक्षदोषोस्ति दूरत्वाणुत्वपूर्वकः ।
नार्थदोषोपि वृत्तौ मे सन्निकृष्टार्थदर्शने ॥ 908 ॥

वृत्तिनाश्यं च तेऽज्ञानं त्वद्रीत्यैव न दूषणम् ।
नावृणीते जडं विश्वं तद्वृत्तिरकुतोभया ॥ 909 ॥

दोषादारोपवादेतु हता त्वत्प्रक्रियातटित् ।
दोषं विनापि चारोपे हता त्वत्प्रक्रियातटित् ॥ 910 ॥

उपजीव्यं तु सर्वस्य विश्वप्रत्यक्षमेव ते ।
सर्वोपकारितद्बाधं कः सुधीरभिधित्सति ॥ 901 ॥

निष्प्रकारं तवाध्यक्षमखण्डार्था च ते श्रुतिः ।
कस्य वा बाधके स्यातां साधके वा विचारय ॥ 912 ॥

सत्त्वस्याप्रतिषेधेन त्रिकालास्पर्शनादपि ।
अखण्डार्थपरत्वाच्च त्रेधा वाक्यं न बाधकम् ।
निष्प्रकारकरूपं ते प्रत्यक्षं च न बाधकम् ॥ 913 ॥

भग्नदन्ताभवत्पूर्वं द्विधा ते श्रुतिपन्नगी ।
अन्ते दन्तोन्मूलनेन साभूदप्रतिवादिनी ॥ 914 ॥

सन्धिग्धमूला सन्दिग्धरूपा तेध्यक्षपन्नगी ।
दन्तात्यन्ताभावाचिन्ताक्रान्तास्वान्ता बिलेऽपतत् ॥ 915 ॥

विश्वप्रत्यक्षनागेन्द्रो द्विजिह्वमुखकोटिभिः ।
अर्थाननन्तांस्तत्सत्तामप्यास्वाद्य दिने दिने ॥ 916 ॥

अच्छेद्यक्रूरदंष्ट्रोग्रो रिपुपक्षभयङ्करः ।
दाधर्ति जगतीमेतां योधस्तात्फणिशायिनः ॥ 917 ॥

भक्तानुकम्पया स्वान्तः सूपविष्टं निशात्यये ।
छत्रीभूतफणारत्नशोभोद्भूतदृशेक्षते ॥ 918 ॥

किञ्च ते ब्रह्मदृक्कैकविज्ञानेनाखिलस्य च ।
विज्ञानं किल तद्ब्रह्म विज्ञानं सर्वसाधकम् ।
अतोप्यबाधितं विश्वमिदमासीदनाकुलम् ॥ 919 ॥

अन्त्यप्रमायां तद्ब्रह्मसमबोध्यत्वतो जगत् ।
तस्यामबाध्यत्वतो वा निष्प्रकारकतामते ।
ब्रह्मवत्परमार्थंस्यादिति सर्व मनोरमम् ॥ 920 ॥

प्रत्यक्षसाधितार्थस्य नानुमा बाधिका भवेत् ।
कालात्ययापदिष्टत्वं दोषो यत्सर्ववादिनाम् ।
महादण्डप्रहाराग्रे किं मृद्भाण्डशतेन ते ॥ 921 ॥

धर्मिग्राहि ममाध्यक्षमुपजीव्यतया महत् ।

तद्विरोधेनुमानानां कोटिः कीटायते तव ।

न चेत्कालान्तरे वह्निः शीतः स्यादनुमानतः ॥ 922 ॥

दृढप्रत्यक्षसिद्धार्थमागमो न तु बाधते ।

तथा सति वृथैव स्याद्वृत्त्यन्तरकथागमे ॥ 923 ॥

आदित्यस्यैव यूपत्वे द्युमणिर्भूमणिर्भवेत् ।

अनुमानममानं ते वाक्यमन्यार्थगामि तत् ॥ 924 ॥

निर्दोषाक्षोद्भवं ज्ञानं तत्ववेदनमेव हि ।

काचादि दोषाभावस्तु तवापि च ममापि च ।

जडमात्रेपि नाज्ञानं चक्षुश्चाज्ञानवैरि ते ॥ 925 ॥

अतत्वावेदकत्वोक्तिः प्रत्यक्षादौ ततस्तव ।

सत्त्वग्राहित्ववैरेण केवलं निर्निमित्ततः ॥ 926 ॥

घटेप्यज्ञाननाशाय साक्षात्कारमपेक्षसे ।

परोक्षज्ञानमस्पष्टमयं स्पष्टतरः किल ॥ 927 ॥

अनुमानस्यागमस्य तत्र दौर्बल्यमब्रवीः ।

इदानीं कथमाशास्से दुर्बलात् प्रबलक्षयम् ॥ 928 ॥

निर्विकल्पकरूपं तु ज्ञानमत्यन्तदुर्बलम् ।

प्रवृत्तेश्च निवृत्तेश्च निमित्तं नैव तत्किल ॥ 929 ॥

विवदन्ते यत्स्वरूपे वादिनस्तत्ववादिनः ।

विशिष्टज्ञानगम्योसौ तदभावेऽष्टमो रसः ॥ 930 ॥

दशमस्त्वमसीत्यस्मिन् दशमत्वविशिष्टधीः ।

दृष्टा दृष्टान्तवाक्ये ते तन्महोदरमातरि ॥ 931 ॥

गर्भमाशङ्कसेन्ध त्वं नात्र पुत्रो विचारणे ।

परोक्षज्ञानकरणान्न प्राहुर्निर्विकल्पकम् ॥ 932 ॥

वन्ध्यासुतादेडमोकात्का भीतिः प्रतिवादिनाम् ।

अतस्त्वत्प्रक्रिया सर्वा व्याहतेति मतिर्मम ॥ 933 ॥

सत्त्वप्रत्यक्षपार्थस्तदपार्थिकुरुते रिपुम् ।

अखण्डार्थमते निर्विकल्पकत्वमतेन च ।

मिथ्यात्वोल्लेखिमानस्य श्रोता कर्णौनयद्भुवि ॥ 934 ॥

अतिदूरत्वादिदोषग्राहिणा साक्षिणैव वा ।

परीक्षायुक्तसदृढप्रत्यक्षान्तरतोपि वा ।

बाधे तु लब्धावसरस्तत्रान्योप्यवतिष्ठते ॥ 935 ॥

दृढप्रत्यक्ष बाधाय नालं मानसहस्रकम् ।
प्रत्यक्षस्य पृथङ्मानं किमित्याभाणकं स्मर ॥ 936 ॥

सर्वापलापी चार्वाकोप्याह प्रत्यक्षमानताम् ।
तस्याप्यमानतां यस्तु ब्रूते सोत्यन्तगर्हितः ॥ 937 ॥

दूरस्थदीर्घवृक्षश्य ह्रस्वता दृश्यतेऽखिलैः ।
अतः प्रमाणग्रहणे सिद्धो दोषोतिदूरता ॥ 938 ॥

देशश्य विप्रकर्षश्च दूरतानाम नापरा ।
देशस्य साक्षिवेद्यत्वाद्दोषोसौ साक्षिगोचरः ॥ 939 ॥

अतिदूरत्वदोषस्य ग्राहिणा साक्षिणैव तत् ।
दत्तेऽवकाशे चन्द्रस्य प्रादेशत्वादि बाध्यते ॥ 940 ॥

तत्रापि वाक्यमात्रेण प्रत्यक्षस्य न बाधनम् ।
बलिना साक्षिणाध्यक्षमुत्पत्तावेव शिक्ष्यते ॥ 941 ॥

दृढप्रत्यक्षबाधाय वाक्यं क्वापि न शक्नुते ।
न चेत्सिंहो देवदत्तो यज्वा स्यात् प्रस्तरोपि च ॥ 942 ॥

लक्षणावृत्तिभङ्गात्तद्वाक्यं नाक्षस्य बाधकम् ।
नानुमाप्यस्य कालात्ययापदिष्टस्य नष्टितः ॥ 943 ॥

विस्तरोस्य प्रमेयस्य मूलग्रन्थामृतार्णवे ।

बुद्धावरोहसिद्ध्यर्थं सङ्ग्रहोयं ततस्ततः ॥ 944 ॥

सत्त्वप्रत्यक्षबाधे हि मिथ्यात्वार्था श्रुतिर्भवेत् ।

बाधितोर्थस्तु वाक्यस्य तवापि न ममापि न ॥ 945 ॥

मिथ्यात्वार्थश्रुतिबलादेवाक्षस्यास्य बाधनम् ।

न हि सार्वजनीनेस्मिन् प्रत्यक्षे बाधकान्तरम् ।

एवं चान्योन्याश्रयाख्यदीपो न स्यात्कथं वद ॥ 946 ॥

न चेन्माणवकादेव गृहादाहो भवेत्तव ।

अग्निर्माणवकश्चेति यतो वागस्ति वैदिकी ॥ 947 ॥

सर्वमाननिषेद्धापि न प्रत्यक्षं निषेधति ।

सत्त्वप्रत्यक्षमेतस्मात्तत्वप्रत्यक्षमेव हि ॥948 ॥

तस्माद्दृष्टव्यवस्थाया वाक्यमात्रेण वारणं ।

निवारणं स्वकीयस्य पाण्डित्यस्यैव केवलम् ।

अन्योन्याश्रयदोषाज्ञे कथं दोषज्ञता भवेत् ॥ 949 ॥

यदि दृष्टं समस्तं च वाक्यं शक्नोति बाधितुम् ।

महावाक्यशतैस्तर्हि विशिष्टैक्यं कुतो न ते ।

मुख्यं जडाजडैक्यं च वाक्यैस्तैः किं न साध्यते ॥ 950 ॥

सर्वं ब्रह्मेति वाचो हि सर्वस्य ब्रह्मरूपता ।
मुख्यार्थः स तु जीवेपि नैवाङ्गीक्रियते त्वया ।
प्रत्यक्षबाधने शक्तेरभावो ह्यत्र कारणं ॥ 951 ॥

जहती सर्वधर्मांश्च पदार्थद्वितयेपि हि ।
विशेष्यमात्रमजहत्यप्रसिद्धैव लक्षणा ।
तत्राङ्गीक्रियते श्रुत्या प्रत्यक्षस्य विरोधतः ॥952 ॥

दृढप्रत्यक्षबाधायाप्यलं वाग्यदि वैदिकी ।
कुतः स्वोक्तार्थसङ्कोचं महावाक्सहते तव ॥ 953 ॥

जडाजडे तु प्रत्यक्षबाधात्सापि न गृह्यते ।
तत्र तद्व्यतिरेकेणासत्त्वमेव निगद्यते ।
भीता विरोधिप्रत्यक्षात्तद्बाधे त्वक्षमैव सा ॥ 954 ॥

श्रुतिः सकृच्छ्रुतापि त्रीनर्थान् भेजे त्वदाज्ञया ।
विरम्य व्यापृतिः शब्दे दोषो भूषायते तव ॥ 955 ॥

प्रत्यक्षतो जडे जाड्यमज्ञताद्यं च चेतने ।
सिद्धं यथाश्रुतैक्यस्य तद्विरोध्यक्षमेव हि ॥ 956 ॥

अतोध्यक्षभयान्मुख्यमैक्यं वाक्यार्थमुत्सृजन् ।
सत्त्वाध्यक्षभयान्मिथ्यात्वार्थत्वं च त्यजोदितम् ॥ 957 ॥

एकं सन्धित्सतोन्यत्ते च्यवते तन्न संशयः ।

तस्मात्त्वमुष्ट्रलगुडन्यायाद्धन्त हतोस्यहो ॥ 958 ॥

एवं प्रत्यक्षहर्यक्षभयेन श्रुतिभिः सह ।

पलायमानो हि स्वार्थान् दोषपङ्काविलस्थले ॥ 959 ॥

तर्पितोसि तथाप्यक्षं श्रुत्या बाधितुमिच्छसि ।

पूर्वोत्तरविरोधाख्यदोषोऽगाधह्रदो हि ते ॥ 960 ॥

अतः प्रत्यक्षबाधाशां मुञ्च शक्तिं विचारय ।

शक्तप्रत्यक्षशरणः श्रुतिमर्थान्तरे नय ॥ 961 ॥

पतिं त्यक्त्वा गतायास्तु जारेषु नियमः कुतः ।

अस्माकं त्वनुशिष्टार्थपरा न स्वैरिणी श्रुतिः ॥ 962 ॥

सप्तसु प्रथमा षड्सु द्वितीयेत्यनुशासनम् ।

सर्वं समाप्नोषि ततः सर्वोसीत्यनुशासनम् ।

मुख्या गौणी लक्षणेति लक्षणज्ञानुशासनम् ॥ 963 ॥

असतश्च सतश्चैव सर्वस्य प्रभवाप्ययम् ।

सर्वस्य च परिज्ञनात् सर्वमेनं प्रचक्षते ।

इति भारतवाक्योक्तमस्ति शिष्टानुशासनम् ॥ 964 ॥

मुख्यार्थबाधे शिष्टार्थं शास्ति शिष्टपरम्परा ।

अतः श्रुतिद्रौपदीयमुपयेमे बहून् पतीन् ॥ 965 ॥

न स्वैरिणी यत्र योग्यो योर्थः स्यात्तत्र तं भजेत् ।

सर्वमानविरुद्धार्थं दुःशासनमिव त्यजेत् ॥ 966 ॥

किञ्च श्रुतिस्वरूपस्य ग्राहि प्रत्यक्षमेव हि ।

तत्प्रामाण्यस्य निर्णेतृसाक्षिप्रत्यक्षमावयोः ॥ 967 ॥

प्रत्यक्षस्याप्रमाणत्वे तद्गृहीतं भवेच्छ्रुतेः ।

प्रामाण्यं च मृषैव स्यादप्रमाण्यं बलाद्भवेत् ॥ 968 ॥

अतस्तदर्थस्यैक्यस्याप्यभावः सर्वथा भवेत् ।

तदभाववति ह्यर्थे तत्प्रकारत्वमेव हि ।

अप्रामाण्यं यतः शिष्टा लक्षणज्ञाः प्रचक्षते ॥ 969 ॥

व्यावहारिकसत्त्वं च प्रामाण्यस्य यदुच्यते ।

तच्च बाधस्य सत्त्वे तु प्रामाण्यस्य त्रिकालगा ।

नास्तितैवेति किं तेन सर्वथाऽभाव एव सः ॥ 970 ॥

बाधाभावेतु सत्त्वस्य प्रत्यक्षं नस्तदैव हि ।

श्रुतिस्वरूपसिद्धिश्च न स्यात् प्रत्यक्षबाधने ॥ 971 ॥

अतः केनैक्यसिद्धिः स्यान्नह्यसत्साधनं भवेत् ।
उपसर्पति सर्पन्तं रज्जुसर्पः किमध्वनि ॥ 972 ॥

कोवान्तेऽवीविशत्सूर्यसुषावृषिपरम्पराम् ।
कस्तप्तशुक्तिरूप्येण कृत्वास्ते करकङ्कणम् ॥ 973 ॥

अर्थासाधारणं कार्यं मिथ्यात्वादेव नात्रयत् ।
तद्वाग्वाचाप्रतीतिर्वा सत्यावाच्यार्थकामुकैः ॥ 974 ॥

भयकम्पादिकं सुप्तौ सर्पसत्त्वेप्यसत्वतः ।
सर्पासत्त्वेप्यत्र सत्त्वाज्ज्ञप्तेरेव फलं किल ॥ 975 ॥

ज्ञप्तिश्च सत्या सर्वत्र मिथ्यार्थस्यैव बाधनात् ।
इत्थं विविक्तता नोचेत् अर्थकार्यं कुतो न तत् ॥ 976 ॥

स यदीत्यत्र पश्येदित्युक्त्या स्वाप्नार्थदर्शनात् ।
इष्टानिष्टफलप्राप्तिः श्रुत्या प्रोक्ता मयैव न ॥ 977 ॥

स्वाप्नार्थोपि यथार्थोहि सन्ध्ये सृष्टिरिति स्मृतेः ॥978 ॥

यत्कार्त्स्न्येनानभिव्यक्तस्वरूपत्वमसूत्रयत् ।
सत्यतां सूक्ष्मतां चासौ वक्ति नानृततां प्रभुः ॥ 979 ॥

अतो मायामात्रतोक्त्या वासनामयतोच्यते ।ऑ
न चेद्विरुद्धो हेतुः स्याच्छ्रुतिश्च कुपिता भवेत् ।
परस्परविरुद्धे च सूत्रे स्यातां ततोपि न ॥ 980 ॥

नेदानीं स्वप्न इत्येव यतोनित्यत्वधीर्नृणाम् ।
नासौ स्वप्न इति क्वापि बाधबोधो न दृश्यते ।
अतोपि सत्यतैवैषां युक्ता नान्येति मे मतिः ॥ 981 ॥

मिथ्याभूतोर्थकारी चेत्युक्तिस्तद्वाहतैव ते ।
सूत्रं च नासतोदृष्टत्वादित्याह श्रुतिश्च नः ।
असतः सत्कथं जायेतेत्येवाह ततोपि न ॥ 982 ॥

चिच्चापरोक्षव्यवहारार्हा मुक्तौ च यत्तव ।
सत्यस्यैवार्थकृत्त्वन्तत्सिद्धमज्ञानसाक्षिणः ॥ 983 ॥

किञ्चाज्ञानारोपमूलमधिष्ठानचिदेव ते ।
तदाधारा च सत्यस्यैवार्थकृत्त्वं कथं न तत् ॥ 984 ॥

रज्जुः करोति स्वं कार्यं सर्पस्तु न करोत्यसौ ।
शुक्तिः करोति स्वं कार्यं रूप्यं तत्र करोति न ।
अतो यत्राधिका सत्ता कार्याधिक्यं न तत्र किं ॥ 985 ॥

कारणं पूर्वभाव्येव सर्वेप्याहुर्मनीषिणः ।

भूतिश्च सत्ता तत्कस्य कारणत्वमभूद्वद ॥ 986 ॥

अतः श्रुत्या च युक्त्या च लोकानुभवतोपि च ।

सदेव कारणं मन्ये मिथ्याभूतमकारणम् ॥ 987 ॥

सदा सर्वत्र सद्ब्रह्म सदा सर्वत्र चार्थकृत् ।

आकाशवत्कालवच्च त्रिकालासत्कदापि न ॥ 988 ॥

भ्रान्तस्य वाग्भ्रान्तमेव स्वार्थं वक्ति न चापरम् ।

मणिप्रभायां मणिधीः प्रभाध्यस्तमणेर्हि धीः ॥ 989 ॥

आसन्मणेर्हि तज्ज्ञानं मणिप्राप्तिर्यदृच्छया ॥ 990 ॥

प्रभाव्याप्तत्वतोवास्यान्मणिप्राप्तिर्न धीबलात् ।

काचे नीलमणिभ्रान्त्या नीलप्राप्तिः कतो न चेत् ॥ 991 ॥

शाखाचन्द्रोक्तितश्चैव शाखायां चन्द्रधीर्भवेत् ।

स च नास्ति यतो वाक्यममानं नापि चार्थवत् ॥ 992 ॥

अभिमुख्याय तद्वाक्यं वदन्त्यज्ञेषु केवलम् ।

चन्द्रप्राप्तिः स्वदृष्ट्यैव भवेत्तेनाध्वना शनैः ॥ 993 ॥

मिथ्यावाक्यस्य यो ह्यर्थः स सत्यः कुत्र भण्यताम् ।
यः स्थूलारुन्धतीन्यायः सोप्येवमभिसंहितः ॥ 994 ॥

अतो भ्रान्तेन बोध्योर्थो नैवाभ्रान्तः क्वचिद्भवेत् ।
अतो मिथ्याश्रुतेरर्थस्तवैक्यं च मृषा भवेत् ॥ 995 ॥

उपजीव्यविरोधेन ह्युपजीवकनाशनम् ।
वदन्ति शिष्टास्तस्येदं स्पष्टमासीन्निदर्शनम् ॥ 996 ॥

यतो मानस्य मिथ्यात्वे मेयं मिथ्येति निश्चितम् ।
ते ब्रह्मणि तदद्वैते तस्मादाशा वृथा तव ॥ 997 ॥

स्वतःसिद्धिस्त्ववेद्यत्वरूपत्वान्नार्थसाधिका ।
न विवादिनि सा वक्तुं शक्यते या त्वयोदिता ॥ 998 ॥

अन्यथा स्वप्रकाशत्वाद्धटसिद्धिर्भवेन्मम ।
स्वपराविषयज्ञानं घटोपि न कथं वद ॥ 999 ॥

मुक्तौ ते यादृशं ब्रह्म तादृशं मे जडं न किं ।
सङ्केतः सर्वशब्दानां कुत्र कुत्र न शक्यते ॥ 1000 ॥

अश्रौतं ब्रह्म तत्तेस्तु श्रुत्युक्तब्रह्मणा वयं ।
कृतार्थाः स्याम भूमासौ नः क्लेशात्तारयिष्यति ॥ 1001 ॥

अतः श्रौतेन बाधेन सत्त्वप्रत्यक्षबाधनम् ।

ज्वलज्ज्वलनवैरेण पतङ्गस्येव नाशनम् ॥ 1002 ॥

तस्मान्निर्दोषमानेन वेद्यसत्ताश्रयत्वतः ।

अबाधितं जगदिदं सर्वं ब्रह्मवदेव हि ॥ 1003 ॥

अर्थः परोक्तवाक्यानामुक्तोस्माभिः पुरैव हि ।

भाविबाधापनोदार्थमेतावच्चर्चितं पुनः ॥ 1004 ॥

किञ्च दृश्यत्वजडतापरिच्छेदाद्योऽखिलाः ।

हेतवः सन्तु जगति मिथ्यात्वं मास्तु का क्षतिः ॥ 1005 ॥

यतो दर्शनयोग्यत्वं दृश्यत्वं निरुपाख्यताम् ।

क्षिपेज्ज्ञानेन हीनत्वं जडत्वं ज्ञातृतां क्षिपेत् ॥ 1006 ॥

परिच्छेदश्च गुणतो देशतः कालतोऽवधिः ।

अनन्तगुणतां देशव्याप्ततां नित्यतां क्षिपेत् ॥ 1007 ॥

सत्यत्वोपप्लवेनैते हेतवो धूमकेतवः ।

अतोऽप्रयोजकाः सर्वे मिथ्यात्वे हेतवस्तव ।

प्रयोजकस्तु बाधो यो न द्वयोः स मतेऽभवत् ॥ 1008 ॥

घटोस्ति नास्ति चेत्युक्ते दृष्टोच्यत इति प्रजाः ।
प्रतिब्रुवन्ति दृष्टश्चेदस्तित्वमनुजानते ।
यदि दृष्टो न नास्तित्वं कस्य लोकोनुमन्यते ॥ 1009 ॥

तस्माद्यो लोकमर्यादामनुसृत्य प्रवर्तते ।
सत्यत्व एव दृश्यत्वं हेतुं कुर्यात्स पण्डितः ।
मिथ्यात्वे तु विरुद्धं तत्को हेतुं कुरुते बुधः ॥ 1010 ॥

ज्ञानोपनीतो भातोपि गन्धो योग्यो न चक्षुषः ।
घ्राणस्यैव स योग्योर्थो रूपाद्याः किल चक्षुषः ॥ 1011 ॥

अन्तरेव स्वतन्त्रस्य बाह्यार्थो घटपूर्वकः ।
ज्ञानोपनीतो भातोपि तद्वद्योग्योन साक्षिणः ॥ 1012 ॥

सुखाद्या एव तद्योग्याः क्वचित्कं कारणं विना ।
कृत्स्नयास्वस्वसामग्र्यायद्दृष्टिः स्यात्पदेपदे ।
स एव तत्तद्योग्योर्थो नान्यः कृत्रिमपुत्रवत् ॥ 1013 ॥

सहकार्यन्तरबलात् प्रतीतिः स्यात् क्वचित् क्वचित् ।
योग्यता तूक्तमार्गेण स्वारस्यात् प्रत्यये किल ॥ 1014 ॥

इमां हि शास्त्रमर्यादां सर्वेङ्गीकुर्वते बुधाः ।
अतो दोषात् प्रतीतेपि मिथ्यार्थे नास्ति योग्यता ॥ 1015 ॥

किञ्च प्रत्यक्षयोग्यं स्याद्बहिर्द्रव्य तदेव हि ।

महत्त्वे सति यद्रूपमद्भूतं च भवेत्सदा ।

तस्माद्दर्शनयोग्यत्वं मिथ्यार्थेष्वस्ति न क्वचित् ॥ 1016 ॥

शब्दाच्चायोग्यता दोषे सति मिथ्यार्थधीर्नृणाम् ।

अप्रमा परमो यस्य दोषाभावे स दोषभाक् ॥ 1017 ॥

तस्माद्दृश्यत्वसत्यत्वे सत्ये ब्रह्मणि वर्तनात् ।

मिथ्यार्थतो निवृत्तेश्च नित्यं व्याप्ते परस्परम् ॥ 1018 ॥

तत्तत्करणसम्बन्धो यत्सत्यत्वैकहेतुकः ।

अप्रयोजकताशङ्का तस्मान्नात्र विवेकिनाम् ॥ 1019 ॥

विवादविषयो विश्वं दृश्यत्वात् परमार्थसत् ।

ब्रह्मवद्व्यतिरेकेण शुक्तिरूप्यवदेव वा ॥ 1020 ॥

रणाङ्कणाद्गृहीतोयं भटो वीरशिरोमणिः ।

चित्रं युक्तिधनैस्तुष्टो हन्ति शत्रोरनीकिनीं ॥ 1021 ॥

अस्य प्रकरणे साम्यं ये प्रोचुः पूर्वसूरयः।

तेषांतु न रणे साम्यं केनापीति मतिर्मम ॥ 1022 ॥

किञ्च दृश्यध्यस्ततैव दृश्यत्वं भवतो मते ।

विषयत्वपरित्यागाद्वृत्तौ वृत्त्याकृतिस्तव ।

दृश्यत्वं किल तत्सर्वं प्रतिवादी न मन्यते ॥ 1023 ॥

तस्मादन्यतरासिद्धो हेतुः स्यादप्रबुद्धते ।

सर्वेषामपि सिद्धो मे हेतुर्नारदसिद्धवत् ॥ 1024 ॥

यतो दुष्टं च करणं स्वयं सदपि तात्विकम् ।

अर्थं न साधयेत्तस्मान्मिथ्यार्थः क्वार्थसाधकः ॥ 1025 ॥

सिद्धिर्हि विद्यमानत्वनिर्णयः सम्मता सताम् ।

सा प्रमाणेन यस्यासीत्तद्धि प्रामाणिकं विदुः ॥ 1026 ॥

निर्णयस्तदभावस्य व्यावृत्त्या तस्य सत्त्वधीः ।

उद्दिष्टा तत्कुचोद्यस्य नावकाशोत्र विद्यते ।

घटस्य नास्तिताज्ञानं घटज्ञानं हि को वदेत् ॥ 1027 ॥

यद्वा प्रमाणं यत्सत्तामङ्गीकारयति स्फुटम् ।

सोर्थः प्रामाणिकोन्योर्थस्त्वप्रामाणिक उच्यते ॥ 1028 ॥

प्रमाणताच करणे प्रमाकरणता मता ।

प्रमा यथार्थधीस्तत्त्वं लोकोक्त्या न दुरग्रहात् ॥ 1029 ॥

अतो यद्विद्यमानत्वं प्रत्यक्षेणेतरेण वा ।

निर्णीयते प्रमाणेन तत्प्रामाणिकशब्दवत् ॥ 1030 ॥

प्रयोगस्यानुसारेण शब्दस्यार्थो भवेत्किल ।

प्रयोगमूलं यत्प्राहुः सर्वे व्याकरणं बुधाः ॥ 1031 ॥

प्रयुञ्जते न तच्छब्दं प्रजा रज्जुभुजङ्गमे ।

निषेध्यत्वेन बाधाख्यमानसम्बन्धवत्यपि ॥ 1032 ॥

ततः प्रमाणसम्बन्धमात्रार्थः प्रत्ययोत्र न ।

तत्सम्बन्धविशेषार्थ इत्याहुः शब्दकोविदाः ॥ 1033 ॥

विशेषश्च स एव स्यान्मिथ्यार्थाद्विशिनष्टि यः ।

अतोस्मदुक्तमेवार्थं शब्दोसौ वक्ति नापरम् ॥ 1034 ॥

माने तव महावाक्ये यदि तत्पदमर्थवत् ।

तदा प्रामाणिकं ब्रह्म न चेदैक्यं न वाक्यतः ॥ 1035 ॥

सिध्येद्विध्येदतो ब्रह्म तत्पदेषुर्न संशयः ।

ऐक्यं तव यतोवश्यं मुख्यतत्वच्युतिर्न चेत् ॥ 1036 ॥

तदात्वैक्याभावरूपहेतोरेव प्रसिध्यति ।

अनेकं जगदेतन्मे बाधेषावप्ययोगतम् ॥ 1037 ॥

अतः प्रामाणिकं ब्रह्म तवापि च ममापि च ।
परमार्थसदेवस्याद्ब्रह्मवत्तेन मे जगत् ॥ 1038 ॥

प्रमितं विश्वसत्यत्वं सच्चेन्नोपाधिरात्मता ।
अत्रैव साध्यस्याव्याप्त्या भवेन्नोपाधिरात्मता ।
न्यायसाम्याद्ब्रह्मणि ते साध्याव्याप्ति प्रसङ्गतः ॥ 1039 ॥

न चेत् प्रमापि जगति साधनाव्याप्तता गता ।
आत्मत्वोपाधिरेतस्मात् स्वात्मानं हन्ति नापरम् ॥ 1040 ॥

प्रामाणिकं च बाध्यं चेत्येतमर्थमनर्थदम् ।
व्याघातोजितनिर्घातस्तर्कोप्याक्रोशयेद्ध्रुवं ॥ 1041 ॥

यद्बाधोर्थायथार्थत्वं तद्याथार्थ्यं च यत्प्रमा ।
वन्ध्यासुतो वदेदेवं न तु पुत्रवतीसुतः ॥ 1042 ॥

यद्येकमानमानत्वहीनतायां रतिस्तव ।
तर्हि बाधप्रमाणेस्तु सा जगत्कण्टकोपमे ॥ 1043 ॥

रक्षो घ्नन्ति हि शान्त्यर्थं कं घ्नन्ति जगतीपतिम् ।
बाधकत्वेन बलिताप्येतेनैव बहिर्गता ॥ 1044 ॥

साधकस्य सदोषत्वे बाधकं प्रबलं भवेत् ।
विदोषसाधकस्याग्रे किं बाधकशतेन ते ॥ 1045 ॥

न ह्यापणस्थरूप्यस्य बह्वाघातेप्यरूप्यता ।
रसयोगेपि तद्रूपनाशादभिभवेन वा ।
रूपान्तरस्यचोत्पत्तौ तस्यैवस्यात्सुवर्णता ॥ 1046 ॥

फलस्य पीतपक्वत्वमिव बाधो न कस्यचित् ।
तस्यैवावस्थान्तरत्वान्मिथ्यात्वापादनं न तत् ॥ 1047 ॥

ततः काचादिदोषोत्थो बाध्योस्तु रजतभ्रमः ।
तद्दोषहीनमानोत्थविश्वधीर्नैव बाध्यते ॥ 1048 ॥

काचादिदोषतोन्योपि यस्तु दोषो मतस्तव ।
अविद्यावद्विषयतासंज्ञो भाष्यकृतोदितः ॥ 1049 ॥

दोषः स तूष्णीं किमुत प्रमायाः प्रतिरोधतः ।
भ्रमस्योत्पादकत्वाद्वा कं पक्षमवलम्बसे ॥ 1050 ॥

आद्ये गुणोपि दोषः स्याद्द्वितीये ते मते प्रमा ।
ब्रह्मचिन्मात्रविषया तद्रोधात्तत्र केवलम् ।
दोषोस्त्वसौ घटाद्यर्थे दोषता तस्य किं कृता ॥ 1051 ॥

मम जीवगताविद्या तस्येशविषयप्रमाम् ।

रुणद्धि तस्य दोषोसौ तत्रैव न परमात्मनि ॥ 1052 ॥

घटादिषु प्रमारोधस्तवापि न ममापि न ।

न प्रत्यक्षादिमानेषु का हानिः स्यादविद्यया ॥ 1053 ॥

चक्षुदोषस्य काचस्य किं घ्राणादौ च दोषता ।

क्वचित्कश्चिद्दोष इति यत्प्राहुः पूर्वसूरयः ॥ 1054 ॥

तृतीयेपि भ्रमः कस्ते यद्धेतुत्वेन दोषता ।

न हि कुड्यघटाद्यर्थधीरेषा भ्रमरूपिणी ।

कुड्यत्वादियुतेष्टेव कुढ्यत्वादिप्रकारिका ॥ 1055 ॥

भ्रमो हि ब्रह्मणि तव तद्गाविद्यापि तद्भ्रमम् ।

सम्पादयन्ती तत्रैव दोषः स्याच्छुक्तिशोदने ॥ 1056 ॥

प्रत्यक्षादिप्रमाणानां जडानां जीववर्तिनाम् ।

कथं सा भ्रमहेतुः स्याच्छक्षुर्दोषोपि को भवेत् ॥ 1057 ॥

किञ्चित् प्रमासाधकश्च बहुतद्रोधकश्च यः ।

स दोषो भ्रमदो दृष्टः प्रमाभावे भ्रमः कुतः ॥ 1058 ॥

सर्वं ज्ञानं धर्मिण्यभ्रान्तं सर्वदेहिनाम् ।

घटे घटत्वमिति धीः कथं स्यात्केवलं भ्रमः ॥ 1059 ॥

कल्प्यादधिकसत्ताकमधिष्ठानं तवैव हि ।

यतोऽवश्यं ततो व्यक्तिः सत्यैवासीत्परात्मवत् ॥ 1060 ॥

तद्व्यक्त्यंशे प्रमैवेयं भवेद्युक्तिबलेन धीः ।

जात्यन्तेऽपि प्रमा सा स्यात्तासां चास्वेव संस्थितेः ॥ 1061 ॥

घटावच्छिन्नचैतन्ये घटत्वमिति कस्य धीः ।

घटाधिष्ठानचैत्यन्ये घटोध्यस्तः परं तव ॥ 1062 ॥

घटत्वं तु घटे नोचेत्साधीः स्यात्प्रातिभासिकी ॥ 1063 ॥

प्रथुबुध्नोदराकारव्यक्तावेव घटत्वधीः ।

व्यञ्जको ह्ययमाकारो व्यङ्ग्या जातिश्च सा किल ।

तस्मादनन्तव्यक्तीनां सत्यता युक्तितोभवत् ॥ 1064 ॥

तद्विशेषविदोधीत्वाज्जातिधीरपि न भ्रमः ।

तत्रैव विद्यमानार्थधीत्वादपि न स भ्रमः ॥ 1065 ॥

तस्मादरजतव्यक्तौ दोषाद्यारजतत्वधीः ।

स भ्रमः स्यान्निजव्यक्तौ जातिधीस्तु न विभ्रमः ॥ 1066 ॥

तद्ब्रह्मभ्रमसृष्टार्थदर्शनात् भ्रान्तितापि न ।

जातिभ्रमे धर्मीभूतव्यक्तिः सत्यायतो ध्रुवा ॥ 1067 ॥

कथं च ब्रह्मणोन्यत्रयोगायोगाद्भ्रमस्तव ।

सत्यो घटोन्यसृष्टोपि यदन्यैः परमीक्ष्यते ।

अन्यदृष्टे तु मिथ्यार्थे क्वास्त्यन्यस्यापि दर्शनम् ॥ 1068 ॥

एकस्य रजतभ्रान्तौ किमन्येषां च तद्भ्रमः ।

स्वरूपैक्यात्समाधानमपि तेन न शोभते ॥ 1069 ॥

अन्यत्राद्दष्टपदवी कथमत्रैव कल्प्यते ।

अदृष्टकल्पनादोषो रुन्धे त्वद्दूषदोषताम् ॥ 1070 ॥

अज्ञानोपादानकत्वमर्थदोषस्तु यस्तव ।

कुम्भकारकुविन्दाद्याः सद्यो दद्युस्तदुत्तरम् ।

न तैः सह वयं ब्रूमः कृतग्रन्थपरिश्रमाः ॥ 1071 ॥

कथं च वृत्तिनाश्यं तदज्ञानं तत्र दूषणम् ।

अविद्यावत्त्वचर्चायां वक्ष्यामस्तत्रचोत्तरम् ॥ 1072 ॥

अज्ञानापगमे तत्तद्वस्तु ब्रह्म तवोल्लिखेत् ।

तद्भ्रान्तिसृष्टत्वकथाप्येषा तस्माद्वृथा भवेत् ॥ 1073 ॥

तस्मान्नात्राक्षदोषोस्ति नार्थदोषोपि दृष्यते ।
चित्रं पित्रोरभावेपि भ्रमसूनुरयं तव ।
तस्मात्सत्यं जगत्सर्वमभ्रान्तेरपि दर्शनात् ॥ 1074 ॥

पृथुबुध्नोदराकारे घट एव घटत्वदीः ।
तस्यापि स्याज्जडाकारव्यङ्ग्यधीर्न निराकृतौ ।
तदा पूर्वोक्तयुक्त्यैव तत्रापि भ्रान्तिता गता ॥ 1075 ॥

यस्मात्सार्वजनिनोयं न स्यादनुभवो भ्रमः ।
अतोत्र दोषचिन्तां च न दोषज्ञोनुमन्यते ॥ 1076 ।

ब्रह्मण्यविद्यमानांस्तान्यदि ब्रह्मणि दर्शयेत् ।
सदा भ्रमोपि सा धीः स्याद्घटादिस्वस्वधर्मिषु ।
तांस्तान् धर्मान् दर्शयन्ति केन वा हेतुना भ्रमः ॥ 1077 ॥

अथ धर्मा न सन्त्येव तेषु तेषु च धर्मिषु ।
अतस्तेष्वेव तत्तद्धीर्यदि भ्रान्तिरितीर्यते ॥ 1078 ॥

तर्हि कुड्येपि घटदीर्घटादौ पटधीरपि ।
कुतो न तेन ते धर्माः सन्त्येव स्वस्वधर्मिषु ॥ 1079 ॥

न चेत् कुतो न सन्तीति प्रश्ने किं स्यात्तवोत्तरम् ।
बाधादिति वदंश्चापि प्रष्टव्यः प्रतिवादिना ॥ 1080 ॥

घटे घटत्वबाधश्चेत्स नास्ति मरणेपि ते ।
ब्रह्मण्यखिलबाधस्तु न बाधस्तेषु तद्धियाम् ॥ 1081 ॥

किं त्वेषां जडधर्माणां ब्रह्मणि प्रतिषेधने ।
जडधर्मत्वदार्ढ्यं स्यात्तदभावः कुतो वद ॥ 1082 ॥

व्यावहारिकताप्येषां बाधादेव भवेत्तव ।
स च नैतेषु ते धर्माः सन्तीत्याकारतोस्ति न ॥ 1083 ॥

भावी च नासौ बाधः तद्व्यावहारिकता कुतः ।
न ब्रह्मणीदमिति तु बाधो नैतान् प्रबाधते ॥ 1084 ॥

अतो जडस्थरूपादिगुणानां कर्मणामपि ।
जात्यादीनां च सर्वेषामबाध्यत्वेन सर्वदा ॥ 1085 ॥

व्यावहारिकतायोगात्तत्सत्वं ब्रह्मसत्त्ववत् ।
पारामार्थ्येनैव सत्त्वमभूत्सद्युक्तिसत्त्वतः ॥ 1086 ॥

घटोपि ब्रह्मणि न चेन्मृत्कपाले भविष्यति ।
ब्रह्मण्यखिलबाधस्तु कस्य वा बाधको वद ॥ 1087 ॥

कपाले नेति बाधस्तु नास्ति नापि भविष्यति ।
तद्धर्मिणां च सर्वेषामबाधात् स्वस्वधर्मवत् ॥ 1088 ॥

व्यावहारिकतऽयोगात् पारमार्थ्यमभूद्बलात् ।
आपणस्थस्य रूप्यस्य शुक्तौ बाधेपि का क्षतिः ॥ 1089 ॥

अतो घटाद्यर्थधीषु भ्रमत्वं नैव शोभते ।
तद्धेतुभूतधर्माणां दोषत्वाशापि ते वृथा ॥ 1090 ॥

तस्मादाविद्यकत्वं च मृदुपादानकत्ववत् ।
प्रमात्वाप्रतिरोधित्वाद्दोषो नाभूद्विचारणे ॥ 1091 ॥

प्रत्यक्षादिप्रमाणानां व्यावहारिकमानता ।
या परैरुदिता तां च युक्तिरेव निषेधति ॥ 1092 ॥

अतः साधकमानस्यैवादोषत्वमभूद्बलात् ।
बाधके वैयधिकरण्याख्यदोषेण दुष्टता ।
अतो बाधकमानस्य मानतैवापहीयतां ॥ 1093 ॥

अथ मानाभावतोर्थाभावस्तेन च धीर्भ्रमः ।
भ्रमाच्च दोषो दोषेण मानताहीनतेति तु ।
अन्योन्याश्रयतस्तस्य कुरुते बोधहीनताम् ॥ 1094 ॥

ऐक्यायोगेन मिथ्यात्वं तत्त्वमर्थगतार्थयोः ।
विरुद्धयोः कथंचित् स्याद्विश्वाभावस्तु किं कृतः ॥ 1095 ॥

सर्वं मिथ्येति सर्वस्य मिथ्यात्वप्रतिपादिका ।

न हि वागस्ति तेनायं विश्वाभावः कुतोपतत् ॥ 1096 ॥

वाक्यं च नाक्षसिद्धस्य बाधकं स्यादितीरितम् ।

अन्यथालक्षणावृत्तेः शिक्षणं स्याद्विचारय ॥ 1097 ॥

यदा ब्रह्मणि नेत्याद्या वाग्वा धीर्वा तदुद्भवा ।

सखण्डा सप्रकारापि सोपादानस्य धर्मिणाम् ।

धर्मिस्थानां च धर्माणां बाधिका  नाभवत्तदा ॥ 1098 ॥

अखण्डार्थानि वाक्यानि निष्प्रकारकधीश्च ते ।

कं बोधयेत् कं  कमर्थं बाधयेद्वा विचारय ॥ 1099 ॥

तस्मात्साधकमानस्य हीनता मरणेपि न ।

अविद्यावद्विषयता नाभूदेवं विचारणे ॥ 1100 ॥

तथाक्षादिप्रमाणानां जडनां हीनतापि न ।

अविद्यावद्विषयता चेयं दोषः कथं वद ॥ 1101 ॥

अविद्यावद्वि ते ब्रह्म नान्यद्धटपटादिकम् ।

महावाक्यान्यमानस्य न तद्विषयतेष्यते ॥ 1102 ॥

अविद्यावद्विषयकं महावाक्यं हि केवलम् ।

प्रत्यक्षादिप्रमाणस्य मानता केन हीयते ॥ 1103 ॥

अविद्योपादानकत्वं यदि तद्वत्त्वमीर्यते ।

तदाऽज्ञाने स दोषो न तन्माने हीनतापि न ॥ 1104 ॥

न हि स्वयं स्वस्य हेतुरनादिश्च न हेतुमान् ।

तस्मात्प्रामाणिकत्वेन स्यादज्ञानमबाधितम् ॥ 1105 ॥

न ब्रह्मणीदमिति तु बाधे जीवे भवेद्धि तत् ।

अबाधितस्य यत्कार्यं तच्चावश्यमबाधितम् ॥ 1106 ॥

अज्ञानोपादानतयाप्येवं सति किमागतम् ।

अज्ञानोपादानता चाध्यक्ष्ये दोषस्तवैव हि ।

किं कुम्भकारशालाग्नेः स्यादामघटतो भयम् ॥ 1107 ॥

अज्ञानेऽज्ञानत्वमेव यदि दोषो मतस्तव ।

सदा सदोषविषयं सदोषं तन्न साधयेत् ॥ 1108 ॥

एवं च मृण्मये बाह्यप्रत्यक्षविषये घटे ।

अज्ञानमयता वादो युक्त्यज्ञानात्परं तव ॥ 1109 ॥

अनाद्यज्ञानपिहितमैक्यमैक्यत्वतो न चेत् ।
दुष्टं स्याद्दुष्टसंसर्गान्मानेषु स्यादमानता ॥ 1110 ॥

अतो विदूरतासौक्ष्म्यं व्यवधानादियुक्तता ।
अर्थदोषो भवेल्लोकसम्मत्या न त्वलौकिकः ॥ 1111 ॥

तमसा पिहितत्वं हि महान् दोषो घटादिषु ।
तदैक्याध्यक्षविषये विषबिन्दोर्न गारुडम् ॥ 1112 ॥

अयोग्यता महान् दोषः शब्दस्यार्थे सतां मतः ।
तद्वह्वल्पज्ञयोरैक्यं वाक्यार्थत्वेपि दोषवत् ॥ 1113 ॥

अविद्यावद्विषयतां दोषमाह गुरुस्तव ।
तदर्थमन्यथीकृत्य न चार्थी कुरु तद्वचः ॥ 1114 ॥

न चेद्दुष्टाज्ञानजं ते तत्वज्ञानं कथं शुभम् ।
तज्ज्ञानजनकं मानं कथं मानमभूद्वद ॥ 1115 ॥

तत्त्वार्थविषयत्वेन ज्ञानस्य शुभता यदि ।
दुर्ज्ञानविषयत्वेन तस्यैवातत्वता न किम् ॥ 1116 ॥

अर्थायाथार्थ्ययाथार्थ्ये ज्ञानैकशरणे किल ।
ज्ञानस्यैव प्रदुष्टत्वे कथमर्थस्य तत्वता ॥ 1117 ॥

तत्त्वसत्त्वात्तवाज्ञानकार्यता दूषणं न चेत् ।
मृत्त्वसत्त्वान्ममाज्ञानकार्यतापि न दूषणम् ॥ 1118 ॥

त्वन्मात्रसङ्गृहीतैक्ये दोषघ्नी यदि तत्वता ।
सर्वोपकारके सर्वदोषघ्नी किन्न तत्वता ॥ 1119 ॥

अथे ह्याज्ञानकार्यत्वं यदि दोषाय नेष्यते ।
कुतोन्यत्र सदोषः स्यात्तद्दूष्यं भाष्यमेव ते ॥ 1120 ॥

अज्ञानजत्वं दोषश्चेद्द्वतमेव मतं तव ।
नाज्ञानजत्वं दोषश्चेद्द्वतमेव मतं तव ॥ 1121 ॥

भाष्यस्यान्यार्थकथनम् हन्तैक्यं तव कृन्तति ।
यथास्थितार्थवार्ता च हन्तैक्यं तव कृन्तति ॥ 1122 ॥

अन्यथा चिन्तितं कार्यं दैवेन कृतमन्यथा ।
सर्वार्थान् सञ्जिहीर्षोस्ते महानर्थोगमत् क्षयम्॥ 1123 ॥

अनादेर्जीवभेदादेर्मानैर्भीर्न कथञ्चन ।
मानं हीनं चिकीर्षोस्ते माने हीनो भवेद्ध्रुवं ।
मानं वा तस्य हीनं स्यात्तामसब्रह्मगोचरम् ॥ 1124 ॥

जीवेशभेदे चाज्ञाने बाधेनाद्ावसम्भवात् ।
मृदाद्युपादानकेषु घटादिष्वप्यसम्भवात् ॥ 1125 ॥

बाधासम्भवतः कल्पकाभावेनाप्यसम्भवात् ।
ब्रह्मज्ञानस्यहीनत्वा पातादज्ञानजस्य ते ॥ 1126 ॥

दोषजन्यासुधीष्वेवा प्रामाण्यस्य प्रदर्शनात् ।
तमोऽवयवजन्येषु तमःसु तददर्शनात् ।
प्रामाण्यानुभवाच्चैव तमोनीलिम्नि चाखिलैः ॥ 1127 ॥

अज्ञानोपादानकत्वमप्यर्थैनर्थकृन्न तत् ।
अविद्यावद्विषयता कथं दोषो भवेद्वद ॥ 1128 ॥

यद्वृत्तौ तन्निवृत्तिस्ते तन्नाशोत्तरवर्तिनी ।
यतश्च दृक्तश्चैष दोषः कं दूषयेद्वद ॥ 1129 ॥

अज्ञानदोषतावादस्तन्न खेदाय धीमताम् ।
यतः केनाप्युपायेन जगज्ज्ञाने न हीनता ॥ 1130 ॥

पश्य प्रामाणिकत्वाख्यहेतोर्नृपशिखामणेः।
तर्कमन्त्रिबलादेव प्रत्यर्थिमुखमोटनम् ॥ 1131 ॥

यतोऽज्ञानस्यैव दोषाज्जन्मदोषो न वस्तुनः ।

तमसो नीलिमा यस्मात् तमस्येव प्रमीयते ॥ 1132 ।

दोषेणापिहितत्वं तु स्यादर्थस्यापि दूषणम् ।

तमोवृतघटादीनां यतो न स्फुटमीक्षणम् ॥ 1133 ॥

अतस्तवैक्यधीरेव द्वेधाप्यासीद्धि विभ्रमः ।

यदैक्यावृत्तिरज्ञानं तद्धीश्च ज्ञानजा तव ॥ 1134 ॥

अनावृतं तु तमसा तवाज्ञानेन चाखिलम् ।

जडं जगज्जडैर्मानैरज्ञानानाश्रयैः शुभैः ।

दृश्यमानं कथं च स्यादप्रमाणिकमुच्यताम् ॥ 1135 ॥

किञ्चाज्ञानस्य सत्यत्वे तदुपादानकं जगत् ।

सत्यमेवेति मानानां मानता हीनता कुतः ॥ 1136 ॥

अतो मानान्तरेणादौ मिथ्यात्वमखिलस्य च ।

वक्तव्यमासीत्ते नायं त्यक्तव्यो भाष्यकृत्तदा ॥ 1137 ॥

यो विद्यावद्विषयतां व्यर्थमादत्त मत्तवत् ।

अन्योन्याश्रयदोषं च योसौ भूषाममन्यत ॥ 1138 ॥

मिथ्यात्वे जगतः सिद्धे मानानां हीनता भवेत् ।
विरोधिमानहैन्ये च मिथ्यात्वं जगतो यतः ॥ 1139 ॥

अतः प्रामाणिकत्वाख्यहेतुर्विजयतेतराम् ।
परन्यायेनैव परं यो हन्ति मारणाङ्कणे ॥ 1140 ॥

भेदेशधर्मविश्वाख्यत्रिलोकीसत्त्वरक्षणे ।
प्रामाणिकत्वहेतुस्तज्जम्भारिरिव जृम्भते ॥ 1141 ॥

यदि मिथ्या जगत्सर्वं कथमर्थक्रिया ततः ।
मरीचिकाजलैः किं स्याद्धावतस्तृड्विमोचनम् ॥ 1142 ॥

जलस्य मुख्यकार्यं हि पिपासाशमनं विदुः ।
मरीचिकाजले क्वापि कदापि न कुतोस्ति तत् ॥ 1143 ॥

अतस्त्वयापि वक्तव्यं मिथ्यात्वादेव केवलम् ।
नाभूदिति तदा सिद्धं तवापि च ममापि च ।
मिथ्याभूतं स्वक्रियायामशक्तमिति सुस्फुटम् ॥ 1144 ॥

प्रातिभासिकतैर्वार्थक्रियाया घातिका यदि ।
प्रतिभासशरीरत्वं तन्मात्राकारताथवा ॥ 1145 ॥

इदीनीं बाध्यता वा स्यात्तत्र नाद्योऽर्थघातकः ।
ज्ञानात् स्वार्थक्रियादृष्टेर्द्वितीये व्यर्थ एव हि ॥ 1146 ॥

व्यावर्त्यो मात्रशब्देन ततोऽर्थाभावलक्षणम् ।
मिथ्यात्वमेव कार्यस्य विघातकमभूद्बलात् ॥ 1147 ॥

तृतीयेऽप्येवमेवासीद्यन्मिथ्यात्वं हि बाध्यता ।
मरीचिकाजलं तस्मान्मिथ्यात्वादेव नार्थकृत् ॥ 1148 ॥

सत्यं जलं चार्थकारि ततः सत्यमभूज्जगत् ।
अर्थक्रियाया योग्यत्वात् व्यतिरेकान्मृषार्थवत् ॥ 1149 ॥

किञ्च नार्थक्रिया तेऽपि प्रातिभासिकसत्यतः ।
सत्ये जलेऽस्ति सा स्पष्टं तेनेदं सिद्धमावयोः ।
सत्यताऽभ्यधिका यत्र तच्छक्तं नावरं त्विति ॥ 1150 ॥

आधिक्यं यद्यबाध्यत्वं सिद्धं मम समीहितम् ।
अन्यच्चेन्नाममात्रं तत्त्रिकालासत्त्वसाम्यतः ॥ 1151 ॥

असतो सिद्धकार्यस्य साधकत्वे प्रयोजिका ।
त्रिकालासत्यता स्यात्किं वाच्यान्यासत्यतैव हि ।
सा चाबाध्यत्वरूपैव तस्मादन्यन्न विद्यते ॥ 1152 ॥

नभोनैल्यं तव मते देहात्मैक्यं च केवलम् ।
बाध्यते चरमज्ञाने साध्यते तावतापि किं ॥1153 ॥

तत्रार्थकार्यं तन्निष्ठतारादेर्नैल्यमेव च ।
चित्त्वं च देहे बाधोसौ दूरस्थोपि हि वारयेत् ॥ 1154 ॥

बाध्यते शुक्तिरूप्यादि तज्ज्ञानं तु न बाध्यते।
यतो रूप्यं नेति बाधो न तु ज्ञानं च नेत्यपि ॥1155 ॥

ज्ञानकार्यं प्रवृत्त्यादि ततस्तत्रापि जायते ।
तस्मादबाध्यतैवार्थक्रियायामुपयुज्यते ॥ 1156 ॥

अन्वयव्यतिरेकाभ्यां कार्याकार्यव्यवस्थितिः ।
प्रवृत्त्या च निवृत्त्या च तौ ज्ञानस्यैव केवलम् ॥ 1157 ॥

उदाहरणमेतस्य कृष्णकाव्ये प्रदृश्यताम् ।
पुनरुक्तेर्विस्तृतेश्च भयान्नेहापि लिख्यते ॥ 1158 ॥

दुराग्रहगृहीतो यो युक्तियुक्तं न पोषयेत् ।
स दूषयेन्निजं श्लाघ्यं दोषज्ञानं न संशयः ॥ 1159 ॥

इदानीं बाधबोधोस्ति नास्त्यन्यस्य किलाधुना ।
किमनेन विशेषेण प्रकृतानुपयोगिना ॥ 1160 ॥

गृहे मृतस्य मरणमुरस्ताडनकारिभिः ।

अघोष्यते गुहामध्ये मृतस्य तु कथापि न ॥ 1161 ॥

अयं न कार्यकर्ता चेत्सकिं कर्ता भविष्यति ।

अतो हि मरणादन्यज्जीवनं सिद्ध्ये भवेत् ॥ 1162 ॥

असत्त्वं मरणप्रायं सत्त्वमेव हि जीवनम् ।

तस्मादर्थक्रियासिद्ध्यै सत्यं वाच्यमबाधितम् ॥ 1163 ॥

व्यावहारिकसत्त्वं च सन्नाम्ना छादनं परम् ।

अमङ्गलस्य वारस्य यथा मङ्गलवारता ॥ 1164 ॥

किं वाञ्छितफलम् दद्यान्नाममात्रमहातरुः ।

त्रिकालेष्वपि सत्त्वस्याभावेन ह्युभयं समम् ॥ 1165 ॥

व्यावहारिकता बाधे त्वसत्त्वापरनामिका ।

बाधाभावे तु सत्त्वैव नास्मत्पक्षविरोधिनी ॥ 1166 ॥

अतस्ततोप्यन्यदेव सत्त्वं हेतुत्वसिद्धये ।

वाच्यं सा चाबाध्यतैव सत्त्वैविध्यं हि ते मते ॥ 1167 ॥

ध्वस्ते घटे ध्वंस एव कार्यकर्तृत्वघातकः ।

ध्वंसो नामोत्तरासत्त्वं तच्च यद्यर्थघातकम् ।

त्रिकालेप्यसतस्तर्हि कर्तृका कथमुच्यताम् ॥ 1168 ॥

तदानीं बाधितादृूप्यात् किं कालान्तरबाधिते ।

अल्पापि कटकाद्यर्थयोग्यतास्ति विचार्यताम् ।

अतो हि मानबाहुल्याबाहुल्याभ्यां न किञ्चन ॥ 1169 ॥

अबाधिताद्भवेत्कार्यं बाधिते तु न तद्भवेत् ।

इत्येव वाच्यं भवता तद्बलात् सत्यता भवेत् ॥ 1170 ॥

उक्तश्रुतिबलात्सूत्रबलाद्युक्तिबलादपि ।

अर्थक्रियायोग्यभावादप्यबाध्यमभूज्जगत् ॥ 1171 ॥

अतस्तद्ब्रह्म नः कर्तृ तवापि ब्रह्मकर्तृताम् ।

न सत्यता विघटयेन्निष्क्रियत्वश्रुतिः परम् ॥ 1172 ॥

सा चेदर्थान्तरे लुब्धा ब्रह्मकर्तृश्रुतेर्बलात् ।

तस्मादर्थक्रियायोग्यं ब्रह्म स्याद्धि निदर्शनम् ॥ 1173 ॥

अर्थक्रियायोग्यता च सत्त्वेनैवावसीयते ।

हेतुना पूर्वभावित्वं तत्सत्तापरनामकम् ॥ 1174 ॥

कुणपस्य प्रवृत्तिर्न स जीवस्तु प्रवर्तते ।
अन्वयव्यतिरेकाभ्यां प्राप्ता चित्तेव हेतुता ॥ 1175 ॥

करणादिसहायस्य हेतुत्वं यदि किं ततः ।
सर्वं चावच्छेदकं ते जडत्वान्न प्रवृत्तिमत् ॥ 1176 ॥

प्रवर्तकं च नान्यस्य तत एव घटादिवत् ।
अतो जडप्रेरकोसौ स्वयमेव हि चेतनः ॥ 1177 ॥

अज्ञानस्य प्रेरकत्वं नाज्ञानस्य सहायतः ।
आत्माश्रयप्रसङ्गेन सन्मात्रं तत्प्रवर्तकम् ॥ 1178 ॥

प्रेरकत्वं हि चिन्मात्रे तज्जडस्यास्ति न क्वचित् ।
अतः केवलचिन्मात्रे कर्तृताऽवश्यकी विदाम् ।
अतश्चेतनमात्रस्य हेतुता सर्वसम्मता ॥ 1179 ॥

विशिष्टस्यापि हेतुत्वे विशेष्ये हेतुता न किम् ।
न हि द्विनिष्ठधर्मोयमिति साधितमेव हि ॥ 1180 ॥

अतो विशेष्यभागो यः स एव स्यान्निदर्शनम् ।
स तु सत्यस्तव मते सर्वबाधेप्यबाधवान् ॥ 1181 ॥

अनामरूपं तद्ब्रह्म मायायाः शास्तिकृत् पुरा ।

मायामनुससारेति श्रीमद्भागवते स्फुटम् ॥ 1182 ॥

अनामरूपे निर्माये शुद्धे ब्रह्मणि केवलम् ।

मायाप्रवृत्तिहेतुत्वप्रोक्तेस्तन्मूलकारणम् ॥ 1183 ॥

दृष्टान्तीकृत्य तद्ब्रह्म विश्वस्य परमार्थताम् ।

अर्थक्रियाहेतुताख्यहेतुना स्यादिति स्थितम् ॥ 1184 ॥

निमित्तमात्रं तत्रात्मा निर्गुणः पुरुषः परः ।

व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥ 1185 ॥

इति भागवते साक्षान्निर्गुणस्य निमित्तता ।

यत्प्रोक्ता तत्सदेवार्थ क्रियाकारि न संशयः ॥ 1186 ॥

अर्थ क्रियानिमित्तत्वाज्जगतः परमार्थता ।

निर्गुणब्रह्मदृष्टान्तात्सिद्ध्यतीत्यतिमङ्गलम् ॥ 1187 ॥

किञ्चेन्द्रियेण सम्बन्धाद्घटाद्यं परमार्थसत् ।

चित्संवलितचित्तेन सन्निकृष्टपरात्मवत् ॥ 1188 ॥

किञ्च योगोस्ति मनसा यदा स्याच्चरमप्रमा ।

आवयोरुभयोस्तेन दृष्टान्तः सम्मतो ह्ययम् ॥ 1189 ॥

अथवा स्तम्भकुम्भादि द्रव्यं नः परमार्थसत् ।

संयुक्तत्वात्तवाज्ञानधारागोचरवस्तुवत् ॥ 1190 ॥

यथा शशोतिदूरस्थो नान्यत्र क्वापि दृश्यते ।

अच्छेन्दुनापि छुरितो दृश्यतेद्यापि लौकिकैः ॥ 1191 ॥

तथा राहोरपि छायानीलानीलाभ्रसङ्कुला ।

अन्यत्रादृश्यमानापि दृश्यतां चन्द्रमण्डले ॥ 1192 ॥

नीरूपं ब्रह्म दुर्द्रव्यसाचिव्येपि नृचक्षुषा ।

कथं निरीक्ष्यते शुद्धं यद्धि प्राहुरधोक्षजम् ॥ 1193 ॥

रूपाभिभवमात्रेण तप्तवारिस्थतेजसः ।

यदा नेक्षारूपशून्यद्रवेक्षा ते कथं वद ॥ 1194 ॥

अतो वृत्तेर्भ्रमत्वे स्यान्निरधिष्ठानको भ्रमः ।

परोक्षवृत्तौ साधिष्टानत्वं तु भवतोपि न ।

तस्मात्प्रमात्वं सर्वत्र वृत्तेर्युक्तिबलादभूत् ॥ 1195 ॥

तस्यामुल्लिखिता सत्ता तत्तदर्थगतैव तत् ।

तत्रोल्लिखितवस्तूनि चार्थात्प्रापुर्यथार्थताम् ॥ 1196 ॥

साक्षाद्वृत्तावन्यसत्ता यत्रोल्लेख्याभवेत्तव ।

परोक्षवृत्त्या सा कत्योल्लिख्यते तेषु वस्तुषु ॥ 1197 ॥

तत्प्रमारूपया वृत्त्योल्लिख्यमानाखिलेषु च ।

सत्तेयं ब्रह्मसत्तायाः समैवेति मतिर्मम ॥ 1198 ॥

अर्थोयं ब्रह्मवद्वस्तुतत्वं यस्तत्र भासते ।

वृत्तौ प्रतीतस्य तस्य प्राक् सतो न दृशिभ्रमः ॥ 1199 ॥

वृत्त्याऽज्ञानक्षये पश्चाद्दक् चक्षुस्ते किलोन्मिषेत् ।

विभ्रमं तद्विधा धत्ते सत्ताद्या मत्तकाशिनी ॥ 1200 ॥

योगायोगाद्भ्रमायोगं मा विस्मार्षीः पुरोदितम् ।

प्रमिनन्तीति वेदेऽस्यां प्राह प्रमितिमेव तत् ॥ 1201 ॥

मायासृष्टौ च मायाविभ्रान्त्यारोपो न यौक्तिकः ।

अन्येषामर्थयोगोत्थवृत्तेश्चाभ्रमतोदिता ॥ 1202 ॥

निरीक्षतोपि यस्येक्षामाययाण्वपि नाज्यते ।

स्तौतीत्थं पञ्चमस्कन्धे पञ्चवक्त्रइतीरितम् ॥ 1203 ॥

न यत्रेत्यादि वाक्योक्ता तत्प्रमाऽमायदृक्प्रभोः ।

आपश्च प्रमिनन्तीति प्रजानां च प्रमोच्यते ॥ 1204 ॥

अतः प्रभोः प्रजानां च प्रमादोयं न शोभते ।

एवं चारोपितत्वेन मिथ्याभूतं जगन्न मे ॥ 1205 ॥

निरधिष्ठानधीत्वं च परोक्षप्रमयोपमा ।

पूर्वप्रमितदृत्त्वं च योगायोगश्च बाधकः ॥ 1206 ॥

मायाविभ्रान्त्ययोगश्च योगायोगो परस्य च ।

रौद्री वाग्वारुणी वाक्क पार्थस्य वचनं तथा ।

श्रुतिश्चेति जगद्बाधारोपबाधा दशाभवन् ॥ 1207 ॥

सत्त्वस्याप्रतिषेधेन त्रिकाले त्वनिषेधनात् ।

अखण्डार्थत्वतो वाचां निर्विकल्पत्वतो धियाम् ॥ 1208 ॥

स्वस्वस्थानानिषेधाच्च शब्देऽक्षानुसृतीक्षणात् ।

एकज्ञानेन सर्वस्य ज्ञानात्सत्त्वश्रुतेर्बलात् ॥ 1209 ॥

आरोपासम्भवाद्ब्रह्मासत्त्ववाक्साम्यतोपि च ।

बाधायोगेन सकलम् विश्वमासीदनाकुलम् ॥ 1210 ॥

दशधा बाधबाधानां प्रमतिर्यस्य चेतसि ।

दशप्रमतिनामासौ गुरुर्विजयतेतराम् ॥ 1211 ॥

स्वपृष्ठचलने पक्षी त्रिलोकीं मनुते चलाम् ।
किञ्चिन्मिथ्येत्यर्थवच्च सर्वं मिथ्या जगत्किल ॥ 1212 ॥

एकयोगे परत्यागस्तुन्दिलाधर चुम्बने ।
मिथ्येत्यसत्त्वं न स्वस्य निर्वाच्यत्वं न कस्यचित् ॥ 1213 ॥

नीचोवाचाबहुवदेद्ददात्यत्यल्पमेव हि ।
घुष्टोऽनिर्वाच्यशब्दार्थौ द्विधर्मा वाच्यता किल ॥ 1214 ॥

स्वाङ्गं स्वयं हि च्छिन्दन्ति पिशाचग्रस्तचेतनाः ।
सत्त्वाभावे ह्यसत्त्वं स्यातच्च प्रच्यवते किल ॥ 1215 ॥

दोषः किं किं न कुरुते यो जातिं हरति क्षणात् ।
अविद्यमानमेवाक्ष्णा काचे सति यदीक्ष्यते ॥ 1216 ॥

अदृष्टः श्यैव किं दृष्टौ श्वाश्वयोः स्याद्विलक्षणः ।
असन्नृश्रृङ्गं दृष्टं चेद्भिन्नं सदसतोः किल ॥ 1217 ॥

किं स्पृष्टोच्छिष्टयोरेकः शुद्धोशुद्धोपरोभवेत् ।
सदन्याभावकालीनं सच्चेद्ब्रह्म तमोपि सत् ॥ 1218 ॥

सदनेऽनदने प्राप्ते कदन्नेपि रुचिर्भवेत् ।
ज्ञानात्मकेन भोगेनैवारब्धस्य क्षयोन्ततः ॥ 1219 ॥

विप्रोहं नैव विप्रोहमित्युक्तिं कोपि लालयेत् ।

स्वस्वभावौ सदैकत्र स्वस्थौस्तः किल मायिनाम् ॥ 1220 ॥

सर्वसम्प्रतिपन्नस्य कोऽभावं भावयेद्बलात् ।

शुक्तिरूप्यस्य मिथ्यात्वेप्यापणस्थस्य तन्न हि ॥ 1221 ॥

प्राणत्यागे मृतिर्युक्ता तदत्यागे कथं मृतिः ।

बाध्यरूप्यस्य मिथ्यात्वेप्यबाध्यस्य कुतो हि तत् ॥ 1222 ॥

शङ्कापिशाची रम्येर्थे पिशाचस्यैव केवलम् ।

बाधशङ्का जगति चेद्ब्रह्मण्यपि कुतो न सा ॥ 1223 ॥

अर्थज्ञाने ह्यकुशलः किं वाक्येन करिष्यति ।

अकस्मादिति वाक्येन कस्माद्ब्रह्म न बाध्यते ॥ 1224 ॥

अबद्धं वदतोज्ञस्य किमवाच्यमिहोच्यताम् ।

किं नावादीत्कोपि वादी निरधिष्ठानकभ्रमम् ॥ 1225 ॥

दुराग्रहगृहीतस्य बुद्धिः सद्यो विभिद्यते ।

न चेद्ब्रूते कथं हेतुमभावे भावदर्शनम् ॥ 1226 ॥

उक्तं तु निर्वहेदेवेत्याग्रहोग्र्यग्रहो नृणाम् ।

किं न स्वोक्तानृतत्वार्थं वेदमप्यनृतं जगुः ॥ 1227 ॥

कपर्दिकामात्रलब्ध्यै लक्ष्यं त्यजति रूक्षधीः ।

न चेन्नीचैक्यलाभाय जगत्सर्वं कथं जहौ ॥ 1228 ॥

यः सर्वस्मै सदा द्रुह्येन्न ह्येतस्य सुखं भवेत् ।

किं मिथ्याश्रुतिरेवान्ते स्वयं मिथ्येति नापतत् ॥ 1229 ॥

मिथ्याभिजल्पैरल्पानां शुद्धस्याशुद्धसौ न हि ।

साधिका बाधिका किं स्यान्मिथ्या मिथ्यात्ववाग्यदि ॥ 1230 ॥

मनोरथरथारूढः कोर्थो व्यर्थं भवेत्तव ।

कः कुर्याच्छुक्तिरूप्येण वलयं कटकानि वा ॥ 1231 ॥

पुत्रीजननशक्तश्चेन्न पुत्रं जनयेत्कुतः ।

रागं चेज्जनयेच्छुक्तिरूप्येन कटकं कुतः ॥ 1232 ॥

राज्ञा प्रत्यक्षतो दृष्टस्याक्षेपी शिष्यते नरैः ।

यथेशदृष्टिमिथ्यात्ववादो वेदोप्यपोद्यते ॥ 1233 ॥

गुरोरगुरुतां ब्रूते लघोरलघुतां खलः ।

भ्रान्तिस्तात्कालिकी भ्रान्तिर्दीर्घभ्रान्तिः किल प्रमा ॥ 1234 ॥

उष्ट्रः कण्टकमेवात्ति पक्कं न क्वापि भक्षयेत् ।

श्रुतिः श्रौतार्थसत्यत्वत्यागि मिथ्यात्वरागि तत् ॥ 1235 ॥

रसार्थी श्वा गृहीत्वास्थि दन्तैरन्तर्निकृन्तति ।
यथार्थिकार्थमिथ्यात्वव्यर्थार्थोर्थं कुयुक्तिदृक् ॥ 1236 ॥

वादिराजाख्ययतिना साधिता युक्तिमल्लिका ।
विश्वसौरभसर्वस्वमथ विष्णौ न्यवेदयत् ॥ 1237 ॥

**इति श्रीमत्परहंसपरिव्राजकाचार्य श्रीमद्वादिराजतीर्थ श्रीमत्पूज्यचरणविरचितायां**
**श्रीमद्युक्तिमल्लिकायां विश्वसौरभं सम्पूर्णम् ॥ 4 ॥**

# फलसौरभं

यद्यज्ज्ञानं मनोवृत्तिप्रतिबन्धकमेव न ।
मनसा ब्रह्मणस्तर्हि साक्षात्कारः सदा भवेत् ॥ 1 ॥

योग्यस्यानापरोक्ष्यं हि प्रतिबन्धनिबन्धनम् ।
योग्यं च मनसो ब्रह्म दृश्यतेन्ते कथं न चेत् ॥ 2 ॥

श्रुतिश्च मनसैवैनं पश्यतीत्याह योग्यताम् ।
रुणद्धि न परोक्षं तत्साक्षात्कारं रुणद्धि च ॥ 3 ॥

मनसः प्रतिरोधे हि श्रवणाद्यपि मृग्यते ।
प्रतिबन्धनिरासाय न चेत् स्वार्थं स्पृशेद्बलात् ॥ 4 ॥

मनसः प्रतिरोधे हि स्यादन्योन्याश्रयो ध्रुवम् ।
मनसो प्रतिरोधेपि स्यादन्योन्याश्रयो ध्रुवम् ॥ 5 ॥

श्रवणं मननं चैव ध्यानं चेति क्रमात्त्रयम् ।
प्रधानाङ्गं हि मनसो द्रष्टव्ये परमात्मनि ॥ 6 ॥

प्रतिबन्धनिरुद्धं हि मनो द्रष्टुं न शक्यते ॥ 7 ॥

परोक्षज्ञानरूपात्तु सदा ध्यानात् प्रसन्नधीः।
अपसार्य निरोधं तं स्वात्मानं दर्शयेत्प्रभुः ॥ 8 ॥

जह्यजामजितेत्याह तस्माद्भागवते श्रुतिः ॥ 9 ॥

दृष्टश्च भगवानेकं हृद्ग्रन्थिं स्वं भिनत्त्यजः।

अन्यं चापसृतं कुर्यात्तेनाच्छादयति क्वचित् ॥ 10॥

अतः कदाचिद्दृश्यो सावदृश्योपि कदाचन ।

अमुक्तेश्च व्यवस्थेयं जीवन्मुक्तिश्च सा मता ॥ 11 ॥

यदि ज्ञानेनैवकार्यैः सहज्ञानं निवर्तते ।

तदा मोक्षविलम्बस्य न किञ्चित्कारणं तव ॥ 12 ॥

स्वतन्त्रश्चेत् प्रभुर्मध्ये स्वेच्छया स निवर्तयेत् ।

स्वतन्त्रश्च नियोगार्हो नेत्याहुर्हि मनीषिणः ॥ 13 ॥

वरं वरय भद्रं ते ऋते कैवल्यमात्मनः ।

एक एवेश्वरस्तस्य भगवान् विष्णुरव्ययः ।

इति भागवते प्रोक्तं तद्धि देवानुशासनम् ॥ 14 ॥

मुक्तौ ग्रन्थिद्वयं सम्यङ्ग्मोचयोन्मुक्तचेतनात् ।

बन्धं मनोमानलिङ्गदेहात्मानं च मोचयेत् ।

मुक्तौ स्वरूपनिष्पत्त्या तस्य स्वच्छन्ददर्शनम् ॥ 15 ॥

प्रतिबन्धनिवृत्तिश्च प्रतिबध्येन केवलम् ।
यस्यान्योन्याश्रयस्तं त्वां मुक्तं चापि न मुञ्चति ॥ 16 ॥

साक्षात्कारे तु करणं श्रवणं किल केवलम् ।
श्रवणेऽङ्गिन्युत्तराङ्गम् मननादीति कश्चन ॥ 17 ॥

श्रुतेर्ब्रह्मणि तात्पर्यावधृतिः श्रवणं मतम् ।
त्रिक्षणस्तायिविज्ञानरूपत्वान्नस्थिरं हि तत् ॥ 18 ॥

श्रवणानन्तरं दृष्टिर्यदि जाताङ्गता गता ।
एकस्मिन्हि फले हेत्वोर्द्वयोरङ्गाङ्गिता मता ॥ 19 ॥

न जाता चेद्यतः सा स्यात्तदेव करणं भवेत् ।
श्रवणं मननात्पूर्वं श्रुतं न ध्यानतः परम् ॥ 20 ॥

मध्ये कल्पान्तरं कल्प्यं मननादौ न कश्चन ।
तच्चैकवाक्ये पठनात्रयं क्रमिककारणम् ॥ 21 ॥

यदि साक्षात्कारकार्याज्ञाननाशे सहायत ।
ज्ञानेङ्गिन्यङ्गतैव स्याच्छ्रवणेङ्गिनि नाङ्गता ॥ 22 ॥

परोक्षज्ञानजनकं श्रवणं केन हेतुना ।
अपरोक्षफलं कुर्यात्साह्यदृष्टस्य कल्पना ॥ 23 ॥

गेहे घट इति प्रोक्ते बहिःस्थस्यापरोक्षधीः ।
गेहान्तस्थघटेपि स्यात् सापि दृश्यार्थदृङ्ङ किम् ॥ 24 ॥

साक्षात्कारस्य योग्योर्थो यदा साक्षात् प्रदृश्यते ।
तत्र प्रयुक्तशब्दोपि साक्षात्कारफलो यदि ॥ 25 ॥

तर्हि स्याद्ब्रह्मणः साक्षात्कारः प्राक्कारणान्तरात् ।
तत्र प्रयुक्तशब्दस्तु व्यर्थः स्यादिति मे मतिः ॥ 26 ॥

किञ्च पूत्कारलिङ्गेन दृश्यमानेपि हस्तिनि ।
जायमानानुमापि स्यात्साक्षात्कारात्मिका तव ॥ 27 ॥

एकगोष्ठप्रविष्टाः किं महिषीधेनुपूर्वकाः ।
एकाकारफलं दद्युरिदं चादृष्टकल्पनम् ॥ 28 ॥

दशमस्त्वमसीत्युक्तिरपि शाब्द्याधिया स्वया ।
चित्तव्याक्षेपहन्त्र्येव दशोमोहमिति प्रमा ॥ 29 ॥

तत्रापि मानसी नोचेदहन्त्वोल्लेखिनी कथम् ।
दशमस्त्वमसीत्यत्र ह्यहं शब्दो न विद्यते ॥ 30 ॥

त्वन्तामेव ज्ञापयेत्सा नाहन्तां ज्ञापयेद्धि वाक् ।
शब्दो वदेत्स्वशक्यार्थमशक्यार्थं कथं वदेत् ॥ 31 ॥

घटत्वाकारधीरेव घटशब्देन ज्ञायते ।
द्रव्यत्वाकारधीर्द्रव्यपदादुभयवत्यपि ।
दशमोहं त्विति तु या मतिः सा मानसी ध्रुवम् ॥ 32 ॥

अव्युत्पन्नस्य तद्वाक्यश्रवणेपि मतिर्न सा ।
व्युत्पत्तिः शब्दजन्यार्थज्ञाने क्लृप्तं हि कारणम् ॥ 33 ॥

अतः शाब्दप्रबोधोस्ति मध्ये व्यासङ्गभञ्जकः ।
समाहितमनास्तु स्वं दशमं मनसेक्षते ॥ 34 ॥

कारुः स्वकण्ठपरशुं विस्मृत्य बहु चिन्तयन् ।
अयं परुशुरित्युक्ते किं शब्दादेव पश्यति ॥ 35 ॥

उक्तिः परोक्षज्ञानेन चित्तव्याक्षेपनाशिनी ।
पश्चात्सकण्ठपरशुं चक्षुषैव स पश्यति ॥ 36 ॥

स्वतः समाहितमना दशमोहमिति स्वयम्।
मनसैवाभिपश्येच्छेद्ब्रह्म पश्येत्तथैव हि ॥ 37 ॥

शब्दस्तु व्यवधानस्योच्छित्त्यैकर्णे निपातितः ।
शाब्दिं करणसामर्थ्यात्तमाकारां धियं दिशेत् ॥ 38 ॥

ततः समहाहितमनाः पश्येदहमिति स्वयं ।

अहंत्वोल्लेखिनी शब्दाभावे धीर्मनसैव हि ॥ 39 ॥

प्रतिबन्धनिरासे हि निमित्तान्तरतः कृते ।

दहनादेव दाह्यस्य दाहः स्यान्नान्यतः क्वचित् ॥ 40 ॥

प्रतिबन्धनिरासेन तस्य स्याच्चरितार्थता ।

सहकारी भवेद्वासौ स एव न हि दाहकः ॥ 41 ॥

अहं शब्दाप्रयोगेपि ह्यहमाकारधीत्वतः ।

दशमोहमिति ज्ञानं न शाब्दं स्वस्थधीर्यथा ।

पराकरोति ते पक्षमनुमान मयीदृशम् ॥ 42 ॥

दृष्टियोग्ये प्रयुक्तोपि शब्दो यद्यपरोक्षकृत् ।

गृहे घटोस्तीत्युक्तेपि तर्हि स्यादपरोक्षधीः ॥ 43 ॥

दृश्यमाने प्रयुक्तस्तु शब्दो यद्यपरोक्षकृत् ।

असमाहितचित्तस्य कथं तर्ह्यपरोक्षधीः ॥ 44 ॥

न ह्यसौ विस्मृतस्वात्मा पुरा शब्दप्रयोगतः ।

आत्मानं मनसा पश्येद्याक्षेपाक्षिप्तचेतनः ॥ 45 ॥

दृश्यमानेपि शब्देन साक्षात्कारान्तरप्रमा ।
अनानुभविकत्वेन वैय्यर्थाच्च न शोभते ।
सैव चेत्तर्हि शब्दोत्था साक्षात्कारप्रमा क्व ते ॥ 46 ॥

करणस्य बलाच्छेद्धीस्तर्हि शाब्द्येव सा भवेत् ।
दृष्टेऽर्थे तर्करसिकस्यानुमानाद्यथानुमा ॥ 47 ॥

तस्माद्दर्शनमुद्दिश्य तादर्थ्येनास्य कीर्तनात् ।
करणत्वं श्रुतिबलाद्वाच्यं नान्यास्ति ते गतिः ॥ 48 ॥

श्रुतिस्तु श्रवणं वक्ति मननं ध्यानमन्ततः ।
पारम्पर्यात्तु तत्राद्ये हेतुर्ध्यानं तु मुख्यतः ॥ 49 ॥

न चेत्कर्मैव हेतुः स्यादङ्गं स्याच्छ्रवणाद्यपि ।
कर्मणा ज्ञानमित्याह यतः श्रुतिरचञ्चला ॥ 50 ॥

तस्मात् क्रमिकवेदोक्तकारणेषु यदुत्तरम् ।
ज्ञानादव्यवधानेन पूर्वं च तत एव तत् ॥ 51 ॥

यदि श्रवणमात्रेपि सर्वेषां ब्रह्मदर्शनम् ।
जीवन्मुक्ताः कुतस्तर्हि शुकाद्या एव योगिनः ॥ 52 ॥

अनानुभविकं चेदं श्रुतिकालेपि दर्शनम् ।

अश्नतः शृण्वतश्चान्नं किं नास्ति महदन्तरम् ॥ 53 ॥

तच्छब्दान्नापरोक्षं स्यान्न तरान्निर्विकल्पकम् ।

यतस्त्वदुक्तवाक्येपि दशमत्वविशिष्टधीः ॥ 54 ॥

अन्वितार्थाभिधायित्वादन्योन्यान्वयमिश्रितम् ।

स्वार्थं मुख्यममुख्यं वा पदं वक्तीति ते मतम् ।

तच्छब्दान्निर्विकल्पाधीरिति रिक्तं वचस्तव ॥ 55 ॥

यौगपद्येन तद्योग्यगुणानुस्मरणं हरेः ।

अच्छिन्नतैलधारावदारात्तं दर्शयेद्धृदि ॥ 56 ॥

ध्यानं च मनसा तस्माद्ध्यातृचित्तं हरीच्छया ।

तद्गं तमेवेन्द्रियत्वात्पश्चतीत्यतिमङ्गलम् ॥ 57 ॥

यदङ्घ्र्यभिध्यानसमाधिधौतसुधियात्मनः।

अनुपश्यन्ति तत्तत्वमित्याह भगवान् शुकः॥ 58 ॥

ध्यानमेव प्रधानाङ्गं तेन चाज्ञानधीमलम् ।

क्षाल्यते धौतधीरेव दर्शने कारणं किल ॥ 59 ॥

धीशब्दोक्तं मनः साक्ष्यात्कारस्य करणं किल ।

अङ्गाङ्गं श्रवणं दृष्टिकारणं न तरां किल ॥ 60 ॥

एवं चार्थद्वयं सिद्धं यदस्माभिरुदीरितम् ।

परोदीरितमार्गौ यौ कुमार्गौ तौ बहिर्गतौ ॥ 61 ॥

परोक्षज्ञानकरणं साक्षात्काराय को वदेत् ।

को वा श्रवणमात्रेण तं पश्यति महाप्रभुम् ।

अज्ञैश्च शब्दमात्रेण दृष्टश्चेत्कलहः कुतः ॥ 62 ॥

तैलधारावदच्छिन्नगुणसन्धानरूपया ।

मनोधारणया योगी पश्येच्चेदुचितं हि तत् ॥ 63 ॥

दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ।

इति गीतासु हरिणा निरणायि मतं मम ॥ 64 ॥

अविद्यां किल विद्राव्य दिव्यं चक्षुर्दृशे दिशेत् ।

साक्षाद्धीकरणादेव साक्षाद्धीः संस्कृतादपि ।

नान्यस्माद्यद्ददौ दिव्यं चक्षुरेव निरीक्षितुम् ॥ 65 ॥

चष्टेऽनेनेति तच्चक्षुर्मनो  वा बाह्यमेव वा ।

चक्षुः सहायेन मनो यतः पश्यति तं बहिः ॥ 66 ॥

किञ्चदक्षशिरश्छिन्दन्नच्छेदे कारणं पुरा ।

अपश्यत्किल तद्दृष्टै दध्यौ पशुपतिश्चिरम् ॥ 67 ॥

इति भागवते ध्यानात् पूर्वं दृष्टेरभावतः ।

तदभावेऽभावरूपं व्यतिरेकमदर्शयत् ॥ 68 ॥

दृष्ट्वा संज्ञपने योगमिति ध्यानोत्तरक्षणे ।

दृष्टं ब्रवीति यत्तेन तत्सत्त्वे सत्त्वरूपिणम् ।

अन्वमंस्तान्वयं ध्यानाददृश्यार्थस्य दर्शने ॥ 69 ॥

रौद्री विद्याऽनवद्येत्थं ध्यानस्य दृशिहेतुताम् ।

अन्वयव्यतिरेकाभ्यां निर्णिनायेति मे मतिः ॥ 70 ॥

रुद्रोप्यद्रावयद्यस्याः क्षुद्रोपद्रवहृद्रुजम् ।

हृद्या मध्वस्य शुद्धा सा विद्या विद्योदते तराम् ॥ 71 ॥

इदं त्रयं प्रधानाङ्गं मनः करणमुच्यते ।

प्रतिबन्धे न तत्पश्येत्तदपाये तु पश्यति ॥ 72 ॥

प्रतिबन्धनिवृत्त्यर्थं श्रवणाद्यपि मृग्यते ।

अतः श्रुतिः श्रवणतो मुक्तिरित्यपि सा जगौ ।

एवं च मनसैवेति श्रौतावधृतिरप्यभूत् ॥ 73 ॥

हर्यनुग्रह एवैभ्यः सर्वेभ्यो बलवत्तरः ।

व्यर्थीकृत्य प्रवचनं सुमेधां च बहुश्रुतम् ।

यमेवैष इति श्रुत्या प्रसादस्यैव कीर्तनात् ॥ 74 ॥

तनुशब्दबलात्सिद्धं साकारस्यैव दर्शनम् ।

अतो निराकारवस्तुनिर्विकल्पकदर्शनम् ॥ 75 ॥

निरस्तं सा तनुश्चाभूत् स्वामित्युक्तेः स्वरूपिणी ।

प्रागावृताय विवृतेरेवोक्तेर्नित्यसिद्धता ॥ 76 ॥

अतश्चिदनान्दरूपशिरःप्रण्यादिमान् हरिः ।

मुक्ताश्च तादृशाकारा इति श्रौतमतस्थितिः ॥ 77 ॥

गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।

सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं प्रबो ।

इति भागवते प्रोक्तं कामद्वेषादिसाधनम् ॥ 78 ॥

द्वारि द्वारि हरेर्लोके सदा सर्वत्र सेविषु ।

अनाद्यनन्तकालेष्वप्येवं कैङ्कर्यकर्मसु ॥ 79 ॥

निबिडज्ञानवैराग्यभक्त्यादिगुणसम्पदा ।

शापाद्युपाधिमूलोसावीषद्वेषो जयादिषु ॥ 80 ॥

अस्वाभाविकदोषत्वान्नैव मोक्षनिरोधकृत् ।

इत्येव मुक्तिदत्त्वेन कीर्त्यते नारदादिभिः ॥ 81 ॥

भृत्यापहारसहनशीलत्वस्तुतये हरेः ।

केवलद्वेषतो मोक्ष इति नर्षेर्मनोगतम् ॥ 82 ॥

कतमोऽपि न वेनस्यपञ्चानां पुरुषं प्रति ।

इत्युत्तरश्लोक एव वेने साधनपञ्चकम् ।

यन्नेत्याह ततो द्वेषो द्वेषमात्रं कथं भवेत् ॥ 83 ॥

पूर्णो हि भगवद्द्वेषो वेने तेनैव कीर्तितः ।

कथं पुनर्निषेधो हि तस्यैव स्याद्विदो मुनेः ॥ 84 ॥

भगवन्निन्दया वेनो द्विचैस्तमसि पातितः ।

इति निन्दाख्यविद्वेषस्तमोहेतुरुदीरितः ॥ 85 ॥

इदानीं मोकदत्वं च कथं तस्यैव कीर्तयेत् ।

त्रिकालदर्शी स मुनिः किं तात्कालिदृक्क न ॥ 86 ॥

अतो ग्रान्थिकमुद्राज्ञो नैवं व्याख्यातुमर्हति ।

तदीषद्द्वेष एवासौ सुगुणस्तोममध्यगः ॥ 87 ॥

हिरण्यकशिपुश्चापि भगवन्निन्दया तमः ।
विविक्षुरत्यगात् सूनोः प्रह्लादस्यानुभावतः ॥ 88 ॥

यदनिन्दत्पिता मह्यं त्वद्भक्ते मयि चाघवान् ।
तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघात् ॥ 89 ॥

निन्दां भगवतः श‍ृण्वन्स्तत्परस्य जनस्य वा ।
ततो नापैति यः सोपि यात्यदः सुकृताच्च्युतः ॥ 90 ॥

इत्यादि वाक्यसन्दर्भैस्तमोहेतुर्यतः स्फुटम् ।
निर्णीतो भगवद्द्वेषस्ततोप्युक्तोर्थ एव हि ॥ 91 ॥

सूत्रकृच्चाह यद्विद्यैव तु निर्धारणादिति ।
नान्यः पन्था इति स्पष्टो वेदस्तौ कोऽनुलङ्घयेत् ॥ 92 ॥

श्रवणं मननं तस्मात् ध्यानं साक्षात्कृतिर्हरेः ।
भक्तिः प्रसाद इत्येते मुक्तेः सोपानपङ्क्तयः ॥ 93 ॥

रुग्मवर्णं च कर्तारमीशं पुरुषरूपिणम् ।
ब्रह्मतातं महात्मानं पद्मनाभं परात्परम् ॥ 94 ॥

यदा पश्यति जीवोऽयं तदा कर्म द्विरूपकम् ।
हित्वा निर्दुखत्वपूर्वैः परं साम्यमुपैति सः ॥95 ॥

इति श्रुतौ मोक्षहेतुज्ञानस्येत्थं विनिर्णयात् ।

ज्ञानं सरूपसाकारसगुणेश्वरगोचरम् ।

साध्यं मोक्षार्थिभिर्भक्तैर्नान्यच्छ्रुतिविरोधतः ॥ 96 ॥

यः स्वतः परतो वेषद्विरक्तो विष्णुभक्तिमान् ।

सारासारविवेकज्ञो मुमुक्षुश्च स मुक्तये ।

अध्यायद्वयरूपस्य शास्त्रस्य श्रवणं चरेत् ॥ 97 ॥

विषयस्यैव शास्तृत्वान्मुख्यं शास्त्रमिदं किल ।

तदगं शास्त्रमितरत्फलसाधनबोधकम् ।

प्रवर्तकस्य चर्चात्र सा साक्षाद्विषयस्य यत् ॥ 98 ॥

वैराग्यभक्तिपादौ च श्रुत्वाध्यायद्वयश्रुतेः ।

सम्यक्सारासारवेदी भक्तिवैराग्यदार्ढ्यवान् ॥ 99 ॥

सार्धाध्यायद्वयोक्तार्थसम्पन्नोथ विमुक्तये ।

तद्धेतुदृष्ट्यै च पुनः शास्त्राभ्यासस्वरूपिणीम् ।

मननाख्यां ध्यानरूपां जिज्ञासां चाचरेत्किल ॥ 100 ॥

ध्यानस्य परिपाके तु तं दृष्ट्वा मुच्यते किल ॥ 101 ॥

अतः श्रवणवैराग्यभक्तिशास्त्रविचारणाः ।

ध्यानं च भगवद्दृष्टिस्तद्भक्तिस्तदनुग्रहः ॥ 102 ॥

इमानि साधनान्यन्ते फलाध्यायोदितं फलम् ।

इत्यादि सूत्रे सर्वोऽपि शास्त्रार्थः कथितः किल ॥ 103 ॥

उत्क्रान्तिमार्गगम्याप्तिभोगरूपं फलं सताम् ।

फलाध्याये तु कथितं बुद्धिशुद्ध्यै विचार्यते ॥ 104 ॥

ज्ञानी ज्ञानोदये जाते ब्रह्मनाड्या विनिर्गतः ।

अर्चिराद्यध्वना प्राप्य ब्रह्मलोके चिरं वसेत् ।

जीवन्मुक्तिदशा सैव ज्ञानिनां कीर्त्यते बुधैः ॥ 105 ॥

द्विपरार्धात्मकः कालः पर इत्येव कथ्यते ।

परस्यार्थं परार्थं यत्प्राहुः शब्दविचक्षणाः ॥ 106 ॥

ब्रह्मणः शतवर्षात्मा कालस्तस्मात्पराभिदः ।

तदन्ते किल सर्वेषां प्राक् ज्ञातपरमात्मनाम् ।

तेनैव ब्रह्मणा साकं महामोक्षो भविष्यति ॥ 107 ॥

वेदान्तज्ञानतः सम्यङ्निश्चितार्थाविरागिणः ।

यतयः शुद्ध सत्त्वास्ते ब्रह्मलोके वसन्ति हि ॥ 108 ॥

सर्वे परान्तकाले तु परामृतपदोदितात् ।

नारायणान्नित्यमुक्तात्परिमुच्यन्ति संसृतेः ॥ 109 ॥

ल्यब्लोपे पञ्चमी चेयं भवेच्छब्दज्ञसंविदा ।
परामृतम् प्राप्य मुक्ता इत्यप्यर्थः श्रुतेस्तदा ॥ 110 ॥

अतः परममोक्षोयं नान्योस्तावस्ति जानताम् ।
इत्याह वैदिकी वाणी विशदा सर्वसम्मता ॥ 111 ॥

अतो विमुक्तिकालोयं श्रौतत्वान्नापरो श्रुतेः ।
परान्तकालमेवेयं मुक्तिकालं यतोऽब्रवीत् ।
परान्तकालः स किल महत्तत्वलयो यदा ॥ 112 ॥

उदरे वासुदेवस्य जीवान् सर्वान् विधिस्तदा ।
निवेश्य सर्वमुक्त्यर्हान् जीवानादाय सत्वरः ॥ 113 ॥

वैकुण्ठान्तःपुरस्थे तु विरजाख्ये सरिद्वरे ।
नित्ये चिद्रूपसलिले रजःशब्दोपलक्षितैः ॥ 114 ॥

त्रिगुणैर्वर्जिते तेषां भर्जनेऽतिपटीयसि ।
स्नात्वा भूतेन्द्रियमनोमात्रं त्रिगुणरूपिणम् ॥ 115 ॥

लिङ्गदेहं विनिर्भिद्य प्राङ्मुक्तैश्च त्रिधामगैः ।
सह मुक्तैश्च सहितो वासुदेवोदरं विशेत् ॥ 116 ॥

एवं परान्तकालेऽस्मिन् मुच्यन्ते ब्रह्मणा सह ।
इत्याहोपनिषत्सैषा तत्तत्त्वमिदमेव हि ॥ 117 ॥

ततश्च चिद्रूपसलिलसम्प्लवे सति केशवः।
वटपत्रपुटे शेते लक्ष्म्या सह किल प्रभुः ॥ 118 ॥

अतः परममोक्षस्य कालोयं नात्र संशयः ।
तस्माद्ब्रह्मलयः सोयं महाप्रलय एव हि ॥ 119 ॥

सोऽयं लयश्च कल्पान्ते सङ्कर्षणमुखाग्निना ।
प्रलयार्केण च जगद्दाहे सांवर्तकोदकैः ।
विलोडितं च तद्भस्म सर्वं जलमयं भवेत् ॥ 120 ॥

जलं च तेजसा शुष्येत्तच्च वायौ प्रशाम्यति ।
वायुश्च गगने लीनो लयस्तस्याप्यहङ्कृतौ ।
अहङ्कारस्य महति तस्य स्यात् प्रकृतौ लयः ॥ 121 ॥

प्रकृतिश्च स्वभावस्था स्वभावं प्रकृतिं विदुः ।
अतस्तस्यास्तु न लयः सा नित्यैव परात्मवत् ॥ 122 ॥

इति श्रुतिपुराणादौ तत्र तत्र प्रदृश्यते ।
एवं च ज्ञानबलतः कस्य नाशो भवेद्वद ॥ 123 ॥

ज्ञानेनैव च नास्तित्वं कस्य विश्वस्य जायते ।

प्रलये नास्तिताया तु साध्वंसादेव केवलम् ॥ 124 ॥

किमन्यन्नाशये ज्ञानी कस्य वा नास्तितां दिशेत् ।

स्वदेहस्यापि यद्दाहान्नास्तिता न स्वसंविदा ॥ 125 ॥

अतो जगद्बाधकथा स्वाबोधादेव केवलम् ।

उच्चैर्न वाच्या विद्वत्सु महाहास्यास्पदा हि सा ॥ 126 ॥

इतोन्यः सर्वसंहारो न श्रौतो नापि यौक्तिकः ।

घटादिसर्वनाशो हि स्वस्वकारणशेषवान् ॥ 127 ॥

दाहेन कार्यनेशेपि भस्मशेषः प्रदृश्यते ।

स्वस्वावयवनाशेपि सूक्ष्म सूक्ष्मतदंशका ।

शिष्टा भवन्ति तद्वस्तु कथं स्यादसदेव हि॥ 128 ॥

अतो या या त्वयोच्येते सा सा नाशपरम्परा ।

कथं मुञ्चेदुपादानसूक्ष्मांशांशपरम्पराम् ॥ 129 ॥

परम्परा द्विरूपेयं प्रकृतौ पर्यवस्यति ।

सर्वस्यान्ते यतः सैव शिष्टा नष्टा च नैव सा ॥ 130 ॥

नाशत्वाद्विमतो नाशः स्याद्भावान्तरशेषवान् ।
घटनाशवदित्येषा विदोषा युक्तिरस्ति हि ॥ 131 ॥

निःशेषवस्तुनाशस्य नाशमात्रेप्यदर्शनात् ।
वक्रताभासोक्तिमात्रेण नैव स्याद्धि स यौक्तिकः ॥ 132 ॥

अदृष्टकल्पनादोषो यतः सर्वत्र सञ्चरेत् ।
श्रुतयश्च पुराणानि मन्मतस्यैव साक्षिणः ॥ 133 ॥

किं च सर्वविनाशो न नाशस्यास्याविनाशनात् ।
नापि भावस्य सर्वस्य नाशो ब्रह्माविनाशनात् ॥ 134 ॥

ब्रह्मभिन्नस्य भावस्य नाशे जीवोपि नङ्क्ष्यति ।
मिथ्याभूतोस्ति तद्भेदः परमार्थो न कुत्रचित् ॥ 135 ॥

भावकार्यस्य सर्वस्य नाश आशास्यते यदि ।
जीवस्य जीवधर्माणां कालादेर्गगनस्यच ।
विनाशोऽनादिभावानाम् भवेदाकस्मकस्तदा ॥ 136 ॥

ब्रह्मान्यानादिनाशे तु नश्येद्ब्रह्मापि तादृशम् ।
अतः सर्वविनाशोयं विद्वदग्रे न शोभते ॥ 137 ॥

अणुत्वेशवशत्वादेरनादेरविनाशनात् ।

जीवब्रह्मैकताशा च दुराशैवाभवत्तव ॥ 138 ॥

अनादिभावभूतानामेतेषां परमात्मवत् ।

अज्ञानोपादानता ते न मिथ्यात्वं च युक्तिमत् ॥ 139 ॥

सादेरनादेः सर्वस्य ब्रह्मणोन्यस्य वै क्षयः ।

उक्तरीत्या स नैवाभूद्यो मायावादिनां मतः ॥ 140 ॥

साद्यदृष्टैः सहान्यस्य कार्यमात्रस्य च क्षये ।

यः पुनः कारणाभावात् सृष्ट्यभावस्तु कथ्यते ।

चित्रं स तार्किकोक्तोपि प्रतितर्कहतो भवेत् ॥ 141 ॥

ब्रह्मणः शतवर्षाख्यपरान्ते यो महालयः ।

सर्वकार्यकरण्डस्य ब्रह्माण्डस्यास्य सप्तभिः ॥ 142 ॥

युक्तस्यावरणैरस्मिन् जायमाने पुनः पुनः ।

अनादितोनुवृत्ते च स्पष्टं सृष्ट्यन्तरान्विते ॥ 143 ॥

कार्यमात्रलये तावत् कार्यादृष्टस्य सर्वथा ।

लयो नाजायत किल कथं सोन्ते भविष्यति ॥ 144 ॥

न हेतेभ्यो लयेभ्यश्च स्यादन्योभ्यधिको लयः ।

येभ्यो ब्रह्मादिदेवेभ्यो ज्ञानी कोभ्यधिको वद ॥ 145 ॥

कालस्यान्त्यस्य शृङ्गं न नापि तद्गलयस्य च ।

अदृष्टकल्पनादोषो ह्यदृष्टं कल्पयत्यहो ॥ 146 ॥

विमतः प्रलयोऽदृष्टशेषवान् प्रलयत्वतः ।

यथायं प्रलयश्चेति युक्तिं कोऽत्येति तत्सताम् ॥ 147 ॥

किं चान्त्या सापि सृष्टिस्ते सर्वसृष्ट्युपमा भवेत् ।

ज्ञानिमात्रावृता सा न पशुपक्ष्यादिसंवृता ।

तस्यां च ज्ञानिमात्रस्यादृष्टनाशस्तु पूर्ववत् ॥ 148 ॥

सर्वादृष्टविनाशस्तु हेत्वभावान्न यौक्तिकः ।

तस्माद्वैदिकतर्काग्रे शुष्कतर्को न शोभते ॥ 149 ॥

सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् ।

इति श्रुतिरनाद्यन्तकालीनान्वग्रहीद्धि नः ॥ 150 ॥

ततो वैकुण्ठमगमद्भास्वरं तमसः परम् ।

यत्र नारायणः साक्ष्यान्न्यासिनां परमा गति ॥ 151 ॥

शान्तानां न्यस्त दण्डानां यतो नावर्तते यतिः ।
इति भागवते नैकुण्ठाख्या भगवतः पुरी ॥ 152 ॥

तमः शब्दोदिताज्ञानाद्बहिर्भूतातिभास्वरा ।
पुनरावृत्तितः शून्या गतिश्च परमोच्यते ।
इतोतिरिक्तः परमो मोक्षः कः स्याद्विवेकिनाम् ॥ 153 ॥

मर्त्यो मृत्युव्यालभीतो लोकान् सर्वांश्च निर्भयान् ।
नाद्राक्षीत्किल पादाब्जं प्राप्य विष्णोर्यदिच्छया ।
स्वस्थः शेते मृत्युरस्मादपैतीत्याह देवकी ॥ 154 ॥

इतोपि कृष्णचरणप्राप्तिरेवामृतं सताम् ।
जीवन्मुक्तौ च यन्मृत्युः ततो मुक्तिरयं परा ॥ 155 ॥

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ 156 ॥

इति गीतोदितां वाणीमनुस्मर न विस्मर ।
जीवन्मुक्तौ तु यज्जन्म ततो मुक्तिरियं परा ॥ 157 ॥

सा च विष्णोः समीपाप्तिः तदङ्घ्रिप्राप्तिरेव वा ।
तल्लोकेषु स्थितिर्वाभूत्तेनैक्यं त्वष्टमो रसः ॥ 158 ॥

अस्पष्टवचनस्यार्थं स्पष्टोक्तेरनुसारतः ।
प्राहुः सर्वे यतः पूर्वे तन्माकुर्वेकताभ्रमम् ॥ 159 ॥

अनन्तासनवैकुण्ठश्वेतद्वीपाभिदास्त्रयः ।
ज्योतिष्मन्तो यत्र लोकास्तत्र माममृतं कृधि ॥ 160 ॥

इति श्रुतौ यतो विष्णोर्लोकेष्वमृततोदिता ।
ततस्तल्लोकगमनं महामोक्षो भवेद्ध्रुवम् ॥ 161 ॥

यतोत्रैव श्रुतिः स्पष्टं विष्णुर्लोके महीयते ।
इत्याह तदिमे लोकास्तस्यैव स्युर्नसंशयः ॥ 162 ॥

उक्तस्मृतेश्च सम्मत्या लोकोयं वैष्णवो भवेत् ।
अतः सलोकतां मोक्षो सालोक्यं च श्रुतिर्जगौ ॥ 163 ॥

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोर्जुन।
इत्युक्तेः स च लोकोयं विष्णुर्लोको न संशयः ॥ 164 ॥

सर्वलोकक्षये यस्तु मोक्षोसौ नेक्ष्यते क्वचित् ॥ 165 ॥

पवमानोत्र यत्प्रार्थ्यो वायोश्च तदनुज्ञया ।
तल्लोकप्रापकत्वं  तत्सिद्धं गुरुशिरोमणेः ॥ 166 ॥

अन्ते ज्ञानाद्ब्रह्मलोकमभिसम्पद्यते किल ।

आवर्तते न स पुनः पुनरावर्तते न सः ।

द्विरुक्त्येत्थं निरणयत्पुनरावृत्तिशून्यताम् ॥ 167 ॥

लोकोयं ब्रह्मणो विष्णोरपराजितपूः किल ।

कुयुक्त्या मृत्युना दोषैः पराजिग्ये यतो न सा ॥ 168 ॥

सत्त्व चित्त्व विभुत्वाद्यैः सत्प्रभोः सम्मिता किल ।

हिरण्मयाः पुरस्तस्याः परंब्रह्म प्रभुः किल ॥ 169 ॥

इति छन्दोगोपनिषज्जगौ यत्तज्जगत्प्रभोः ।

वैकुण्ठाख्यैव नगरी सा पुरीति मतिर्मम ॥ 170 ॥

यत्राश्वत्थो मृतस्यन्दी यत्रारण्यौ सुधार्णवौ ।

साश्वत्थप्रियदुग्धाब्धिशायिनः पूर्न संशयः ॥ 171 ॥

किं च श्रुतिर्यतः स्पष्टममृतेनावृतां पुरीम् ।

आह तेनापि मुक्तस्य पुरी सेयं न संशयः ॥ 172 ॥

जात्येकवचनं चेदमावृतामिति कीर्तनात् ।

अतोऽमृतैः पूर्णपुरी नारायणपुरी ध्रुवम् ॥ 173 ॥

देवानां पूरयोध्येति यदयोध्याभिदां पुरः ।
प्रादत्तस्याः श्रुतिः पूर्वं पूर्वं तद्विष्णोरेव सा पुरी ॥ 174 ॥

नानाजनपदाकीर्णं वैकुण्ठं तद्धरेः पदम् ।
तन्मध्ये नगरी दिव्या सायोध्येति प्रकीर्तिता ।
इति पाद्मस्य वचनाद्यदयोध्या हरेः पुरी ॥ 175 ॥

विभ्राजमानां हरिणीमिति सैव श्रुतिः पुनः ।
हरिणीमाह तेनापि हरेरेव पुरी भवेत् ॥ 176 ॥

पुरीं हिरण्मयीं ब्रह्म विवेशेति यतः श्रुतिः ।
ब्रह्मणोन्ते प्रवेशार्हामाह तेनापि सा पुरी ॥ 177 ॥

विष्णोरेव पुरी ब्रह्मनाम्नस्तस्यैव पूस्त्वतः ।
क्वचिद्ब्रह्मपुरी युक्त सैव ब्रह्म विषेद्धियाम् ॥ 178 ॥

ये तु लोकान्तरप्राप्तिमोक्षं नाचक्षते बुधाः ।
तेषां वृतार्चिराद्यध्वनोर्ध्वोर्ध्वगमनं भवेत् ॥ 179 ॥

ब्रह्मज्ञानेन सर्वस्य नाशे ब्रह्माभवत्स्वयम् ।
क्व गच्छेदपरिच्छिनो मार्गः कस्यापवर्गदः ॥ 180 ॥

अतो वैकुण्ठादिलोकप्राप्तिर्मुक्तिर्विवेकिनाम् ।
अन्या तु मुक्तिराम्नायन्यायच्छेदाय केवलम् ॥ 181 ॥

खगेन्द्रध्वजपादब्जयुगमूलनिषेवणम् ।
यतो भागवते स्पष्टमपवर्गाख्यमीरितम् ॥ 182 ॥

अतो वैकुण्ठलोकस्थमुकुन्दपदसन्निधौ ।
स्थितिरेव मुमुक्षूणां मोक्षो व्यासानुशासनात् ॥ 183 ॥

अतीतकल्पमुक्तं चाप्येषा वागेव यद्वदेत् ।
पुराणस्य सदेदृत्त्वात्तेन भेज इतीरितम् ॥ 184 ॥

आगामिनोपि निर्णीत्यै वागेवं वर्तते किल ।
अपवर्गाख्यमित्युक्तेरग्रेन्योर्थो न शोभते ॥ 185 ॥

ज्ञानसाध्यत्वकथनात् सिद्धा परममोक्षता ॥ 186 ॥

सेव्यसेवकभावश्च यतो भेजे इतीर्यते ।
अतो जीवेशभेदस्य मुक्तावप्यनुवर्तनम् ॥ 187 ॥

साकारत्वं च पादोक्त्या रथोक्त्या भोगसाधनम् ।
तारतम्यं च जीवेषु खगेन्द्रत्वस्य कीर्तनात् ।
खगादिजीवराशिश्च मुक्तावस्तीति गम्यते ॥ 188॥

एतत्समस्तं तत्रापि सिद्धवाक्यार्थवेदिनाम् ॥ 189 ॥

महाभागवतेऽनल्पबुद्धिः पाण्डववंशजः ।

अधिकारी व्यासपुत्रः शुको योगीश्वरो गुरुः ॥ 190 ॥

तादृशाचार्यसम्पत्तौ तस्य ज्ञानेन यत्फलम् ।

महामोक्षः कथं नासौ यन्मार्गोद्यापि योगिनाम् ॥ 191 ॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।

यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ 192 ॥

इति गीतासु कृष्णेन स्वलोकगमनस्य यत् ।

पुनरावृत्तिशून्यत्वं परमत्वं च कीर्तितम् ।

अतस्तत्परमं धाम तदेव च परात्परम् ॥ 193 ॥

यत्रत्वस्येति वाक्यं च स्पष्टश्रुत्युक्तमार्गतः ।

आचचक्षे परं मोक्षमिममेव न चापरम् ॥ 194 ॥

वाक्यार्थस्य प्रकारश्च पूर्वमेव निरूपितः ।

तयोर्निरवकाशस्य प्राबल्यं सावकाशतः ॥ 195 ॥

अन्यथा सुखभोगस्य ज्ञानमात्रस्य सर्वथा ।

निषेधात्तार्किकस्यैव मोक्षः स्यान्नावयोर्मते ॥ 196 ॥

अविद्यास्तमयाधारो भावान्तरविभेदवान् ।
द्वंसाधारत्वतः कुम्भध्वंसा धारकपालवत् ।
अनुमेयं मुक्तिकाले भेदं साधयति स्फुटम् ॥ 197 ॥

ब्रह्मा तु सर्वजीवांस्तांस्त्रिविधान् स्वोदरस्थितान् ।
निवेश्य विष्णोरुवरे कुक्षिस्थैरपरोक्षिभिः ॥ 198 ॥

साकं वैकुण्ठवाहिन्यां परितोन्तःपुरं हरेः ।
मुक्तामुक्तस्थलोपाधौ चिद्रूपजलसम्पदि ॥ 199 ॥

विरजायां महानद्यां निर्दोषायां भवच्छिदि ।
मग्नो विध्वस्तसंसारो लिङ्गदेहस्य भङ्गतः ॥ 200 ॥

दिव्यस्वरूपसम्पन्नः शेषवीन्द्रेन्द्रपूर्वकैः ।
चिद्रूपैः सनकाद्यैश्च भृग्वाद्यैश्च समन्वितः ॥ 201 ॥

कुक्षिं प्रविश्य स्वपितुरषित्वा शतवत्सरान् ।
सृष्टिकाले पूर्वमुक्ता ब्रह्माद्या योगिनो यथा ।
जाताः स्वयं च स्वगणैः सह तद्वत्प्रजायते॥ 202 ॥

शुद्धप्रकृत्यंशतः स्युर्भूषणायुधराशयः ।
मुक्तानां किल सर्वेषां लिङ्गभङ्गे हरीच्छया ॥ 203 ॥

अतः सारूप्यमोक्षोयं सर्वेषामपि योगिनां ।

सालोक्यसामीप्यसायुज्यानि योग्यतया किल ॥ 204 ॥

अस्मद्गुरुर्मुख्यवायुर्हरेर्नाभिसरोरुहात् ।

उत्पद्य चतुरास्यत्वं प्राप्य शास्त्यखिलं जगत् ॥ 205 ॥

एवं चक्री जगच्चक्रं सदा वर्तयति प्रभुः ।

आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः ॥ 206 ॥

योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकै ।

भेदधृष्ट्याभिमानेन निःसङ्गेनापि कर्मणा ॥ 207 ॥

कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभम् ।

स सङ्गत्य पुनः काले कालेनेश्वरमूर्तिना ॥ 208 ॥

जाते गुणव्यतिकरे यथापूर्वं प्रजायते ।

इति भागवते स्पष्टं कथेयं समुदीरिता ॥ 209 ॥

साधनं चास्य जीवेशभेदद्दष्टिर्हरौगुरौ ।

अभिमानाभिदाभक्तिर्निवृत्तं कर्मचोच्यते ॥ 210 ॥

मुख्यं तदुभयं कर्म त्वमुख्यं तत्र साधनम् ।

अतस्तृतीयं तत्प्रोक्तमपिशब्दोप्यगर्हयत् ॥ 211 ॥

समुच्चयार्थं गर्हार्थमपिशब्दोयमीरितः ।

न चेच्चशब्दं प्रब्रूयात्सोपिच्छन्दो भिनत्ति न ॥ 212 ॥

अभिमानोप्युक्तरीत्या भक्तिरेव भवेदसौ ।

मोक्षसाधनपङ्क्त्या यः पठितो दिव्ययोगिना ॥ 213 ॥

एवं परान्तकाले स्यान्मुक्तकत्वं योग्ययोगिनाम् ।

परान्तकाले यन्मुक्तिकालः श्रुतिषु कथ्यते ।

निवृत्तं कर्म यन्मुक्त्यै ततोन्योर्थो न शोभते ॥ 214 ॥

पुमान् विरिञ्चतामेति मामेवैति ततः परम् ।

इत्युक्त्या च पुनर्जन्म तस्यैव स्यात्कथं वद ॥ 215 ॥

मां लक्ष्मीं स्वात्मवाचित्वे यथाहमिति रुद्रवाक् ।

न शोभते न हि स्वात्मप्राप्तिः स्वस्य लये सति ॥ 216 ॥

पदं वैष्णवमेतीति वैकुण्ठगतिकीर्तनात् ।

पुनरावृत्तिवार्तास्य निवृत्तौ वा भवत्तव ॥ 217 ॥

ब्रह्मणा सह मुक्तः सन् भोगान् भुङ्क्ते विपश्चिता ।

श्रुतिश्चैषा ब्रह्मणोन्ते मुक्तिमाह न संसृतिम् ॥ 218 ॥

दत्तं किल ब्रह्मपदं रामेणास्मद्धनूमते ।

तच्च न स्याद्यदि ब्रह्मा स एव स्यात्पुनः पुनः ॥ 219 ॥

न चेच्छ्रुतिः कथं प्राह पवमानः प्रजापतिः ।

इत्याद्या पवमानस्य प्रजापतिपदं वद ॥ 220 ॥

तस्माल्लये हरेः कुक्षिं प्रविश्यान्ते लयस्य सः ।

वैकुण्ठादिपुरस्थः स्यादित्येवार्थः पुमर्थकृत् ॥ 221 ॥

परान्तकाले सर्वेपि मुच्यन्ते योगिनः किल ।

ब्रह्मैवं सति योगीन्द्रो मुक्ताग्रेसरतामियात् ॥ 222 ॥

असुरान् दमयन्नुग्रान् सुरान् शान्तांस्तथोन्नयन् ।

परावृणक्ति पूर्वेषां सख्यानि त्वरया परैः ॥ 223 ॥

एतीति वेदे तमसि दैत्यानां श्रूयते व्यथा ।

यदृच्छाकृततन्मोक्षप्रयत्नच्छेद एव च ॥ 224 ॥

देवानामूर्ध्वलोकश्च वीप्सया नियमोपि च ।

अतः सर्वविमोक्षश्च  सर्वैक्यं च कथं वद ॥ 225 ॥

लोकप्राप्तिश्च येषां न तेषामैक्ये तु का कथा ।

राजोभयस्य स किल नोन्नीतैरप्यभेदवान् ॥ 226 ॥

एधमानद्विडित्युक्त्या स्वात्मसाम्यं सहेत न ।

तस्माद्ब्रह्मत्वमेतेषां दुरापमिति मे मतिः ।

ईषद्वृद्धिं च यो द्वेष्टि न किं दद्यान्महोन्नतिम् ॥ 227 ॥

अतः श्रुतिसतीभावसिद्धश्रीशानुभाववित् ।

तद्भावं भावयेन्नैव योऽवाग्धून्वन् दुराशयात् ॥ 228 ॥

आरुरुक्षन्ति मायाभिरुत्सिसृप्सन्ति ये दिवम् ।

तान् दस्यून्विधुनोम्यज्ञ पूर्वस्माच्च पदादधः ।

इति भागवतोक्त्या च श्रुत्या चैतत्समर्थय ॥ 229 ॥

असुराणामूर्ध्वलोकाप्राप्तिस्तमसि च स्थितिः ।

नियता श्रूयते सर्वमोक्षो दुर्वच एव तत् ॥ 230 ॥

मामात्मपरदेहेषु प्रद्विषन्तोभ्यसूयकाः ।

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।

क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ 231 ॥

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।

मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिं ॥ 232 ॥

इति कृष्णोपि गीतायामसुराणामधोगतिम् ।

स्वाप्राप्तौ नियमं चाह द्वेषिणां यत्पदे पदे ।

अतः पूर्वोक्तवाक्यार्थे समाख्येयं बलीयसी ॥ 233 ॥

क्वचित्कद्वेषिमोक्षोक्तिरपि भक्तान् जयादिकान् ।

शापादिना तथाभूतानुद्दिश्यैवेति शंसति ॥ 234 ॥

यद्वाङ्गिरवकाशेयं तस्याश्चोक्तैव तद्गतिः ॥ 235 ॥

यज्ञेन यज्ञमयजन्तेति वेदवचस्यपि ।

उक्तोयमर्थो विस्पष्टं ततो मुक्ताः सहस्रशः ।

सन्ति नैकत्वमेतेषां यतोत्रानेकतोच्यते ॥ 236 ॥

तेषु पूर्वे पूर्वमुक्ताः पश्चान्मुक्तास्तथापरे ।

ज्ञातयोऽज्ञातयश्चेति ते मुक्ताः क्वचिदीरिताः ॥ 237 ॥

सखायः किल ते सर्वे मुक्तावपि मनोजवे ।

असमाः स्वच्छरूपत्वाद्ध्रदा इव मनोहराः ॥ 238 ॥

मनोज्ञकर्णवन्तश्च मनोज्ञाक्ष्यादिसुन्दराः ।

प्रत्ययो यत्प्रकृत्यर्थप्राशस्त्यं च वदेत्किल ॥ 239 ॥

प्रशस्तता च कर्णादेर्ज्ञानानन्दात्मतैव हि ।
अतो निराकारतैषां नैव वाच्या कदाचन ।
श्रोत्रनेत्रफलस्याप्तेरपि ते तत्पदोदिताः ॥ 240 ॥

स्पष्टैतद्वाक्यबलतो यत्रस्वस्येति वागपि ।
उक्तरीत्या तर्कमुद्रामाश्रित्यैवेति गम्यते ॥ 241 ॥

मुक्तिकाले यतस्तेषां महिमान इति श्रुतौ ।
महिमोक्तः शून्यभावो मुक्तानामुचितो न तत् ॥ 242 ॥

नन्दन्ति किल ते सर्वे क्लेशलेशश्च तेषु न ।
अतो मुक्तकथैवेयं तत्पूर्वा वाक्क मौक्तवाक् ॥ 243 ॥

परञ्ज्योतिरुपप्राप्य निष्पन्ननिजरूपवान् ।
पर्यैति मुक्तिस्थानेषु स्त्रिभिर्यानैश्च संयुतः ॥ 244 ॥

रममाणो हसन् क्रीडन् ज्ञात्यज्ञातिजनैः सह ।
इति मुक्तस्य सौभाग्यं श्रुतिराह पदेपदे ॥ 245 ॥

अतो द्वितीयशून्यत्वमद्रष्टृत्वमवक्तृताम् ।
अश्रोतृत्वं श्रुतिप्रोक्तचित्रभोगेष्वभोक्तृताम् ॥ 246 ॥

शून्यवाद्युक्तमोक्षाभां मुक्तं को नाम वैदिकः ।
ब्रूयाच्छ्रुतिं बाधितार्थां स्पष्टश्रुतिसमाख्यया ।
योग्यार्थे प्रणयेन्नो चेन्मीमांसा किं निबन्धना ॥ 247 ॥

अतश्छन्दसि मर्यादामेवमेवेति शाब्दिकः ।
नैवाह शब्दव्यत्यासं विभक्तिप्रत्ययादि च ।
अबाधितार्थलाभार्थमेव प्राह पदे पदे ॥ 248 ॥

तस्मात्वाचित्कैक्यवाक्यमुपादाय बहुश्रुतीः ।
नोपेक्षयेत्तादृगर्थं तस्यैक्यस्य परं वदेत् ॥ 249 ॥

व्यात्यासेन व्यत्ययेन वृत्त्यावा लोकसिद्धया ।
कथं मीमांसकस्यार्थः सर्वानुभवबाधितः ॥ 250 ॥

यतः साधनवैचित्र्यं देवर्ष्यादिषु दृश्यते ।
अतः फलेपि वैचित्र्यं ततो मुक्ताः परावराः ॥ 251 ॥

न चेन्मुक्तौ तारतम्यं कृतहान्यकृतागमौ ।
भवेतां हि महादोषौ भ्रान्ताश्च स्युर्महोद्यमाः ॥ 252 ॥

स्वरूपानन्दवैचित्र्यमीमांसां कुर्वती श्रुतिः ।
मुक्तानां तारतम्यस्यानङ्गीकारे प्रकुप्यति ॥ 253 ॥

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान्नबिभेति कुतश्चन ॥ 254 ॥

इत्यन्तोक्तपरब्रह्मस्वरूपानन्दपङ्क्तिगा ।
सर्वाप्यानन्दमीमांसा स्वरूपानन्दगोचरा ॥ 255 ॥

भवेद्धि सर्वथा नो चेत् प्रायपाठस्य का गतिः ।
प्रायपाठविरोधो हि महान् दोषो विदांमते ॥ 256 ॥

सत्यज्ञानानन्दपदैरानन्दमयचर्चया ।
उपक्रमेपि यद्ब्रह्मस्वरूपानन्द ईरितः ॥ 257 ॥

अतो मध्ये कृता चिन्ता स्वरूपानन्दगोचरा।
भवेदवश्यं संसारमात्रगोष्ठी कथं श्रुतेः ॥ 258 ॥

तद्दृष्टान्ततया संसार्यानन्दोपि विचार्यते ॥ 259 ॥

तत्तद्रूपस्य तादृत्त्वाभावे बहिरयं क्रमः ।
कथं स्यान्नियमेनैव यो वेदेन प्रमीयते ॥ 260 ॥

उक्तो हि मानुषानन्दो न सदा विद्यते नृणाम् ।
संसारिणां क्वचिद्दुःखमपि सम्भावितं यतः ॥ 261 ॥

अतस्तादृङ्मौक्तसुखं नियतं हि श्रुतेर्मतम् ।

न चेद्ब्रह्मादिजीवानां रूपस्यानन्दरूपता ।

केन सिद्ध्येद्यदि स्पष्टा श्रुतिरेषा बहिर्गता ॥ 262 ॥

कथं ब्रह्मसुखं तेषामवाङ्मनसगोचरम् ।

न हि तक्षकचूडास्थं रत्नमन्येन लभ्यते ।

अतस्तार्किकजीवाः स्युः सर्वे जीवास्तवापि हि ॥ 263 ॥

जीवस्वरूपानन्दस्य तादृक्त्वे किं गतं तव ।

ऐक्यायोगाद्यदि भयं भेदोस्तु सततं सताम् ।

अपौरुषेये निर्बन्धो न स्वस्वमतसिद्धये ॥ 264 ॥

अकामहतता कस्मान्मुक्तलिङ्गमपोद्यते ।

कथमवृजिनत्वं च मुक्तादन्यस्य शोभते ॥ 265 ॥

ब्राह्मणस्य हि देहोयं नोपभोगाय कल्पते ।

इह क्लेशाय महते प्रेत्यानन्तसुखाय च ॥ 266 ॥

इत्युक्त्या नेह सुखिनो विराग अपि योगिनः ।

अतः पदस्थसुखवत्पदाकामे सुखं कुतः ॥ 267 ॥

स भुङ्क्ते विषयान्सर्वान् प्रशास्तिच जगत्रयम् ।
अयं पञ्चाग्निमध्यस्थस्तपस्तपति सर्वदा ।
सुखलेशोपि नास्यास्ति सुखं तादृक्कथं वद ॥ 268 ॥

तदिह क्लेशभाग्योगी सुखं तस्यास्ति मुक्तिगम्।
तस्मान्मुक्तसुखेष्वेव तारतम्यं तवाप्यभूत् ॥ 269 ॥

अतः कामार्थसम्पत्त्या ह्यकामहततास्त्वियम् ।
अकामस्य वृथा कामहतता वाञ्छिचेत्तव ॥ 270 ॥

विरक्ता सर्वसम्पत्तौ विरक्ताः स्युर्न कुत्रचित् ।
तत्तत्पदेष्वकामास्ते विरक्ताः क्व व्यवस्थया ॥ 271 ॥

तवनीचपदाकामात्सुखं शतगुणोत्तरम् ।
भवेदुच्चपदाकामे कथं स्युस्तादृशर्षयः ॥ 272 ॥

यदि सर्वपदा कामाः सर्वे तर्हि सुखे समाः ।
भवेयुस्तारतम्येन सुखिता तेषु किं कृता ॥ 273 ॥

अतस्तत्तत्पदाकामः सकामोन्यपदेषु च ।
भवेदसौ महायोगी का गीस्त्वं बाधितं वदेत् ॥ 274 ॥

भोग्यार्थतारतम्ये स्यात्तारतम्यं सुखस्य च ।

तत्त्यागेपि सुखस्योच्चनीचतेत्यद्भुतं वचः ॥ 275 ॥

किं कूपस्थजलाकामात्सुखं शतगुणोत्तरम् ।

तटाकस्थजलाकामे पिपासारहिते वद ॥ 276 ॥

सूक्ष्मभाण्डोदनाकामात्सुखं शतगुणोत्तरम् ।

स्थूलभाण्डोदनाकामे बुभुक्षारहितेस्ति किम् ॥ 277 ॥

कथं चित्कामशून्यो यः सोकामहत उच्यताम् ।

पदं न पदलभ्यं ते ततोप्येतदलौकिकम् ।

श्रुत्युक्ता वृजिनत्वं तु घटते न कथञ्चन ॥ 278 ॥

तत्तच्छ्रुत्यर्थकथनं न श्रुत्यै रोचते सताम् ।

भारतीहृदयं त्वेको भारतो वेत्ति नापरः ॥ 279 ॥

अनुसन्धीयतां चर्चा महती मूलशास्त्रगा ।

बुद्धावारोहसिद्ध्यर्थं ततः किञ्चिदिहोद्धृतम् ॥ 280 ॥

अतो मिथो जीवभेदो जीवब्रह्मविभिन्नता ।

तत्तदानन्दवैचित्र्यात् सिद्धा सिद्धान्तवेदिनाम् ॥ 281 ॥

तस्माच्छ्रौतं च यौक्तं च मध्यस्य मतमाफलात् ।

हृद्यं च निरवद्यं च तत्सर्वमतिमङ्गलम् ॥ 282 ॥

ते प्रसादो हरे सेवानुरूप इति सप्तमे ।

प्रह्लादो यत्स्फुटं मुक्तौ फलं सेनानुगं जगौ ॥ 283 ॥

तत्रैव मुक्तौ फलसम्पद उच्चावचा इति ।

दातैव यत्फलासाम्यं प्राह भागवते स्फुटम् ।

युक्तिश्रुतिस्मृतिभ्यस्तत्सिद्धा मुक्तोच्चनीचता ॥ 284 ॥

मनोजवेष्वसमता यत्सख्यं चोदितं श्रुतौ ।

तन्मत्सराद्यभावश्च तत्र तेषां प्रसिध्यति ॥ 285 ॥

हरिसाम्योक्तिवत्क्वापि साम्योक्तिर्दुखवर्जनात् ।

उक्ता निरवकाशास्ता यच्छ्रुतिस्मृतियुक्तयः ।

तत्सिद्धतारतम्यं तन्मुकुन्दोपि न मोचयेत् ॥ 286 ॥

गुरोः शिष्यस्य पान्थस्य काकस्य च पशोरपि ।

द्वितीयाशैव यद्दृष्टा सुखं कस्याद्वितीयता ॥ 287 ॥

नश्वरं यदि हैश्वर्यमतोऽनश्वरसम्पदे ।

स्वर्गार्थी कुरुते यज्ञं सुखं कस्याद्वितीयता ॥ 288 ॥

एकार्थनाशेप्यन्यार्थे स्त्रीनाशे स्त्र्यन्तरे स्पृहा ।

दग्धे गेहे नूत्नगेहे सुखं कस्याद्वितीयता ॥ 289 ॥

धत्ते प्रियां मुकुन्दोऽङ्के गात्रार्धे तु शिवां शिवः ।

सख्या सखायो नन्दन्ति सुखं कस्याद्वितीयता ॥ 290 ॥

यदि सांसारिकद्वैतमिव मुक्तौ द्विता भवेत् ।

तदान्योन्यं दर्शनं स्यात्सख्यं विषयभोक्तृता ॥ 291 ॥

यदात्मात्मैक एव स्यान्मुक्तौ नान्यत्तु किञ्चन ।

तदा कं केन पश्येत्सकं जिघ्रेत्स्वं च केन वा ॥ 292 ॥

पश्येदकरणस्तस्मान्मोक्षस्यापुरुषार्थता ।

अतोऽवश्यं भवेद्वैतं मुक्तौ संसारवत्सताम् ॥ 293 ॥

इति श्रुतिस्तर्कमुद्रामाश्रित्य द्वैतमेव यत् ।

स्थिरीकरोति मुक्तानां कस्य स्यादद्वितीयता ॥ 294 ॥

यदि वस्तुस्थितकथा वृथाभूत्तर्हि ते श्रुतिः ।

विज्ञातारमरे केन विजानीयादिति स्फुटम् ॥ 295 ॥

यत्स्वज्ञानं  च नेत्याह ततस्तार्किकमोक्षवाक् ।

अभूदियं वेदवाणी कृपाणी ते भवेद्ध्रुवम् ॥ 296 ॥

न प्रेत्यसञ्ज्ञेति च वाक् प्राकृतज्ञानशून्यताम् ।
मुक्तस्याह परं नोचेज्जिग्युस्तार्किकबालकाः ॥ 297 ॥

किञ्च न प्रेत्यसंज्ञास्तीत्युक्तिर्मोहनिपातनम् ।
इति श्रुतेश्च न ज्ञानमात्रं सा वाङ्निषेधति ॥ 298 ॥

यत्र वस्तु द्वैतमिव द्वित्रलग्नं मनो भवेत् ।
तत्रेतरः पुमान् पश्येदितरार्थानपि स्फुटम् ॥ 299 ॥

यत्र त्वेकाग्रमनसः सर्वमिष्टं च योगिनः ।
आत्मैवाभूत्तत्र केन ततोन्यं कं स पश्यति ॥ 300 ॥

कं जिघ्रति स्वकं रूपं केन वासौ प्रपश्यति ।
येनेदमखिलं वेद पश्येद्वा केन तं गुरुम् ।
इत्यात्मरतमस्तौद्वा यत्रत्वस्येति वागियम् ॥ 301 ॥

अक्षासक्तः किमश्रौषीन्मातुर्मृतिमुदीरिताम् ।
किं पश्येत् पश्यतोपि स्वं घटस्थहृदया नटे ।
शरकृत्केन किं जिघ्रेत्कं जानीयात्कमीक्षते ॥ 302 ॥

मुक्ताः स्वात्मरता जिघ्रन्तीक्षन्ते कं विजानते ।
सेनामन्यमनाः सेनां नाज्ञासीदिति लौकिकम् ।
आत्मैकासक्तचित्तोपि तथेति किमलौकिकम् ॥ 303 ॥

अप्राकृतप्राकृताभ्यां द्वाभ्यां द्वित्वो भवे भवेत् ।

द्वीताः संसारिणस्तस्मात्तत्सम्बन्धिवपुस्त्विदम् ॥ 304 ॥

बाह्यं द्वैतमिति प्रोक्तमस्वभावत्वतश्च तत् ।

इवशब्दोदिं जेवे यदा भवति तन्नृणाम् ॥ 305 ॥

तदात्वितरशब्दोक्तो बाह्येन्द्रियगणोप्ययम् ।

पश्येत्स्वरूपादितरमर्थं देहघटादिकम् ॥ 306 ॥

यत्र त्वात्मात्मकं सर्वमभूद्देहेन्द्रियादिकम् ।

तत्र मुक्तौ केन बाह्येनाक्ष्णाबाह्यार्थमीक्षते ।

कं वा चिघ्रेद्विजानीयादित्यर्थौ वा श्रुतेर्भवेत् ॥ 307 ॥

यथोदं शुद्धमासिक्तं शुद्धे स्यात्तादृगेव हि ।

एवं मुनेर्जानतश्च शुद्धोप्यात्मा परात्मनि ।

प्रविष्टस्तादृगेव स्यान्न तदात्मेति या श्रुतिः ॥ 308 ॥

परमं साम्यमेवेति ब्रह्मणा सह चेति वाक् ।

उपसङ्क्रम्य चेत्युक्तिरूपसङ्क्रामतीति वाक् ॥ 309 ॥

साक्षाज्ज्ञानफलं मोक्षं शंसन्त्यस्तत्र तत्र हि ।

कथं घटेरन् सर्वैक्ये बह्व्योर्थान्तरवर्जिताः ॥ 310 ॥

यदि जीवन्मुक्तिपरा सर्वापीयं मम श्रुतिः ।
यत्रत्वस्येति या वाक्ते तर्हि सुप्तिपरास्तु सा ॥ 311 ॥

यत्र जागरणे नानापदार्थद्वैतवन्नृणाम् ।
तज्ज्ञानं च भवेत्तर्हि स्यादन्योन्यनीरीक्षणम् ॥ 312 ॥

यत्र सर्वं च करणमात्मसाक्ष्येव केवलम् ।
बाह्यानां मन आदीनां यदाह्युपरतिस्तदा ॥ 313 ॥

तत्र सुप्तौ केन किं वा पश्येज्जिघ्रेच्च कं तदा ।
स्वदष्टारं च कं पश्येदज्ञानावरणात्तदा ।
येनेदमखिलं वेद जानीयात्तं च केन सः ॥ 314 ॥

अथवा प्राह सा मुक्तौ सुखरूपेन्द्रियादिकम् ।
एकीभवन्ति च परे मुक्ताश्च क्षीरनीरवत् ॥ 315 ॥

प्रविष्टत्वात्तदुदरे सर्वेषां स्वपतां हृदि ।
अर्थोप्येवमभूत् स्वस्थः क्लिष्टार्थो नास्ति कश्चन ।
पुनरावृत्तिरेवासीत्तद्वत्त्वद्वचनस्य च ॥ 316 ॥

मम वाक्यानि न पुनरावर्तन्ते कदाचन ।
तेषु तेषु प्रकरणेष्वनुक्त्यान्यफलस्य हि ॥ 317 ॥

मुमुक्षोस्त्वस्य केनेदं फलं वक्त्यनपेक्षितम् ।
अन्यत्र हि विरक्तास्ते सर्वविद्याविशारदाः ॥ 318 ॥

अज्ञानाख्याञ्जनच्छेदः पुण्यपापविमोचनम् ।
सर्वकामाशनं चैव स्वरूपव्यक्तिरेव च ।
जीवन्मुक्तौ कर्मफले कथं स्याद्धीमतां मते ॥ 319 ॥

यदि कामाशनं तेषां ममन्थुः क्षीरसागरम् ।
यज्ञाशनार्थं कलहस्तत्र तत्र कथं वद ॥ 320 ॥

त्वगस्थिमात्रगात्राणां वातपर्णोदकाशिनाम् ।
सदा शरीरसन्तापतपस्यासक्त चेतसाम् ॥ 321 ॥

मुनीनां नारदादीनां साक्ष्यात्कृतपरात्मनाम् ।
जीवन्मुक्तिदशास्थानां कथं कामान्विता वद ॥ 322 ॥

अतो निरवकाशानि वचनान्यखिलानि मे ।
ब्रूयुर्मुक्तिमनावृत्तिं नावर्तन्ते कथञ्चन ॥ 323 ॥

यः समीपाप्तिसाहित्यसाम्यानि च विभिन्नयोः ।
ततः परममोक्षे च भेदोयं सुस्थिरोऽभवत् ॥ 324 ॥

सर्वीभूय परम्ब्रह्म सर्वान् कामान् किलाश्नुते ।
मुक्तस्तद्ब्रह्मरूपेण भुङ्क्ते तानखिलान् किल ॥ 325 ॥

सहशब्दो यौगपद्यं वदेदात्मेच्छया किल ।
तस्य क्रमिकभोगांश्च भुङ्क्तेऽयं युगपत्किल ।
ये प्राहुरित्थं श्रुत्यर्थमनर्थं किं न ते विदुः ॥ 326 ॥

तुषान्नं कण्टकान्नं च मलं नारकभोजनम् ।
नानायोनिस्थजीवानां हीनाहीनाशनानि च ॥ 327 ॥

इमे सर्वात्मकब्रह्मकामा मुक्तस्य चेत्तव ।
मुक्तिर्न बन्धात्तर्ह्येषा भुक्तिर्मुक्तेरभूदहो ।
तस्मादीदृग्विधव्याख्या प्रत्याख्या मुक्तिसम्पदः ॥ 328 ॥

कथं च परमं साम्यं जीवन्मुक्तौ हि दुःखिनाम् ।
निर्दुःखब्रह्मणा साकमिति चिन्त्यं विवेकिभिः ॥ 329 ॥

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ 330 ॥

इति गीतासु यत्स्पष्टं स्वसाधर्म्यं हरिर्जगौ ।
सर्गप्रलयशून्यानां महामोक्षस्थदेहिनाम् ॥ 331 ॥

जीवन्मुक्ताश्च जायन्ते म्रियन्ते च तदा तदा ।

अतः परममुक्तस्य प्रशंसेयं न संशयः ॥ 332 ॥

तथान्योपनिषत् प्राह शरवत्तन्मयो भवेत् ।

इति मुक्तिप्रकरणे शरवन्मुक्तचेतनः ॥ 333 ॥

लक्ष्यवद्ब्रह्म तस्यांतः प्रवेशः क्षीरनीरवत् ।

इदमेवास्य सायुज्यं मयटोर्थोप्ययं किल ॥ 334 ॥

जातिभेदो वर्णभेदो मुक्तभेदोस्ति तत्र च ।

भेदेनादर्शनादेव तदेकीभाववाक् श्रुतौ ।

अदृष्टान्तोक्तितो यस्मात्सदृष्टान्ता बलीयसी ॥ 335 ॥

कथं जीवेशभेदो न यं मुक्तोपि न मुञ्चति ।

द्वासुपर्णेति सैवाह पुनस्तद्भेदमञ्जसा ।

तस्माद्वेदान्तवाक्यानामस्मिन्नर्थे महान् भरः ॥ 336 ॥

त्वमेवाहमिति प्रोक्तो भृत्यस्तत्प्रेम भावयेत् ।

अतो मुक्तैक्यवाक्यं च मुक्तस्यात्याप्तता परम् ॥ 337 ॥

ममात्मा भद्रसेनोयमित्युक्तिर्द्वेष्टि किं द्वयम् ।

एकीभूता इति प्रोक्ते किं गवामद्वितीयता ॥ 338 ॥

द्वेषान्धाय वने वासो योषात्यागोपि रोचते ।
न चेद्वितीयशून्यत्वमोक्षाय यतते कथम् ॥ 339 ॥

चोरस्याभाषणं लिङ्गमस्पर्शनमदर्शनम् ।
कथं मोक्षमशिक्षन्त न चेदेतादृशीं दशां ॥ 340 ॥

पूर्वोत्तरविरुद्धोक्तिं मत्तो वक्ति न जात्वपि ।
किमेकाकी नरमत इत्याद्युक्तीः स नात्यगात् ॥ 341 ॥

ज्योतिः प्राप्य स पर्यैति स्त्री ज्ञात्यज्ञातिसंयुतः ।
सहाश्नुते सर्वकामानित्याद्या मौक्तिकोक्तयः ॥ 342 ॥

राजन्निगडबद्धस्य तन्मुक्तस्य च राङ्नवान् ।
यथाबद्धगतिः कृष्णो मुक्तानां परमा गतिः ॥ 343 ॥

स्वाधीनं स्वसमं कर्तुं नोत्सहस्व कदाचन ।
सारूप्यदोपि किं श्रीशो दत्ते श्रीवत्सकौस्तुभौ ॥ 344 ॥

सदा सेव्यपि नाकाङ्क्षेदङ्गनालिङ्गनं प्रभोः ।
इच्छन्त्यच्छहृदो मुक्तावपि नैक्यं तदीशितुः ॥ 345 ॥

हृष्टोपि राजा  न स्वीयां जायां विशति कस्यचित् ।
प्रपन्नाय प्रसन्नोपि स्वात्मैक्यं न दिशेद्धरिः ॥ 346 ॥

न राजवाहनं काङ्क्षेन्न तत्सिंहासनं भटः ।
गरुडारूढता शेशशायिता तत्कदापि न ॥ 347 ॥

सुरेश्वरौ हरेः सेवापरौ सर्वत्र सर्वदा ।
नरोल्पकः कथं मुक्तौ तौ मुक्तावारुरुक्षति ॥ 348 ॥

न यत्र माया किमुतापर इत्याखिलेशितुः ।
पुरे कामक्रोधपूर्वकार्यस्वाभावमञ्जसा ॥ 349 ॥

किमुतेति वदन्योगी मायाऽभावाख्यहेतुना ।
कारणाभावरूपेण साधयामास यौक्तिकः ॥ 350 ॥

ईषन्मायावशेषं च दाषसेमं नु ते मुनिः ।
सिद्धेश्वरस्य किं स्वोक्तहेत्यसिद्धिर्मनः प्रिया ।
चण्डालाङ्गुलिसङ्गेपि चण्डालस्पर्श एव हि ॥ 351 ॥

कार्याभावास्य चाञ्जस्यं सर्वथाऽभाव एव यत् ।
अतोसौ कारणस्यापि सर्वथाऽभावामाक्षिपेत् ॥ 352 ॥

एवं च मायात्यन्ताभावस्थानं नित्यमुक्तताम् ।
चिद्रूपत्वं न किं लेभे जडं मायामयं हि ते ॥ 353 ॥

तल्लक्ष्म्यात्मक लोकोपि सोभूद्यन्नित्यमुक्तचेत् ।
लयेप्यलीना सैवाका तत्पतिर्यत्पुरः पतिः ॥ 354 ॥

एवं च युक्तितो वैकुण्ठादिलोकाश्चिदात्मकाः ।
लक्ष्म्यात्मकाः सत्यरूपा नित्याश्चासन्न संशयः ॥ 355 ॥

वैकुण्ठनामलोकं तद्दिव्यं षड्गुणसंयुतम् ।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥ 356 ॥

नित्यसिद्धैः समाकीर्णं चिन्मयैः पाञ्चकालिकैः ।
सभाप्रासादसंयुक्तं वनैश्चोपवनैः शुभम् ॥ 357 ॥

वापिकूपतटाकैश्च वृक्षषण्डैश्च मण्डितम् ।
अप्राकृतं सुरैर्वन्द्यमयुतार्कसमप्रभम् ॥ 358 ॥

प्रकृष्टसत्त्वराशित्वात्कदा द्रक्ष्यामि चक्षुषा ।
इत्थं वैकुण्ठनगरीमस्तौषीच्चतुराननः ॥ 359 ॥

पंचरात्रेचतुर्वक्रस्तोत्रेष्वाद्यमिदं किल॥

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणा ।
इत्युक्ते षड्गुणः पूर्णज्ञानविज्ञानशक्तिमान् ॥ 361 ॥

संयुतत्वोक्तितश्चाभूत्सम्यग्युक्तो हि तैर्गुणैः ।
अप्राकृता सुरैर्वन्द्यो लोकोसौ न ह्यचेतनः ॥ 362 ॥

विशेषणत्रयं ह्येतच्छ्रियः श्रीशस्य चोचितम् ।
अतोपि श्रीपतेर्लोकः श्रीरूपीयं भवेद्ध्रुवम् ॥ 363 ॥

पठन् सहस्रनामानि शम्भुब्रह्मोर्ध्वधामगः ।
इति यं धूर्जटिः स्तौति किं तद्धाम विचार्यताम् ॥ 364 ॥

शम्भुर्ब्रह्मोर्ध्वता धाम्नस्ताभ्यामुत्तमतैव हि ।
अहङ्कारात्मकाच्छम्भोर्ब्रह्मणो महदात्मकात् ।
न हि वैकुण्ठपूरूर्ध्वं तद्गुणैरेव सोपरि ॥ 365 ॥

ब्रह्मादयो बहुतिथमिति भागवतोक्तितः ।
ब्रह्मादिभ्यो गुणैरुच्चा यच्छ्रीरेव हरेः प्रिया ।
एवं च लक्ष्मीरूपत्वं लोकस्य न कथं वद ॥ 366 ॥

हरेरनुव्रता एव मुक्तास्तत्रापि ते किल ।
सर्वे चतुर्बाहवश्च श्यामकोमलमूर्तयः ॥ 367 ॥

मणिप्रवेकाभरणा निष्ककण्ठाः सुवर्चसः ।
श्रीवत्सकौस्तुभाभावात्पूर्ण शक्त्याद्यभावतः।
विलक्षणाः परं सर्वेप्याकारे सदृशाः किल ॥ 368 ॥

जगद्व्यापारवर्जं च विना श्रीवत्सकौस्तुभौ ।

इति सूत्रे भागवते चोक्त्या विष्णोर्विलक्षणाः ॥ 370 ॥

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।

सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ।

इति गीतासु ये प्रोक्तास्त एते योगिनः किल ॥ 371 ॥

एवं च जननाभावान्मरणाभावतस्तथा ।

जडदेहाद्यभावाच्च दुःखाभावाच्च सर्वदा ॥ 372 ॥

ज्ञानानन्दमयाकारा नित्य च सुखभुक्त्वतः ।

मुक्तिर्विलक्षणा बन्धाज्जीवाः सर्वे द्वयो समाः ।

त्रिविधाः सन्ति संसारे शुद्धा एव विमुक्तिगाः ॥ 373 ॥

अश्वो मान्यो गजो मान्यो धेनुर्मान्या दिवौकसाम् ।

वृक्षः कल्पतरुर्मान्यः सर्पो मान्यो हरेः प्रियः ॥ 374 ॥

पक्षी विष्णुरथो मान्यो लोको मान्यो हि योर्थ्यते ।

स्त्रियश्चाप्सरसो मान्याः श्वानावपि च नाकिनाम् ॥ 375 ॥

मान्यौ किल श्यामनामा शबलाख्यश्च यः श्रुतः ।

भूलोके स्थितपश्वादेः स्वर्गेलोके स्थिते यदा ॥ 376 ॥

पूज्यता प्राकृतेप्यर्थे तदा विष्णोस्त्रिधामसु ।

स्थितानां शुद्धसत्वानां ज्ञानानन्दस्वरूपिणाम् ।

श्रुतिस्मृतीतिहासाद्यैः स्तुतानां किं न पूज्यता ॥ 377 ॥

उत्तरोत्तरवस्तूनामुत्तमोत्तमतोचिता ।

मुकुन्दनगरीस्थानां मुक्तैव गुणोचिता ॥ 378 ॥

दिव्यादिव्यतटाकेषु दिव्यादिव्यवनेषु च ।

दिव्यादिव्यनगर्यांच दिव्यज्ञानसुखात्मकाः ॥ 379 ॥

मत्स्याद्या मृगपक्ष्याद्या हस्त्यश्वरथपूर्वकाः ।

अर्थास्तत्तदलङ्कारा मत्स्यकूर्मादिरूपिणः ।

विष्णोराकृतिवत्स्वस्थाः सन्ति चेत्सन्तु किं तव ॥ 380 ॥

श्रुत्या स्मृत्या च या वर्ण्या सा शून्यापूर्न वैष्णवी ॥ 381 ॥

पूर्णा पुरोचितैः सत्वैः सुपुरत्वाद्धरेः पुरी ।

यथा संप्रतिपन्नेति किं न स्यादनुमा मम ॥ 382 ॥

स सत्वराशिर्मुक्तत्वव्याकोपस्य न कारकः ।

प्रकृष्टत्वाद्यथाविष्णोर्मत्स्याद्या व्यक्तिराशयः ॥ 383 ॥

प्रकृष्टश्च स संसारदूरत्वात्तद्वदेव हि ।
दुःखमेव हि संसारे ततः क्वानुपपन्नता ।
तच्च मायात्ययस्थानस्थत्वात्तद्वत् प्रसिद्ध्यति ॥ 384 ॥

भिन्ना मिथः परेशाच्च मुक्ताविसदृशत्वतः ।
सत्वराशिर्ययात्रत्यो यथा वा राजतद्भटौ ॥ 385 ॥

प्रकृष्टसत्वराशित्वादित्याह स्मृतिरेव यत् ।
प्रकृष्टः सत्वराशिश्च यस्यासौ हि तथाभिधः ॥ 386 ॥

तत्कुतर्ककुवाक्येभ्यो न बिभ्यत्यसुमा इमाः ।
अतोनुमानमालेयं तामलङ्कुरुते पुरीम् ॥ 387 ॥

श्रीरेव लोकरूपेण विष्णोस्तिष्ठति सर्वदा ।
अतो हि वैष्णवा लोका नित्यास्ते चेतना अपि ॥ 388 ॥

पशुपक्ष्यादिरूपेण जीवा एव पृथक् स्थिताः ।
संसृतौ व्यत्ययस्तेषां मुक्तौ तत्तत्स्वरूपता ॥ 389 ॥

इत्यादि मानैस्तत्प्रोक्ते चर्चायुक्तिबुभुत्सया ।
अतो युक्तियुतं श्रौतं सर्वं मान्यमिति स्थितम् ॥ 390 ॥

स्पष्टा श्रुतिश्चार्थमेनं वक्ति तच्चातुरीं श्रुणु ॥ 391 ॥

सुरधेनुद्रुमाहीन्द्रवीन्द्रनद्यादिरूपिणः ।
मुक्ताश्च पशुपक्ष्याद्याः सन्ति चेत् किं ततो गतम् ॥ 392 ॥

निर्दुःखानन्दचिद्रूपा मुक्तास्ते चित्रयोनयः ।
मत्स्यकूर्मवराहाद्या इवो न दोषमूर्तयः ॥ 393 ॥

ब्रह्मलोकाप्तचण्डालाद्यशेषाप्राणीसार्थपः ।
इति नामार्थतत्वज्ञा मुक्तौ चेत्थं प्रचक्षते ।
स्वर्नीतगर्दभश्वादिरिति नामान्तरं किल ॥ 394 ॥

विषवृक्षफलाकारा शर्कराकृतकृत्रिमा ।
धत्ते किं तिक्ततादोषं मुक्तास्ते तद्वदेव हि ॥ 395 ॥

मुक्तेरमुक्तिता तु स्याद्दुःखे सत्येव नान्यथा ।
देहादिर्दुःखहेतुत्वाद्दुःखमित्युपचर्यते ॥ 396 ॥

तद्दुःखं दुःखहेतुश्च दुःखान्मुक्तेन शोभते ।
यद्दुःखात्यन्तविच्छेदं मोक्षमाहुर्विचक्षणाः ॥ 397 ॥

निर्दुःखानन्ददेहस्तु यदि स्यात्परमात्मवत् ।
तच्चित्रतायामपि च किं वित्तं तव नश्यति ॥ 398 ॥

पुरुरूवस्य तस्येमे प्रतिरूपाः किलाखिलाः ।
श्रुतिसिद्धं ततो जीव नानारूपं न संशयः ॥ 399 ॥

शता देशेति तद्रूपं यच्छ्रुत्यैव विवेचितम् ।
अतः स्वरूपमात्रं न रूपं मत्स्यादयो हि ते ॥ 400 ॥

कथं स्वरूपमात्रस्य शतता दशता तव ।
तत्पुरुत्वं न पूर्णत्वं बहुतैव भवेद्ध्रुवम् ॥ 401 ॥

रूपं रूपं चेति वीप्सा जुगुप्सा च न चेद्भवेत् ।
मत्स्यकूर्मादिरूपाणां प्रतिरूपाश्च तादृशाः ।
कथं न वाच्या धीमद्भिः प्रतिशब्दार्थवेधिभिः ॥ 402 ॥

तत्तद्रूपापरोक्ष्येण मोक्षस्तेषां भवेत्किल ।
प्रतिपत्यापरोक्षं हि प्रतिचक्षणमुच्यते ॥ 403 ॥

तदस्येति श्रुतौ प्रोक्तं जीवस्य परमस्य च ।
द्रष्टृदृश्यात्मकं रूपद्वयं तत्पारमार्थिकम् ।
यन्मोक्षदप्रमारूपसाक्षात्कारस्य गोचरः ॥ 404 ॥

मोक्षं प्रत्यपरोक्षं च यतस्तत्प्रतिचक्षणम् ।
अर्थं प्रत्येव दृष्टिश्च यतोभूत्प्रतिचक्षणम् ।
अतो यथार्थज्ञानार्था प्रतिचक्षणवागियम् ॥ 405 ॥

उद्देश्यता कथं नो चेदनुद्देशभ्रमे सताम् ।
तादर्थ्ये हि चतुर्थीयमनर्थे सा कथं वद ॥ 406 ॥

ऐश्वर्यवान् किलेन्द्रोसौ सद्गुणो न तु निर्गुणः ।
अतो मायापदं चास्य माहात्म्यान्येव शंसति ॥ 407 ॥

बहुत्वार्थविभक्त्यर्थो मायैका ते कथं वद ।
कथं मायाख्यदोषः स्यात्परमेश्वरताश्रये ।
न हि मायामयं रूपं प्रमागोचरतां व्रजेत् ॥ 408 ॥

शता दशेति कथनादिन्द्रो नायं पुरन्दरः ।
परमेश्वरता मुख्या न यन्नश्वरसम्पदि ॥ 409 ॥

युक्ता हीति सुयुक्तीनां विद्वत्सिद्धेश्च कीर्तनात् ।
संशयोस्मिन् समस्तेर्थे कार्यो नार्यैः कदाचन ॥ 410 ॥

अमुक्तागम्यभूर्या हि सा साक्षान्मुक्तिरेव हि ।
तत्रापि भगवद्भाग्यमुक्तं भागवते बहु ।
यदागात्सनकादीन् स्वान् मुनीन् अनुनिनीषया ॥ 411 ॥

विनतातनयांसस्थः श्रिया देव्या समन्वितः ॥ 412 ॥

चार्वङ्घ्रिजङ्घाजानूरु कटिकुक्षिवलित्रयः ।
निम्ननाभिस्फुरन्मध्य विशालोरस्थलोज्वलः ॥ 413 ॥

कम्बुग्रीवो वृत्तपीनदीर्घबाहुचतुष्टयः ।
अमन्दसान्द्रसौन्दर्यमन्दिरास्येन्दुमण्डलः ॥ 414 ॥

चार्वाक्षिफालनामस्य कर्णगण्डारुणाधरः ।
मन्दस्मितप्रभामिश्रसुन्दरोष्ठारुणद्युतिः ॥ 415 ॥

किरीटहारग्रैवेयरत्नकुण्डलकौस्तुभः ।
काञ्चीकिङ्किणिमञ्जीरनूपुराद्यैर्विराजितः ॥ 416 ॥

करस्थकमलं धुन्वन् करुणालोललोचनः ।
छत्रचामरवादित्रगीतनृत्ताक्षताङ्कुरैः ॥ 417 ॥

व्यजनैर्धूपदीपैश्च पुष्पैर्नीराजनैः स्तवैः ।
अर्च्यमानः प्रतिपदं मुक्तसंसारबन्धनैः ॥ 418 ॥

सुरैरसङ्घैः परितो मुक्तक्लेशैः कृतोत्सवः ।
तत्रायात्किल सर्वेशो यत्र ते सनकादयः ॥ 419 ॥

जीवन्मुक्तैश्च मुनिभिरगम्या सा हरेः पुरी ।
आसीत्परममुक्तानामास्थान्येव विवेकिनाम् ॥ 420 ॥

न चेदन्तःपुरं सर्वान् प्रवेशयानन्दयेद्धि तान् ।

कृपालुर्भक्तिभरितांस्ततो नामुक्तभूरसौ ॥ 421 ॥

तत्राप्युक्तप्रमाणेन प्रभुः साकार एव सः ।

श्रीश्च दिव्यमनोज्ञाङ्गी भृत्यास्ते दिव्यमूर्तयः ।

अनन्तास्ते च सेवन्ते सेव्यस्तैः सर्वदा प्रभुः ॥ 422 ॥

हर्म्याणि रत्नभवनान्नुद्यानोपवनानि च ।

वापीकूपतटाकानि सन्ति तत्र गृहे गृहे ॥ 423 ॥

पक्वो वातापिदेहोपि भिक्षोः शाकादिरूपतः ।

रक्ष्यःशक्त्या यथापूर्वं लक्ष्यते तक्षणे किल ॥ 424 ॥

अतो मौक्तं समस्तं च वस्तु भुक्तं च तैः पुनः ।

तथैव तिष्ठेत्तन्नित्यं स्याच्चाजं लिङ्गदेहवत् ॥ 425 ॥

सर्वः सर्वेशशक्त्यैव श्रुत्युक्तार्थः समर्थ्यते ।

अन्यैरघटितं योसौ घटयेदणुगो महान् ॥ 426 ॥

ऐक्यं च निर्गुणत्वं च न श्रौतं नापि युक्तिमत् ॥ 427 ॥

रुणद्धि यद्धि घटकशक्तीशत्वे महाप्रभोः ।

घटयेन्नेदृशानर्थकरमर्थं स बुद्धिमान् ॥ 428 ॥

दुःखं सन्धित्सतो यत्सा शक्तिः प्रच्यवते बहिः ॥ 429 ॥

यः सर्वेश्वरतागुप्त्यै सेहे विप्रपदाहतिम् ।

स्वमहिम्नि महांस्तस्य भरः स्तोत्रर्थकारिणः ॥ 430 ॥

सायोध्याख्या हरिपुरि रत्नगोपुरमण्टपा ।

श्रीरेव नगराकारा सेवते स्वपतिं किल ।

भक्ताः परममुक्तास्ते नित्यमुक्तो हरिः प्रभुः ॥ 431 ॥

तस्माज्जीवेश्वराभेदो जीवाभेदोऽद्वितीयता ।

निराकारत्वमज्ञत्वं निर्गुणब्रह्मयुत्तव ॥ 432 ॥

अप्रामाणिकमेवेदं सर्वमासीन्न संशयः ।

उक्ते परममोक्षेस्मिन् यन्नाभूत् कुत्र तद्भवेत् ॥ 433 ॥

अतो दुराशां सन्त्यज्य भज कृष्णपदाम्बुजम् ।

गर्ते वा पत मध्ये ते स्थितिर्लज्जातुरस्य न ॥ 434 ॥

एवं च सुखरूपेण चक्षुषा सूखरूपिणाम् ।

मुक्तं पश्यति मुक्तोन्यः सुखरूपेण जिघ्रति ॥ 435 ॥

घ्राणेन सुखरूपत्वात् घ्रेयमेवं सुखात्मना ।

मनसैव विजानीयाद्विज्ञातारं हरिं प्रभुम् ॥ 436 ॥

इत्येव यत्रत्वस्येति श्रुतिः स्वार्थमुपाददे ।

यतः सुखं कमित्याहुः शब्दतत्वविशारदाः ॥ 437 ॥

अन्यार्थस्य महामोक्षेप्येतस्मिन् वैष्णवे पदे ।

उक्तरीत्या बाधितत्वादयोग्यं तज्जहौ श्रुतिः ॥ 438 ॥

विस्तरस्त्वस्य सर्वस्य मूलशास्त्रमहार्णवे ।

द्रष्टव्यश्चित्त शुद्ध्यर्थमेतावच्चर्चितं मया ॥ 439 ॥

अतो योग्योरसौभाग्यापेक्षी मुक्तोनुमीयते ।

मुक्तत्वान्नित्यमुक्तोसौ यथास्वानन्दनिर्भरः ॥ 440 ॥

तस्माच्छून्यत्वमोक्षाय नाकाङ्क्षा जायते नृणाम् ।

अनाकाङ्क्षितमोक्षाय न परोक्ता भवेच्छ्रुतिः ॥ 441 ॥

तस्माच्छुभजनाकीर्णा दिव्यभोगवती स्थितिः ।

मुक्तिरुक्तश्रुतिशतैरप्यामानादिति स्थितिम् ॥ 442 ॥

यत्र मुक्तौ मुक्तवर्गाद्धरेर्द्वैतमिव प्रभोः ।

द्वैतोपमो विशेषश्च भवति स्वगुणादिना ॥ 443 ॥

मुक्तानां च मिथः सर्वेशाच्च द्वैतमिवाञ्जसा ।

द्वैतोपमो विशेषश्च भवति स्वगुणादिभिः ॥ 444 ॥

तत्रैव मोक्षे वैकुण्ठपूर्वके स्वं विजानते ।

परान् जानन्ति भोगांश्च भुञ्जतेनुभवन्ति च ॥ 445 ॥

स्वानन्दमपि ते बह्वी भवन्त्येकीभवन्ति च ।

यानैश्चरन्ति श्लिष्यन्ति क्रीडन्ति च हसन्ति च ॥ 446 ॥

यत्र मोक्षे सर्वमात्मैवाभूदन्यन्न किञ्चन ।

न द्वैतं न विशेषो वा तव ज्ञातृत्वमेव न ॥ 447 ॥

दूरेभूद्धोक्तृता तस्मादविद्यास्तमयो न सः ।

विद्यास्तमय एवाभूत् स्वज्ञानं च यतोस्य न ॥ 448 ॥

नापि दुःखस्य विध्वंसः सुखस्य ध्वंस एव सः ।

एकाकी रमते नासौ कथं कामांश्च सोश्नुते ॥ 449 ॥

इत्याक्षिपन्ती शून्यत्व मोक्षं सर्वानपेक्षितम् ।

वैकुण्ठाख्यं महामोक्षं यत्रद्वैतमिवेति वाक् ।

निरणीनयदेवेयं यतो नावर्तते यतिः ॥ 450 ॥

विशेषवीक्षितात्मेति यतो भागवते रमा ।

विशेषाणां चाधिपतिं गृणीते स्वपतिं स्पुटम् ॥ 451 ॥

अतो हरौ विशेषोस्ति तन्नियम्यश्च देहिषु ।
कथं नाभूद्विशेषोयं यो विशिष्यैव गीयते ।
अतो द्वैतमिमेत्युक्तो द्वैतप्रतिनिधिर्हि सः ॥ 452 ॥

सारूप्यं चैव सालोक्यं सामीप्यं योग एव च ।
मुक्तिश्चतुर्विधा प्रोक्ता भेदापेक्षाहि साऽखिला ॥ 453 ॥

कुचोद्यकृदवद्यार्थी दृश्यमर्थं न पश्यति ।
किं योगार्थकधातूत्थां सायुज्याख्यां विदुः खलाः ॥ 454 ॥

युजिर्योगे सह युजौ सयुजौ शब्दविन्मते ।
तयोर्भावश्च सायुज्यं कथमैक्यमिहोच्यते ॥ 455 ॥

उक्तं पुरैव यद्याप्तिं वक्तयैक्यपदमित्यपि ।
मुख्यत्वान्यथ्वार्थकं तत्किलातो हतोस्यहो ।
अतः सयुक्ततैवासीत्सायुज्यं न त्वभिन्नता ॥ 456 ॥

इहाच्युताङ्गगा देवा यन्मुक्तौ च तदङ्गगाः ।
सारूप्यं चैव सामीप्यं सालोक्यं च हरेर्बहिः ।
सदा हर्यङ्गसङ्गस्तु सायुज्यमिति सिद्ध्यति ॥ 457 ॥

इत्यमुक्तापि यस्य श्रीर्नित्यं वक्षसि लक्ष्यते ।
अनित्यमुक्तः को मुक्तो तदैक्यं प्राप्नुयाद्वद ॥ 458 ॥

प्रलये न लयो यस्याः प्रोद्भवे चास्ति नोद्भवः ।

प्रकृतिः किल या देवी नित्यमुक्ता कथं न सा ॥ 459 ॥

अद्यः प्रलयोयतोब्राह्मोयद्ब्रह्मप्रलयोलयः ।

अतो रमारमेशौ द्वौ सर्गप्रलयवर्जितौ ॥ 460 ॥

यौ हि सर्वलये सन्तौ तयोरन्तो न यौक्तिकः ।

अतः प्रागसतः सत्ता सम्बन्धश्च न यौक्तिकः ॥ 461 ॥

ययोः सृष्टिश्च नष्टिश्च न श्रुता नापि यौक्तिकी ।

लक्ष्णीनारायणौ तौ द्वौ नित्यमुक्तौ न संशयः ॥ 462 ॥

अतस्त्वां शब्दमर्यादा बाधते बुधसंसदि ।

उक्तरीत्यार्थमर्यादाप्यनर्थं कुरुते वद ॥ 463 ॥

प्रागुक्त श्रुतयश्च त्वां निघ्नन्त्यज्ञ पदे पदे ।

अतो मुक्ताश्रयो ब्रह्मरुद्राद्युत्कृष्टचेतनः ॥ 464 ॥

द्वितीयाद्वै भयमिति सदृशाद्भीतिरुच्यते ।

न चेत् द्वितीयाद्वचनाद्भीः स्वस्यैव भवेद्ध्रुवम् ।

यदेकाकी नरमत इत्यस्त्यन्यार्थशून्यवाक् ॥ 465 ॥

द्वीतीयादाश्रमानृणां भयं स्याद्बहु संसृतेः ।

अतस्तृतीयं तुर्यं वा प्रथमादाश्रमाद्व्रजेत् ॥466॥

इति वा सा श्रुतिर्वक्ति पुण्य पापाख्य योर्द्वयोः।

द्वितीयाद्धि भयं दुःखं नरकाद्यं ततः सुधीः ॥

प्रथमं धर्ममेवैकं भजेद्वन्द्वसहोन्वहम् ॥ 467 ॥

इत वा वक्ति सत्सङ्गं शंसती मोक्षकारणम् ।

द्वयोः सदसतोर्नृणां द्वितीयाद्वाभयं जगौ ॥ 468 ॥

एवं द्वितीयाज्जगतो भयं मृत्युर्यतो नृणाम् ।

तन्मृत्युभयभङ्गाय प्रथमं पुरुषोत्तमम् ॥ 469 ॥

भजेदनन्यभक्तः सन्निति वा शास्ति सज्जनान् ।

इति सामान्यवाग्वक्ति मोक्षहेतुपरम्पराम् ॥ 470 ॥

न चेद्वितीयाद्वचनात् स्वस्याभयमितीरितम् ॥ 471 ॥

एकद्वितीयतो भीता सातिभीतेति मे मतिः ।

बहूनां भेदवाक्यानां युक्तीनां च पराक्रमात् ॥ 472 ॥

चिदचिद्रूपजगता सर्वैणैक्यं यदीष्यते ।

द्वितीयतो भयं तर्हि द्वितीयार्थाच्च पूर्वभीः ॥ 473 ॥

अर्थद्वये द्वितीयार्थाद्विरम्य व्यापृतिर्भयम् ॥ 474 ॥

मुच्यमानाणुना चैक्यमुच्यमानमनीदृशि ।

द्वितीया ते भयं दद्यात्तस्मादस्माद्विलक्षणात् ॥ 475 ॥

सत्रैविध्यं यदिष्टं ते द्वितीयाद्वै भयन्तदा ।

स्यादाद्यब्रह्मणो नोचेद्वितीयाद्वादिनो भयम् ॥ 476 ॥

इत्थं रज्जुभ्रमात्सर्पग्राहीत् त्वंह हतोस्यहो ॥ 477 ॥

द्वितीयाद्देहगेहादेर्भयं स्यात्तेन तं त्यजेत् ।

इत्येवार्थः श्रुतेर्वाच्यो बन्धोच्छित्यैद्दगर्थिभिः ।

गुरुमेवाभिगच्छेदित्यादिवाक्यार्थवेदिभिः ॥ 478 ॥

द्वितीयाद्ब्रह्मविज्ञानाद्भयं भवति संसृतेः।

इत्यर्थोवात्र तच्छ्लाघ्यः समित्पुस्तकपाणिभिः ॥ 479 ॥

किञ्चाबिभदिति ब्रह्मभयमुत्त्वा पुनः श्रुतिः ।

तेनैकाकी बिभेतीति तत्र कारणमाह च ॥ 480 ॥

तस्मादेकाकितायां च भीत्युक्त्या तां च सन्त्यज।

द्वितीयमैच्छदिति च वचो हन्ति तवेप्सितम् ॥ 481 ॥

अनुकूलं द्वितीयं तच्छ्रुतिश्च न निषेधति ।
रक्षोभूतपिशाचादि द्वितीयं भयदं जगौ ।
कस्मान्वहं बिभेमीति भीषकाभाववाङ्ग किम् ॥ 482 ॥

एकाकी चेन्न रमते तेनैच्छत्स द्वितीयकम् ।
इति वागुपसंहर्त्री संहर्त्री तव दुर्धियः ॥ 483 ॥

अतः प्रकरणं मन्द हन्ति वादरणं तव ।
जिह्वारूपं प्रकृष्टं ते करणं वा निहन्त्यहो ।
भयं द्वितीयाद्वचनादित्युक्तं सूक्तमेव तत् ॥ 484 ॥

स्वाखण्डवादखङ्गेन मृतमृत्यै न मे कृतिः ।
स्वयूथ्यानां मनस्तृप्त्यै भक्त्यै मुक्त्यै च केवलम् ॥ 485 ॥

सामानाधिकरण्याद्वा नानात्वक्षेपतोपि वा ।
ऐक्यसिद्धिस्त्वखण्डार्थवादेनाभूत्तवैव हि ॥ 486 ॥

सर्वज्ञाल्पज्ञयोरैक्यं नास्त्येवेति तु यो वदेत् ।
ऐक्यस्य ब्रह्मरूपत्वाद्ब्रह्मवागैक्यवागिति ।
कथं तं प्रत्युत्तरं स्यान्निर्मूलोस्ति न वै तरुः ॥ 487 ॥

अन्यथा शशश्रृङ्गस्य विदूषित्वाच्चिदुक्तितः ।
शशश्रृङ्गं च स कथं त्वां प्रत्येव न साधयेत् ॥ 488 ॥

ऐक्यस्य ब्रह्मरूपत्वं मायावादी वदेदपि ।
परं प्रत्यैक्यसिद्ध्यर्थं नैवमाह सुधीर्ह्यसौ ॥ 489 ॥

अतः सर्वगुणैर्विष्णुर्मुक्तं कुर्यात्कथं समम् ।
ततोपि नैक्यं साम्यं तु किञ्चित्साम्यमितीरितम् ॥ 490 ॥

किलामृतस्यैष सेतुर्मुक्तानां परमा गतिः ।
सोमृचस्याभयस्येशः कृष्णोमुक्तैः किलेज्यते ॥ 491 ॥

इति श्रुतिपुराणानि सेतिहासानि सर्वतः ।
गर्जन्त्यन्ये महित्वं ते नाश्नुवन्तीति हि श्रुतिः ।
अप्यर्वाग्वृत्तयो यस्य महित्वे स्वभुवादयः ॥ 492 ॥

ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते ।
तद्यत्स्वभावः कैवल्यं स भवान् केवलो हरिः ॥ 493 ॥

इति भागवतोक्त्या च ब्रह्माद्यैर्नैव लभ्यते ।
यस्य स्वभावः तद्भावं मर्त्यः को गन्तुमर्हति ॥ 494 ॥

गिरो निरवकाशायाः सावकाशा हि किङ्करी ।
अतस्तदध्वनैवासौ गच्छेन्न तु कदध्वना ॥ 495 ॥

तस्मात्सर्वेश्वरो विष्णुर्भूतभव्यभवत्प्रभुः ।

मुक्तामुक्तजगन्नाथो भक्त्याराध्य इति स्थितम् ॥ 496 ॥

**या धात्रादिजगद्धात्रीख्याता तैर्वन्दितार्चिता ।**

**मुक्तामुक्तजगन्माता सा श्रीर्मङ्गलदेवता ॥ 497 ॥**

जयति श्रीरमाकान्तो जयति श्रीश्च तत्प्रिया ।

श्रीश्रीशभक्तो जयति मध्वो विध्वस्तसाध्वसः ॥ 498 ॥

षष्ठेऽष्टकेऽन्तिमाध्यायद्वयमारभ्य सप्तमे ।

पवमानः पूयमानःसोमश्चोक्तः पदेपदे ॥ 499 ॥

स मध्व इति तत्रैव पवमानस्य मध्वता ।

यत्स्पष्टं श्रूयते तस्मान्मध्वाख्या मारुती तनुः ॥ 500 ॥

वेविजानः पृथक्कुर्वन् स मध्वः पञ्चधा जगत् ।

पृथग्भावातिशयवाग्विजेरूपमिदं यतः ॥ 501 ॥

मिश्रोऽमिश्रश्च भवति सदा सुजनदुर्जनैः ।

युमिश्रणामिश्रणयोरिति धात्वर्थता द्वयोः ।

सख्यं नावैष्णवैर्यस्य प्रतीपो नैव वैष्णवे ॥ 502 ॥

इत्थं कृशानोरसनशीलोस्तु प्रलये सति ।

मनसाभीषकेणोग्रोवायावायुवते सह ।

सत्यर्थैबहुतैकस्यैवास्ति यद्वत्ययस्ततः ॥ 503 ॥

ते वायोरवतारा नः पूर्वासो गुरुताम् गताः ।

उपरासोपरासश्च प्रलये मुक्तिदायकाः ॥ 504 ॥

इन्दवश्चेष्टदातृत्वात् परमैश्वर्यतोपि वा ।

महेति महते वाजायान्नाय ज्ञानगोमते ।

धन्वन्तु धनदाः सन्तु धनधान्य इतीरणात् ॥ 505 ॥

प्रसिद्धिं लौकिकीं सौत्रीं  चाह रूपद्वयेस्य हा ।

इत्यर्थोत्र यतः स्पष्टं दृश्यते  पदसम्पदा ॥ 506 ॥

पवमानेति सोमेति प्राक् प्रस्ताव्यैव यं श्रुतिः ।

सोमः पवत इत्याह स सोमो मारुतो ध्रुवम्।

पवते यः स किं नाभूत्पवमानो विदाम्मते ॥ 507 ॥

प्रसेनानीरिति श्रुत्या यद्धीमहनुमत्कथा ।

स्पष्टं निरूपितात्रैव तत्सोमः सोमवंशजः ॥ 508 ॥

अग्रे रथानां सेनानीः शूरोसौ भुवि यस्तदा ।
एति प्रहर्षते भीमसेनसेना तदा किल ।
भीमसेनोह्यसौ सेनानीत्वं यत्तस्य शोभते ॥ 509 ॥

कवीन्द्रयादवेन्द्राद्धानोचितान् सुरराट् स्तुतान् ।
भद्रान् पराक्रमान् कुर्वन् युवराजपदे स्थितः ॥ 510॥

सखिभ्यो विष्णुभक्तेभ्यो वस्त्रावस्त्राणि सम्भ्रमाः ।
युतानि च समन्तात्स दत्ते किल दिने दिने ॥ 511 ॥

इति भीमं स्तौति सैव हनूमन्तं च शंसति ।
एकप्रकारकार्यत्वादेकरूपत्वतोपि वा ॥ 512 ॥

भद्रान् कुर्वन् कवीन्द्रस्य राघवेन्द्रस्य वा प्रभोः ।
आह्वानार्हान्निजगुणान् सखिभ्योर्थे रिपोः पुरीम् ।
गत्व वस्त्राणि चादत्ते रभसानि किल द्विषां ॥ 513 ॥

स्वबालासक्तवस्त्राणि सखिभ्योग्निभ्य एव वा ।
आसमन्ताद्विभुर्धत्ते प्रागादत्ते च तत्कृते॥ 514॥

द्विद्गुरीदाहपूर्वांश्च सीतास्थेन्द्रस्य तोषदान्।
भद्रान् पराक्रमान् कुर्वन् वनभङ्गादिकान् प्रभुः ॥ 515॥

अग्रे रथानामित्यादि योज्यमस्मिंश्च पूर्ववत्।
ससोमः पवनोस्मद्धनूमान्वा भविष्यति ॥ 516॥

मतीनां जनिता विष्णोर्जनिता यः श्रुतौ श्रुतः ।
विप्राणामृषिरित्युक्तः स मध्व इति च श्रुतः ॥ 517 ॥

एक एव भवेद्विष्णुर्मतिं विप्रेषु योदिशत् ।
विष्णोः प्रमापनाल्लोके स विष्णोर्जनिता श्रुतः ॥ 518 ॥

यस्ताविजानात् सपितुः पितेत्यस्ति यतः श्रुतिः ।
देशकालगुणव्याप्तविष्णोर्जन्मेदमेव हि ।
यतः प्रागसतः सत्ताकालव्याप्तेन शोभते ॥ 519 ॥

ध्यावपृथिव्यादिजन्महेतुत्वं ब्रह्मणो गुणं।
ऐक्याद्धटयितुं ब्रह्मा देवानामिति तं जगौ ॥ 520॥

बाधाभावे तु वाक्यानामर्तो वाच्यो यथाश्रुतः ।
बाधितार्थं तु यद्वाक्यं तत्सम्बन्धादिकं वदेत् ॥ 521 ॥

अथवा पवनं नाम मरुतो गमनं किल ।
मतीनां जन्म किं तेन दिवो जन्म भुवश्च किम् ।
विष्णोर्जन्म ततः किं स्यात्तत्रतत्रोपदेशनात् ॥ 522 ॥

मध्वाख्यदिव्यरूपेण मतीनां जनकोप्यभूत् ।
द्युभ्वादेर्जनकश्चाभून्मिथ्यात्वप्रविमोचनात् ॥ 523॥

नीचैक्यनिर्गुणत्वादेर्निराकरणतः प्रभोः ।
विष्णोश्च जनकोप्यासीद्धयत्राता पिता किल ॥ 524 ॥

स्वस्य स्वजगतश्चेत्थं स्थापनात् परितुष्यता ।
सत्यलोकाधिपत्ये च दत्ते ब्रह्मापि सोभवत् ॥ 525 ॥

विप्राणामृषिरप्यासीद्यस्तानित्थमशिक्षयत् ।
स एव बलदेवोभूत् यद्बलाद्बलिनां बलम् ॥ 526 ॥

अत्येति मोक्षपदवीर्यन्मोक्षाध्वसु षोडशः ।
कालचक्रं च सेत्येति यतः सर्वोच्चलोकगः ।
स रेभन् मेघगम्भीरनादी य(त्प्रति)गर्जति ॥ 527 ॥

एवं प्रत्युक्तिसद्रत्नमालालङ्कुरुते गुरुम् ।
इति वाक्यसन्दर्भस्यार्थौ यौक्तो भविष्यति ॥ 528 ॥

पवमानः पूयमानो वायुः सर्वस्य सम्मतः ।
तत्सूक्ते सह तेनोक्तः सोमोन्यो न पदेपदे ।
समानाधिकृतत्वं यद्वस्त्वैक्यस्य प्रमापकम् ॥ 529 ॥

प्रावीविषदिति श्रुत्याप्येषोर्थः स्पष्टमीर्यते ।

गिरः सिन्धुः स मध्वाख्यो मनीषाश्च मतोरमाः ॥ 530 ॥

वाचश्चोर्मिनोर्मिमिव सोमः सोमाभिमानवान् ।

पवमानो मुख्यवायुरवतीर्णो महीतले ॥ 531 ॥

प्रावीविषद्विशेषेण प्रावर्तयदिति स्फुटम् ।

अर्थः प्रतीयते सर्वैः प्रवृत्त्यर्थो यतो विषिः ॥ 532 ॥

गोषु विद्यासु सर्वासु यानीमान्यवराणि च ।

जनैः सर्वैः सबहुशो वृतत्वाद्बृजनानि च ॥ 533 ॥

राजसानि कुशास्त्राणि   तामसान्यपि सर्वशः ।

जानंस्तदर्थदोषं च पश्यन् सुजनचेतसां ॥ 534 ॥

अन्तरातिष्ठति हरिं पश्यंश्च वृषभःकिल ।

वागूर्मिता वाक् प्रदत्वं  बुद्धिदत्वादयो गुणाः ॥ 535 ॥

सारासारविवेकश्च यद्गुरुत्वप्ररूपकाः ।

अन्तःप्रागुक्तमध्वाख्यरूपवागेव वागियं ॥ 536 ॥

हृदन्तःप्राणरूपस्य बहिश्च गुरुरूपिणः ।

पवमानस्य चरितं श्रुतिरित्थमबोधयत् ॥ 537 ॥

उन्मध्व इति चान्या वाक् सूक्तेस्मिंस्तौति मद्गुरुम् ।
वसानो भूतले मध्वो महिषः सर्वतो महान् ।
ऊर्विरुत्कृष्टमतिमानूर्विवद्वा सदोन्नदन् ॥ 538 ॥

वनना भजनार्हत्वादपो ज्ञानप्रदत्वतः ।
ऋगादिविद्याः सरित इव विद्वान् विगाहते ॥ 539 ॥

यस्मादुदस्थापयत्तास्तस्मात्सोतिष्ठयत्प्रभुः ।
अन्यार्थे पातनं पातः स्वस्वार्थे प्राप्तिरुत्थितिः ॥ 540 ॥

यस्य राजा पवित्राख्यसुदर्शनरथो हरिः ।
सहस्रारेषु यद्धृष्टिर्ज्वालाचाग्नेः सहस्रदा ॥ 541 ॥

सहस्रभृष्टिः स बृहच्छ्रवः श्रवणमात्मनः ।
कृतं वाजं स्वेष्टदत्वादन्नमन्नसमं सदा ॥ 542 ॥

आरुहद्विषयीभूय सदा तत्रैव संस्थितः ।
जयत्यखिलदुर्वृत्तांस्तस्यासाध्यं न किञ्चन ॥ 543 ॥

यस्य श्रवणसम्पत्त्या विष्णुऋ प्रीतोभवत्प्रभुः ।
नापूर्वो निगमोद्धारस्तस्येति हृदयश्रुतेः ॥ 544 ॥

सप्तस्वसृरितिश्रुत्या मध्वः प्रस्तूयते स्फुटम् ॥ 545 ॥

वावशानोतिशयितकान्तियुक्तः सुखात्मकम् ।

कं ब्रह्म परमं विद्वान् मध्वो ज्ञानदशे सताम् ॥ 546 ॥

ऋगाद्याः सप्तसद्विद्याः स्वतन्त्रेशसृतत्वतः ।

स्वसृः स्वतःपूर्वजा वा परमात्ममुखाम्बुजात् ॥ 547 ॥

अरुषीः सर्वभिन्नाख्यहयग्रीवर्षिसंयुताः ।

तदन्यद्रष्टृशून्या वा लयेप्यच्यतबुद्धिगाः ॥ 548 ॥

वर्णव्यत्यासतोस्त्वित्थं नोचेदक्रूररूपिणः ।

उज्जभारोद्धारात्मभाष्यादिग्रन्थविस्तरे ॥ 549 ॥

असदस्यान्धकूपेभ्य उज्जह्रे वा बलात्प्रभुः ।

हभौ निभौ हृञ् छन्दोभागे कापीति शाब्दिकाः ।

ज्ञानायासामुद्धारस्ता विद्यानात्रसंशयः ॥ 550 ॥

पूषणस्य हरेः पूर्णबलप्रेरणकर्मणः ।

वव्रिं वरणमिच्छन् स प्रसादाभिदमुत्तमं ॥ 551 ॥

अन्तरिक्षेन्तरिक्षाख्या व्याकृताकाशमानिनि ।

दुर्गाननाम्बुजे पूर्वं सर्वस्य जगतः पुरा ।

जाजाताः सप्तविद्यास्ता अन्तस्सुजनचेतसाम् ॥ 552 ॥

मध्ये ये मेन्ययमयत्स्वयं चाविदद्ञ्जसा ।

आहान्तरिक्षे जातत्वमनादित्वं च सूचयन् ॥ 553 ॥

इत्यस्तौत्पवमानस्य सूक्ते यं स्पष्टवागियं ।

स मध्वः पवमानांशः सिद्धो विद्वच्छिरोमणिः ॥ 554 ॥

विष्टम्भोदिव इत्यत्राप्युक्तो मध्वो गुरुर्मम ।

विष्टम्भो धारको योसौ दिवोधारणशीलवान् ॥ 555 ॥

धरूणोस्याः पृथिव्याश्च विश्वाश्च क्षितयोस्य हि ।

हस्ते हस्तवशा मिथ्यात्वाख्यबाधविमोचनात् ॥ 556 ॥ ॥

वायो तवांशुरंशोसौ मध्वस्तच्छीलशीलवान् ।

नितरां योगयुक्तत्वान्नियुत्वानुत्स उत्सुकः ॥ 557 ॥

हरिस्तुतिं श्रोतुकामः सर्वैश्चादृश्यरूपतः ।

असत्संज्ञं परंब्रह्म गृणते स्तोत्रसञ्चयैः॥ 558 ॥

वागिन्द्रियाख्येन्द्रियाय पवते प्रेरणेच्छया ।

सत्सु वाग्वैखरीदित्सुरेव सञ्चरति क्षितौ ।

इत्यर्थोत्र यतः सम्यग्दृश्यते पदसम्पदा ॥ 559 ॥

सिंहं न सन्तेति वाक्ष मध्वस्य चरितं जगौ ॥ 560 ॥

सिंहं नृसिंहं विवृतनसोन्तो यस्य तं सुपः ।
लोपे न सन्तेति पदस्यार्थं दुर्जनसंहृतेः ॥ 561 ॥

हरिं भक्तेषु शान्तत्वादरुषं रोषवर्जितम् ।
आयासमागतं स्तम्भात् प्रह्लादार्थं सभान्तरे ।
अस्य सज्जनवर्गस्य दिवो ज्ञानद्युतेः पतिं ॥ 562 ॥

शूरोतिशौर्यवान्युत्सु वाग्युद्धेषु महीतले ।
मध्वो मध्वाभिधो योगी श्रोतृषु प्रथमः सदा ।
गा गोपदोक्तसद्विद्याव्यक्त्युत्कर्षाय पृच्छते ॥ 563 ॥

अस्य प्रसादादाप्तेन चक्षसा ज्ञानचक्षुषा ।
सत्सुबोधोक्षणं कुर्वन्नुक्षा भिक्षुगणाग्रणीः ।
परिपाति सतां बृन्दमित्यर्थोत्र स्फुटो यतः ॥ 564 ॥

प्रधारामध्व इत्यत्राक्ष्युक्तो मध्वस्य विक्रमः ॥ 565 ॥

अग्र्यो मध्वो मध्वमुनिः प्रकृष्टज्ञानधारया ।
सहिताः सप्तविद्याख्या महीः समहतीरपः ॥ 566 ॥

हविर्वन्द्यः स्वयं विष्णोर्हविः प्रयतमत्वतः ।
ध्यातृभिर्ज्ञानयज्ञेषु हूयमानत्वतोपि वा ॥ 567 ॥

हविर्ज्ञानघृतस्रावी तेषु तत्प्रतिमात्वतः ।

स्तुत्यो वा ताः स्फुटीकर्तुं स्वबुद्ध्येत्थं विगाहते ॥ 568 ॥

प्रकृष्टसूर्यधारादिधारा विषमभूमयः ।

यासु ताः पर्वतमहीः सर्वाः पथि पथि प्रभुः ।

प्रकृष्टोग्रप्रवाहाख्यधाराश्च सरितामपः ॥ 569 ॥

अग्र्यो मध्वो मध्वमुनिर्गच्छन् बदरिकाश्रमम् ।

अग्रीभूत्वा व्रजन् वाऽसावग्रियोग्रेसरस्तदा ॥ 570 ॥

नेत्याहूतो म्लेच्छभटैस्तैराहूतस्वसेविषु ।

वन्द्यः स्तुत्यचरित्रश्च लीलयैव विगाहते ॥ 571 ॥

इदं च नाद्भुतं तस्य यो हविर्वायरूपतः ।

आहूयते यज्ञवेद्यां तत्राहूतसुरेषु च ॥ 572 ॥

हविष्षु वन्द्यस्तस्येदृङ्महात्म्यं युक्तमेव हि ।

इति वा सा श्रुतिः सत्सु प्रसिद्धां तत्कथां जगौ ॥ 573 ॥

अस्मभ्यमिन्दवित्यत्राप्यस्मद्गुरुरभिष्टुतः ॥ 574 ॥

अभीष्टदानशीलत्वादिन्दो हे पवमान ते ।

योवतारो महेश्वर्यवन्तं नारायणं सदा ।

युनक्तीतीन्द्रयुर्नाम्ना मध्वो मध्व इतीरितः ॥ 575 ॥

तेन रूपेण विज्ञानधारया सह सर्वदा ।

अस्मभ्यमस्मानुद्दिश्य पर्जन्य इव वृष्टिमान् ।

पवस्वेति यतःस्पष्टमर्थोत्रापि प्रतीयते ॥ 576 ॥

मध्वः स त्वं पवस्वेति वाशास्ते मुनिमण्डली ।

इत्यर्थोत्र  यतः स्पष्टं दृश्यते पदसम्पदा ॥ 577 ॥

येन देवाः पवित्रेण आत्मानं पुनते सदा ।

तेन सहस्रधारेण पावमान्यः पुनन्तु मा ।

इति श्रुतिः प्राक् पवित्रमाम्नाऽऽहूय पुनश्च तत् ।

सहस्रधारं यत्प्राह तत्सहस्रारमेव तत् ॥ 578 ॥

देवाश्च येन चक्रेण लाञ्छितेन भुजे सदा।

स्वस्वदेहं मनश्चापि पुनते वैष्णवोत्तमाः ॥ 579 ॥

तेन  चक्रेण मरुतो मूर्तयो मां पुनन्त्विति ।

मुनिः प्रार्थयते कश्चिदित्यर्थोत्र प्रदृश्यते ।

शब्दाननुपमृद्यैव शब्दशब्दार्थवेदिभिः ॥ 580 ॥

एवं च सर्वदेवानां कार्यं चक्रादिधारणम् ।

प्रार्थ्यं महर्षिभिः कोवा मानवोन्यो न मान येत् ॥ 581 ॥

सदेत्युक्त्या च यद्गोपीचन्दनैश्चक्रलाञ्छनम् ।

अद्यापि कुर्वते वृद्धास्तच्च श्रुतिरसूचयत् ॥ 582 ॥

देवास्तु तप्तचक्राङ्कयोग्ये शुभदिने सदा ।

तप्तेन तेन पुनते मृदा तल्लाञ्छनैः सदा ॥ 583 ॥

इति पूर्वार्धवाक्यार्थो लभ्यते पदसम्पदा ।

उत्तरप्रार्थनाहेतुरूपया चार्थसम्पदा ॥ 584 ॥

अर्थ्यमानं तु मुनिना तप्तचक्रस्य लाञ्छनम् ।

गुरूणां करकञ्जेन धार्यं चक्रं तदेव हि ।

अतः पूर्वार्धवाक्येपि तप्ताङ्कप्रस्तुतिर्बलात् ॥ 585 ।

मुनींश्च देवदेहांश्च शुद्धिकुर्वत्सुदर्शनम् ।

परं पवित्रमत्रस्यान्नान्यत्पुम्मतिनिर्मितम् ॥ 586 ॥

अतोप्यन्यार्थकथनं व्यर्थमासीद्दुरात्मनाम् ।

सदेति च पदङ्कुप्येत्पवित्रान्तरकल्पने ॥ 587 ॥

अतः श्रुतिः पवित्रं त इत्यत्रापि सुदर्शनम् ।

प्रभोरायुधमेवाह नियोगस्तस्य सन्निधेः ।

अन्यत्रापि भवेदन्नमन्त्रणे सौरमन्त्रवत् ॥ 588 ॥

पवित्रं चरणं नेमिररिश्चक्रं सुदर्शनम् ।

सहस्रारं  प्राकृतघ्नं लोकद्वार महौजसम् ॥ 589 ॥

विष्णुचक्रस्य नामानि पर्यायेण निबोध मे ।

इति पाद्मोक्तगौरीशवाग्घि लिङ्गानुशासनम् ॥ 590 ॥

पावमानी तनुश्चेयं स्यादाचार्यस्वरूपिणी ।

यास्य वैष्णवधर्मस्य सर्वत्रापि प्रवर्तिका ॥ 591 ॥

सा च प्रसिद्धेर्बदरीमध्ये मुनिमनःप्रिया ।

व्यासकैङ्कर्यधुर्या च माध्वी भवितुमर्हति ॥ 592 ॥

युगे युगे ऽवतीर्णानां बहुत्वमपि युक्तिमत् ।

द्विविधस्यास्य धर्मस्य मौल्यं सा मूर्तिरर्हति ॥ 593 ॥

बलकार्याणि रूपाणि वायोः सन्तु सहस्रशः ।

ज्ञानकार्यं तु तद्रूपमिदमेव प्रदृश्यते ॥ 594 ॥

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ।

ब्रह्म तेन पुनीहीति तस्यैव प्रार्थनान्तरम् ॥ 595 ॥

सख्युरग्रे हृदिगतमग्न्याख्यं तं गुरुं प्रति ।

स्पष्टीकर्तुं महाधर्मं तप्तचक्राङ्कधारणम् ॥ 596 ॥

अग्निश्च दह्यात्त्वां नो चेत् पूर्वावाक्प्रधक्ष्यति ।

अन्यथा वाक्यभेदः स्यात्सूक्तं चैतत्प्रकुप्यति ॥ 597 ॥

अग्ने तेऽर्चिषि यच्चक्रमन्तरा विततं कृतम् ।

तप्तेन तेन चक्रेण ब्रह्म वेदं पुनीहि नः ॥ 598 ॥

इति प्रार्थनरूपोर्थो यः स्पष्टोत्र प्रतीयते ।

अतश्चक्राङ्कशून्यानां वेदाभ्यासो वृथा भवेत् ॥ 599 ॥

यदा चक्राङ्कशून्योक्तवेदस्याप्यपवित्रता ।

तदा तेषां तु मूर्खाणां हीनादपि च हीनता ।

किं वाच्या तेन चण्डालाधमं तं स्मृतिर्जगौ ॥ 600 ॥

प्रतप्तं बिभृयाच्चक्रं शङ्खं च भुजमूलयोः।

श्रौतस्मार्तादिसिद्ध्यर्थं मन्त्रसिद्ध्यर्थमेव च ॥ 601 ॥

अचक्रधारिणं विप्रं दूरतः परिवर्जयेत् ।

श्वपाकमिव नेक्षेत लोके विप्रमवैष्णवम् ॥ 602 ॥

यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः ।

समत्वेनाभिमन्येत स पाषण्डो नरः स्मतः ॥ 603 ॥

यो मोहाद्विष्णुमन्येन हीनदेवेन दुर्मतिः ।

साधारणं सकृद्ब्रूते सोन्त्यजो नान्त्यजोन्त्यजः ॥ 604 ॥

अतः श्रुतेः स्मृतेश्चैको मार्गः सद्धर्मरक्षणे ॥ 605 ॥

किञ्च श्रुत्यन्तर प्रोक्तं शतोद्यामं हिरण्मयम्।

पवित्राख्यं विष्णुचक्रं धारणाय विनिर्मितम् ।

यज्ञरक्षाकरं सोग्निः सहते स्वोदरेर्पितम् ॥ 606 ॥

अन्यत्तु कुपितः सर्वं दहेद्वायुसखोह्यसौ ।

अतोर्थान्तरवार्तात्र दग्धैवाभून्न संशयः ॥ 607 ॥

चक्रं सुवर्णतः कुर्याच्छङ्खं तु रजतेन च ।

इति पौराणिकीगोष्ठी तत्सर्वं मे मनोरम् ॥ 608 ॥

एवं च तप्तचक्रं मे नांहो दाहाय केवलम् ।

विरुद्धपक्षकक्षाणामपि दाहमचीक्लृपत् ॥ 609 ॥

पवमानपदैः सोमपदेन च य ईर्यते ।
स एवाग्निसवित्रादौ स्थितस्तत्तत्पदोदितः ॥ 610 ॥

अङ्गीभूताग्निनेतृत्वादङ्गेष्वग्निशिखा नयन् ।
प्राणाग्निरिति यः प्रोक्तः स एवाग्निस्थितामलः ॥ 611 ॥

अलं भावो यतो नास्य पवित्रीकरणे सताम् ।
उपस्थातृषु यः पुण्यराशिं सूते दिनेदिने ॥ 612 ॥

स एव सविता सोमबिम्बस्थः सोमनामकः ।
समत्वाह्लादकारित्वपूर्वैः शुभगुणैः प्रभुः ॥ 613 ॥

पवमानस्य यत्सूक्ते पवमानप्रशंसनम् ।
उचितं तेन वायुश्च वायुगो हरिरेव च ।
सूक्तस्थिताखिलर्ग्भिश्च स्तुत्यो नायस्य वागियम् ॥ 614 ॥

अतोग्नावाहितं चक्रं स्वार्चिषा पुण्यदायिना ।
स एव तप्तं कुरुते गुरुर्भूत्वा स एव च ॥ 615 ॥

सतां भुजे धारयति मुनीनां मध्वरूपदृक् ।
स एव धारयेद्वायुदन्यत्र गुरुषु स्थितः ॥ 616 ॥

मध्वाख्यगुरुरूपेण पूयमानः स पावयन् ।

धारयेत्तानि रूपाणि मध्वस्यैव बहूनि तत् ॥ 617 ॥

शिष्टाचारादहष्टस्य यदा वेदस्य कल्पना ।

स्पष्टदृष्टश्रुतिं सोतिबलवान्नैव मुञ्चति ॥ 618 ॥

अतः श्रुतिरभूदेषा तप्तचक्राङ्कशासनम् ।

लिङ्गानुशासनं तूक्तं शासनद्वयसम्पदा ।

सहितां वैष्णवग्रामसीमां को वा न मानयेत् ॥ 619 ॥

प्रास्तवं यत्संहिता यत्तदेव परिशिष्टवाक् ।

प्रपञ्चयति तेनाभूत्तच्च शिष्टानुशासनम् ॥ 620 ॥

प्रपञ्चनं च प्रोक्तस्य तेन वाक्यद्वयेन तत् ।

तप्तचक्राङ्कनं वक्ति वाक्यभेदो न चेद्भवेत् ।

यतोस्य परिशिष्टत्वं तच्छेषत्वमपेक्षते ॥ 621 ॥

तापेन देहपावित्र्यकृत्पवित्रं जगत्त्रये ।

नापरं विद्यते विष्णुचक्राद्वैष्णवसम्मतात् ॥ 622 ॥

जडर्चां श्रवणायोगान्नताः प्रार्थयते मुनिः ।

ऋगर्थीभूतपवनतनूनां प्रार्थनं हि तत् ॥ 632 ॥

यतस्तत्रैव स मुनिर्देवैर्देवीः समाहिताः ।
इत्याह तेन सर्वर्क्षु देवैः सह समाहिताः ॥ 624 ॥

देव्यश्च सन्ति भारत्या मूर्तयो वायुमूर्तयः ।
मानिन्यः प्रतिपाद्याश्च ततस्तत्प्रतिपादिताः ॥ 625 ॥

चक्राङ्कधारणं तेषु कुर्वन्त्यो वायुमूर्तयः ।
प्रधानभूताः प्रार्थ्यन्ते शेषे शेषिणि वाक्कये ॥ 626 ॥

न यस्य सर्वमोक्षेपि मोक्षः साधर्म्यधर्मिणि ।
तच्चक्रलाञ्छनं मोक्षयोग्यात्को मोचयेद्बुधः ॥ 627 ॥

चमूषत्साधुचम्वां सद्वैष्णवेषु समुज्ज्वलन् ।
सुखी हरिर्हि यस्येनः स श्येनो विष्णुकिङ्करः ॥ 628 ॥

नयन् सुखभुवं स्वीयाश्छकुनाख्योपि स प्रभुः ।
बिभृत्वा धारणाशीलो द्रप्संश्चित्तद्रवान्वितः ॥ 629 ॥

आयुधानि सदा बिभ्रद्भुजकण्ठोदरादिषु ।
चक्रशाङ्र्गगदापद्मपूर्वाण्यखिलवाक्पतेः ॥ 630 ॥

गोविन्दुर्गोपतेर्वा स्वस्वामिनः सेविनां प्रभुः ।
अपां ज्ञानप्रवाहाणामूर्मिमौन्नत्यसम्पदम् ॥ 631 ॥

समुद्रं वेदशास्त्राख्यं सचमानः स्वचेतसा ।
सम्बन्धं प्रापयन् मध्वो मरुदंशो भवाद्बहिः ॥ 632 ॥

स्थितेस्तुर्यं मुक्तलोकाधारत्वाद्धामसंज्ञितम् ।
परंब्रह्म विशेषेण व्यक्तीत्याह श्रुतिः परा ।
समवाये सचिद्धातुं यतो व्याख्यान्ति शाब्दिकाः ॥ 633 ॥

पूयमानस्य सूक्तस्था तन्माध्वीयं कथा ध्रुवम् ।
यतः प्रवचनं कुर्वाद्वायोरूपं श्रुतिर्जगौ ॥ 634 ॥

तच्चमूषु सतां सेयं कथा भक्तिमतां सतां ।
सेनास्तुतौ च सेनानीस्तुतिरेव यतो भवेत् ॥ 635 ॥

स्वरेण प्रणवाख्येन मन्त्रेण हृदिगं सदा ।
परतश्च परं देवं महतश्च महत्तरम् ॥ 636 ॥

दृतोर्ध्वपुण्ड्रः श्रुतसच्चक्रधारी हयः पुमान् ।
विष्णुं ध्यायति सर्वत्र स महात्मेति साम्प्रतम् ॥ 637 ॥

प्रसिद्धोपनिषच्चाह श्वपाक इति धातुतः ।
तप्तचक्राकोर्ध्वपुण्ड्रधृतिस्तुतिपरा स्फुटम् ॥ 638 ॥

द्विरेखमूर्ध्वपुण्ड्रं च भवति द्विभुजे सदा ।
तप्तचक्रं धाययतीत्याह काचन वेदवाक् ॥ 639 ॥

काण्वानां सा शतपथब्राह्मणे किल वर्तते ।
यद्वेदस्य शिरो वक्ति तदेव हि वपुर्मतम् ॥ 640 ॥

तस्मादियं च वाक् स्तौति तप्तचक्रायुधाङ्कनम् ।
अचक्रधारिव्याख्यादि प्रत्याख्यानचिकीर्षया ॥ 641 ॥

अत्रापि च पवित्रन्त इति वाग्वायुगं हरिम् ।
स्तुवन्ती तप्तचक्राङ्कधारणं वक्ति सुस्फुटम् ॥ 642 ॥

ब्रह्मणो वेदराशीनां पते लक्ष्मीपते तव ।
पवित्रहस्तगं चक्रं व्याप्तं सर्वत्र सर्वदा ॥ 643 ॥

प्रभुस्त्वं देहि गात्राणि यतः पर्येषि विश्वतः ।
चक्रव्याप्तौ हेतुभूता चक्रिव्याप्तिरितीरिता ।
नान्यत्पवित्रं प्राण्यङ्गव्यापि नापि जगत्रये ॥ 644 ॥

तेनातप्ततनूरामः पाकहीनोश्नुते न तत् ।
आमुष्मिकफलं यद्धि प्रसिद्धं मोक्षसंज्ञितम् ॥ 645 ॥

श्रुतासस्तेन पक्काङ्गा वहन्तश्च दिनेदिने ।
गोपीचन्दनतो भक्तास्तत्समेत्य समाशत।
इत्यर्थं वागियं स्पष्टमाचष्ट किल वैष्णवी ॥ 646 ॥

तदेषा पूयमानस्य सूक्तस्था वायुगं हरिम् ।
स्तौति वायुमतस्थानां धर्मस्तवनतत्परा ॥ 647 ॥

वायोः सूक्तं वदेद्वायुं वायुगं वा हरिं वदेत् ।
वदेद्वा वातरसनमुनिधर्मं सुनिर्मलम् ॥ 648 ॥

ब्रह्मास्त्ररूपगायत्री शत्रोः संहारकर्मणि ।
नियुक्तेत्येव किं वक्ति रिपुसेनाप्रणाशनम् ॥ 649 ॥

सुदर्शनस्य मीमांसा द्रष्टव्या विस्तरार्थिभिः ।
उपकर्तुः प्रतिकृतेरशक्त्येहापि तत्कथा ।
अतोस्मदुक्त एवार्थ इति सर्वं मनोरमम् ॥ 650 ॥

अतो वेदेन वेदान्तवचनेन च मानितम् ।
सर्वैर्मान्यं मतमिदं माननीयो गुरुश्च नः ॥ 651 ॥

**यद्वायोः पवमानस्य पूयमानाभिदस्य च ।**
**सूक्तस्थर्चामियं चर्चा तद्वायुस्तुतिरेव नः ॥ 652 ॥**

स्पष्टं मध्वाभिधानाङ्काः सप्तर्चोत्र विचारिताः ।

अष्टर्चस्तच्चरित्राङ्काश्चक्राङ्कैका रहस्यवाक् ॥ 653 ॥

वायुस्तुतौ च मध्वाख्या सकृदेव प्रकाशिता ।

असकृन्मध्वसन्नाम्नी सेयं वायोर्महास्तुतिः ॥ 654 ॥

इदं ते पात्रमित्यृक्क मध्वं स्तौत्यष्टमेऽष्टके ॥ 655 ॥

शतक्रतो बहुज्ञानपरमैश्वर्य हे हरे ।

इन्द्राख्य ते सनेधाने योग्यवित्तानि यस्य तत् ।

सनवित्तं ज्ञानभक्तिविरक्त्यादिगुणोर्जितम् ॥ 656 ॥

इदं मध्वाभिधं पात्रं सन्निधानपदं ध्रुवम् ।

न चेदेतादृशज्ञानपूर्तिरत्र कुतो भवेत् ॥ 657 ॥

सत्वं न चेदिति प्रोक्तं देववाक्यमनुस्मर ॥ 658 ॥

येनानेन प्राणतया सर्वत्र व्यापिनार्पितम् ।

सोमं यज्ञरसं सर्वं पिब पूर्णोपि तत्प्रियात् ।

ज्ञानयज्ञरसं दिव्यज्ञानाख्यं रसमेव वा ॥ 659 ॥

योयों मध्वो मध्वनामा मदिरस्य मदीरणात् ।

जातस्य वेदशास्त्रादेर्मथनादुदितस्य वा ॥ 660 ॥

ज्ञानस्य पूर्णः सम्पूर्णः केवलं करणं न तत् ।
तत्सम्बन्ध्यपि तज्ज्ञानं तद्गुणस्यापि बोधनात् ॥ 661 ॥

इति ज्ञापयितुं षष्ठी तच्च योगिषु सर्वतः ।
जुह्वदाहावनामा सन् वर्तते व्याससन्निधौ ॥ 662 ॥

मुनिमात्रगुरर्नासाविदित्थं यमभिस्थिताः ।
हर्यन्ति मनसाऽऽकृष्य ध्यायन्ति सकलाः सुराः ॥ 663 ॥

अभितो वा व्याहरन्ति तमीदृक् सुगुणं सुराः ।
यद्वाभितः प्राप्नुवन्ति चेप्सया शास्त्रसम्पदाम् ॥ 664 ॥

हर्यन्नुषसमित्यादौ प्राप्यर्थोऽस्ति यतो ह्यजिः ।
अन्यार्थशून्या वागेषा किं न ब्रूते गुरुं मम ॥ 665 ॥

मध्वो वो नामेति वाक्च मरुत्सूक्ते तमुज्जगौ ॥ 666 ॥

यद्यतो मुख्यमरुतो वैर्युग्रा ये कुमारकाः ।
आयासुर्भूतलं भीमहनूमन्मध्वनामकाः ॥ 667 ॥

येचिद्देव जगत्युर्व्यौ रोदस्यौ पृथिवीं दिवम् ।
रेजयन्ति चरित्रेण राजयन्ति युगेयुगे ॥ 668 ॥

पिन्वन्ति पालयन्त्युत्समुत्सुकं स्वपदाम्बुजे ।
पिविं मिविश्च यद्धातुं सेचनेर्थेनुशासने ।
पालनं चाखिलैरिष्टैः सेचनम् यद्विदुर्बुधाः ॥ 669 ॥

बलज्ञानाख्यकार्येषु तेषु पुत्रेषु हेऽनिलाः ।
मरुतो यः प्रियं मध्वो नाम मारुतमद्भुतम् ॥ 670 ॥

यजत्रा  याजकाः सर्वे यज्ञेषूक्तिविशारदम् ।
सुखेन भरिताः सन्तो दृष्ट्वा श्रुत्वा च तद्वचः ।
प्रमदन्ति प्रहृष्यन्ति कर्मनिर्णयकोविदम् ॥ 671 ॥

**इति श्रुतिर्यच्चरित्रं वक्तयत्रैव प्रचारितम् ।**
**स मध्वो वैदिकाचार्यः सिद्ध सद्विद्वदग्रणीः ॥ 672 ॥**

तदस्येति श्रुतौ प्रोक्तो विष्णोस्तु परमे पदे ।
उत्स औत्सुक्यवान्मध्वः कोवा सिद्धो निगद्यताम् ।
मध्वश्रुतेर्विष्णुभक्तिलिङ्गाच्चासौ गुरुर्हि नः ॥ 673 ॥

यतः श्रुत्योरुक्रमस्य सा हि बंदुरितीर्यते।
ततस्थं सा गुरुं मुख्य प्राणरूपं न्यरूरुपत्॥ 674॥

यस्मिन् स्थिते स्थितोहं स्यां यद्गतौ च गतोस्म्यहम् ।
तं स्त्रक्ष्यामीति मन्वानः प्राणं सोसृजत प्रभुः ॥ 675 ॥

इत्याहोपनिषद्यस्मात्तस्मात्प्रियकुमारकः ।
प्राण एव हरेर्बन्धुः स एवात्रापि कीर्त्यते ॥ 676 ॥

मुख्यस्यैव ग्राह्यतया तथा श्रौतसमाख्यया।
हिशब्दोदितया विद्वत्प्रसिध्या चापरो न सः ॥ 677 ॥

देवानां प्रायपठितो देवश्रेष्ठो भवेदयम् ।
धर्मनिर्णयभूमित्वाद्बन्धुत्वाच्च महाप्रभोः ॥ 678 ॥

किञ्चेत्थेति पदाद्यत्र देवा देवयुसंज्ञिताः ।
यद्युञ्जन्ति परं देवं परिवारतया सदा ।
मदन्ति तत्र विष्ण्वङ्गाभिषिक्ते तीर्थपाथसि ॥ 679 ॥

नित्यं सोशनवान् प्रोक्तस्तेन चानन्दतीर्थताम् ।
स्पष्टीकरोति वेदोसौ तस्य मध्वाख्ययोगिनः ॥ 680 ॥

**आनन्दरूपस्य हरेस्तीर्थं यस्य स एव हि ।**
**आनन्दतीर्थनामा स्यात्तस्माच्चास्मद्गुरुर्भवेत् ।**
**अतः श्रुतिरियं सूते मध्वरूपं गुरुं मम ॥ 681 ॥**

बळित्थेति श्रुतिर्वायोर्देवस्य प्रथमं वपुः ।
द्वितीयं च तृतीयं च वक्ति वाक्यत्रये क्रमात् ॥ 682 ॥

तच्चप्रसिद्धसन्त्यागायोगादन्याप्रसिद्धितः ।
तत्ववाद्युदितं रूपत्रयमेवेति मे मतिः ॥ 683 ॥

हनुद्भीमसंज्ञौ द्वौ प्रसिद्धौ विष्णुकिङ्करौ ।
अतस्तृतीयोपि कश्चिद्भवेद्भक्तधुरन्धरः ॥ 684 ॥

पूर्वौ द्वौ हरिसेनायाः सेनान्यौ यन्मतौ सताम् ।
अतस्तृतीयोपि सोयं वैष्णवाग्रेसरो भवेत् ॥ 685 ॥

त्रेतायां द्वापरे चैव तौ द्वौ वायुकुमारकौ ।
तत्तृतीयः कलौ च स्याद्युक्त्या वायुकुमारकाः ।
यौक्तस्य तस्य सुजनप्रसिद्धिर्मध्वतां दिशेत् ॥ 686 ॥

बलकार्येषु यो विष्णोः साचिव्यमकरोन्मरुत् ।
हनूमदादिरूपेण ज्ञानकार्येपि स प्रभोः ।
व्यासरूपस्य सचिवीभावमर्हति नापरः ॥ 687 ॥

बलकार्ये सहायौ तौ प्रभोर्दानवमर्दनौ ।
ज्ञानकार्ये सूत्रकृतो भाष्यकृद्धि सहायकृत् ।
अतोपि मध्वनामायस्तृतीयो वायुनन्दनः ॥ 688 ॥

किञ्चाश्रमचुष्कस्य धर्ममाचरतो गुरोः ।
प्रथमं तु वपुर्वर्णिवनिनोः धर्ममाचरत् ।
द्वितीयं गृहिणो धर्ममाचरद्भीमसंज्ञितम् ॥ 689 ॥

तृतीयं च वपुर्युक्त्या यत्याश्रमधुरन्धरम् ।
भवेदवश्यं तद्वायोर्माध्वी तनुरभूद्बलात् ॥ 690 ॥

देवो वा दानवो वा स्याद्भाष्यकारो न मानवः ।
तत्र विष्णौ रता देवा दैत्या ब्रह्मशिवादिषु ।
अतोपि वैष्णवं भाष्यं देवमूलं न संशयः ॥ 691 ॥

अयादवीं क्ष्मां करिष्ये इत्येकः प्रतिशुश्रुवे ।
अन्यस्तु कृष्णं जग्रास यो ग्रसीत्सकलं जगत् ॥ 692 ॥

स वादी मूलदैत्यो वा तदावेशयुतोपि वा ।
अपरः कोपि दैत्यः स्यान्न चेदीदृङ्मतिः कुतः ॥ 693 ॥

सूचिमात्रप्रदेशं च यः स्वतोन्यस्य नादिशत् ।
स भीमगदया शाम्येन्नाभीमस्य पराक्रमैः ।
मध्वस्य भीमरूपत्वं तद्यौक्तमिति मे मति ॥ 694 ॥

किञ्च श्रुतौ मतिपदं हनुमद्वाचकं भवेत् ।

यतो गत्यर्थको धातुर्ज्ञानार्थ ति शाब्दिकाः ।

तज्ज्ञानशीलं तद्वन्तं निर्वक्ति हनुमत्पदम् ॥ 695 ॥

मतिरूपं मतीत्याहुर्मतिमन्तं यतो बुधाः ।

अतः स्वाभाविकी यस्य मतिः स मतिरुच्यते ।

एवं च हनुमानेव मतिशब्दोदितो न किं ॥ 696 ॥

द्वितीयं च वपुः सा वाक्पितुमानिति शंसति ।

पितुरित्यन्न नामेति ब्राह्मणं पितुमांस्ततः ।

बह्वन्नवानभूद्भीमो बाहुल्यार्थमतुब्बलात् ॥ 697 ॥

तृतीयं तु वपुः प्राह दशप्रमतिनामि सा ।

तच्च पूर्णप्रज्ञनाम समानार्थं प्रतीयते ॥ 698 ॥

**बहुत्वार्थदशत्वोक्तेः पूर्णत्वार्थेपि वर्तनात् ।**

**अतः पूर्णप्रज्ञ एव दशप्रमतिनामवान् ॥ 699 ॥**

अप्यक्षरस्य साम्येन निर्ब्रूयादिति वैदिकाः ।

सर्वसाम्येतु शब्दौ द्वौ कथं नैकार्थवाचकौ ॥ 700 ॥

दशप्रमतिनामान्यो यतो नास्ति जगत्त्रये ।

अर्थालाभेन शब्दोसौ पूर्णप्रज्ञं बलाद्व्रजेत् ॥ 701 ॥

यतो मध्वो मातरिश्वा गुरासन्तं मथायति ।

इति वक्ष्यति यं मध्वं मातरिश्वाभिधं स्फुटम् ।

दशप्रमतिनामात्र स एवातो न संशयः ॥ 702 ॥

वृषभस्यास्य देवस्य तृतीयं च वपुर्हरेः ।

योषितो वेदमानिन्यः श्रीभूदुर्गाभिधाः किल ॥ 703 ॥

दोहसे ज्ञानदोहाय दशप्रमतिसंज्ञितम्।

जनयन्त निजाम्नायरक्षणार्थमजीजनन् ॥ 704 ॥

वृषभस्यास्य देवस्य तृतीयं च वपुर्हरेः।

येषितो वेदमानिन्यः श्रीभूदुर्गाभिधाः किल ॥ 705 ॥

दोहसे ज्ञानदोहाय दशप्रमतिसंज्ञितम्।

जनयन्त निजाम्नायरक्षणार्थमजीजनन् ॥ 704 ॥

अमाऽन्योगेपि लङ् रूपं यतः स्याच्छन्दसीदृशम् ।

छन्दस्यसन् प्रत्ययोपि तुमर्थेऽस्तीतिशाब्दिकाः ॥ 705 ॥

यतो मध्वो मातरिश्वा जन्मनोनुसुराननु ।

प्रकृष्टविजिगीषादिशक्तिमान् प्रदिवः सुधीः ॥ 706 ॥

प्रकृष्टा द्यौर्येषु ते वा प्रदीपो देवताजनाः ।

ताननोद्दिश्येति वार्थो वक्तव्योत्र विचक्षणैः ॥ 707 ॥

अधवे सर्वतः श्रेष्ठ्ये यद्धवः पतिरुच्यते ।

भावप्रधानो निर्दोशोप्यस्ति तेनोचितमं हि तत् ॥ 708 ॥

गुहासन्तं हृद्गुहायां वसन्तं पुरुषोत्तमम् ।

ईमित्थं हृग्दुहास्थत्वाद्याकारेण मथायति ।

वेदशास्त्रादिमथनं कृत्वा दर्शयति प्रभुः ॥ 709 ॥

दीर्घेण मथनस्यातिदीर्घतां श्रौततां च सा ।

असूचयत्तेन नानादुर्भाष्याण्यप्यमोचयत् ॥ 710 ॥

तस्मादीशानादयोपि सूरयस्तत्प्रसादतः ।

बभूवुरिति सम्बन्धो यतोत्रैको बहुः कृतः ।

आद्यथैव विभक्तिस्तदिति सर्वं च मङ्गलम् ॥ 711 ॥

वगार्थस्तूदितः पूर्वैर्मङ्गीस्तद्युक्तिमल्लिका ॥ 712 ॥

यस्यर्चो मध्वनामाङ्काः श्लोकानेकादशा गृणन् ।

स मध्वो वैदिकाचार्यो गुरुर्जयति दुर्जनान् ॥ 713 ॥

वायोर्दिव्यानि रूपाणि पद्मत्रययुतानि च ॥ 714 ॥

त्रिकोटिमूर्तिसंयुक्तस्त्रेतायां राक्षसान्तकः ।
हनुमानिति विख्यातो रामकार्यधुरन्धरः ॥ 715 ॥

स वायुर्भीमसेनोबूद्वापरान्ते कुरूद्वहः ।
कृष्णं सम्पूजयामास हत्वा दुर्योधनादिकान् ॥ 716 ॥

द्वैपायनस्य सेवार्थं बदर्यां तु कलौ युगे ।
वायुश्च यतिरूपेण कृत्वा दुःशास्त्रखण्डनम् ॥ 717 ॥

ततः कलियुगे प्राप्ते तृतीयो मध्वनामकः ।
भूरेखादक्षिणे भागे मणिमद्वंशान्तये ।
धिक्कुर्वंस्तत्प्रभां सद्योवतीर्णोत्र द्विजान्वये ॥ 718 ॥

इत्याद्याः सूक्तयो वायुपुराणस्थाः सहस्रशः ।
अवतारत्रयं वायोः कथयन्ति महात्मनः ॥ 719 ॥

अतः श्रुतिस्मृतिस्तुत्यचित्रचारित्रविस्तृतेः ।
मध्वस्यैव मतं युक्त्यन्वितं परममङ्गलम् ॥ 720 ॥

हितं न जानाम्यहितं न जाने नाकर्तुमीशो न च कर्तुमीशः ।
यथानटान्नाटकदारुयन्त्रं तथा हरेः प्रेरणयैव वर्ते ॥ 721 ॥

यदभूत्तद्धरेर्यच्च नाभूत्तच्च हरेः परात् ।
जीवो विष्टिगृहीतोऽस्मात्किं भवेत्किं च नो भवेत् ॥ 722 ॥

कर्मणो यदि तत्कर्म स्वानिष्टं कुरुते कुतः ।
अनाद्यनिष्टकर्माणि करोत्यन्यवशो ध्रुवम् ॥ 723 ॥

नित्यो जीवो स्वतन्त्रश्चेदनित्यं कर्मजन्मनि ।
स्थितौ लये परापेक्षमन्याधीनं कथं न तत् ॥ 724 ॥

यत इत्येकवचनादेको दाधार चेत्यलम् ।
स्पष्टश्रुतेर्न कर्माणि कर्मद्वारा न चेतनाः ।
अनन्तः सर्वजगतां कर्तारो लाघवादपि ॥ 725 ॥

लोकेऽदृष्टद्वारकर्तृमात्रात् क्वापि क्रियाऽजनेः ।
कृति पूर्वककर्तैव कर्तान्यस्तूपचारतः ।
अन्यथा कन्यकायाः स्याद्भर्तापि पितृवत्पिता ॥ 726 ॥

अतो नामुख्यकर्त्रैव महाकार्यमिदं भवेत् ।
किं स्त्रीपुंसौ विनापि स्यात्पुत्रः पुत्रेष्टिमात्रतः ॥ 727 ॥

न चेदुपादानमपि तद्वत्स्यादौपचारिकम् ।
दृष्टानुसारतस्तच्चेत्कर्तापि स्यात्तथैव हि ॥ 728 ॥

अदृष्टमपि बीजाद्यं कल्प्यं फलबलाद्यथा ।

तथाऽदृष्टोपि कर्तास्य कल्प्यः कोप्युरुशक्तिमान् ॥ 729 ॥

न च कालादिकं तस्य प्रेरकं जडवस्तुनः ।

स्वतः प्रवृत्त्ययोगेन प्रेर्यत्वात् कर्तृतोन्यतः ॥ 730 ॥

नापि तत्प्रेरको ब्रह्मा नेशो नेन्द्रोपरे कुतः ।

अङ्घ्र्यर्चनेन तत्तीर्थजुष्ट्या तद्गतभूत्वत्तः ॥ 731 ॥

किञ्च सृज्यं वशे स्रष्टुर्हार्यं हर्तुर्वशे परम् ।

पातुर्वशे स्थितम् सर्वमतो विष्णोर्वशेखिलम् ॥ 732 ॥

यत्कर्तुश्च स्थितिर्वाच्या हर्तुश्चावश्यकी स्थितिः ।

न ह्यसत्कारणं दृष्टं ब्रह्मेशौ तद्वशौ हरेः ॥ 733 ॥

एतश्च स्वस्थितिः स्वीयव्यापारत्वात् स्वतो हरेः ।

अतः स्वतन्त्रता तस्य सिद्धासिद्धार्थपद्धतेः ॥ 734 ॥

न ह्यण्डजः सृजेदण्डमहङ्कारं हरो हरेत् ।

महत्तत्वं कुतः सृष्टं कुतो नष्टं विचार्यताम् ॥ 735 ॥

अतः स्वयोग्य कार्यस्य कर्तारौ तौ हरीच्छया ।

हरिस्तु कर्ता सर्वस्य भर्ता हर्ता त्रिशक्तिधृत् ॥ 736 ॥

न पिताधिपतिर्नृणां न हर्ता यामिकोपि वा ।

किन्तु रक्षक एवातो विष्णुरेव जगत्पतिः ॥ 737 ॥

दशदिक्पतिभावेन देवा ब्रह्मेशपूर्वकाः ।

कण्डाधिपतयो विष्णुस्तद्भावज्जगत्पतिः ॥ 738 ॥

अखिलैर्लोकपालैश्चाप्यदृश्यः सन्नुरुश्च सन् ।

तेषामन्तर्बहिश्च त्वं सदा विचरसीति वा ॥ 739 ॥

यं हित्वाराक्षसावेशान्मत्सरज्वरसंयुताः ।

यतमानाः पृथक् सर्वे लोकपालाः समेत्य च ॥ 740 ॥

त्रातुं न शेकुरितिवाक्कास्ति भागवते यतः ।

अखण्डाधिपतिस्तस्माद्धिविष्णुरेव न संशयः ।

मनोर्हि वागियं कैर्वा माननीया न मानवैः ॥741॥

तच्छ्रुत्वा मुनयःसर्वे विस्मिता मुक्तसंशयाः ।

भूयांसं श्रद्धधुर्विष्णुं  यतः शान्तिर्यतो भयम् ।

इति भागवते प्रोक्तं मुनीनां वचनं स्मर ॥ 742 ॥

तद्गोत्रजातः पूर्वेषां तेषां वाक्यं न विस्मर ।

यद्गोत्र प्रवरेशास्ते तानुदास्ते कथं भवान् ॥ 743 ॥

अस्य देवस्येति वेदे यथाविष्णोर्वशे हरः ।

स्पष्टं श्रुतस्तथा वेदे  न क्वापीशवशो हरिः ॥ 744 ॥

ईषेरिच्छार्थकाद्धातोः पचाद्यचिकृते सति ।

गुणे जाते पालनेच्छा कृपा यस्य स्वसेविषु ।

तस्यैषस्य न चेदेतस्येति स्याच्छब्दविन्मते ॥ 745 ॥

तस्यास्य विष्णोर्देवस्य भक्ताभीष्टस्य सेचनात् ।

मीह्ळुषो यन्मिहःसेके हविर्भियज्ञासाधनैः ।

प्रभृथं प्रभृतं शस्तं तृतीयोतिशये यतः ॥ 746 ॥

अचो हलश्च यत्पश्चात्तृतीयोसौ ततः किल ।

ततः प्रभरणे पूजात्मके सम्यक्कृते सति ॥ 747 ॥

वया भूत्यादि दानेन बन्धको वयबन्धने।

इति धातोर्हि प्रसिद्धो रुद्रस्त्रिभुवनेश्वरः ॥ 748 ॥

रुद्रियं रुद्रसम्बन्धि महित्वं महिमोच्चयम् ।

घस्येत्यादेशकरणे समुद्रियपदं यथा ।

तथा बाहुलकात्तस्माद्रौद्रमेव हि रुद्रियम् ॥ 749 ॥

विदे लेभे तद्वदेव पूर्वाभ्यासमुपैक्षत ।

पूर्वानभ्यस्तपदवीप्राप्तिं सूचयितुं श्रुतिः ॥ 750 ॥

अनावृत्तिपदप्राप्तिसूचनाय च सूत्रवत् ।
अस्मिन्नर्थे प्रमाणानां प्रसिद्धिं च हिना जगौ ॥ 751 ॥

युवामप्यश्विनौ वर्तिवर्तनं याज्ञिकान्नवत् ।
इरावद्ब्रह्मणे यस्मादिलेत्यन्नमुदीरितम् ।
डलयोरलयोश्चाभेदेन स्यादीदृशं पदम् ॥ 752 ॥

यासिष्टं तस्य कृपयैवायासिष्टं लुङीदृशम् ।
अमाञ् योगेपि यद्वेदे पदं शास्ति स पाणिनिः ॥ 753 ॥

औणादिके सन्तरूपाद्वृर्तेर्वर्तिर्भविष्यति ।
यथार्चिः सर्पिरित्यादि पदं तद्वदिदं पदम् ॥ 754 ॥

अतः स्पष्टार्थवाणीयं रुद्रस्याभीष्टदायकम्।
विष्णुं शुभगुणाम्बोधिं रुद्रादप्यधिकं जगौ ॥ 755 ॥

श्रौतोखण्डपदः सोमो नेशो वेदविदां मते ।
विश्वधिकत्वगीः सावकाशेन्द्रादिश्रुताविव ॥ 756 ॥

सोरोदीदिति वेदे हि मोदनाद्रुद्रतोदिता ।
न ते महित्वमिति तु विष्णोरसमतोदिता ॥ 757 ॥

याह्युच्छेषणभागोवैरुद्र इत्याह वेदवाक् ।
जुषेथां यज्ञमित्याद्या सा विष्णुं वक्त्यतः स राट् ॥ 758 ॥

इन्द्राविष्णू युवां यज्ञं जुषेथां द्रविणं च नः ।
धत्तं दत्तं प्रदिशतामरिष्टैर्नाशवर्जितैः ॥ 759 ॥

पथिभिर्मोक्षमार्गैर्नः पारयन्तो भवाम्बुधेः ।
परं पारं प्रापयन्ताविति यच्छ्रुतिरञ्जसा ॥ 760 ॥

ऐहिकामुष्मिकफलप्रदातारं मखस्य च ।
भोक्तारं विष्णुसूक्तस्था विष्णुं स्तौति द्विरूपिणम् ॥ 761 ॥

यतश्च रुद्राहुतिदाहस्तमद्यापि याज्ञिकाः ।
प्रक्षालयन्ति तेनासौ यज्ञोच्छिष्टाशनो ध्रुवम् ॥ 762 ॥

प्रलये वटपत्रेप्सु शेते नारायणः किल ।
तदा क्वान्ये सुरास्तस्मात्सर्वेशो विष्णुरेव हि ॥ 763 ॥

किञ्च गीतोपनिषदि सर्वं द्विपुरुषाख्यया ।
सङ्गृहीतं  हरिस्त्वेकः पुरुषोत्तम ईरितः ॥ 764 ॥

रामः प्रभू रामभृत्या देवाः सर्वेपि वानराः ।
कृष्णः प्रभुः कृष्णभृत्या देवा धर्मात्मजादयः ॥ 765 ॥

अर्हत्तमो ह्यग्रपूजामर्हत्यन्यो न संसदि ।
यथैवेह तथामुत्र तद्विष्णुरखिलप्रभुः ॥ 766 ॥

तस्मात्सर्वेश्वरो विष्णुः सर्वं सर्वत्र सर्वदा ।
प्रवर्तयति सर्वज्ञः सर्वशक्तिः सनातनः ॥ 767 ॥

तद्भूतं भूतमेतस्माद्भवच्च भवति प्रभोः ।
भाव्यं भविष्यति ह्यस्य कृपया नान्यतः क्वचित् ॥ 768 ॥

अतः सर्वेष्टलाभाय सर्वानिष्टनिवृत्तये ।
तमर्च्यमर्चय स्तुत्यं स्तुहि नम्यं नमाच्युतम् ॥ 769 ॥

ज्ञानं मानं नेति वाक्यं व्याहतं स्याद्विचारणे ।
धात्वर्थः प्रत्ययार्थश्च यतः स्थानद्वये समः ॥ 770 ॥

स्वतस्त्ववादे प्रामाण्यं कस्येति च विचारय ॥ 771 ॥

प्रज्ञप्तिः प्रमितिः प्रज्ञा प्रमा प्रज्ञानमेव हि ।
प्रमाणं स्याद्यतः शब्दाः पर्यायाः शक्तिशोधने ॥ 772 ॥

श्रवणं मननं ध्यानं दर्शनं स्मरणं तथा ।
गमनं मोचनं बन्धाद्रमणं च किमुच्यताम् ॥ 773 ॥

गर्भधानं च जननं तथोपनयनं च किं ।

यजनाध्ययने दानभोजने के विचारय ॥ 774 ॥

भावार्थकल्युडन्तोक्तिबाहुल्यस्यैव दर्शनात् ।

अर्थोसौ प्रथमप्रोक्तो मुख्यस्तस्येति मे मतिः ।

तल्ल्युटो भाववाचित्वं मरणेपि न गच्छति ॥ 775 ॥

प्रमाणीभूतभावार्थमनुसृत्यैव तल्ल्युटः ।

करणेपि प्रवृत्तिः स्यात् धात्वर्थस्य प्रवेशनात् ॥ 776 ॥

तत्केवलं प्रमाणं स करणेऽनुप्रमाणता ।

यतोनुशासनं चानु ततोप्येतद्गुणोचितम् ॥ 777 ॥

आधाराख्याधिकरणं भूम्यादिर्न प्रयोगवान् ॥ 778 ॥

नारायणादिशब्देषु ल्युटोधिकरणे गतिं ।

सूचयन्नेव तं प्राह कर्त्रर्थेनानुशासितम् ॥ 779 ॥

षड्कारकमते कर्ता नैवाधिकरणं खिल।

कर्तृप्रामाण्यवादं तद्धन्ति पाणिनिरेव सः ॥ 780 ॥

याताथ्र्यमेव  प्रामाण्यं यतः स्ववचने जनः।

प्रमाणतायै ने वाक्यं यतार्थमिति शंसति ।

व्यवहारानुकूलत्वाल्लक्षणं च तदेव तत् ॥ 781 ॥

यदा यत्र यथा योऽर्थस्तथातद्विषयीकृतौ।

पारम्पर्यैण साक्षाद्वा यतार्थं वक्ति तज्जनः ॥ 782 ॥

प्रामाण्यवादे ज्ञानस्य प्रामाण्यं वर्तते किल।

स्मर्तान्यस्यास्य विस्मर्ता लक्षणोक्तौ स किं बुधः॥ 783 ॥

अदुष्टकरणं चक्षुः प्रमाव्याप्तं यथा भवेत् ।

तथा प्रमाता जीवोपि प्रमाव्याप्तः कुतो न ते ॥ 784 ॥

अशिष्टकर्तृप्रामाण्ये कर्तृमात्रे तदुच्यताम् ।

न चेत्सभा स्वशिष्टस्त्वं शिष्टमध्ये भविष्यसि ॥ 785 ॥

यदि स्मृतेर्न मानत्वं न स्यात्तर्ह्यनुभूतिषु ।

समानाविषयज्ञानद्वये यन्न द्वयी गतिः ॥ 786 ॥

यस्मिन् काले यत्र देशे तद्घटं संस्मरेत् खिल।

तदानीं तत्र सोर्थो भूदिदानीमस्ति वा न वा ।

स्मर्तारोपीत्थमेवाहुस्तत्केनास्याममानता॥ 787॥

कालात्ययस्य संस्काराभावान्न स्मरणं यदि।
तर्हि तत्कालमद्यापि वर्तमानं च न स्मरेत् ।
घटमात्रग्राहिणीयं कुतो वा मानतां त्यजेत् ॥ 788॥

सुहृद्भावेन पृच्छन्तं प्रति तूत्तरमुच्यते ।
यथानुभवकालोपि साक्षिणैवोपनीयते ।
तथा तदप्ययोप्यत्र साक्षिणैवोपनीयताम् ॥ 789 ॥

मनोन्तः करणं तस्य साचिव्यं कुरुते हि सः ।
ज्ञातज्ञापनदोषं च दूरीचक्रे ततः स्मृतिः ॥ 790 ॥

अतो ज्ञानस्य मानत्वमपवादेन हीयते ।
न चेज्ज्ञानग्राहिणैव गृह्यते नात्र संशयः ।
अपौरुषेयवेदोक्तेः प्रामाण्यं स्थिरमेव तत् ॥791 ॥

आनन्दश्रुतितो ब्रह्मानन्दरूपं प्रदीप्यते ।
तर्हि प्रियशिरस्त्वादि श्रुतेरानन्दमूर्तिता ॥ 792 ॥

अप्यङ्गीक्रियतां नो चेन्नोभयं च प्रसिद्ध्यति ।
जयितार्किकबालस्यात्त्वं तु भूयाः पराजयी ॥ 793 ॥

यद्यैक्यं निर्गुणत्वं च वाक्यस्य बलतस्तव ।
तर्हि भेदश्च सुगुणास्तत्तद्वाक्यबलान्मम ॥ 794 ॥

यदि सिद्धानुवादेन मद्वाक्यं दुर्बलं तव ।
सिद्धत्वद्ब्रह्मवाक्तर्हि गर्ह्या मह्यं न रोचते ॥ 795 ॥

अपूर्वशशश्रृङ्गोक्त्या बलवत्या तदापतेत् ।
परेण पूर्वबाधश्चेद्ब्रह्मवृत्त्या निवर्त्यताम् ॥ 796 ॥

पूर्वेणपरबाधश्चेद्वन्ध्यान्मुक्तिर्निवर्त्यताम् ।
स्तुत्यं मिथ्या यदि भवेद्दृश्यं मिथ्या न किं तव ॥ 797 ॥

श्रुत्युत्पन्नदृशेः सच्चेच्छ्रुत्युत्पन्नस्तुतेश्च सन् ।
एकपङ्ग्दिस्थगेहानां दाहादाहौ कथं वद ।
प्रतिबन्दी ततो बन्दी करोति भवतः श्रुतिम् ॥ 798 ॥

किं चाखण्डार्थवादाख्यमयश्चणकमश्नुतः ।
दन्ताः पेतुर्भवद्वाक्यभुजङ्गस्य फणे न किम् ॥ 799 ॥

अपौरुषेयनिर्दोषवाक्येष्वेषु यदीष्यते ।
सर्वथाऽमानता तर्हि गता प्रच्छन्नबौद्धता ॥ 800 ॥

अमानत्वस्वतस्त्वाख्यतत्वस्य व्यक्तवक्तरि ।
अमानतकालकूटं यदि वक्त्रे वसेत्तव ।
समानोच्चारणे शक्तिर्गमिष्यति मरिष्यसि ॥ 801 ॥

तस्मादबाधितार्थानि वाक्यानि स्युर्यथाश्रुतम् ।
बाधितार्थानि वाक्यानि योग्यार्थेषु नयेद्बुधः ॥ 802 ॥

निर्दुःखसुखभोगाख्यो मोक्षो वाच्यस्त्वया मया ।
यत्रत्वस्येति वाक्यं तु ज्ञानमात्रं निषेधति ॥ 803 ॥

तच्छ्रुत्वा तार्किको हृष्येत्तत्सा तर्केण तार्किकम् ।
हन्तुं सन्त्वखिला भोगा मुक्तौ सर्वजनप्रियाः ॥ 804 ॥

सुखानुभवसिद्ध्यर्थं स्वावेद्यत्वं परित्यज।
सुखाविषयकज्ज्ञानरूपं सुखमयं मनः ।
किं तेन फलवत्किन्तु तद्द्रष्टुः साक्षिणः फलम् ॥ 805 ॥

किञ्चाभिमानिव्यपदेशस्त्वित्यत्र स सूत्रकृत् ।
यतो मृदब्रवीदित्याद्यापातानुपपन्नवाक् ।
तद्वदेव परेत्याह तन्नेत्याह मतं तव ॥ 806 ॥

प्रत्युद्गमं प्रश्रयणमभिवादनमेव च ।
गुहाशयाय कुर्वन्ति न तु तद्देहमानिने ॥ 807 ॥

इति यः प्राह गिरिशः सोपि नेत्याह ते मतम् ।
गुहाशयो देहमानीत्युक्तौ यद्देहगौ जगौ ॥ 808 ॥

यद्देहमानिनं प्राह जीवमेव महेश्वरः ।

सोत्यल्पगुणवाक्यानि जीवेष्वेवानुशास्ति तत् ॥ 809 ॥

उपाचारार्हसुगुणस्तोमोक्तीः परमात्मनि ।

सोन्वशिक्षद्यतः प्रत्युद्गमाद्यमदिशत् प्रभोः ॥ 810 ॥

अतः श्रुतिपुराणादौ रुद्राद्युत्कर्षवाक्तु या ।

सान्तर्याम्यधिदैवादिष्वित्युक्तान्तरगोचरा ॥ 811 ॥

अधोक्षजो मे मनसा विधीयत इतीश्वरः ।

स एव तं यद्यनक्ति गुहाशयपदोदितम् ॥ 812 ॥

एवं च विष्णोरुत्कर्षे सर्वागमगिरां भरम् ।

यो हरो वक्ति सर्वस्य स गुरुर्नात्र संशयः ।

त्रिलोचनमतायास्मै को वा द्युह्येद्विलोचनः ॥ 813 ॥

भेदस्य व्यावहार्यत्वे स्यादैक्यं प्रातिभासिकम् ।

भेदो ह्यैक्यनिषेधात्मा तस्याद्यैव निषिद्धता ।

किं न दद्यात्त्वदद्वैते ब्रह्मज्ञानान्यबाध्यताम् ॥ 814 ॥

इदानीमेव बाध्यत्वाच्युक्तिरूप्येति सा दशा ।

अतो वृद्ध्यर्थिनश्चित्रं मूलनाशो भवेत्तव ॥ 815 ॥

एवमेव त्रिकालेषु निषेधाभावरूपिणी ।

सत्यता व्यावहार्या चेन्मिथ्यात्वं प्रातिभासिकम् ॥ 816 ॥

भवेत्पूर्वोक्तमार्गेण गुणाभावनिषेधकाः ।

अभावाभावरूपत्वाद्भावरूपा गुणाः प्रभोः ॥817 ॥

व्यावहार्या यदि तदा नैर्गुण्यं प्रातिभासिकम् ।

भवेद्घटभूमेः किं सघटाभूर्न बाधिका ॥ 818 ॥

प्रातिभासिकमानानि मानान्यासन् यतस्तव ।

तस्मान्मन्मानमार्ताण्डः प्रलयार्को भवेद्द्विषाम् ॥ 819 ॥

ऐक्यनैर्गुण्यमिथ्यात्वान्यधःकृत्यैव यद्भवान् ।

भेदसद्गुणसत्यत्वान्यालम्ब्येश्वरपूजनम् ॥ 820 ॥

गुणानुस्मरणं श्रौतस्मार्तकर्माणि चानिशं ।

करोषि केन कस्यातो बाधोऽनादौ भवेद्वद ॥ 821 ॥

चिदेकतां न बाधेत यद्ययं तर्हि साप्यमुं ।

न बाधेत न्यायसाम्यात्तद्भेदोभूदबाधितः ॥ 822 ॥

विशिष्टैक्यपरं वाक्यं प्रातिभासिकमानताम् ।

गतं चितोरेकतातन्मानाभावादसत्यभूत् ॥ 823 ॥

अतत्वावेदकं वाक्यमुपेक्ष्यं भेदवाक्यवत् ।

कः शुक्तिरूप्यतावाक्यमुद्दिधीर्षति शुद्धधीः ॥ 824 ॥

न चेद्भेदप्रमाणं च दृष्टेर्थे व्यावहारिके ।

जीवब्रह्मचितोरेव भेदं लक्षणया वदेत् ॥ 825 ॥

अतः पुनश्चिदेकत्वं प्रातिभासिकतां गतम् ।

एवं च घट्टकुट्यान्ते प्रभातोभून्न संशयः ॥ 826 ॥

वस्तुतस्तु चितोरेव विशेषणबलात्तयोः ।

भिदा सम्पाद्यते तेन चोद्यस्यावसरोपि न ॥ 827 ॥

अन्यदौपाधिकं सर्वमुपाधौ सति जायते ।

उपाध्यपगमे गच्छेत् भेदस्तु न तथा किल ॥ 828 ॥

स्वसम्बन्ध्येकदेशस्य स्वासम्बन्धिप्रदेशतः ।

भेदं सकालयेत्किं स्याद्घटाभ्रान्तर्घटाद्भिदा ॥ 829 ॥

अतः स्वतो विशेषं वा भेदं वा भेद्यवस्तुनि ।

योपेक्षते स्वयोगाय स्वयमेव कथं पुनः ।

कुर्यादुपाधिस्तौ पूर्वौ न हि स स्वपितुः पिता ॥ 830 ॥

वृक्षाग्रे कपिसंयोगो वृक्षमूले परं न सः ।

भावाभावविरोधस्य न चेच्छान्तिर्भविष्यति ।

तत्संयोगस्वभावाच्च परिहारो भवेन्न ते ॥ 831 ॥

एवं च भेदमात्रस्योपाधेर्जन्म न युक्तिमत् ।

तद्विद्यमानभेदस्य ज्ञापकोसौ न कारकः ॥ 832 ॥

अतो विशिष्ट भेदश्च स्वतश्चिद्भेदमाक्षिपेत्।

द्विर्बद्धवेदाद्भादस्तच्चिदैक्यस्यैव घातकः॥ 833॥

तद्यामिकानां सदसि किं स्यात्तस्करकैतवैः ।

उक्तिव्यत्यासेपि कुर्युश्चौर्यस्य स्थैर्यमेव ते ॥ 834 ॥

परेऽव्यये सर्व एकीभवन्तीति च या श्रुतिः ।

सा च गोष्ठे गाव एकीभवन्तीत्यादि वाक्यवत् ।

मुक्तानामेकतामाह गवामिव परस्परम् ॥ 835 ॥

आधारं गोष्ठवद्ब्रह्म वरं सर्वोत्तमत्वतः।

पूर्णत्वतो वा महिमव्ययस्याभावतोऽव्ययम् ॥ 836॥

अनुशास्ति न चेत्विस्त्वां हीनस्तीति मतिर्मम।

अभूततद्भाववादी भूततद्भाववादिनम् ॥ 837॥

कालानां कर्मणां चैव जडानां कथमेकता ।
परेणैकीभवन्तीति प्रयोगश्च भवेत्तदा ।
सप्तमीयं भवद्ग्रन्थस्याष्टमीं कुरुते सदा ॥ 838 ॥

वक्ति कारणमात्रस्य सत्यतां मृत्तिकाश्रुतिः ।
कार्यमात्रस्य सद्भावं वक्ति कार्ष्णायसश्रुतिः ॥ 839 ॥

उपादानस्य सत्यत्वे कार्यसत्त्वमभूद्बलात् ।
उपादेयस्य सत्यत्वे तत्सत्वं च भवेद्बलात् ।
अतो द्विर्बद्धसत्यत्वं को वा मोचयितुं क्षमः ॥ 840 ॥

वाचारम्भणवाक् तस्माद्यथापूर्वमिति श्रुतेः ।
नामरूपात्मकस्यास्य वक्त्येकविधतां सदा ।
उक्तं विकारसत्यत्वं त्वदर्थं बाधते यतः ॥ 841 ॥

अक्लीबेन सहोक्तौ च क्लीबोसौ शिष्यते किल ।
शिष्यमाणस्य तस्यैकवद्भावोप्युचितः किल ॥ 842 ॥

मृज्ज्ञाने सर्वमृत्कार्यज्ञानं सर्वत्र सर्वदा ।
नामाद्यव्यत्यये सत्येव स्यादित्याह तं च वाक् ॥ 843 ॥

व्यत्यासाभावतः स्वोक्तसत्यत्वस्थापनाय च ।
महावाक्योक्ततत्वेस्मिन् व्यावहारिकता च न ॥ 844 ॥

एवकारोकारणस्याकार्यस्य च न सत्यता ।

इत्याह तेन सत्तायास्त्रैविध्यं प्रत्यषिध्यत ॥ 845 ॥

यन्नामरूपयोश्चान्यथात्वं न स कदान्यथा ।

कार्यकारणरूपं च नामरूपात्मकं जगत् ।

द्वेधा निर्दिश्य तत्सत्त्वमपि वक्ति सयुक्तिकम् ॥ 846 ॥

यदामृदंति विज्ञाता सादृश्याज्ञापयेज्जगत्।

तदा समर्थः सामर्थ्याद्विज्ञातः पुरुषोत्तमः।

कथं न दद्यात्सार्वज्ञमिति कैमुत्यतः प्रभोः ॥ 847॥

सार्वज्ञदानशक्तिं सा बोधयन्ती मुहुर्मुहुः।

निदर्शनत्रयमिदं नृणां प्रादर्शयच्छ्रुतिः॥ 848॥

इत्येव वाच्यः श्रुत्यर्थो नो चेत्कुप्येदियम् कृतिः।

हयग्रीवप्रासादोत्थसामर्थ्यकृतकौतुका ॥ 849॥

श्रुत्या द्वितीयमात्रस्य निषेधे सति ते मते ।

अत्यन्ताभावोपि नेति द्वितीयं पुनरापतेत् ॥ 850॥

भावस्यैव निषेधे सत्यभावाभावसम्भवात् ।

तदाकारेण सकलं द्वितीयं पुनरापतेत् ॥ 851 ॥

भावस्वरूपमात्रस्यासत्त्वात्तस्यापि बाधने ।

ब्राह्म्यश्चितोपि बाधेन द्वितीयं पुनरापतेत् ॥ 852 ॥

ब्रह्मरूपस्य भावस्यानिषेधे तद्गुणाम्बुधेः।

अबाधसम्भवेन त्वद्वितीयं पुनरापतेत् ॥ 853 ॥

एकशेषेण तद्बाधे पुनर्ज्ञाननिषेधनात्।

ब्रह्मणो जडतापत्त्या द्वितीयं पुनरापतेत् ॥ 854 ॥

श्रुत्यबाधे वेदरूपं द्वितीयं पुनरापतेत्।

श्रुतेर्बाधे त्वबाध्यं तद्द्वितीयं पुनरापतेत् ॥ 855 ॥

विश्वान्यद्ब्रह्म नाशास्यं द्वितीयस्यैव दूषणे।

तच्छेशेन्यस्य तन्यायाद्द्वितीयं पुनरापतेत् ॥ 856 ॥

अभावस्य यथा रक्षा वाक्यप्रामाण्यगुप्तये ।

तथा भावस्य रक्षायां द्वितीयं पुनरापतेत् ॥ 857 ॥

अन्योन्याभावारूपत्वाभावाद्भिन्नं भवन्मते ।

भेदपञ्चकरूपं च द्वितीयं पुनरापतेत् ॥ 858 ॥

दशप्रमतिनामा मे गुरुस्त्रिदशतोचितः ।

योदीदिशद्दोषमेकं दूष्येषु दशसु प्रभुः ॥ 859 ॥

किं च द्वितीयाज्ञानस्य कार्यत्वाद्ब्रह्मणो जगत् ।

तृतीयं तेन गौर्दोग्ध्री विद्यते तेन काचन ॥ 860 ॥

यदखण्डार्थवादी त्वं तृणखण्डं च नादिशः ।

तैलं धूलिषु निक्षिप्तं पिण्याकं भस्मसात्कृतम् ।

निषेधो न निषेध्यं न केन वा गौर्जिजीविषेत् ॥ 861 ॥

एवं निराशास्ताः सर्वाः क्रन्दन्त्यो वाजिनोनुगाः ।

वाजि किङ्करमध्वाख्ययोगीन्द्रेण पदे पदे ॥ 862 ॥

दत्तग्रासाः सतां वृन्दारण्यमेत्य कृतोत्सवाः ।

गोविन्दमेव परितः प्रापुरित्यतिमङ्गलम् ॥ 863 ॥

ईशात्सर्वेश्वराद्विष्णोरपेतस्य ततः प्रभोः ।

ब्रह्मणस्तु द्वितीयेपि ब्रह्मण्यभिनिवेशतः ॥ 864 ॥

निर्गुणाख्येऽभिमानेन भयं भवति यन्नृणां ।

विपर्ययो स्मृतिश्च स्यान्मुकुन्दब्रह्ममोचनात् ॥ 865 ॥

सगुणस्य द्वितीयं हि निर्गुणं स्यान्न चापरम् ।

निरर्थोसि निरर्थाख्यभेदकं यदि मुञ्चसि ॥ 866 ॥

द्वतीयकोटिस्थेशात्ते द्वितीयं स्यात्तदेव हि ॥ 867 ॥

अतो भक्त्या तमेवेशं भजेद्यश्च गुरुर्भुवि ।
देवता च भवेत्तादृशाचार्यै यत्नवान् बुधः।
इति वाक्यार्थमालोच्य त्यजान्यद्भज न प्रभुम् ॥ 868 ॥

अविद्यमानोह्यत्यन्तासन्नपि द्वयशब्दितः ।
द्वितीयो निर्गुणाख्यात्मा ध्यातुर्नैर्गुण्यवादिनः ॥ 869 ॥

दुर्धिया भाति तत्वं तु तन्न किं त्वच्युताभिधः ।
अस्मात्पद्यद्वयात्पूर्ववद्ये स्पष्टोदितः किल ।
उपर्युपरि चक्राङ्कोधोधो नारायणश्च यः ॥ 870 ॥

दैवत्वेनासदीशादेर्वा द्वयस्याग्रहाच्च भीः ।
गुरुत्वेन तु तत्सेवाऽसूचिपूर्वविशेषणात् ॥ 871 ॥

तत्तेषां निर्गुणादीनां प्राप्त्यै कर्मादिकं चरत् ।
बुधो निरुन्ध्याद्धि मनो विष्णावेव नियोजयेत् ॥ 872 ॥

मुकुन्दादच्युताख्याच्च ततः स्यादभयं किल ।
असतः सत्त्वशून्यस्य निर्गुणस्यात्मभावनात् ॥ 873 ॥

उद्विग्नबुद्धेः पक्षिः श्वाद्यात्मनाभीरभूद्धिया ।
विश्वान्तः पाति रुद्रादेर्वा भीर्विश्वस्वभावतः ॥ 874 ॥

सा यत्राच्युतपादाब्जोपासनायां निवर्तते ।
सर्वात्मना विश्वपदमित्तं पञ्चार्थवद्ध्रुवं ॥ 875 ॥

नो चेत्सार्वजनीनोक्तित्यागो निर्हेतुको भवेत् ।
वादीभपञ्चवक्त्राभमदो विश्वपदं ततः ॥ 876 ॥

अत्र षण्मतधर्माणां मध्ये मध्वमताध्वना ।
अकुतश्चिद्भयं मन्ये तदेवेत्यनुशास्ति तत् ॥ 877 ॥

नित्यमित्युक्तितो मुक्तौ चोपास्तिमनुशास्ति सः ।
पदाम्बुजोक्त्या चाकारं सौन्दर्यादिगुणानपि ॥ 878 ॥

प्राचीनपद्यं तद्रीत्या सर्वं निर्णेयमुत्तरम् ।
पुञ्जं भयानां भुञ्जानं तं जानन् को भयम् जयेत् ॥ 879

यं भीर्बिभेति तं भीरुः सम्भजेत् स्तम्भसम्भवम् ।
इति प्राचीनपद्यस्य हृदयं हृदयो हि ते ॥ 880 ॥

यस्मादुपास्तिमेवाह मुक्त्यै मुनिपरम्परा ।
तस्मान्मिथ्योपास्तिवार्ता हृत्स्था गर्तेपतत्त्व ॥ 881 ॥

एकैकस्यापि पशुपक्ष्यादिभावेन देहिनः ।
नानात्त्वं संसृतावेव मुक्तावेकप्रकारता ॥ 882 ॥

राजादितुच्छं म्लेच्छादेरीश्वरस्यापि तन्त्रता ।
संसृतौ स्याद्विमुक्तौ तु स्वभावेश्वरतन्त्रता ।
नापरस्य ततो मुक्तिरेव प्राथ्या विवेकिभिः ॥ 883 ॥

इत्याह भगवान् व्यासो यस्माद्भागवते स्फुटम् ।
ततोप्यभवमन्विच्छन्नुपासीताच्युतं प्रभुम् ॥ 884 ॥

धर्मान् भागवतान् पृष्टः कविर्वादिविवादतः ।
भगवन्तं च तद्धर्मं विविच्येत्थमवर्णयत् ॥ 885 ॥

अच्युतो भगवांस्तस्योपास्तिर्धर्मो महान् किल।
भगवत्यर्पणं च स्यात्तद्धर्मोऽखिलकर्मणाम् ॥ 886 ॥

विमतो विष्णुरेवैको भगवानभयत्वतः ।
व्यतिरेकेण नाशादिभयग्रस्तजडादिवत् ।
भक्ताभयकरत्वाद्वा भगवान् स महाप्रभुः ॥ 887 ॥

विमतो निर्गुणादिर्न भगवान् स भयत्वतः ।
अन्वयेनैव सभयचैत्रमैत्रादिजीववत् ॥ 888 ॥

विमतं विष्णुभजनं धर्मो भागवतो भवे ।
भवभीभङ्गहेतुत्वाद्व्यतिरेकेण भुक्तिवत् ॥ 889 ॥

विमता निर्गुणाद्यर्चा धर्मो भागवतो न सा ।

भयहेतुत्वतः कुम्भीपाकसाधनपापवत् ॥ 890 ॥

इति पञ्चानुमानानि सोभिप्रैति कविः कविः ॥ 891 ॥

यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः ।

नानात्वमात्मनो यावत्तावदीश्वरतन्त्रता ॥ 892 ॥

यावदस्यास्वतन्त्रत्वं तावदीश्वरतो भयम् ।

य एतत्समुपासीरंस्ते मुह्यन्ति शुचार्पिताः ॥ 893 ॥

इति भागवते स्पष्टं मुक्तावद्वैतमिच्छताम् ।

भेदादेः संसृतावेव सत्वं संसदि शंसताम् ।

मतं सर्वमनूद्यान्ते निषेधोपि विधीयते ॥ 894 ॥

य एतत्पूर्वकथितं प्रमेयं समुपासते ।

तेऽन्धेतमसि शोकेन मूर्छां यान्तीति यज्जगौ ॥ 895 ॥

अतो भागवतं सर्वं मुक्तौ चेश्वरतन्त्रताम् ।

भेदस्य च सदा सत्वं शास्तीत्येव मनोरमम् ॥ 896 ॥

भगवत्परमेवाहुर्यतो भागवतं बुधाः ।

भगवान् भाग्यवांश्च स्यात्पूज्यश्च स्यान्न चापरः ।

अतोऽस्मिन्निर्गुणोस्योक्तिरैक्योक्तिश्च न शोभते ॥ 897 ॥

कदाचिन्नास्तितारूपं मिथ्यात्वं तु तवापि न ।

लयेष्वभावमात्रेण साध्यसिद्धिप्रसङ्गतः ॥ 898 ॥

त्रिकालनास्तितारूपो योत्यन्ताभाव उच्यते ।

सत्तार्थकत्वाद्भूधातोरत्यन्तासत्त्वमेव तत् ॥ 899 ॥

सत्त्वप्रत्यक्षबलतो यद्यसत्त्वं निवार्यते ।

प्रमारूपं तदध्यक्षं ब्रह्मणिवोभयं क्षिपेत् ॥ 900 ॥

भ्रमरूपं यदि भवेत्साह्यतद्वति तस्य धीः ।

सत्त्वाभावस्यैव तर्हि द्विर्बद्धस्य सुबद्धता ॥ 901 ॥

प्रत्यक्षं चाक्षसंयुक्तचक्षुरादीन्द्रियैर्यदि ।

तर्हीन्द्रियाणामर्थानां संयोगोत्पत्तये पुरा ।

सत्तापि वाच्या तच्चोच्या हन्ताभूदनुमैव ते ॥ 902 ॥

अतो सत्त्वनिरासा या नीतप्रत्यक्षशक्तितः ।

त्रिकालनास्तितारूपमिथ्यात्वस्यापि बाधनात् ॥ 903 ॥

न चाम्बुना कर्णलग्नप्राञ्चीनाम्बुनिवृत्तिमत् ।

अनुमा बाधितैवाभूत्साथों भूत्तस्करस्तव ॥ 904 ॥

असन्निकृष्टाक्षजं तदसत्त्वस्यैव साधकम् ।

नृशिरः सङ्गि यच्छक्षुर्न तच्छृङ्गेण सङ्गवत् ॥ 905 ॥

एवं चासन्निकृष्टाक्ष्णा शुक्तिरूप्यनिरीक्षणं ।

असत्तां गमयेत्तस्य न त्वसत्रो विभिन्नताम् ।

अर्थापत्त्याप्यनर्थोभून्नत्वर्थोभूत्परस्य तत् ॥ 906 ॥

व्यावहारिकसत्ता च भ्रान्तऽभ्रान्तविकल्पने ।

असत्त्वसाधिका वा स्यात्स्याद्वा मिथ्यात्व बाधिका ॥ 907 ॥

सद्विविक्तत्वमपि ते सत्त्वानाधारतैव यत् ।

अतस्तस्यापि साध्यत्वे स्यान्नृशृङ्गोपमं जगत् ॥ 909 ॥

अतो मिथ्यात्ववादेस्मिन् ब्रह्मान्यत्सकलं जगत् ।

असदेवाभवत्तेन माने स्याद्दूषणं बहु ॥ 909 ॥

साध्यबाध्याश्रयासिद्धी स्वरूपासिद्धिरेव च ।

व्याप्यत्वासिद्धता च स्याद्दृष्टान्तासिद्धिरेव च ॥ 910 ॥

मानानुगस्य ते मानोप्यपसिद्धान्तदोषतः ।

भग्नस्स्यात्सत्वमात्रस्य बाधे तस्य तु धर्मिणाम् ।

स्वस्वरूपेण चाबाधे सदद्वैतमतक्षतिः ॥ 911 ॥

यथाऽबाध्यब्रह्मरूपं सदेकमभवत्तथा ।

जडाबाध्यजगद्रूपमपि यस्मादभूद्धि सत् ॥ 912 ॥

स्वरूपस्यापि बाधे तु प्रागुक्तं दूषणं भवेत् ।

एवं चोभयतः पाशारज्जुर्बध्नाति ते गलम् ॥ 913 ॥

अन्यत्त्वं सदसद्भ्यां च यदि मिथ्यात्वमीर्यते ।

अप्रसिद्धं तदा साध्यं भवेद्धि प्रतिवादिनम् ॥ 914 ॥

दृष्टान्ते साध्यवैकल्यशल्यं चैव भवेत्तव ।

सत्त्वभ्रान्तिः सन्निकर्षशून्यप्रत्यक्षमेव च ॥ 915 ॥

असत्त्वं स्थिरयेदुक्तविधया न निवारयेत् ।

अतः प्रसाध्यकाङ्क्षं च नासीदेतन्निदर्शनम् ॥ 916 ॥

किञ्चासत्त्वनिषेधेपि सत्त्वस्याभावमात्रतः ।

प्रागुक्तपञ्चदोषाणां नैवोद्धारो भवेत्तव ॥ 917 ॥

भाष्यारोपितधूमस्य सत्त्वाभावेन केवलम् ।
असद्विलक्षणस्यापि किं नासिद्धिर्भवन्मते ॥ 918 ॥

एवं च सद्विविक्तेषु रज्जुसर्पादिकेषु ते ।
असद्भिन्नेष्वपि यतस्तद्योग्यार्थौ न दृश्यते ॥ 919 ॥

तत्सत्त्वरहितत्वाख्यमसत्त्वं सर्वसम्मतम् ।
मिथ्यात्वमस्तु सर्वत्र पुनस्तस्यासतोन्यता ।
व्यर्था किमर्थं स्वीकार्या या व्याहत्याच दूषयेत् ॥ 920 ॥

दोषे सत्येव दृश्यत्वं योगस्यायोग्यता तथा ।
असत्त्वस्यैव सिद्ध्यर्थं लिङ्गभूते न संशयः ।
उक्ता सिद्ध्यादिदोषाणां तस्मान्नास्ति तदौषधम् ॥ 921 ॥

व्यावहारिकसत्ता च प्रागुक्तेनैव वर्त्मना ।
न विकल्पसहा तस्मान्मिथ्यात्वाशां परित्यज ॥ 922 ॥

ज्ञानेन नाश्यता या तु सापि नास्ति निदर्शने ॥ 923 ॥

किञ्च भेदे तव मतेप्यनादौ ज्ञाननाश्यता ।
त्वद्रीत्यैव न यस्मात्स्वोपादेयक्षयरूपिणी ।
अतोंशतो बाधिताभूत्त्वन्नयेनैव तेनुमा ॥ 924 ॥

हा हन्त किं ते स्खलनमन्धस्येव पदे पदे ।

अविद्योपादानता च तमसीव न दूषणम् ॥ 925 ॥

अज्ञानस्यानुपादेयमज्ञानं सत्यमेव यत् ।

अज्ञानोपादानतया किं नश्छिन्नं ततो वद ॥ 926 ॥

स्वात्यन्ताभावसाहित्यं विरोधाद्बाधितं तव ।

अविरोधे जगत्सत्त्वसिद्धेर्मम न दूषणम् ॥ 927 ॥

किञ्चैवं सदसत्त्वाख्यपक्षस्याप्यविरोधतः ।

अनिर्वाच्यत्ववृक्षस्य मूलच्छेदोभवत्तव ॥ 928 ॥

दृश्यध्यस्तत्वरूपं यद्दृश्यत्वं तव सम्मतम् ।

साध्यावैशिष्ट्यदोषेण न तन्मिथ्यात्वसाधकम् ॥ 929 ॥

हेतोरन्यतरासिद्धिश्चस्यादीदृशि साधने ।

बाध्यत्वं च ममासिद्धं केन साध्यं प्रसाध्यते ॥ 930 ॥

नापि वृत्तिव्याप्यता ते मते भवति दृश्यता ।

सम्बन्धस्यानिरुक्त्या च ब्रह्मणि व्यभिचारतः ।

यतस्ते चरमावृत्तिर्ब्रह्मचिन्मात्रगोचरा ॥ 931 ॥

साक्षिवेद्ये शुक्तिरूप्ये त्वद्दृष्टान्तेप्यवर्तनात् ।

साक्षिवेद्याज्ञानपूर्वे भागासिद्धिप्रसङ्गतः ॥ 932 ॥

कथञ्चिद्युक्तिवेद्यत्वाच्छ्रुतिवेद्यत्वतश्च तत् ।

वृत्तिव्याप्यं यदि तदा स्यादैक्ये व्यभिचारिता ॥ 933 ॥

अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि ।

इत्युक्तेः शशशृङ्गादौ त्वद्रीत्या व्यभिचारिता ॥ 934 ॥

वृत्त्याकाराकारितायां हेत्वसिद्धिश्च मे भवेत् ॥ 935 ॥

किञ्च दृश्यत्वजडतापरिच्छिन्नत्वपूर्वके ।

धर्मे सत्यपि शुक्तिस्तेन मिथ्या केन हेतुना ॥ 936 ॥

तद्रूप्यस्यैव मिथ्यात्वे बाध एव प्रयोजकः ।

वाच्यस्त्वयापि न त्वन्यः स तु नास्त्येव मन्यते ॥ 937 ॥

निष्प्रकारकधीपक्षे बाधस्तु भवतोपि न ।

नास्तित्वाकारबोधं यद्बाधमाहुर्विपश्चितः ॥ 938 ॥

बाधबाधेपि बाधेन तदभावे स एव सन् ।

अतो मिथ्यत्ववादस्ते युक्तेर्मिथ्यात्वमानयत् ॥ 939 ॥

सत्यत्ववादिनामेव सहायमकोरदहो ।

विस्तरस्त्वस्य सर्वस्य मूलशास्त्रे प्रदृश्यताम् ॥ 940 ॥

चर्चेयं परीत्यैव  परावद्याभिधित्सया ।

तन्मन्ये माध्वराद्धान्तं विद्वन्मकुटवर्धनम् ॥ 941 ॥

जरतीभिः कारुरहमश्वोवोढेति वाक् त्रयम् ।

वक्ति वैकुण्ठमाहात्म्यं तच्च किञ्चिद्विवृण्महे ॥ 942 ॥

कर्मारः कारुजातीयो यत्र मुक्तौ हरेः पुरि ।

जरतीभिः प्रवृद्धाभिरोषधीभिश्शिवात्मभिः ॥ 943 ॥

वंशादिभिर्ध्वजं चापं बाणवेणुरथादिकम् ।

क्रीडायै रचितं दिव्यं शाकुनानां पतत्रिणाम् ॥ 944 ॥

पर्णैः पत्रैः शिखण्डाद्यैर्द्युभिर्द्योतनकारिभिः ।

अश्मभिश्चित्ररत्नैश्च चित्रितं पुनरिच्छति ।

हिरण्यवन्तं कर्तुं च तत्र माममृतं कृधि ॥ 945 ॥

प्रायपाठबलादत्राप्येतद्वाक्यं किलोह्यते ।

परिस्रवस्त्रावयेन्दो तत्र मामिति वा भवेत् ॥ 946 ॥

यत्र कारुरहं त्वष्टा यत्रास्ते जातितो भिषक् ।

यत्रोपलक्षेपणीचननानानाविधः किल ॥ 947 ॥

नानाधियस्तारतम्यबुद्धयो वसवोखिलाः ।

विचित्रवसुयुक्ता वा मुक्ताः सर्वेऽनुगा इव ॥ 948 ॥

वयं तस्थिम कृष्णस्य तत्र मामममृतं कृधि ।

अवतारेऽनुगमनाभावात्सर्वेऽनुगा इव ॥ 949 ॥

यत्र विष्णोः समीपस्थसामन्तस्य प्रधानिनः ।

उपमन्त्रिपदोक्तस्य मुक्तशक्रादिरूपिणः ॥ 950 ॥

रथं ज्ञानानन्दमयमश्वोमुक्ततुरङ्गमः ।

सुखं सुखेनैव वोढा पर्यङ्क प्रापयिता किल ॥ 951 ॥

रोमण्वन्तौ रोमवन्तौ मेषौ ज्ञानशरीरिणौ ।

तौ भेदौ पुरतस्तस्य मिथस्ताडनकारिणौ ॥ 952 ॥

सुखं सुखेनैव दुःखं वैराद्यं तु न किञ्चन ।

मुक्तत्वात्तस्य शेपोण्डं महत्सुखमयं सदा ॥ 953 ॥

हंसानां मन्त्रिणस्तस्य वोढारौ यत्र लीलया ।

यद्भिन्त इति भेदौ च स्यातां भेदनकारिणौ ॥ 954 ॥

यदित्थं यत्र मण्डूका वाः सरोवरवारि च ।

इच्छन्ति चित्सुखाकारास्तत्र मामृतं कृधि ।

जात्येकवचनं चेदमेकमेकं सरः क्व तत् ॥ 955 ॥

एवं नानाविधा मुक्ता यत्र तत्रामृतं कृधि ।

इत्युक्त्या तद्गजीवानां मुक्तत्वं सुतरामभूत् ॥ 956 ॥

तदुत्तरर्चां चर्चा च किञ्चित्किञ्चिद्विविच्यते ।

अमृते अक्षिते यत्र लोके सुकृतकर्मभिः ।

सुष्टुचीर्णनिवृत्ताख्यमुक्तिसाधनकर्मभिः ॥ 957 ॥

देवैर्महीयते विष्णोः परमं तत्पदं सदा ।

तत्रामृतं मां कृधीन्दो पवमानेष्टदायक ॥ 958 ॥

इन्द्राय पमैश्वर्यसम्पन्नाय परिस्रव ।

परितः स्रावयेन्द्रं तमुद्दिश्य प्रापयाशु माम् ॥ 959 ॥

णिचोन्तर्नीतता तस्य सहप्राप्ति विवक्षया ।

इत्यर्थानां मुमुक्षूणां कर्णेद्यापि जपन्ति याम् ॥ 960 ॥

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।

कामस्य यत्राप्ताः कामास्तत्र मामृतं कृधि ॥ 961 ॥

इति श्रुतेः शिरःपाणिद्वयमध्याङ्घ्रिरूपिणः ।
प्रियमोदप्रमोदानन्दमुदाख्याः सदासते ॥ 962 ॥

कामाप्तिव्यक्ततत्सौख्यं यतस्तेषां मनःप्रियम् ॥ 963 ॥

आनन्दमयरूपस्य हरेः सारूप्यमीयुषः।
मुक्तांश्च तादृशाकारान् सर्वान् शंसति सा श्रुतिः ॥ 964 ॥

रत्येकं बहुतां यस्मादानन्दादेश्च सा जगौ ।
एवं च तत्सरूपाणां मुक्तानामाकृतेर्बलात् ॥ 965 ॥

आनन्दमयपादस्य ब्रह्मपुच्छमिति श्रुतिः ।
पूर्णमुद्रूपतामेव प्राह पूर्वसमाख्यया ॥ 966 ॥

प्रियादिपूर्णतां तत्तच्छ्रुतिरेतत्समाख्यया ।
शंसतीत्येव सिद्धोर्थो नोचेत् व्यर्थात्र तत्कथा ॥ 967 ॥

यत्स्वाकृत्या मुकुन्दस्य मुक्ता निर्णन् पराकृतिम् ।
तत्तीर्णसरितोप्येते तारकं न विसस्मरुः ॥ 968 ॥

यत्र ब्रह्मा च मूकोस्ति यत्र ब्रध्नस्य विष्टपं ।
मुक्तसूर्यस्य सदनं यत्र वैवस्वतो यमः ॥969 ॥

मुक्तःसन् रञ्जनात्तेषां राजा न तु भयङ्करः ।

दिवोवरोधनं यत्र स्वर्गान्तःपुरयोषितः ॥ 970 ॥

मुक्ताः सत्यः स्वर्गिभिस्तैर्मुक्तैः सह किलासते ।

मुक्तब्रह्मादिदेवानामास्थानी किल सा पुरी ॥ 971 ॥

नित्यं यत्र किल ज्योतिः किं वाच्या तस्य नित्यता ।

निर्दुःखत्रिपुरी रूपा सापि नाकाभिधा किल ॥ 972 ॥

इतोन्यायादिमुक्तिः स्यात्सैव प्रार्थ्या मुमुक्षुभिः ।

प्रत्यृचं प्रार्थ्यमानेयं महामुक्तिर्न संशयः ॥ 973 ॥

एवं च पवमानस्य गुरुत्वे मुक्तिमीयुषाम् ।

बहुत्वे विष्णुसेवित्वे तल्लोकस्य क्षयोज्झितौ ॥ 974 ॥

तत्प्राप्तेर्मुख्यमोक्षत्वे तत्र जात्यपरिक्षये ।

भेदस्य परमार्थत्वे तद्वानां मृतिवर्जने ॥ 975 ॥

विष्णोः परमदैवत्वे तदन्यब्रह्मवर्जने ।

निःशङ्को भव दुर्मार्गं त्यज भक्त्या भज प्रभुम् ।

यद्वाङ्ग्मिरवकाशेयं तद्योग्यखिलमीप्सितम् ॥ 976 ॥

अतः शुभगुणाम्भोधिः शुद्ध सर्वविलक्षणः ।
सत्यविश्वाश्रयो मुक्तामुक्तेशो जयति प्रभुः ॥ 977 ॥

वित्तैरिक्तोपि जात्युच्चो नात्यल्पमुपसर्पति ।
सुक्षीणक्ष्यैशरक्षा स्यादर्कोदर्कश्रियैव हि ॥ 978 ॥

तत्संपत्तौ विपत्तौ च गतिः श्रीपतिरेव नः ।
यो ब्रह्मरुद्रवीन्द्रेन्द्रचन्द्रादीनामधीश्वरः ॥ 979 ॥

नान्यं भजामि न स्तौमि नानुयामि कदाचन ।
हरिं च हरिपत्निं च सुरादींश्च गुरून्विना ॥ 980 ॥

भक्तिः स्यात् त्वयि गोविन्द तृप्तिः स्यात्त्वन्निषेवया ।
त्वत्तोन्यत्र विरक्तिः स्यान्मुक्तिश्च स्यान्मुकुन्द मे ॥ 981 ॥

**अस्मिन् भवे भवेऽअन्यस्मिन् भवान्ते च भवाम ते ।**
**दासानुदासाः श्रीनाथ त्राता त्वं नः सदा भव ॥982 ॥**

पद्माख्यसूत्रबद्धेयं हृद्या स्याद्युक्तिमल्लिका ।
पद्मनाभस्य मध्वस्य विद्यायाश्च मनःप्रिया ॥ 983 ॥

हयग्रीवपदाम्भोजमधुमत्तमधुव्रतैः ।
सदा सेव्या वादिराजरचिता युक्तिमल्लिका ॥ 984 ॥

यो युक्तिमल्लि ते पुल्लपल्लवोल्लासवल्लभः ।

अङ्घ्राहिमङ्घ्रं रम्यं च तं प्राङ्घ्रं त्वं च सौरभैः ॥ 985 ॥

यद्वाङ्मूलासि मध्वोसौ विस्तारयतु ते गुणान् ।

दशप्रमतयो यस्य दश चाकृतयः प्रभोः ।

वल्लीधुरन्धरो योसौ पुष्पवाटीधुरन्धरः ॥ 986 ॥

बीजावापः प्ररोहश्च पल्लवः प्रसवानि च ।

यत्प्रबन्धः प्रचारश्च विद्वन्मध्वस्य शक्तितः ॥ 987 ॥

क्रयोत्थवित्तसम्पत्त्या तत्पूर्णो गुरुरेव नः ।

तद्धत्तवित्तभुग्योहं तत्परीचारमाचरन् ॥ 988 ॥

गृहेषु गृहकृत्यानि कुर्वन् पथि पदानुगः ।

तेन राजान्तिकं नीतः सोहं सेवाधुरन्धरः ॥ 989 ॥

स्ववनं स्वगृहं स्वाध्वस्वराजनगरीषु च ।

स एव मम योगीन्द्रो योगक्षेमधुरन्धरः ॥ 990 ॥

श्रुतिस्मृतिनिषङ्गोत्तमन्त्रास्त्रैर्यः समन्ततः ।

हिमालयस्य मलयस्य च मध्येऽजयत् खलान् ॥ 991 ॥

सोऽन्तः प्रविश्य दुःशास्त्रपुर्याः सर्वस्वशोधनम्।

महाराजो मम गुरुस्तुच्छं कार्यमुपैक्षत ॥ 992 ॥

विद्यादारिद्र्यदोषेण दुःखी तत्सैन्यभिक्षुकः ।

अहमर्थातुरस्तां तु प्राविशं तद्भटैः सह ॥ 993॥

दुस्तर्कतस्करान् जघ्नुस्तत्र तत्र त एव हि ।

ससम्भ्रमोच्चस्वरकृत्सोहं मेलनकृत्परम् ॥ 994 ॥

पतीनां मरणात्सर्वा दुर्वाङ्नारी गृहे गृहे ।

स्वार्थैः सहान्योन्यघातैर्हता वीक्ष्याफलां पुरीम् ॥ 995 ॥

उपेक्ष्यार्थांश्च तांस्त्यक्त्वा निर्गतोहं ततो बहिः ।

कथमेतामकथयं सर्वां गुर्वग्रतो मम ।

कृती स सुकृतीनां तु कथां कृतिमकारयत् ॥ 996 ॥

स्वकोशस्थसदर्थाख्यवित्तैर्दत्तैः स एव तत् ।

विद्रावयेद्धि दारिद्र्यं दद्यान्मध्वो गतिं च मे ॥ 997 ॥

न शास्त्राभिज्ञा न च नियमयुक्ता न यमिनो ।

न मन्त्रानुष्ठानव्रतचरणचित्ता अपि वयम् ।

न तद्यत्नोपेतास्तदपि चतुरा एव नितराम् ।

वदामो यद्दिष्ट्या हयवदन तुभ्यं नम इति ॥ 998 ॥

आचार्याः पवनोस्माकं आचार्याणी च भारती ।
देवो नारायणः श्रीशो देवी मङ्गलदेवता ॥ 999 ॥

वादिराजाख्ययतिना साधिता युक्तिमल्लिका ।
मुक्तिसौरभसर्वस्वमित्थं सत्सु न्यवेदयत् ॥ 1000 ॥

**इति श्रीमत्परमहंसपरिव्याजकाचार्य श्रीमद्वादिराजतीर्थ श्रीपादविरचितायां श्रीमद्युक्तिमल्लिकायां फलसौरभसर्वस्वं सम्पूर्णम्**

**गुरुमखिलगुणज्ञं सद्गुणैकाधिवासं**
**शमदम परिनिष्ठं सत्यनिष्ठं वरिष्टम् ।**
**सकलसुजन शिष्ठं नित्यनिर्धूतकष्टं**
**हयमुखपदनिष्ठं मां भजन्तु प्रपन्नाः ॥**

**।। श्रीलक्ष्मी हयग्रीवार्पणमस्तु ॥**